सारस्वती सुषमा

श्रीशङ्कराचार्यद्वादशजन्मशताब्दीविशेषाङ्कः



सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

श्रीशङ्कराचार्यद्वादशजन्मशताब्दीविशेषाङ्कः

सम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

अनुसन्धानसंस्थाननिदेशकः

उप-सम्पादकः

डॉ० हरिश्चन्द्रमणित्रिपाठी

प्रकाशनाधिकारी

४१ वर्षे

१-४ अङ्काः

वार्षिकं मूल्यम्—३० रूप्यकाणि

जून-सितम्बर-दिसम्बर-मार्च, १९८६-८७

प्रकाशकः—

डॉ० हरिश्चन्द्रमणित्रिपाठी,
प्रकाशनाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

मुद्रकः—

रत्ना प्रिंटिंग वर्क्स,
कमच्छा, वाराणसी

प्राप्तिस्थानम्—

'विक्रय-विभागः', सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी—२२१ ००२.

प्ररोचना

श्रीमदाद्यशङ्कराचार्यपादानधिकृत्य तेषां द्वादशजन्मशताब्द्यवसरे **'सारस्वती सुषमायाः'** एष विशेषाङ्को ग्रथितः। सोऽधुना प्रकाशमानीयते। अत्र त्रिंशन्निबन्धाः। एषां निबन्धानां प्रणेतारः स्वेषु स्वेषु विषयेषु निष्णाता विपश्चितः। तैर्यद्यद्वस्तु समुन्मीलितम्, तत्सर्वं नवनवोन्मेषशालि। मन्ये, चास्याङ्कस्य ग्रथने पूर्वाधिकारिणां **श्रीवेङ्कटाचलमहोदयानां** महानुद्योगः प्रेरक आसीत्। तेषां कृते भूरिशो धन्यवादा मया उदीर्यन्ते। तत्र चतुर्णां कुलपतिचराणाम्—**श्रीवेङ्कटाचल-श्रीकरुणापतित्रिपाठि-श्रीगौरीनाथशास्त्रि-श्रीकुबेरनाथशुक्लमहोदयानाम्**, दिवङ्गतानां विपश्चिन्मौलिमणिभूतानां **श्रीरघुनाथशर्मणाम्**, पण्डितवर्याणां 'पद्मभूषण' **श्रीपट्टाभिरामशास्त्रि-श्रीसुब्रह्मण्यशास्त्रि-श्रीरामवदनशुक्ल-श्रीरामप्रसादत्रिपाठि**—इत्येतेषां सर्वेषां मूर्धन्यविदुषां लेखा अमुमङ्कं मण्डयन्तीति महतः प्रमोदस्य विषयः। नव्यानां डॉ०श्रीधरभास्करवर्णेकर-स्वामिश्रीकाशिकानन्दमहामण्डलेश्वर-श्रीवलजिन्नाथपण्डित-श्रीशङ्करनारायण-पूर्वपुराणाचार्यश्रीपारसनाथद्विवेदि-डॉ०गणेशीलालसुथार-श्रीमुरलीधरपाण्डेय-वेदान्तोपाचार्यश्रीपारसनाथद्विवेदि-श्रीएन्० आर्० कृष्णताताचार्य-पण्डितश्रीवशिष्ठमुनिमिश्र-आचार्यश्रीकेदारनाथत्रिपाठि-डॉ०एन्०आर्० श्रीनिवासन्-डॉ०आदित्यनाथभट्टाचार्य-श्रीसुधाकरदीक्षित-डॉ० चन्द्रशेखरशर्महिरेमठ-डॉ० भागीरथप्रसादत्रिपाठि-श्रीशिवजी-उपाध्याय-डॉ०नरेन्द्रनाथपाण्डेय-श्रीशिवदत्तशर्मचतुर्वेद-डॉ० रामशङ्करभट्टाचार्य-डॉ० सि० मार्कण्डेयशास्त्रि—इत्येतेषां विद्वत्तल्लजानामपि लेखा अस्याङ्कस्य शोभां विदधतीति श्रीमदाद्यशङ्कराचार्याणां विषये श्रद्धायाः सातत्यं सूचयति।

श्रीमदाद्यशङ्कराचार्या वैचारिकस्य भारतस्य निर्मातारस्त्वासन्नेव, ते राजनीतिमतिक्रम्य भारतस्य विचारदृष्ट्या, भावदृष्ट्या च साकल्यमपि सुनिश्चित्य ऐक्यघटयितारोऽप्यासन्। तेषां वयं समेऽधमर्णाः। अत्रैतद्विज्ञापनीयं भवति यत् त एकतोऽद्वैतवेदान्तप्रतिष्ठापकास्तर्कशिरोमणयः, अपरतश्च **सौन्दर्यलहरी**प्रणयनेनोपासनाया नितरां सूक्ष्मातिसूक्ष्मायाः पद्धतेः प्रतिष्ठातारोऽप्यासन्। अयं द्वितीय एव पक्षस्तेषामविश्रान्तविजययात्रायाः शक्तिस्रोत आसीत्। तं पक्षमधिकृत्याग्रे विचारः प्रचलिष्यतीति आशासानः अमुमङ्कं विदुषामास्वादाय परिवेषयामि।

अस्याङ्कस्य मुखपृष्ठयोः कलासज्जायै, अन्तर्वर्तिपृष्ठयोः कलासज्जायै च क्रमशो **डॉ० ए० पी० गज्जरमहोदयान्**, 'अमेरिकन् इन्स्टीच्यूट आफ इण्डियन स्टडीज्, रामनगर, वाराणसी' इति संस्थायाः सञ्चालकान् **श्रीनम्बियारमहोदयान्** प्रति च भूयो भूयो धन्यवादान् वितरामि। विशेषाङ्कस्यास्य शोभाधायकमुद्रणादिकार्यसम्पादयितॄन् 'रत्ना प्रिंटिंग वर्क्स' इति मुद्रणालयस्य सञ्चालकान् **श्रीविनयशंकरपण्ड्यामहोदयान्** प्रति धन्यवादा वितीर्यन्त इति।

वाराणस्याम्,
गुरुपूर्णिमायाम्,
वि० सं० २०४८

विद्यानिवासमिश्रः
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

विषयानुक्रमणी

–: ० :–

सारस्वती सुषमा
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

४१ वर्षे ‖ ज्येष्ठ-भाद्र-मार्गशीर्ष-फाल्गुन-पूर्णिमाः, वि० सं० २०४३ ‖ १-४ अङ्काः

'उपदेशसाहस्री'-नामविषये कश्चिन्नूतनो विमर्शः

आचार्य श्रीवि० वेङ्कटाचलम्
कुलपतिः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणस्याम्

❀ ❀ ❀

अथ श्रीशङ्करभगवत्पादप्रणीतेषु प्रकरणग्रन्थेषु मूर्धन्यतया सर्वाभिमतस्य **'उपदेशसाहस्री'**-ग्रन्थस्य नामविषये किञ्चिद्विमृश्यते ।

सत्सु बहुषु वेदान्तप्रकरणेषु शाङ्करेषु शाङ्करत्वेन वा ख्यातेषु, यद् विशेषतो बहु मन्यन्ते प्रकरणमिदमाधुनिका ऐतिहासिकदृष्टिप्रिया बहिरङ्गपरीक्षणप्रसिताः समालोचकाः, तत्र हेतुरयमेव यत्प्रकरणस्यास्य श्रीशङ्कराचार्यप्रणीतत्वं निःसन्दिग्ध-प्रमाणसिद्धम्, अत एव विवादगन्धेनाप्यनागन्धितमिति । यदा हि भगवत्पादशिष्यः सुरेश्वराचार्यः स्वयमुद्धरति प्रकरणस्यास्य पद्यानि कतिपयानि, ब्रूते च कण्ठोक्तैः शब्दैः पद्यान्यमूनि भगवत्पादीयानीति, तदास्य ग्रन्थस्य भगवत्पादीयत्वे कथन्नाम विवदितु-मुत्सहतां विवादशीलोऽपि सर्वत्रानाश्वस्तः संशयात्मापि कश्चित् ? तथा हि—**नैष्कर्म्य-सिद्धेश्चतुर्थाध्यायेन** ग्रन्थमुपसंजिहीर्षुराचार्यसुरेश्वरः प्रथममस्याध्यायस्य प्रयोजनं व्याचिख्यासुः, त्रिषु पूर्वाध्यायेषु प्रतिपादितस्य विषयजातस्य सुखबोधाय संक्षिप्य संग्रहण-मेवास्याध्यायस्य प्रयोजनमित्याह स्म—

पूर्वाध्यायेषु यद्वस्तु विस्तरेणोदितं स्फुटम् ।
संक्षेपतोऽधुना वक्ष्ये तदेव सुखवित्तये' ॥ इति ।

इत्थं प्रतिज्ञातं संक्षेपमुक्त्वा, अध्यायान्ते स्वोपक्षिप्तस्य सर्वस्य प्रमेयपूगस्य सत्सम्प्रदायानुगतवेदान्तसिद्धान्तानुरूपत्वं स्थिरीकर्तुं, स्वस्मिन् कर्ममीमांसावासनानु-वृत्तिमारोपयतां स्वयूथ्यानां केषाञ्चिदाक्षेपं परिहर्तुं चैव पुनः ससंरम्भं प्रतिजानीते ग्रन्थकृत् सुरेश्वरो यत् स्वप्रतिपादितं नैष्कर्म्यसाधकं सर्वमपि श्रुतितर्कमुखं प्रमाण-प्रमेयजातं स्वगुरुपरम्परानुगतात् सिद्धान्तपथात् तुषादपि न भिद्यत इति । तदिदं द्रढयितुं स्वगुरूणां शङ्करभगवत्पादानां, परमगुरूणां गौडपादानां च ग्रन्थवाक्यानि

प्रमाणत्वेनोद्धरत्याचार्यसुरेश्वरः। अस्मिन् प्रसङ्गे उपदेशसाहस्रीग्रन्थस्य पद्यभागतः सप्तदश सन्दर्भाः, माण्डूक्यकारिकातो द्वौ सन्दर्भौ च यथाक्षरमुद्धृताः। तस्मिंश्च प्रमाणोदाहरणप्रसङ्गोपक्रमे—

"भगवत्पूज्यपादैश्च उदाहार्येवमेव तु"[२]।

इति स्वगुरून् शङ्कराचार्यान् भगवत्पूज्यपादशब्देन कण्ठत उल्लिख्य, पुनः प्रसङ्गान्तेऽपि **"तथा भगवत्पादीयमुदाहरणम्"**[३] इति वृत्तिस्थयावतरणिकया सह शाङ्करं पद्यमेकमुद्धृत्य च स्पष्टमेवाचार्यंगौडपादान् गौडशब्देन, शङ्करभगवत्पादान् द्राविडशब्देन चेत्थं सादरमनुसन्धत्ते—

"एवं गौडैर्द्राविडैर्नः पूज्यैरर्थः प्रभाषितः"[४] इति।

अत्रोपक्रमोपसंहारपरिशीलनेन प्रतिभाति यदनयोरनुपदमुद्धृतयोरारम्भसमाप्तिवाक्ययोर्मध्यगतानि सर्वाण्यपि पद्यानि गौडपादशङ्करभगवत्पादयोरन्यतरप्रणीतग्रन्थगतान्येव भवितुमर्हन्तीति। पाठकानां बोधसुकरत्वायायं समग्रोऽपि सन्दर्भोऽत्र यथाग्रन्थमुद्ध्रियतेऽविकलमेव[५]।

एष संक्षेपतः पूर्वाध्यायत्रयस्यार्थ उक्तः। सोऽयं न्याय्योऽपि वेदान्तार्थः शास्त्राचार्यप्रसादलभ्योऽपि अनपेक्षसिद्धस्वभावत्वात् कैश्चिच्छ्रद्दधानैर्न प्रतीयते। तेषां सङ्ग्रहार्थमभिमतप्रामाण्योदाहरणम्—

भगवत्पूज्यपादैश्च उदाहार्येवमेव तु।
सुविस्पष्टोऽस्मदुक्तोऽर्थः सर्वभूतहितैषिभिः॥

किं परमात्मन उपदेशः, उतापरमात्मन इति। किं चातः? यदि परमात्मनस्तस्योपदेशमन्तरेणैव मुक्तत्वान्निरर्थक उपदेशः। अथापरमात्मनस्तस्यापि स्वत एव संसारस्वभावत्वान्निष्फल उपदेशः। एवमुभयत्रापि दोषवत्वादत आह—

"अविविच्योभयं वक्ति श्रुतिश्चेत् स्याद्ग्रहस्तथा"[६]।
इति पक्षमुपादाय पूर्वपक्षं निशात्य च॥

तच्चेदमविवेकात् स्वतो विविक्तात्मने तत्त्वमसीत्युपदिष्टम्।
"युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः"[७]।
यतोऽनभिज्ञे वाक्यं स्याद् बधिरेष्विव गायनम्॥

तस्य च युष्मदस्मद्विभागविज्ञानस्य का युक्तिरुपायभावं प्रतिपद्यते? शृणु—
'अन्वयव्यतिरेकौ हि पदार्थस्य पदस्य च।
स्यादेतदहमित्यत्र युक्तिरेवावधारणे'[८]॥

कथं तौ युक्तिरिति ? अत्राह—

'नाद्राक्षमहमित्यस्मिन् सुषुप्तेऽन्यन्मनागपि ।
न वारयति दृष्टिं स्वां प्रत्ययं तु निषेधति'[९] ॥
'एवं विज्ञातवाच्येऽर्थे श्रुतिलोकप्रसिद्धितः ।
श्रुतिस्तत्त्वमसीत्याह श्रोतुर्मोहापनुत्तये'[१०] ॥

तत्र त्वमिति पदं यत्र लक्षणया वर्तते, सोऽर्थ उच्यते—

'अहंशब्दस्य या निष्ठा ज्योतिषि प्रत्यगात्मनि ।
सैवोक्ता सदसीत्येवं फलं तत्र विमुक्तता''[११] ॥

अन्यच्चान्वयव्यतिरेकोदाहरणम् । यथा—

'छित्त्वा त्यक्तेन हस्तेन स्वयं नात्मा विशेष्यते ।
तथा शिष्टेन सर्वेण येन येन विशेष्यते'[१२] ॥
'विशेषणमिदं सर्वं साध्वलङ्करणं यथा ।
अविद्याध्यस्तमतः सर्वं ज्ञात आत्मन्यसद्भवेत्'[१३] ॥
'तस्मात् त्यक्तेन हस्तेन तुल्यं सर्वं विशेषणम् ।
अनात्मत्वेन तस्माज्ज्ञो मुक्तः सर्वविशेषणैः'[१४] ॥
'ज्ञातैवात्मा सदा ग्राह्यो ज्ञेयमुत्सृज्य केवलः ।
अहमित्यपि यद्ग्राह्यं व्यपेताङ्गसमं हि तत्'[१५] ॥
'दृश्यत्वादहमित्येष नात्मधर्मो घटादिवत् ।
तथान्ये प्रत्यया ज्ञेया दोषाश्चात्माऽमलो ह्यतः'[१६] ॥

सर्वन्यायोपसङ्ग्रहः—

'नित्यमुक्तत्वविज्ञानं वाक्याद् भवति नान्यतः ।
वाक्यार्थस्यापि विज्ञानं पदार्थस्मृतिपूर्वकम् ॥
अन्वयव्यतिरेकाभ्यां पदार्थः स्मर्यते ध्रुवम् ।
एवं निर्दुःखमात्मानमक्रियं प्रतिपद्यते ॥
सदेवेत्यादिवाक्येभ्यः प्रमा स्फुटतरा भवेत् ।
दशमस्त्वमसीत्यस्माद्यथैवं प्रत्यगात्मनि[१७] ॥'

वीक्षापन्नस्योदाहरणम्—

'नवबुद्ध्यपहाराद्धि स्वात्मानं दशपूरणम् ।
अपश्यन् ज्ञातुमेवेच्छेत् स्वमात्मानं जनस्तथा ॥

अविद्याबद्धचक्षुष्ट्वात् कामापहृतधीः सदा ।
विविक्तं दृशिमात्मानं नेक्षते दशमं यथा[१८] ॥'

सोऽयमविद्यापटलावगुण्ठितदृष्टिः सन् कथमुत्थाप्यत इत्याह—

यथा स्वापनिमित्तेन स्वप्नदृक् प्रतिबोधितः ।
करणं कर्म कर्तारं स्वाप्नं नैवेक्षते स्वतः ॥
अनात्मज्ञस्तथैवायं सम्यक् श्रुत्यावबोधितः ।
गुरुं शास्त्रं तथा मूढं स्वात्मनोऽन्यं न पश्यति ॥

स किं सकलसंसारप्रविविक्तमात्मानं वाक्यात् प्रतिपद्यते, उत नेति ? अत्र ब्रूमः। कूटस्थावगतिशेषमात्रत्वात् प्रतिपत्तेरत आह—

दण्डावसाननिष्ठः स्याद्दण्डसर्पो यथा तथा ।
नित्यावगतिनिष्ठं स्याद् वाक्याज्जगदसंशयम् ॥

कुत एतत् ? यस्मात्—

पश्यन्निति यदाहोच्चैः प्रत्यक्त्वमजमद्वयम् ॥
अपूर्वानपरानन्तं त्वमा तदुपलक्ष्यते ॥
तत्त्वमस्यादिवाक्योत्थविज्ञानेनैव बाध्यते ।

यस्मात्—

अस्माद्यदपरं रूपं नास्तीत्येव निरूप्यते ।
अन्यथाग्रहणाभावाद् बीजं तत् स्वप्नबोधयोः ॥

अस्यार्थस्य द्रढिम्न उदाहरणम्—

'कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ।
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिध्यतः[१९] ॥'
'अन्यथा गृह्णतः स्वप्नो निद्रातत्त्वमजानतः ।
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते[२०] ॥'

तथा भगवत्पादीयमुदाहरणम्—

'सुषुप्ताख्यं तमोऽज्ञानं बीजं स्वप्नप्रबोधयोः ।
आत्मबोधप्रदग्धं स्याद् बीजं दग्धं यथाऽभवम्[२१] ॥'
'एवं गौडैर्द्राविडैर्नः पूज्यैरर्थः प्रभाषितः ।
अज्ञानमात्रोपाधिः सन्नहमादिदृगीश्वरः ॥'

अस्मिन् प्रसङ्गे सुरेश्वराचार्यैर्भगवत्पादीयः 'उपदेशसाहस्री'-ग्रन्थः परामृष्ट इति, ततो भूयांसि पद्यानि समुद्धृतानीति च पूर्वैष्टीकाकारैः सम्यक् प्रत्यभिज्ञातमेव। तदिदं हिरियण्णासम्पादितनैष्कर्म्यसिद्धिपुस्तकस्थायां ज्ञानोत्तमाचार्यप्रणीतायां **चन्द्रिका**-टीकायाम्[२२]—"इदानीमुपदेशसाहस्र्यां भगवत्पादाचार्यैः पूर्वपक्षत्वेनोक्तमर्थमुदाहरति" इत्यारभ्य पदे पदे[२३]कृतैराचार्योल्लेखैर्भूयोभिर्निगदव्याख्यातमेव। सम्पादकैश्च हिरियण्णा-महोदयैरत्रत्यानि आचार्यवाक्यानि उपदेशसाहस्रीगतसन्दर्भोल्लेखपुरःसरं संकलितानि द्वितीये परिशिष्ट इति तत एव तानि सुखावसेयानि[२४]। तथापि परिशिष्टस्यास्य विषये किञ्चिदिदमवधेयं भवति। नैष्कर्म्यसिद्धिप्रसङ्गेऽस्मिन् सुरेश्वराचार्योद्धृतः—

"युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः।"

इति श्लोकार्धरूप एकः सन्दर्भ उपदेशसाहस्रीस्थितोऽपि तैः स्वपरिशिष्टे नान्तर्भावितः, यतो हि तैः सन्दर्भोऽयं भगवत्पादवाक्यत्वेन न प्रत्यभिज्ञात इति स्पष्टप्रायम्। अप्रत्य-भिज्ञाने हेतुरपि सुकर एव सम्भावयितुम्। तथा हि—एनमेकं सन्दर्भं वर्जयित्वा सुरेश्व-राचार्यैरुपदेशसाहस्रीतः समुद्धृताः सर्वेऽन्ये संदर्भाः पूर्णश्लोकरूपा एव। अत एवैषां सर्वेषां प्रतीकानि उपदेशसाहस्रीश्लोकसूच्यां सुलभानि। अयं तु सन्दर्भः श्लोकस्योत्त-रार्धरूपः। अत एव नास्य क्वचित् श्लोकसूच्यामुपलम्भकथापि। अत एव उपदेश-साहस्र्याः, बृहदारण्यकवार्तिकस्य च पद्यसूचीमवलम्ब्य सुरेश्वरोद्धृतानामेतत्प्र-घट्टकस्थितानाम् आचार्यवचनसन्दर्भाणामाकरान्वेषणे प्रवृत्तैः हिरियण्णामहोदयैरिदं वाक्यम् उपदेशसाहस्रीयत्वेन न प्रत्यभिज्ञातुमपारि। उपदेशसाहस्र्याः समग्राया एतद्-दृष्ट्या परीक्षणेनैवास्माभिरयमधिकः सन्दर्भ तत्त्वेन प्रत्यभ्यज्ञायि।

इदमन्यदप्युत्पश्यामो वयम्। नैष्कर्म्यसिद्धेरनुपदमुद्धृते प्रघट्टके—

"भगवत्पूज्यपादैश्च उदाहार्यैवमेव तु"। इति।
"इत्थं गौडैर्द्राविडैर्नः पूज्यैरर्थः प्रभाषितः"।

इति च पद्ययोरन्तराले यावन्ति सन्ति पद्यानि, तैः सर्वैरपि ("कार्यकारणबद्धौ तौ....." इत्यादिकमेकं गौडपादीयसन्दर्भं विहाय) भगवत्पादीयवचनैर्भाव्यमेव। अन्यथा आदौ "भगवत्पूज्यपादैः" इति, अन्ते "इत्थं गौडैर्द्राविडैः" इति चोपक्रमोपसंहारस्थिता सुरेश्वराचार्याणां प्रतिज्ञैव व्याहन्येत। एवं स्थितेऽपि सन्त्येवाधुनात्र कतिपयश्लोकाः, ये उपदेशसाहस्र्यां वा वार्तिके वा नान्विष्टाः। दृढान्वेषणे नैते जातुचिद्वार्तिके वा ग्रन्थान्तरे वा उपलभ्येरन्नपि। अन्यथा अगतिकगत्या इमे भगवत्पादीये कस्मिश्चित् सम्प्रति लुप्ते ग्रन्थे स्थिताः स्युरिति सन्तोष्टव्यम्।

यद्यपीत्थं सुरेश्वराचार्यैर्भूयसा उद्धृतत्वेन उपदेशसाहस्र्या भगवत्पादप्रणीतत्वं निष्कण्टकतया सिध्यत्येव, तथापि तैः क्वचिदपि ग्रन्थनाम नोदलेखीति तन्नामयाथार्थ्य-निर्णये न मनागप्युपकुर्वन्तीमान्युदाहरणानि सुरेश्वराचार्यकृतानि। अत एव ग्रन्थनाम-निर्णयार्थं प्रमाणान्तरमेव मार्गणीयं भवेदित्यतिरोहितम्।

साम्प्रतं तावद् ग्रन्थस्यास्य नाम 'उपदेशसाहस्री' इति 'उपदेशसहस्री' इति च द्वेधा दृश्यते मुद्रितपुस्तकेषु। शृङ्गेरिप्रतिष्ठं दक्षिणाम्नायपीठं महता वैभवेन तपोबलेन चाधिष्ठितवतां वर्तमानपीठाधिपपरमेष्ठिगुरूणां **श्रीसच्चिदानन्दशिवाभिनवनृसिंह-भारतीस्वामिपादानामाज्ञानुग्रहेण** विंशतिसम्पुटैः श्रीवाणीविलासमुद्रणालये १९०९ तमे खैस्ताब्दे मुद्राप्य प्रकाशितायां **शाङ्करग्रन्थावली** तु सर्वत्र 'उपदेशसहस्री' इत्येव व्यवह्रियते ग्रन्थोऽयम्[२५]। रामतीर्थप्रणीतया पदयोजनिकाव्याख्यया सह १९३० खैस्ताब्दे निर्णयसागरमुद्रणालयप्रकाशिते ग्रन्थे तु 'उपदेशसाहस्री' इति नाम दृश्यते। तत्रत्य-टीकाया आरम्भवाक्ये[२६], गद्यप्रबन्धपद्यप्रबन्धयोः पुष्पिकाद्वये[२७] च 'उपदेशसाहस्री' इत्येव निर्देशः समुपलभ्यते। अत एव तत्रत्येषूपसंहारपद्येष्वन्यतमस्मिन्—

"**उपदेशसहस्रीयं विवृता हि महात्मभिः**"[२८]।

इति यद् भिन्नं रूपं दृश्यते, तच्छन्दोऽनुरोधात् कृतं स्यादिति सम्भाव्यते।

शास्त्रपारङ्गतैः पण्डितराज-शास्त्ररत्नाकर-श्रीसुब्रह्मण्यशास्त्रिभिः सम्पादिते १९७८ तमे खैस्ताब्दे प्रकाशित आनन्दगिरिकृतटीकायुते ग्रन्थेऽपि प्रायशः सर्वत्र 'सहस्री' इति, 'उपदेशसहस्री' इति वा निर्देशो दृश्यते। यथा टीकारम्भे शीर्षके 'सहस्रीविवृतिः'[२९] इति, पश्चान्मङ्गलश्लोकेऽपि "मया सहस्रविवृतिर्विधीयते"[३०] इति, पद्यभागपुष्पिकायां 'श्रीसहस्रीपद्यभागटीका'[३१] इति, ग्रन्थोपसंहारपद्ये "उपदेशसहस्रीयं गद्यपद्यमयी मया। व्याकृता ..."[३२] इति, समाप्तिपुष्पिकायां 'श्रीसहस्रीटीका'[३३] इति च सन्ति भूयिष्ठा ह्रस्व-निर्देशाः, येभ्यो दृढं ज्ञायत एतट्टीकामूलमातृकासु 'उपदेशसहस्री' इत्येव रूपं प्रयुज्यत इति, अतश्च आनन्दगिरीणामिदमेवाभिमतमिति। अत एवास्मिन् पुस्तके गद्यभागटीकाप्रथम-वाक्ये केवले[३४] 'उपदेशसाहस्री' इति दीर्घाकारयुक्तं रूपं मुद्रितम्, तल्लिपिकारप्रमादाद्वा, सम्पादकप्रमादाद्वा सम्पातायातं भवेदिति प्रतिभाति। मूलमातृकाविलोकनेनैव याथार्थ्यं निश्चेतुं शक्येत। अत एवास्य मुद्रितपुस्तकस्य मुखपृष्ठादौ नाममुद्रणे उपोद्घाते च सम्पादकैः शास्त्रिपादैः 'उपदेशसाहस्री' इति रूपं सर्वत्र एकान्तेन प्रायोजि, तदेतत् कथमपि नानन्दगिर्याचार्यसम्प्रदायानुरोधिनी; किन्तु साम्प्रतिकभूयोव्यवहारप्रवाहगतानुगति-

कतामात्रमिति स्पष्टमेव। वस्तुतस्तु 'उपदेशसहस्री' इति ह्रस्वसकारपाठ एव आनन्दगिरिसम्मत इति निश्चप्रचम्। जर्मनीदेशे १९४९ वर्षे 'बान्' नगरमुद्रिते हाकर्महोदयसम्पादिते ग्रन्थे, जापानदेशे 'टोक्यो' नगरतः प्रकाशितेऽस्य ग्रन्थस्य आङ्ग्लानुवादपुस्तके च ग्रन्थनामविषये कीदृशी वस्तुस्थितिरिति न ज्ञायते श्रृङ्गग्राहकतया। कालटीतः १९८४ तमे वर्षे श्रीशङ्करशर्म-श्रीकृष्णशर्मभ्यामनूदिते मलयालमसंस्करणे तु दीर्घ'सा'कारपाठ एवाश्रित इत्यलमनेन दूरदूरानुधावनेन।

यथा तथा वा भवतु ग्रन्थनामस्थितिरेषा पश्चात्तनी। ग्रन्थस्य भगवत्पादकृतं मूलनाम तूभयथापि नासीदिति निश्चेतुमस्त्यवकाशः। तथा हि—भगवत्पादीयो ग्रन्थोऽयम् आचार्यभास्करेण स्वगीताभाष्य[३५]उद्धृतः। तत्र 'उपदेशसहस्री' इति वा 'उपदेशसाहस्री' इति वा ग्रन्थनाम नोल्लिख्यते भास्करेण; किन्तु केवलम् 'उपदेशग्रन्थ' इत्येव। भास्करेण तत्र भगवत्पादीय एव कश्चिद् ग्रन्थो निर्दिदिक्षित इति तत्प्रकरणपर्यालोचनया स्पष्टमेव। "न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते"[३६]इति गीताश्लोकं स्वमतेन प्रथमं व्याख्याय पश्चात् शाङ्करं नैष्कर्म्यशब्दव्याख्यानं प्रत्याचष्टे भास्करः। भगवत्पादीयमतखण्डने च तदीयेनैव सिद्धान्तेन विरोधमापादयन्नित्थं लिखति भास्करः—"अथ नैष्कर्म्यशब्देन ज्ञाननिष्ठतोच्यते कर्माकृत्वा ज्ञानोत्पत्त्यसम्भवादिति, तथाप्यविदुषां सर्वकर्मत्यागोपदेशो भवतो विरुद्ध्येत"[३७]। तथा चोक्तम् 'उपदेशग्रन्थे'—

"त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम्"[३८]। इति।

अयमत्र भास्कराशयः—अनुपदमुद्धृते वाक्ये 'विवेकाय' इत्यत्र तादर्थ्ये चतुर्थी प्रयुक्ता। तेनेदं सम्पद्यते यत् त्वंपदार्थस्य साधनरूपेण सर्वकर्मसंन्यासो भगवत्पादाभिमत इति। यस्य तावत्साधकस्य त्वंपदार्थविवेक एव न जातः, स तावद् अज्ञान्येव भवेदिति निर्विवादमेव। अतश्च अज्ञानिनोऽपि पुरुषस्य सर्वकर्मसंन्यासो भगवत्पादैः स्वीकृत इत्यायाति। स च कथमपि न युज्यते। अधिगतात्मतत्त्वसाक्षात्कारो मुक्ताविद्याकर्मबन्धनो ज्ञानी यदि संन्यसेत् सर्वकर्माणि, तत् काममुपपद्यतां नाम तन्मतेन। तद्विपरीततया यस्तावदविद्याकामकर्मादिबन्धादनिर्मुक्तः, स कथं सर्वकर्माणि संन्यस्येदिति।

उपदेशग्रन्थोद्धृतशाङ्करवाक्यत्वेन योऽर्धश्लोक इह उद्धृतो भास्करेण, तदुपदेशसाहस्र्या अष्टादशे तत्त्वमतिप्रकरणे यथायथमुपलभ्यत इत्यत इदं स्पष्टमेव यद् भास्करः सम्प्रति 'उपदेशसाहस्री'-नाम्ना, 'उपदेशसहस्री'-नाम्ना वा प्रथमानमेव ग्रन्थम् 'उपदेश'-नाम्ना निर्दिशतीति। यतो हि भास्करो भगवत्पादसमकालिकोऽभूदिति प्रायशो

निर्विचिकित्सम्, अत एवास्य ग्रन्थस्य तदात्वे प्रसिद्धं नाम 'उपदेशः'[३९] इत्येव स्थितं भवेदिति सङ्गच्छतेऽनुमानम्। तमेनम् उपदेशग्रन्थोल्लेखं भास्करकृतम् उपदेशसाहस्र्या एवोल्लेख इत्यजानतैव भास्करीयगीताभाष्यसम्पादकेन डॉ० सुभद्रोपाध्यायेन (सुभद्र झा इति लोके विख्यातेन) भास्करस्य शङ्कराचार्यादर्वाग्भवत्वे प्रमाणाभावः प्रतिज्ञातस्तद्-ग्रन्थभूमिकायाम्[४०]। वस्तुतस्तु उपदेशसाहस्रीग्रन्थोल्लेखपुरःसरं तद्वाक्योद्धरणमेव निष्प्रत्यूहं प्रमाणं भवेद् भास्करस्य शङ्कराचार्यादर्वाचीनतायाम्। श्रीशङ्कर-भास्करयोः पौर्वापर्यप्रश्नोऽयमिह निबन्धे नादिप्रसक्त इति नातीवेह पराक्रम्यतेऽस्मिन् विषये[४१]।

सम्प्रति उपदेशसाहस्रीग्रन्थस्य भगवत्पादीयस्य उपदेशग्रन्थनाम्ना उल्लेखमिमं किञ्चिद्विमृशामः। यदि श्रीशङ्करभगवत्पादैरस्य ग्रन्थस्य 'उपदेशसाहस्री' इति 'उपदेशसहस्री' इति वा नाम स्वयमकरिष्यत, यदि च ग्रन्थोऽयं साम्प्रतमिव तदापि ईदृशनाम्नैव लोकेऽप्रथिष्यत, तर्हि भास्करेणापि ग्रन्थोऽयं 'उपदेशसाहस्री' इत्यादिरूपेणैव निरदेक्ष्यत, न तु 'उपदेशग्रन्थ' इति। अतश्च भास्करकृतस्येदृशनामोल्लेखस्य केनापि कारणेनावश्यं भाव्यमेव। वयं तु इत्थमुत्पश्यामः—ग्रन्थोऽयं श्रीशङ्कराचार्यैः भाष्यादि-ग्रन्थ इव ग्रन्थप्रणयनसङ्कल्पपूर्वकं न निबद्धः, येनास्य तैर्नामकरणस्यावसरः प्रासङ्क्ष्यत; किन्तु शिष्यैः सह तीर्थयात्राप्रसङ्गेषु विजययात्राप्रसङ्गेषु वा यथा तत्तत्तीर्थविशेषेषु तत्तदधिष्ठानदेवतास्तोत्राणि सद्यः प्रतिभाप्रस्फुटितानि तत्सहचरैः श्रुतानि पश्चात् पत्रमारोपितानि स्युरिति सम्भाव्यते, तथैव शिष्यैरनुचरैर्वा सार्धं तत्त्वविचारप्रसङ्गेषु, वादिभिः सार्धं वादकथाप्रसङ्गेषु वा भगवत्पादमुखनिर्गता गद्यरूपाः पद्यरूपाश्च अपूर्वा वाचिकोपदेशाः तत्सहचरैः शिष्यैर्भक्तैरथवा श्रुतोपदेशैर्वादिभिरेव वा पश्चात् पत्रमारोपिताः स्युरिति। अत एवामीषां वेदान्तसिद्धान्तप्रतिपादकानां पद्यानां गद्य-सन्दर्भाणां च एकस्मिन् काले देशे वा ग्रन्थरूपेण स्वरूपं नोद्भिन्नं स्यात्। अत एव तदा तेषामुपदेशश्लोकानां वाक्यानां वा नामकल्पनस्य कथैव नावतीर्णा स्यात्। एवमेव क्रमश उपचीयमानकायोऽसावुपदेशसङ्ग्रहस्तदवस्थायाम् 'उपदेश'-नाम्नैव प्रथां गतः स्याद् गोष्ठीषु। एतादृशकल्पनेन आचार्यभास्करकृतोऽयम् 'उपदेशग्रन्थ'[४२] इति निर्देशः साधु समञ्जसो भवति।

तदेवं भिन्नभिन्नेषु स्थानेषु, भिन्नभिन्नेष्ववसरेषु, भिन्नभिन्नान् पुरुषान् प्रति भिन्नभिन्नप्रयोजनान्यालम्ब्य कृतानामुच्चावचानां व्याकीर्णानामुपदेशानां भक्तशिष्यै-रन्यैर्वानुचरैः क्रमसङ्गत्यादिपर्यालोचनविन्यासपूर्वकं ग्रन्थरूपता सम्पादितेति पश्चाच्चास्य विशिष्टनामसङ्कल्पाभावेन 'उपदेशः' इत्येवासौ ग्रन्थः सर्वत्र पप्रथ इति च कल्पनं

श्लिष्यति। इत्थं काले गते बहुतिथे चात्रत्यां भूयसीमुपदेशसंख्यामालक्ष्य संख्याबहुत्व-मेवाश्रित्य 'उपदेशसाहस्री' इति 'उपदेशसहस्री' इति वा ग्रन्थगौरवव्यञ्जकं नाम कल्पितं भवेदिति च सम्भाव्यते। अवान्तरप्रकरणानां क्रमनामादिपरिकल्पनमपि परस्तादेवैतादृशग्रन्थसंस्करणकाले कृतं स्यादिति सम्भाव्यते। दृश्यते च क्वचिदवान्तर-प्रकरणानां नामविषये पाठभेदोऽपि पुस्तकेषु। यथा आनन्दगिर्यनुसारिपाठे गद्यभागे प्रथमप्रकरणस्य 'मोक्षसाधनज्ञानोपदेशविधिः' इति, निर्णयसागरसंस्करणे 'शिष्यप्रबोधन-विधिः' इति, वाणीविलाससंस्करणे 'शिष्यानुशासनम्' इति च दृश्यते भेदः। एवमेव पद्यभागेऽपि द्वितीयैकोनविंशयोः प्रकरणयोः क्वचित् प्रतिषेधतृष्णाज्वरनाशक इति नाम-करणम्, अन्यत्र आत्मज्ञानोत्पत्ति-भेषजप्रयोग इति[४३]। वस्तुतस्तु प्राचीनैर्ग्रन्थसंस्कर्तृभिः पण्डितैर्विनिगमकान्तरान्वेषणक्लेशं परिहरद्भिः सर्वेषामेव प्रकरणानां तत्तत्प्रकरण-प्रथमश्लोकानामाद्यपदान्येवाश्रित्य नामानि कल्पितानीति स्पष्टम्। परस्तादन्यैस्तत्र 'छित्त्वा'-'मूत्राशङ्क' इत्यादिषु नातिश्लीलतामालोच्य वा, अन्येन वा केनापि हेतुना तेषु नामसु क्वचित्परिवर्तनं[४४] व्यधायीति प्रतिभाति। नानेन विवेचनेन किमपि महत्तरं प्रयोजनं सेत्स्यतीति विरम्यते विस्तरात्।

इदमन्यदत्र विभावनक्षमं सुधियाम्। उपदेशसाहस्र्यां सन्ति प्रकरणान्येकोन-विंशतिः पद्यभागे, त्रीणि च गद्यभागे। पद्यभागस्थानां प्रकरणानां क्रमनिर्णये तु तदाकारलाघवगौरवमेव विनिगमकत्वेन स्वीकृतं तत्सङ्ग्राहकैः सम्पादकैरिति स्पष्टमेव। प्रथममन्त्यं च प्रकरणद्वयं वर्जयित्वा मध्यगतेषु सर्वेषु प्रकरणेषु स्पष्टमेव परिदृश्यते क्रमशः पद्यसंख्योपचयः। विभाव्यतां श्लोकसंख्यातालिकेयं वाणीविलाससंस्करणानु-सारिणी[४५]—

१. उपोद्घातप्रकरणम्	२६
२. आत्मज्ञानोत्पत्तिप्रकरणम्	४
३. ईश्वरात्मप्रकरणम्	४
४. तत्त्वज्ञानस्वभावप्रकरणम्	५
५. बुद्ध्यपराधप्रकरणम्	५
६. विशेषापोहप्रकरणम्	६
७. बुद्ध्यारूढप्रकरणम्	६
८. मतिविलापनप्रकरणम्	६
९. सूक्ष्मताव्यापिताप्रकरणम्	९
१०. दृशिस्वरूपपरमार्थदर्शनप्रकरणम्	१४

गद्यभागे तु सन्ति त्रीण्येव प्रकरणानीति तत्र क्रमविषये नातिवलेशित आत्मा प्रथमैर्ग्रन्थसम्पादकैरिति प्रतिभाति[४६]। अथवा तत्रापि पद्यभाग इव क्रमोपचयमाश्रित्य प्रकरणद्वयं प्रथमं विन्यस्तमिति, परस्तात् तृतीयं पूर्वद्वयापेक्षया अतीव लघुतमं योजितमिति यद्यनुमातुमिष्यते, काममनुमीयताम्। प्रथमं प्रकरणद्वयं गुरुशिष्यसंवाद-रूपमिति, तृतीयं तु न तथेत्यस्ति चान्यद् वैषम्यं तृतीय इत्यप्यवधेयम्। तत्र प्रतिप्रकरणं कृतानामंशविभागानां संख्यास्थितिरित्थमस्ति—

पद्यभागे पद्यसंख्या ६७१ भवति। अर्थपूर्तिमवलम्ब्य क्वचिदेकस्यैवार्धस्य पृथक् संख्या प्रदत्ता, क्वचित्तु अर्धत्रयमेकत्वेन संख्यातमिति श्लोकसंख्यागणने ईषद् भेदः समायाति। अस्मिन् संख्याविन्यासे अस्तीषद् भेदः संस्करणभेदेनेत्यपि विभावनीयम्; परन्तु सहस्रसंख्यापूर्तिस्तु कथमपि न भवति, गद्यभागे संख्यातानां खण्डानां मेलनेनापि[४७]। अत एव बहुत्ववाचकोऽयं सहस्रशब्द इत्यास्थेयं भवेत्[४८]।

इयता परिकरबन्धेन यत् साधितं तस्येमे निष्कर्षाः—

(१) स्वयूथ्यैः शिष्यैः सुरेश्वराचार्यैर्नैष्कर्म्यसिद्धौ उद्धृतोऽयं ग्रन्थ इत्यतिरिच्य प्रति-पक्षिभिर्भास्कराचार्यैरपि भगवत्पादीयग्रन्थत्वोल्लेखपुरःसरमयमुद्धृत इति अस्य शङ्कराचार्यप्रणीतत्वं सर्वथा निष्कण्टकम्।

(२) भास्करकृतादुल्लेखप्रकारात् स्पष्टं विज्ञायते यदस्य ग्रन्थस्य नासीद्विशिष्टं किमपि नाम।

(३) आदावयम् 'उपदेश'-नाम्नैव लोके प्रचचार। अत एव तस्मिन् काले ग्रन्थमिममुद्धर्तुकामा अपि 'उपदेशग्रन्थ' इत्येवैनमुज्जह्रुः।

(४) काले गते बहुतिथे परस्तादेव कदापि ग्रन्थसंस्कर्तृभिः टीकितृभिर्वास्य यदा नामकरणसंस्कारोऽप्यकारि, तदा प्रभृत्येवास्य 'उपदेशसाहस्री' इति, 'उपदेशसहस्री' इति वा नाम स्थिरीबभूवेति।

इदमत्र सुधीभिर्विभावनीयम्—भगवत्पादैः प्रसङ्गविशेषेषु कृता ये उपदेशा नानारूपास्ते चिराय तदनुचरवर्गेषु कर्णपरम्परया विकीर्णतया प्रसृताः, परस्तात् कदापि कैरपि पत्रमारोप्य ग्रन्थरूपतामापादिता इति, स एव उपदेशसाहस्रीति सर्वत्र ज्ञायत इति योऽस्माभिरेतद्ग्रन्थविषये ऊहः कृतः, सोऽयं लोकोद्धारदीक्षितानां सर्वेषां महापुरुषाणां प्रामाणिकैश्चरितेतिवृत्तैः इतिहासपरम्परया च सर्वथा संवदतीति। तथा हि—प्रथममवधारयन्तु भगवता बुद्धेन कृतानामुपदेशानां स्थितिम्। नालेखि बुद्धेन एकमप्यक्षरमुपदेशरूपं स्वहस्तेन कदापि क्वापि। पालिभाषायां कृतानि तदुपदेशवचनानि सर्वाण्यपि अविच्छिन्नशिष्यपरम्परयानुवृत्तानि बहुवर्षशतेभ्यः पश्चादेव शिष्यसङ्घैः ग्रन्थरूपतां प्रापितानि तिपिटकरूपेणाद्य प्रथन्ते जगति सर्वत्रेति। तत्रापि तिपिटकमिति समष्टिग्रन्थनाम, सुत्तपिटकादीनि पिटकनामानि, खुद्दकनिकाय-दीघनिकाय-मज्झिमनिकाय-अङ्गुत्तरनिकाय-प्रभृतीन्यवान्तरनिकायनामानि सर्वाण्यपि परवर्तिभिः संग्रहकर्तृभिरेव कल्पितानि। सम्प्रति पाश्चात्यलोकेषु मूर्धाभिषिक्तस्य क्रिस्तुधर्मस्य प्रवर्तकस्य भगवदवतारत्वेन पूज्यमानस्य क्रिस्तोः तत्साक्षाच्छिष्याणां चोपदेशाः चिरकालानन्तरमेव 'बाईबल्'-ग्रन्थरूपेण सङ्गृहीता इति सर्वविदितमेव। अत एव तत्संस्करणेषु विद्यमानान् भूयसो भेदानाश्रित्य प्रवृत्तस्तन्मूलस्वरूपविवादो नाधुनापि विश्राम्यतीति कथयन्ति तद्विदः। आधुनिके कालेऽपि श्रीरामकृष्णपरमहंस-श्रीरमणमहर्षि-प्रभृतिभिर्महापुरुषैस्तदा तदा कृता लोकोपदेशा अपि तत्तच्छिष्यैः परस्तात् सङ्गृहीताः ग्रन्थरूपेण प्रख्यापिता इति सर्वप्रत्यक्षैवेयं स्थितिरिति दिक्।

सुरेश्वरभास्करोद्धृतानामुपदेशसाहस्रीवाक्यानां विषये इदमन्यदप्यस्त्यवधेयम्। सुरेश्वराचार्यैरुद्धृतेषु पद्येषु भूयांसि उपान्त्याष्टादशप्रकरणस्थान्येव। एवं सप्तदशात् पञ्चदशादप्येकैकं पद्यमुदहारि तैः। भास्कराचार्यैर्यदर्धपद्यमुदहारि, तदप्युपान्त्यप्रकरणस्थमेव। एतदालोक्य केचित्संशयात्मान इत्थं प्रत्यवतिष्ठेरन्—क्रमोपचीयमानप्रकरणपद्यसंख्याश्रितेन प्रकरणक्रमविन्यासेन स्पष्टं भवति यद् आद्यमन्त्यं च प्रकरणद्वयं परस्तादेव कदाचित् संयोजितमिति। अत एवानयोर्भगवत्पादोपज्ञत्वं संशयास्पदमिति च। एवं स्थिते भास्करसुरेश्वरयोरुपान्त्यप्रकरणोद्धरणेनोपान्त्यस्य अष्टादशस्य तत्त्वमसि-

प्रकरणस्य भगवत्पादप्रणीतत्वं निष्प्रत्यूहं भवेत्। तथा सुरेश्वरोद्धृतत्त्वमालम्ब्य अन्त्यभागस्थानां पञ्चदशादीनां प्रकरणानां प्रामाणिकत्वमपि शक्यमास्थातुम्। सन्दिग्धं प्रथमप्रकरणं वर्जयित्वा उपक्रमभागस्थितानि प्रकरणानि तु सर्वाण्यपि आकारेण लघु-लघूनि। येषु चत्वारि, पञ्च, षड्, नव वा पद्यानि, अथवा ततः किञ्चिदधिकानि वा दृश्यन्ते, तेषां पृथक्प्रकरणसंज्ञाकरणमेव हास्यं प्रतिभाति। अत एव भास्करसुरेश्वरकृत-मुद्धरणमुपान्त्यस्य तत्त्वमसिप्रकरणस्य तथान्त्यभागस्थितानामाकारेण बृहतां कतिपय-प्रकरणानामेव शाङ्करत्वं प्रमाणीकुर्यान्न सर्वेषाम्, विशेषतश्च नारम्भस्थितानां पञ्चष-पद्यात्मकानां प्रकरणव्यपदेशमप्यनर्हतामिति, अत एवारम्भस्थितानि परवर्तिभिरन्यै-राचार्यैः प्रणीतानि शाङ्करत्वगौरवलिप्सया बलादत्र समावेशितानि स्युरिति युक्त-मुत्पश्याम इति।

सत्यमस्तीषदवकाश इत्थं प्रत्यवस्थातुम्। यावदन्यैर्नोल्लिख्यते नोद्ध्रियते वा, तावत् कस्यापि ग्रन्थस्य प्रामाणिकता न सिध्यतीति कोऽयं नयः? यदि भास्करसुरेश्व-राभ्यां नोदहरिष्यन्त पद्यानि, किमुपदेशसाहस्र्या भगवत्पादीयत्वमेव नासेत्स्यत्? काममस्ति किमपि विशिष्टं महत्त्वं प्राचीनग्रन्थानां कालकर्त्रादिनिर्णयेऽर्वाचीनग्रन्थ-कृत्कृतानामुल्लेखानामुद्धरणानां वा; परन्तु तदभावे सम्प्रदायपरम्परादिषु प्रमाणेषु गजनिमीलिकापि हास्याय कल्पिष्यत इति न विस्मर्तव्यम्। इदं तु काकतालीयं यदय-मुपदेशसाहस्रीग्रन्थ उदहारि भास्करसुरेश्वराभ्याम्। वस्तुतस्तु यावद् दृढं बाधकं प्रमाणं न भवति, तावत्सम्प्रदायपरम्परायाः प्रामाणिकत्वमूरीकर्तव्यमिति निष्कण्टकः पन्थाः। अस्ति चास्मिन् विषये प्राचीनैराचार्यैरानन्दगिरिप्रभृतिभिर्व्याख्यातोऽयं ग्रन्थ इति, तत्र च भगवत्पादप्रणीतत्वं कण्ठोक्तैरक्षरैर्घोषितं च तैरिति महत् प्रमाणम्। तथापि प्रारम्भ-भागस्य भगवत्पादीयत्वमाक्षिपतां संशयात्मनामपि मुखमुद्रणक्षमं प्रमाणान्तरमुपलभ्यत इति तेऽपि तुष्यन्तु।

प्रथमं तावदिदं काकतालीयन्यायोपलब्धमेकं सुरेश्वरोद्धरणमेव। यद्यपि सुरेश्वरा-चार्यैर्भूयिष्ठमुद्धृतानि पुच्छभागप्रकरणस्थान्येव पद्यानि, तथापि मुखभागस्थमेकं प्रकरण-मप्यनुगृहीतमेव तैर्नैष्कर्म्यसिद्धौ। षट्पद्यात्मकात् षष्ठाद्विशेषापोहप्रकरणात् चत्वारि पद्यानि तैस्तत्र यथायथमुद्धृतान्येव। इदमपि मन्येऽन्यत्काकतालीयं यद् भास्करेणैव कृतमन्यदप्युद्धरणं मुखभागस्थमस्माभिर्दैवादुपालम्भि। मुद्रिते भास्करगीताभाष्ये यद्यपि उपदेशग्रन्थनाम्ना एक एव उल्लेखो ज्ञातचर इति सत्यमेव, तथापि भास्करीय-गीताभाष्यस्य तस्मिन्नेव प्रसङ्गे सम्पादकस्य प्रमादेनान्यथाभावं गमितम्, सम्पादके-

नोद्धरणत्वेनाप्यपरिज्ञातम्, अत एव पाठकानां कृते सर्वथा दुष्प्रत्यभिज्ञानम् उपदेशसाहस्र्या अस्ति, पश्चान्तरमस्माभिः दैवात् प्रत्यभिज्ञातमिदं प्रथमतया। तदिदमुद्धरणं भास्करोद्धृतं पञ्चपद्यात्मकपञ्चमप्रकरणस्य प्रथमपद्यमिति सप्रमाणमनुपदमेव सप्रपञ्चं निरूपयिष्यते। अत एवाद्यभागस्थानि पञ्चषपद्यात्मकानि न शाङ्कराणीति रिक्तं वच इत्यलम्।

तदेवं भास्करीयगीताभाष्ये 'उपदेशग्रन्थ' इति य उल्लेखो दृष्टः, सोऽयं वस्तुत उपदेशसाहस्र्या एवोल्लेख इति, तत्रोद्धृतं वाक्यं च उपदेशसाहस्र्यां समुपलभ्यत इति च स्पष्टं निरूपितम्। अयं तु परमार्थो यदिमम् उपदेशग्रन्थोल्लेखं विलोक्य तस्य उपदेशसाहस्रीत्वं स्वमनीषिकयैव सम्भाव्य, उपदेशसाहस्र्यां तद्वाक्यमन्विष्य, तस्यां तद् दृष्ट्वा च भास्करेण उपदेशसाहस्री भगवत्पादीयैव उपदेशग्रन्थनाम्ना निर्दिष्ट इति निष्कर्षः स्वयमस्माभिरकारि। अनेन नूतनवस्तूपलम्भेन चान्वभावि तदा कोऽपि मानसोल्लासो महान्। तदा 'वाल्टायर' नगरे सम्पत्स्यमाने अखिलभारतीयप्राच्यविद्यासम्मेलनस्याधिवेशन एतद्विषयकनिबन्धसंक्षेपोऽपि पण्डितपरिषद्विभागार्थं प्रास्तावि; परन्तु कारणान्तरैः परस्तात् तदधिवेशने नोपस्थातुमपारि। तदनन्तरमेवादर्शि 'न्यू केटलागस् केटलागोरम्' सूच्यामस्य भास्करकृतोल्लेखस्य याथार्थ्योद्घाटनम्; परन्तु नाद्यावधि अस्मद्दृष्टिपथमागतं केन विदुषा कुत्र कृतमिदमपूर्वं याथार्थ्योद्घाटनमिति। 'न्यू केटलागस् केटलागोरम्' सूची सर्वत्राकरविषये मुखरापि अस्मिन् विषये मौनमाश्रितेतीषदरुन्तुदमेव।

अथाधुना पूर्वं संकेतितः परैरचुम्बितपूर्वो य उपदेशसाहस्र्या नूतनोल्लेखो भास्करीयगीताभाष्येऽस्माभिर्महता श्रमेणान्विष्टः, सोऽधुना प्रस्तूयते। इदं तु यदृच्छामात्रं यदयमुल्लेखोऽपि तस्मिन्नेव गीताभाष्यप्रकरणे तिष्ठतीति। तथापि केनापि विदुषा नाद्यावधि स प्रत्यभिज्ञात इत्यत्र सम्पादककृतं भ्रान्तं पाठशोधनमपराध्यतीति स्पष्टं भविष्यत्यनुपदमेव। वस्तुतस्तु भास्करेण 'नैष्कर्म्य'शब्दार्थविवेचनप्रसङ्गेऽस्मिन् समनन्तरमेव उपदेशसाहस्र्याः पञ्चमप्रकरणस्थं प्रथमं पद्यमप्युद्धृतमास्ते। यद्यपि मूलमातृकायां तत्राप्युपदेशग्रन्थ इत्येव उल्लेखः कृतोऽस्ति, भास्करेण उद्धृतं चास्ति तदनन्तरमुपदेशसाहस्र्याः समग्रं पद्यमेकम्, तथापि सम्पादकेन मातृकावाचने पाठशोधने च तथा कृतो महानुपप्लवः, येन न केवलम् 'उपदेशग्रन्थ'शब्द एवान्यथाभावं गमितः; किन्तु तथा विकारमुपनीतम् उपदेशसाहस्रीपद्यं यथा जानतामपि तद् दुष्प्रत्यभिज्ञानं भवेत्। मन्ये, इदं बलमाधुनिकसम्पादनपद्धतेर्यत्र सम्यगनुशिष्टोऽभूत्सम्पादकः, येन प्रमादभूयिष्ठेभ्योऽपि सम्पादकशोधितेभ्यः पाठेभ्यः प्रमादबहुलाभ्योऽपि मातृकाविषयकटिप्पणीभ्यो यथार्थोद्घाटनं शक्यसाधनमभूदस्माकम्। आधुनिकसम्पादनपद्धतिं यथायथमनुरुन्धाने।

डॉ० सुभद्रझामहोदयैः मूलमातृकापाठाः सर्वेऽपि टिप्पणीषु सन्ति प्रदत्ताः, येन भ्रान्तरूपेण तैरनुवाचितास्ते। इदं तु ईषदाश्चर्यमेव यदत्रत्यमनुष्टुप्छन्दोबद्धं वाक्यमपि पद्यत्वेन न शेकुस्ते प्रत्यभिज्ञातुम्। अयमपि मन्यामहे दैवयोग एव कश्चिद् यदस्माभिः भ्रमविजृम्भितटिप्पणीमध्ये गूढतरं प्रच्छन्नमपि तत्रत्यमुपदेशसाहस्रीपद्यं प्रत्यभिज्ञातम्, यतो हि तेष्वेव दिवसेषु अस्यैव पद्यस्य विषये काचिच्चर्चा प्रवर्तिताऽभूदस्माभिः साकं कैश्चित्पण्डितप्रकाण्डैरस्मत्समादरभाग्भिः[४१]। अत एव मातृकाटिप्पणीस्थितः 'सत्र' शब्दो वस्तुतो 'मूत्र' इति, 'सूत्रद्वार' शब्दो वस्तुतो 'मूत्रद्वार' इति, 'किलोतं कोनाग्रहोदमृतं' इत्येतत् 'किलोत्तङ्को नाग्रहीदमृतं' इति च यथायथं प्रत्यभिज्ञातम्। प्रत्यभिज्ञाय च याथार्थ्यदृढीकरणाय 'सरस्वतीभवन'मातृकाकोशादस्मद्विश्वविद्यालयाधीनाद् मूलमातृकामप्यानाय्य स्वयमवाचयामेमं मातृकाभागम्, निरचिनवाम चात्र सम्पादक एव पदे पदे बभ्रामेति।

विद्वांसः पाठका यथा अस्मत्कृतस्य मातृकापाठवाचनस्य पाठसंशोधनस्य च सौष्ठवासौष्ठवं परीक्षितुं शक्नुयुः, यथा चास्मत्कृतवाचनशोधनेषु सम्भावितान् भ्रममूलान् दोषानपाकर्तुं शक्नुयुस्तथाधुना प्रस्तूयन्ते। प्रथममस्मदनुवाचितः संशोधनसंकेतसहितो मातृकापाठः, ततः परमस्मदनुवाचनरीत्या मातृकाया वास्तविकी स्थितिः, अन्ते च सम्पादकसंशोधितो मुद्रितग्रन्थपाठः, तत्र टिप्पणीषु दत्तास्तदनुवाचनरीत्या मातृकापाठाश्च। एतेषां त्रयाणां तोलनेन विद्वांसः स्वयमेवापरोक्षमवधारयितुं शक्ष्यन्ति कियन्महतीं विकृतिमुपनीयन्तेऽस्माकं महतां ग्रन्थानां मूलस्थिता यथार्थाः पाठाः भ्रान्तैर्लिपिकारैरसमर्थैः सम्पादकैश्चेति।

अस्मदनुवाचितः शोधितः पाठः—

किञ्चायं विद्वान् ब्रह्मीभूतो यदा(?)भेदमेकान्तेन न पश्यति। तस्यामवस्थायां न कर्म कर्त्तव्यं ब्रूमः। यदि तु [यदा तु (?) यस्तु (?)] व्युत्थितचित्तोऽशनपानादिषु कर्तृत्वमनुभवति, तेनैव [तदैव (?)] सन्ध्योपासनादि कर्तव्यं स्यात्। विशेषहेतुर्वक्तव्यः (?)। यच्चोक्तमात्मीयोपदेशग्रन्थे—

मूत्राशङ्कः किलोत्तङ्को नाग्रहीदमृतं यथा।
कर्मनाशभयाज्जन्तोरात्मज्ञानाग्रहस्तथा ॥

इति तदप्यपर्यालोचितमुक्तम्। उत्तङ्कस्य अयुक्तमूत्रद्वारविनिर्गतत्वादमृतधारायां मूत्रभ्रान्त्या तदग्रहणम्। इह तु आत्मज्ञानान्मुक्तिमिच्छतां कथमात्मज्ञानाग्रहः ?

मातृकायां यथास्थितः पाठः (अस्मदनुवाचनानुसारी)—

इदमादाववधेयम्—मातृकेयं सरस्वतीभवनस्थे हस्तलिखितग्रन्थकोशे ५९२९ क्रमसंख्ययावतिष्ठते। तत्र ३८ तमपत्रस्य प्रथमपृष्ठेऽयमंशो विद्यते। तत्र केवलं "किं चायं विद्वान्" इत्येतावानंशः पूर्वपत्रतो गृहीतः। अस्यां मातृकायां वाक्यसमाप्तिसूचकं सम्प्रति सर्वत्रैकान्ततः प्रयुज्यमानं 'पूर्णविराम'-चिह्नमपि नास्ति। अस्माभिस्तु सर्वाण्याधुनिकानि विराम-प्रश्नादिचिह्नानि समारोपितानि। प्राचीनमातृकास्विवात्रापि ग्रन्थपङ्क्तिर्दण्डायमाना दीर्घंदीर्घं प्रसरति, न तु मध्ये पदच्छेदो वा वाक्यच्छेदो वा क्रियते। पदच्छेदवाक्यविश्रामादिसंकेताभावेन सम्पादकस्य बहुत्र पदच्छेदे वाक्यच्छेदे च बभूवान्यथाख्यातिरिति विदाङ्कुर्वन्तु सूक्ष्मेक्षिकाचणाः पण्डिताः। अत्र यथामातृकं 'मक्षिकास्थाने मक्षिका'न्यायेन विलिख्य प्रस्तूयते पङ्क्तिक्रमानुसारम्—

पूर्वपत्रस्यान्ते—किंचायंविद्वान्ब्रह्मीभू

प्रथमपङ्क्तिः—तोभेदमेकातेननपश्यतितस्यामवस्थायांनकर्मकर्तव्यंब्रूमोयदितुव्युस्थित-चित्तोशनपानादि

द्वितीयपङ्क्तिः—सुकर्तत्वमनुभवतितानेवसंध्योपासनादिकर्त्तव्यंस्याद्विशेषहेतुर्वक्तव्यः यश्चोक्तमात्मीयो

तृतीयपङ्क्तिः—पदेशग्रथसत्राशंकःकिलोतंकोनाग्रहीदमृतंयथाकर्मनाशभयाजंतोरात्म-ज्ञानाग्रह

चतुर्थपङ्क्तिः—स्तथेतितप्यपर्य्यालोचिनमुक्तंउतंकस्यमुक्तसूत्रद्वारविनिर्गतत्वादमतधारा-यासूत्रभ्रां

पञ्चमपङ्क्तिः—त्याउरुग्रहणमिहत्वात्मज्ञानात्मुक्तिमिछतांकथमात्मज्ञानाग्रहःयदिचकर्म-मुक्तिकारणं

प्रथमपङ्क्तेरन्ते 'पानादि' इत्यत्र 'प'कारो 'य'कारवदवश्यं भासते; किन्तु सर्वत्रैवास्यां मातृकायां 'प'कारस्येदृश्येव भ्रामिका स्थितिरिति, मातृकासु प्रायिकैवैषा स्थितिरिति चास्य 'य'काररूपेण वाचनं मातृकावाचनदम्भमात्रमिति नास्माभिस्तथा-कृतम्। एवमेव तृतीयपङ्क्तावपि प्राचीनमातृकासु 'ज'कारलेखनमाधुनिक'ड'कार-लेखनमनुकरोतीत्यवधेयम्। अत एव तत्रास्माभिः 'ज'काररूपेणैवानुवाचितः, यद्यपीदृशवाचनेऽपि लिपिकरस्य नास्ति दोषमुक्तिः, यस्माद् द्वि'ज'कारस्थान एक-'ज'कारलेखनदोषस्तदवस्थ एव।

सम्पादकसंशोधितो मुद्रितपुस्तकारूढः पाठः५०—

किञ्चायं विद्वान् ब्रह्मीभूतो भेदमेकान्तेन न पश्यति। तस्यामवस्थायां न कर्म कर्तव्यमिति ब्रूमः। यदि तु व्युत्थितचित्तोऽशनपानादिषु कर्तृत्वमनुभवति, तस्यैव सन्ध्योपासनादि कर्तव्यं स्यात्। विशेषहेतुर्वा वक्तव्यः। यच्चोक्तमात्मोपदेशीयोऽयं ग्रन्थः। तत्राशङ्क्ये किलोत्तङ्केन गृहीतममृतम्। यथा कर्मनाशभयाज्जन्तोरात्मज्ञानाग्रहस्तथेति तथ्यपर्यालोचिनमुक्तम्। उत्तङ्कस्य युक्तसूत्रद्वारविनिर्गतत्वाद् अमृतधारायाः सूत्रभ्रान्त्यात्मज्ञानाग्रहणम्। इह त्वात्मज्ञानान्मुक्तिमिच्छतां कथमात्मज्ञानाग्रहः।

डा० सुभद्रोपाध्यायसम्पादितस्य अस्मदीयविश्वविद्यालयेनैव प्रकाशितस्य भास्करीयगीताभाष्यस्य सम्पादनदौस्थ्यविषयेऽनुपदमुपस्थापितं सन्दर्भत्रयमेव वक्ष्यति सर्वां वैरूप्यकथामिति मन्यामहे नावशिष्यते किमपि कण्ठतो वक्तव्यमन्यदिति, न वा निदर्शनीयतामपेक्षते शास्त्रव्युत्पत्तिलाघवं सम्पादकीयमिति। इयन्मात्रं विज्ञापनीयं पण्डितेषु। यत्तावदुदाहरणं प्रदर्शितम्, स केवलं स्थाल्यां पुलाकः। पदे पदे बभ्राम चस्खाल च सम्पादक इति स्वयमेव वेत्स्यन्ति विज्ञा विद्वांसो ग्रन्थपरीक्षणेनेति चैतावतैव विरम्यतेऽस्माद्दोषमात्रदर्शनव्यापारात् **"न चाप्यतीव कर्तव्यं दोषदृष्टिपरं मनः"** इति कौमारिलमनुशासनमनुसन्दधानैः।

वस्तुतस्तु भाष्यमिदं पुनः सम्पादनमर्हति प्रौढभाषावैदुष्यवता वेदान्तशास्त्रव्युत्पन्नेन विदुषा यो भाषाव्युत्पत्तिं शास्त्रव्युत्पत्तिं चाश्रित्य स्खलितभूयिष्ठाया मातृकायाश्चिकित्सां विधाय अर्धलुप्तस्यास्य भास्करीयगीताभाष्यस्य यथार्थपाठोद्धारेण उपकुर्याद् भाष्यकर्तारं भास्करम्, जिज्ञासूनध्येतृंश्चेति दिक्।

तदेवं भास्करीयभाष्यस्थितेनानेनोल्लेखद्वयेन सिद्धमिदं यत् सम्प्रति 'उपदेशसहस्री', 'उपदेशसाहस्री' इति वा नाम्ना प्रसरदिदं शाङ्करं वेदान्तप्रकरणं भास्करस्य काले श्रीशङ्कराचार्यकाले च उपदेशनाम्नैव लोके विख्यात इति, ततः परमपि चिरायानेन नाम्ना प्रससार यावदानन्दगिरिकालमिति च। इदमपि सम्भाव्यते यदस्य वेदान्तसिद्धान्तसङ्ग्राहकस्य ग्रन्थरत्नस्य शङ्करभगवत्पादप्रणीतत्वं यद्यपि सर्वथा संशयापेतमेव, तथापि नेदं भाष्यादीव लिखितं भाष्यकारैः स्वहस्तेन; किन्तु तदनुचरैस्तदुपज्ञा इमे श्लोकाः, गद्योक्तयश्च संगृहीताः संकलिताश्चेति। तदनु च यथायथं ग्रन्थरूपं प्रापिता इति, परस्ताच्च स्वयमानन्दगिरिणाचार्येण अथवा तत्पूर्वभाविना केनाप्याचार्यान्तरेण विदुषा वाऽस्य नामकरणं कृतम् **'उपदेशसहस्री', 'उपदेशसाहस्री'** इति वेति च सर्वमनाकुलम्।

ताम्रपर्णीतीरजन्मा गङ्गाजीवनजीवनः ।
विश्वनाथतनूजातो वेङ्कटाचलनामकः ॥
साहित्ये शाङ्करे तन्त्रे चेषत्कृतपरिश्रमः ।
निबन्धमिममग्रथ्नाद् विश्वनाथानुकम्पया ॥

❀

पादटिप्पण्यः

१. नैष्कर्म्यसिद्धिः, ४.१ (अग्रे सन्दर्भसमुद्देशेषु ग्रन्थोऽयं नै॰ सि॰ इति संक्षेपितः । एतद्ग्रन्थसन्दर्भा एम्॰ हिरियण्णासम्पादित-'भाण्डारकर् ओरिएन्टल् रिसर्च इन्स्टिटयूट्'-प्रकाशित १९८० वर्षीय-चतुर्थसंस्करणानुसारिणो वेदितव्याः ।)

२. नै॰ सि॰, ४.१९ ।

३. नै॰ सि॰, ४.४३-मितपद्यस्यानन्तरपूर्वं वृत्तिवाक्यम् ।

४. नै॰ सि॰, ४.४४. अत्र "पूज्यैरयमर्थः प्रभाषितः" इति मुद्रितः पाठः प्रकटच्छन्दोभङ्गः प्रामादिक इति संस्करणान्तरस्थः शुद्धः प्रसिद्धश्च पाठः समादृतः ।

५. अत्रास्माभिरुद्धृतः 'एष संक्षेपतः' इत्यारम्य 'अहमादिदृगीश्वरः' इत्यन्तो द्राघीयान् नै॰ सि॰ ग्रन्थसन्दर्भः पूर्वोक्ते संस्करणे १८४-१९३ पृष्ठेषु तिष्ठति ।

६. उपदेशसाहस्री, १८.७८ (अग्रे सन्दर्भसमुद्देशेषु ग्रन्थोऽयम् उ॰ स॰ इति संक्षेपितः । श्रीरङ्गस्थ-वाणीविलासमुद्रणालय-प्रकाशित-श्रीशाङ्करग्रन्थावलेश्चतुर्दशसंपुटानुसारमत्र समुद्दिष्टाः सन्दर्भाः ।)

७. उ॰ स॰, १८.९० (उत्तरार्धः)

८. तत्रैव—१८.९६

९. तत्रैव—१८.९७

१०. उ॰ स॰, १८.९९

११. तत्रैव—१८.१०१

१२. तत्रैव—६.१

१३. तत्रैव—६.३

१४. तत्रैव—६.२

१५. तत्रैव—६.४, अनन्तरपूर्वोद्धृतेषु षष्ठप्रकरणगतेषु एषु चतुर्षु पद्येषु द्वितीयतृतीययोः क्रमः सर्वेषु संस्करणेषु विपर्यस्तो दृश्यते। सुरेश्वराचार्यपाठानुसारिक्रमस्य साम्प्रतिकसर्वसंस्करणानुसारिक्रमस्य च मध्ये को युक्ततर इति सुधीविमर्शनयोग्योऽयं विषयः।

१६. उ० स०, १५.१६

१७. तत्रैव—१८.१८८-१९०

१८. तत्रैव—१८. १७२-१७३

१९. माण्डूक्यकारिका गौडपादकृता, १.११

२०. तत्रैव—१.१५

२१. उ० स०, १७.२६

२२ नै० सि०, पृ० १८४

२३. अनुपदोद्धृतटीकासन्दर्भानन्तरं चन्द्रिकाटीकायां नवसु प्रसङ्गेषु आचार्यशब्देन, भगवत्पादाचार्यशब्देन, भगवत्पूज्यपादाचार्यशब्देन, प्रकारान्तरेण च कृताः सन्त्युल्लेखा भूयांसः। ते यथा—

(क) अन्वयव्यतिरेकौ.....तदपि **भगवत्पादाचार्यैः** प्रदर्शितमित्याह। (पृ० १८६)

(ख) आगमापायि........पदार्थविवेकोपायत्वेनास्मदुक्तौ **आचार्यैरपि** दर्शिताविति दर्शयति। (पृ० १८६)

(ग) इत्थं.........यदुक्तं **तदाचार्यैरप्युक्तमित्याह** एवमिति। (पृ० १८६)

(घ) त्वंपदलक्षणमपि यथोक्त**माचार्यैरपि** दर्शितमित्याह तत्रेति। (पृ० १८७)

(ङ) आत्मानात्मविवेकायान्वयव्यतिरेकौ प्रकारान्तरेणापि दर्शितौ **आचार्यैरि**त्युत्तरश्लोकपञ्चकस्य तात्पर्यमाह अन्यच्चेति। (पृ० १८७)

(च) पुनरपि **भगवत्पूज्यपादैर**स्मदुक्तो न्यायस्तत्त्वमसिप्रकरणेऽपि दर्शितः समस्तन्यायोपसंहारैः पञ्चभिः श्लोकैः प्रदर्शित इत्याह सर्वन्यायेति। (पृ० १८८)

(छ) यदस्माभिस्तृतीयाध्याये........तदपि न स्वोत्प्रेक्षामात्रम्, **आचार्यैरपि** दर्शितत्वादित्याह वीक्षापन्नस्येति। (पृ० १८९)

(ज) **उपदेशसाहस्र्यामप्येतदुक्तमित्याह** तथेति। (पृ० १९३)

(झ) द्राविडैः **भगवत्पूज्यपादाचार्यैः**। पञ्च द्राविडा इति केरलानामपि द्राविडत्वप्रसिद्धेः। (पृ० १९३)

[अस्मिन् सन्दर्भे केरलानामित्यस्य स्थाने केवलानामिति यन्मुद्रितं तत्प्रामादिकमिति संशोधितमस्माभिः।]

२४. नै० सि०, पृ० २९३-२९५

२५. १५० तमे पृष्ठे गद्यप्रबन्धपुष्पिकायां, २४६ तमे पृष्ठे पद्यप्रबन्धपुष्पिकायां च "इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ उपदेशसहस्र्यां" इति ह्रस्वसकारयुतं रूपमेव दृश्यते। उभयत्र मुखपृष्ठयोरपि तथैव रूपं मुद्रितमास्ते।

२६. "इह भगवत्पादाभिधो भगवान् भाष्यकारः सर्वोपनिषदर्थसारसंग्राहिकामुपदेशसाहस्रीं गद्यपद्यविभागग्रन्थरचनया........" इति निर्णयसागरमुद्रणालयसंस्करणप्रथमपृष्ठस्थमारम्भवाक्यम्।

२७. "इति श्रीमच्छङ्करभगवत्पादकृतौ उपदेशसाहस्र्यां गद्यप्रबन्धः समाप्तः" इति गद्यभागान्ते मध्यपुष्पिका ७७-तमपृष्ठस्था। "इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्य(पाद ?)शिष्यस्य श्रीमच्छङ्करभगवतः कृतिः सकलवेदोपनिषत्सारोपदेशसाहस्री समाप्ता" इत्युपसंहारपुष्पिका ३३५-तमपृष्ठस्था। उभयत्र मूलपुष्पिकयोरिव टीकापुष्पिकावाक्ययोरपि 'उपदेशसाहस्री' इति दीर्घसाकारयुतमेव निर्दिश्यते ग्रन्थनाम।

२८. पूर्वोक्तनिर्णयसागरमुद्रणालयसंस्करणे ३३६-तमे पृष्ठे।

२९. माऊण्ट आबू-स्थाने वाराणस्यां च प्रतिष्ठितेन महेश-अनुसन्धान-संस्थानेन प्रकाशिते आनन्दगिरिटीकायुक्ते संस्करणे प्रथमपृष्ठे।

३०. तत्रैव—तस्मिन्नेव प्रथमपृष्ठे। मङ्गलश्लोकानन्तरं "सकलोपनिषदर्थसारसंग्राहिकामुपदेशसहस्रीं गद्यपद्यात्मिकां....... " इत्यादि टीकारम्भवाक्येऽपि ह्रस्वसकारसंवलितमेव रूपं समुपलभ्यते।

३१. तत्रैव—११९-तमे पृष्ठे।

३२. तत्रैव—१६६-तमे पृष्ठे।

३३. तत्रैव—तस्मिन्नेव १६६-तमे पृष्ठे।

३४. पृ० १२१. "ॐ सर्वोपनिषदर्थसारसंग्राहिका गद्यपद्यात्मिका हीयम् उपदेशसाहस्री।" इति तत्रत्यं प्रथमवाक्यम्।

३५. पृ० ८४. भगवद्गीताभाष्यमिदं भगवदाशयानुसरणाभिधानं भास्करकृतं सरस्वतीभवनग्रन्थमालायां ९४-तमत्वेन वाराणसेयसंस्कृतविश्वविद्यालयेन १९६५-वर्षे प्रकाशितम्।

३६. भगवद्गीता, ३.४

३७. पाठोऽयं मुद्रितभास्करग्रन्थानुसारी। वस्तुतस्तु मूलमातृकायां "उपदेशे ग्रन्थे" इति नितरां स्पष्टा पाठलिपिः। सा चास्माभिः मूलमातृकायां स्वयं परीक्षिता। एवं स्थितेऽपि कुतोऽन्यथा वाचितः सम्पादकेनेति तु न विद्मः। "उपदेशे ग्रन्थे" इति मातृकास्थः पाठः साधीयानिति नः प्रत्ययः। अत्र हि 'उपदेश' इति भास्करविवक्षितं ग्रन्थनाम, न तु उपदेशग्रन्थ इति। उपदेशस्य चात्र ग्रन्थनामत्वं स्पष्टीकर्तुमेवात्र ग्रन्थ इति विशेषणं समयोजि भास्करेणेत्यवधेयम्। अन्यथा उपदेशशब्दमात्रप्रयोगे ग्रन्थबोधानुदयप्रसङ्गात्।

३८. पूर्वोल्लिखितं भास्करकृतं भगवद्गीताभाष्यम्, पृ० ८४। श्लोकार्धोऽयम् उपदेशसाहस्र्याः पद्यप्रबन्धस्याष्टादशप्रकरणाद् उद्धृतमित्यवसेयम्। दृश्यताम् उ० स०, १८-२१९।

३९. 'उपदेशः' इति भास्करविदितं प्राक्तनं ग्रन्थनाम परस्ताद् 'उपदेशसहस्री' इति वा 'उपदेशसाहस्री' इति वा कथं परिणमितं भवेदिति प्रश्नोऽस्माभिरग्रे समाधीयते।

४०. दृश्यतां 'निवेदन'-संज्ञितायाः सम्पादकस्य भूमिकायाः 'ट'–पृष्ठस्थोऽयं सन्दर्भः— "न हि भगवान् शङ्करः भास्करस्य नामोच्चारयति, न च भगवान् भास्करः शङ्करस्य। स्यादेतद् यत् तयोः शङ्करभास्करपूर्ववर्तिनोर्ज्ञानवादज्ञानकर्मसमुच्चयवादयोः शङ्करभास्करौ प्रख्यापकावेव। अत एकस्य मते अन्येन दूषिते न द्वयोराचार्ययोः समकालीनता पूर्वापरकालीनता वा प्रमातुं शक्यते।" (अत्र 'प्रमातुं' इत्यस्य स्थाने 'प्रमेतुं' इति प्रयुक्तं, तदस्माभिः प्रयोगसौष्ठवाय शोधितम्। अग्रेऽपि भूमिकायां सम्पादकमहोदयेन 'अनुमातुम्' इति प्रसिद्धमपहाय 'अनुमेतुं' इति प्रयुक्तम्। उभयमिदं चिन्त्यं भातीत्यन्यदेतत्।)

इदमत्राकूतं सम्पादकानां सुभद्रझामहोदयानाम्—यतोऽनयोराचार्ययोर्ग्रन्थेषु अन्यतरेणान्यतरस्य नाम क्वापि नोल्लिखतं दृश्यते, अत एवोभयेऽप्यमी आचार्याः परस्परानभिज्ञाः परस्परग्रन्थानभिज्ञाश्च। अतश्च शाङ्करभाष्यस्थाः भास्करावलम्बितभेदाभेदखण्डनपराः प्रसङ्गाः,भास्करीयभाष्यस्थाः अभेदवादमायावादादिपक्षखण्डने च प्रगाढाभिनिवेशप्रदर्शकाः प्रसङ्गाश्च परस्परपूर्वाचार्यपरम्पराप्राप्तपक्षखण्डनरूपतयैव व्याख्येयम्। अत एव चेदृशं वादखण्डनमाश्रित्यानयोर्मध्ये कस्याप्येकतरस्य अन्यापेक्षया पौर्वापर्यनिर्णयो न संगच्छते—इति। केवलं कुमारिलभट्टादर्वाक्त्वं भास्करस्य प्रमाणसिद्धमिति भास्करीयगीताभाष्यस्य भट्टवार्तिकवाक्योद्धरणेन स्पष्टीकरोत्यग्रे स्वभूमिकायां सुभद्रोपाध्यायः।

ग्रन्थस्यास्य प्रस्तावनालेखकैः संस्कृतविश्वविद्यालयस्य तदानीन्तनैः अनुसन्धानप्रतिष्ठानसञ्चालकैः पण्डिताग्रेसरैः श्रीबलदेवोपाध्यायैरपि कण्ठोक्तैरक्षरैः सम्पादकस्यायं पक्षः समर्थितः स्वीये प्रास्ताविके। तत्रेत्थं लिखन्ति ते—"पौर्वापर्यकालिकविषये बहुशः सन्दिह्यते पण्डितैः। केचन भास्करः शङ्कराचार्यादर्वाचीन इति मन्यन्ते; परन्तु गीताभाष्यस्यैतस्य सम्पादकवर्यो नानाभिरभिनवाभिर्युक्तिभिस्तस्य शङ्करादपरकालिकतां निरस्य पूर्वकालिकतामेव प्रमाणयति। इमा युक्तयस्तर्काश्च तद्विरचितभूमिकात एवावगन्तव्याः।"

—इति (पृष्ठ-ग)

४१. आस्तां नामान्यत्सर्वम्। भास्करीयं ब्रह्मसूत्रभाष्यं गीताभाष्यं वा पठतामापातदर्शिनामपि स्पष्टमिदं यत् शाङ्करमतखण्डनपरेषु भास्करीयभाष्यसन्दर्भेषु यादृशी खरतरा उद्वेगाग्निमुद्गिरन्ती भाषा प्रयुज्यते, यादृशः संरम्भः क्रोधावेश इव च प्रदर्श्यते, क्वचित् क्वचिच्च तान् प्रति यादृशा वैयक्तिकाः लाघवव्यञ्जकाः कठोराक्षेपाः क्रियन्ते, तत एवेदं समर्थयितुमस्त्यवकाशो, यदसौ भास्करः प्रौढवयाः परिणतवया वा भगवत्पादसमकालिकोऽभूल्लोके प्राप्तप्रतिष्ठः कश्चिदुत्तरमीमांसापण्डितो यो न सेहे सर्वत्र प्रसरन्तं तेजोविशेषजनितम् "अलोकसामान्यमचिन्त्यवैभवं" प्रतिष्ठाभूमानं नवनवोदितस्यास्याजातश्मश्रोर्बालकप्रायस्य शङ्कराख्यस्य, असूयाञ्चकार च तस्मै तेजस्विने यूने दावानलवत् प्रतिमुखागतं प्रतिपक्षवृक्षशतं क्षणेन क्षपयते। भगवत्पादशिष्याणां भास्करीयभेदाभेदपक्षखण्डने च यः संरम्भाग्रहो दृश्यते, सोऽपीदृशीमेव शङ्करभास्करयोः पौर्वापर्यकल्पनमुपोद्बलयतीति दिक्।

४२. 'उपदेश' इति मात्रं ग्रन्थनाम। तस्य यदृच्छाशब्दत्वेन ग्रन्थसंज्ञारूपत्वं स्फोरयितुमेव ग्रन्थविशेषणं प्रयुक्तमिति, मूलमातृकायां पुनः "उपदेशे ग्रन्थे" इति स्वच्छो व्यस्तपाठ उपलभ्यत इति, स चायं व्यस्तपाठ 'उपदेश'-शब्दस्येह ग्रन्थनामरूपत्वं समर्थयतीति चोक्तमेव पूर्वम्।

४३. द्वितीयप्रकरणस्य प्रथमश्लोकस्थितं 'प्रतिषेद्धुम्' इति प्रथमपदमाश्रित्य 'प्रतिषेधप्रकरणम्' इति नाम कल्पितम्, तथैवान्त्यस्योनविंशस्य प्रकरणस्य प्रथमपद्यप्रथमपादस्थं 'तृष्णाज्वरनाशकारणम्' इति पदमाश्रित्य 'तृष्णाज्वरनाशकम्' इति नाम कल्पितं दृश्यते आनन्दगिरिसम्मते प्राचीनतमपाठक्रमे। अत्रोभयत्रापि प्रतिषेधनाशादिरूपममङ्गलार्थं परिहर्तुकामैरर्वाचीनैर्ग्रन्थसंस्कर्तृभिरन्यथा कल्पितं नामान्तरमिति प्रतिभाति।

४४. पञ्चमं प्रकरणं 'मूत्राशङ्क'–शब्देनोपक्रमते, षष्ठञ्च 'छित्वा'–शब्देनेति ग्रन्थगता वस्तुस्थितिः। तत्र निर्णयसागरसंस्करणस्थसम्पादकीयटिप्पणीतोऽवगम्यते यत्क्वचिन्मातृकास्वनयोः 'मूत्राशङ्कप्रकरणम्' इति 'छित्वाप्रकरणम्' इति च नामनी उपलभ्येते। अनयोः स्थाने मातृकान्तरेषु 'बुद्ध्यपराध' इति, 'विशेषापोह' इति प्रकरणप्रतिपाद्यार्थानुगते नामनी दृश्येते। ईदृश एव नामनी दृश्येते आनन्दगिरिपाठसम्प्रदाये इति दिक्।

४५. प्रथमान्त्यप्रकरणद्वयवर्जमन्तरालस्थानां प्रकरणानां क्रमोपचीयमानश्लोकसंख्यालम्बनं प्रकरणक्रमविनिगमकसम्भावनमिदम् ऋग्वेदस्थानां दशमण्डलानां क्रमपरिकल्पनविनिगमकविषये पाश्चात्यविदुषां कथनं स्मारयेत्तदभिज्ञान्। तत्रापि प्रथमदशममण्डलद्वयवर्जमन्तरालस्थेषु द्वितीयादिसप्तमान्तेषु गोत्रमण्डलेषु स्थितां क्रमोपचीयमानसूक्तसंख्यामालम्ब्य मण्डलक्रमः कल्पित इति तेषां वादः। तमेनं प्रथमान्त्यमण्डलयोः सूक्तसंख्यास्थितमारोहक्रमभङ्गं हेतुत्वेनोपन्यस्यन्ति तेऽनयोर्मण्डलयोरर्वाग्भवत्वे इत्यन्यदेतत्। इह तु पौरुषेयत्वेन निश्चिते ग्रन्थेऽस्माभिरनयोरुपक्रमोपसंहारप्रकरणयोरर्वाक्संयोजित्वं तर्क्यंत इत्यवधारणीयम्। नैतावन्मात्रेणानयोः प्रकरणयोः भगवत्पादोपज्ञत्वे शङ्काङ्कुरप्ररोहोऽस्मन्मनसि। पूर्वसंदृब्धे उपदेशसंकलनरूपे ग्रन्थे भिन्नपाठपरम्पराप्राप्तयोरनयोः परस्तात्कैश्चित् संयोजितत्वेन श्लोकसंख्यायामारोहक्रमभङ्गः सूपपाद इति निष्कण्टकः पन्थाः।

४६. गद्यपद्यभागयोः पौर्वापर्यविषयेऽप्यस्ति पाठपरम्पराभेदः। आनन्दगिरिराचार्यो मन्यते गद्यभागं पूर्वतनम्, पद्यभागञ्च परतरम्। वाणीविलाससंस्करणानुसारेण निर्णयसागरमुद्रितरामतीर्थाचार्यटीकानुसारेण चानयोर्भागयोः क्रमो विपरीतः। टीकाद्वये क्रमवैपरीत्यं कथमजनीति तु न विद्मः; परन्तूभयत्रापि कण्ठोक्तैरक्षरैः प्रमाणीकृतमीदृग् वैपरीत्यम्। तथा हि—आनन्दगिर्याचार्या गद्यभागटीकोपक्रम इत्थं लिखन्ति—"सर्वोपनिषदर्थसारसंग्राहिका गद्यपद्यात्मिका हीयमुपदेशसाहस्री। तत्र पद्यभागं प्रागुक्तया परिपाट्या परिसमाप्य गद्यभागमवतारयन् भगवान् भाष्यकारः........" इत्यादि। रामतीर्थाचार्यास्तु पद्यभागटीकोपक्रमे गद्यभागस्य पूर्वत्वमित्थं प्रतिजानते—"तदेवं सर्वोपनिषदर्थसारसंग्रहं गद्यबन्धप्रबन्धेन संक्षेपतो युक्त्योपदिश्य पुनरप्युक्तमेवार्थजातं पद्यबन्धप्रबन्धेन सोपस्करं विस्तरेणोपदेष्टुकामो भगवान् भाष्यकारः........" इत्यादि।

४७. पद्यभागस्य श्लोकसंख्याने पूर्वोक्तानि त्रीण्यपि संस्करणानि प्रायशः सर्वत्र संवदन्ति। केवलमष्टादशे द्राघिष्ठे प्रकरणे वाणीविलाससंस्करणगणनया श्लोक-

संख्या न्यूना चतसृभिः । श्लोकपाठे तु नास्ति तुपादपि भेदः क्वचित् । गद्यभागे च प्रतिद्वात्रिंशदक्षरं श्लोक एक इति प्राचीनसम्प्रदायानुसारिगणनयापि गद्यभागस्य श्लोकसंख्या यथायथं सहस्रसंख्यापूरणी न भवति; किन्तु किञ्चिदधिकैव सहस्रतः । अत एव साग्रसहस्रत्वमाश्रित्य ग्रन्थनाम्नि सहस्रसंख्या योजिता स्यादित्यनुमातुमस्त्यवसरः ।

४८. प्रसङ्गेऽस्मिन्नन्यदप्यस्ति श्रद्धावधेयं विद्वद्भिः । गद्यभागप्रथमप्रकरणे पञ्चत्रिंश-खण्डान्तेऽस्ति श्लोक एकः समुद्धृतो भगवत्पादैः, तथा चोक्तमित्यवतरणिकया । स चायं श्लोकः पद्यभागस्य पञ्चदशे नान्यदन्यत्प्रकरणे यथाक्षरमुपलभ्यते । इदञ्च किञ्चिच्चित्रमिव प्रतिभाति यदाचार्यैः स्वोपज्ञमेव पद्यभागस्थं पद्यं तस्यैव ग्रन्थस्य गद्यभागे तथा चोक्तमित्युदहारि । उद्धरणेनानेनेदं सिद्धं भवति यत्पद्यभागो गद्यभागात्पूर्वं विरचित इति । कथमन्यथा पद्यमिदं तथा चोक्तमित्यु-द्ध्रियेताचार्यैः । कस्माच्चिदन्यस्मान्मूलात् प्राप्तं पूर्वाचार्यपद्यमिदं पद्यभागे भगवत्पादैः संयोजितं स्यादित्यादि सम्भावनं यद्यपि न दण्डवारितम्, तथापि तत्र प्रमाणं मृग्यं भवेत् ।

४९. प्रथितयशोभिः पूज्यैः पण्डितश्रीपट्टाभिरामशास्त्रिभिः तेषु दिवसेषु उत्तङ्कवृत्तान्त-विषये काचिच्चर्चोपस्थापिताभूदुपदेशसाहस्रीपञ्चमप्रकरणस्थ–मूत्राशङ्केत्यादि-पद्यालम्बना । अयमेवासीदपूर्वो दैवयोगो यद्बलाद् भास्करगीताभाष्यवाचनावसरे तत्र भ्रान्तासु पादटिप्पणीषु दुष्प्रत्यभिज्ञेयतया खण्डितं विप्रकीर्णं तत्पद्यं सद्यः प्रत्यभिज्ञातुमशक्नवाम ।

५०. भास्करकृतं गीताभाष्यम्, पृ० ८५ ।

श्रीशङ्करभगवत्पादानुमोदितोऽद्वैतवादः

आचार्यश्रीकरुणापतित्रिपाठी

कुलपतिचरः,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

एवम्,

अध्यक्षश्च,

उत्तरप्रदेशसंस्कृताकादम्याः

❀❀❀

भारतीयसंस्कृतवाङ्मयस्य सर्वस्वभूता वेदा एव, ते च कर्मोपासनाज्ञानात्मक-काण्डत्रयविलसिताः। तत्रोपनिषद् भाग एव ज्ञानकाण्डपदेन गीयते। तस्मिन्नुपनिषद्-भागे, महाभारते, भगवद्गीतायाम्, श्रीमद्भागवतादिमहापुराणेषु च सर्वत्राद्वैतवादः समुपलभ्यते। स एवौपनिषदोऽद्वैतवादो भगवता श्रीशङ्कराचार्येण विश्वस्य समक्षमा-नीतः, न तु नूतनः कश्चनाद्वैतवादः।

तथा हि—ईशावास्योपनिषदि 'यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति। सर्व-भूतेषु चात्मानं ततो न विजुगुप्सते' इति श्रूयते। तत्रात्मशब्दः प्रत्यगात्मपरस्तत्रैव तस्य रूढत्वात्। तथा चात्मनो जीवाख्यस्य सर्वजगदाधारत्वं सर्वशरीरेषु एकस्यैव वर्तमानत्वं चाद्वैतसिद्धान्तं प्रकाशयति। अत जगदाधारत्वेन जीवस्येश्वराभिन्नत्वं ध्वनितं भवति, जगत्स्रष्टुः जगदुपादानस्येश्वरस्यैव जगदाधारत्वसम्भवात्।

अथ च—

> यस्तु सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
> तत्र को मोहः कः शोकः एकत्वमनुपश्यतः॥

अयं भावः—यस्मिन् काले सर्वाणि भूतानि जीवान् विजानतस्तत्त्वज्ञस्यात्मैव संवृत्तानि, जीवानां स्वव्यतिरिक्ततया अभावात्, शरीरिणां मिथ्यात्वेनात्मनि कल्पित-त्वात्, आत्मभिन्नत्वेनाभावात्, तत्र तदा एकत्त्वमनुपश्यतः अद्वितीयमात्मानं पश्यतः शोकमोहादेरभावः सम्पद्यते—इति अद्वैतज्ञानस्य संसारनिवर्तकत्वमुक्तम्। केनोपनि-षदि—श्रोत्रस्य श्रोत्रम्, मनसो मन इति कथनेनेन्द्रियाणां स्वविषये प्रेरकं शुद्धमात्मानं कथयित्वा—

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यन्ति।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥

इत्यनया श्रुत्या प्रेरकस्य साक्षिणो ब्रह्माभेद उक्तः—इत्यद्वैतवादः स्फुटितो भवति।

यदि तु जीवभिन्नस्यान्तर्यामिणो ब्रह्मत्वोक्तिरत्र श्रुताविति प्रोच्यते, तत्तु न युक्तिसहम्, अन्तर्यामिणस्तस्य ईश्वरतयाभेदेनोपास्यत्वात्, नेदं यदिदमुपासते, इत्यस्य तस्मिन्नसामञ्जस्यात्। कठोपनिषदि भगवान् यमराजो नचिकेतसो दृढं वैराग्यं वेदान्तोपदेशयोग्यतां च दृष्ट्वा आत्मनो देहव्यतिरिक्तत्वमुपपाद्य मुमुक्षवेऽस्मै "तं दुर्दर्शं गूढमनुप्रविष्टम्" इति मन्त्रेण जीवं देवं स्वप्रकाशं ब्रह्म विदित्वा हर्षशोकौ जहाति, इति अद्वैतज्ञानस्य मोक्षसाधनत्वमुपदिदेश। अग्रे च "अङ्गुष्ठमात्रः पुरुषो मध्ये आत्मनि तिष्ठति ईशानो भूतभव्यस्य", "अङ्गुष्ठमात्रं जीवं देहादिभ्यः पृथक्कृत्य तं शुक्रममृतं ब्रह्म विद्यात्" इत्यादिभिर्बहुशो जीवब्रह्मणोरभेदः प्रत्यपादि।

प्रश्नोपनिषदि—षोडशकलं पृथिव्यादिप्रपञ्चस्रष्टारमुपक्रम्य "स ईक्षाञ्चक्रे कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि" इत्यादिना तस्य जीवरूपतया प्रतिपादनादभेदपरत्वं पर्यवस्यति।

मुण्डकोपनिषदि च—पुरुषात् परब्रह्मणः प्रपञ्चसृष्टिमुक्त्वा "पुरुष एवेदं विश्वम्" इति प्रपञ्चस्योपादानादभेदः प्रतिपाद्यते, यथा मृद् घट इति। तत्राभेदश्च ब्रह्मव्यतिरेकेण प्रपञ्चस्याभावे पर्यवस्यति।

छान्दोग्येऽप्युक्तम्—मृत्तिकेत्येव सत्यमिति। इदं सर्वं पुरुष एवेति च बाधायां सामानाधिकरण्यम्। तथा च प्रपञ्चस्य मिथ्यात्वं सिद्धं भवति।

माण्डूक्येऽपि—सुषुप्तावस्थायां प्राज्ञजीवस्य 'एष सर्वेश्वरः', 'एष सर्वज्ञः' इत्यादिना ब्रह्माभेदः स्पष्टतया प्रतिपादितोऽस्ति।

तैत्तिरीये च "स यश्चायं पुरुषे यश्चासावादित्ये स एकः"

इति अध्यात्माधिदैवतोपाधिभेदभिन्नयोः जीवब्रह्मणोः कण्ठत एवाभेदो निर्दिष्टः।

ऐतरेये च "ज्ञानमेव पुरुषं ब्रह्म ततमपश्यत्" इति मूर्धद्वाराऽन्तःप्रविष्टस्य जीवस्य ब्रह्मणा सहैकत्वं प्रतिपाद्यते। छान्दोग्ये च "वाचारम्भणं विकारो नामधेयम्, मृत्तिकेत्येव सत्यम्" इति उपादानसत्यत्वम्, विकारानृतत्वं च स्फुटं निर्दिष्टमस्ति। न चात्रेतिशब्दोपादानं किमर्थमिति वाच्यम्, तस्याद्यार्थकत्वेन मृत्तिकादि सत्यम्, तदपेक्षया तत्कारणस्येत्येवं ब्रह्ममात्रसत्यत्वे पर्यवसानात्।

अपि च "तत्त्वमसि" इति महावाक्येन जीवब्रह्मणोरभेद उच्यते। ननु शरीरवाचकानां शरीरिवाचित्वात्त्वमित्यस्य त्वच्छरीरकमित्यर्थ इति चेत्—तन्न शोभनम्, असिपदस्यानुपपत्तेः, नववारमभ्यस्ते लक्षणाया अनौचित्यात्। अपि च—अनृताभिसन्धस्य बन्धः, सत्याभिसन्धस्य च मोक्षः, इति प्रतिपादनेन दृष्टान्तद्वारा ब्रह्मज्ञानवतो मोक्षः, ब्रह्मणः सत्यत्वम्, प्रपञ्चाभिनिविष्टस्य बन्धः, प्रपञ्चस्य मिथ्यात्वं सुष्ठु प्रतिध्वन्यते। बृहदारण्यके च मैत्रीये ब्राह्मणे—"न वाऽरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति" इत्यादिना आत्मन अनौपाधिकप्रेमविषयत्वमुक्त्वा "आत्मा वा अरे द्रष्टव्यः" इत्यनेन तस्यैव द्रष्टव्यत्वमुक्त्वा तस्यैवात्मनः "अस्य निःश्वसितमेतद् ऋग्वेदो यजुर्वेदः" इत्यादिना वेदमूलत्वं जगदुपादानत्वं चोच्यते। तेन ज्ञायते जीव एवावस्थान्तरगतः सन् ब्रह्म इति।

अयमाशयः—सर्वेषां स्वात्मा प्रियः, पत्यादयोऽपि प्रियाः, इत्यनुभवसिद्धम्। तत्र पत्यादीनां प्रियत्वं न पतित्वादिप्रयुक्तम्; अपि तु स्वेष्टसम्पादकत्वेन प्रयुक्तम्। अतः स्वात्मनः सर्वदा प्रियत्वात्, पत्यादेस्तु स्वेष्टसम्पादकत्वदशायामेव प्रियत्वात्, निरतिशयप्रीतिविषयत्वं द्रष्टव्यत्वं च आत्मनः सिध्यति, तस्य परमात्माभिन्नत्वाच्च जगदुत्पत्तिस्थितिप्रभृतिहेतुत्वमेतत्प्रकरणे यदुक्तम्, तत् सङ्गच्छते। भगवता श्रीगौडपादाचार्येणापि अद्वैतवादस्यौपनिषदत्वं सुस्पष्टं प्रतिपादितमस्ति। तथा हि—तदीये मुख्यतमे ग्रन्थे माडूक्यकारिकाभिधे सन्ति चत्वारि प्रकरणानि—१. आगमप्रकरणम्, २. वैतथ्यप्रकरणम्, ३. अद्वैतप्रकरणम्, ४. अलातप्रकरणं च। तत्र प्रथमप्रकरणे आगमाख्ये जाग्रदाद्यवस्थात्रयचिन्तनम्, ब्रह्मचिन्तनम्, तत्प्राप्त्युपायप्रणवचिन्तनं च। अत एवास्य प्रकरणस्यागमप्रकरणं नाम। मुख्यमुपेयोपायचिन्तनम्। उपेय आत्मा, उपायः प्रणवोपासनम्। अत्रैकोनत्रिंशत्संख्याकाः कारिकाः सन्ति, तत्राष्टादशसु कारिकासु उपेय आत्मा चिन्तितः। अवशिष्टासु एकादशसु उपायः प्रणवोपासनं चिन्तितम्। अयमात्मा शरीरे स्थितस्त्रिविधामवस्थामनुभवति—जाग्रत्स्वप्नसुषुप्त्याख्याम्। जाग्रदवस्थापन्नोऽयं शरीर उपचाराद् विश्व इत्युच्यते। स्वप्नावस्थापन्नः स तैजस उच्यते। सुषुप्तिमापन्नः प्राज्ञ इत्युच्यते। प्रथमः शारीर आत्मा चक्षुषि, द्वितीयस्तैजसो मनसि, तृतीयश्च प्राज्ञो हृदयाकाशे वर्तते। प्रथमो विश्वस्तु बाह्यविषयाननुभवति, अतो बहिष्प्रज्ञः, द्वितीयस्तैजसोऽन्तःस्थितान् विषयाननुभवति, अन्तःप्रज्ञः, तृतीयः प्राज्ञः सुषुप्तो न किञ्चिदनुभवति, अतो न प्राज्ञ इत्युच्यते।

अवस्थात्रयातीतोऽयमात्मा तुरीय इत्युच्यते। कस्यापि विशेषस्याभावात् किञ्चिन्नाम न विद्यते, इदं तुरीयमेव आत्मनो मुख्यं स्वाभाविकं स्वरूपम्। तदेव

मायाविनिर्मुक्तमद्वैतं शिवं तुरीयं रूपम्। तुरीयामवस्थां वर्णयता भगवता गौड-पादाचार्येणोच्यते—

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ (मा० का० १।१६)

अत्र प्रथमे प्रकरणे सृष्टिप्रक्रियाऽपि विचारिताऽस्ति। सर्वं तत्तु कल्पितं मायामात्रम्। तथा हि—

प्रभवः सर्वभूतानां सतामिति विनिश्चयः।
सर्वं जनयति प्राणश्चेतोंऽशून् पुरुषः पृथक् ॥ (मा० का० १।१७)

अत्रत्याः सर्वे विचारा उपनिषत्सम्मता एव। अत एव व्याख्यातारः पदे पदे उपनिषदंशान् उद्धरन्ति। द्वितीयेऽपि प्रकरणे "मायामात्रमिदं द्वैतम्" इत्युक्त्वा द्वैतस्य मिथ्यात्वमुक्तम्।

शुद्धे आत्मनि पूर्वं जीवकल्पना, पश्चात् सर्वस्य बाह्यान्तरप्रपञ्चस्य, रज्जौ सर्पकल्पनावत्। तथा हि—

जीवं कल्पयते पूर्वं ततो भावान् पृथग्विधान्।
बाह्यानाध्यात्मिकाँश्चैव यथाविद्यस्तथा स्मृतिः ॥ (मा० का० २।२६)

अस्याः कारिकाया भाष्ये भगवता श्रीशङ्करेणोच्यते—

'योऽसौ स्वयं कल्पितो जीवः सर्वकल्पनायामधिकृतः' इति। अयमाशयः—सर्वकल्पनाया मूलभूता जीवकल्पना इति। स्वप्नदृष्टान्तेन जागरितेऽपि भावानां मिथ्यात्वं प्रतिपादितम्। यथा स्वप्ने कश्चिद् दूरदेशं गत्वाऽपि प्रबुद्धः सन् स्वशय्यायामेव स्वमुपलभते, तथैव जागरिते दृश्यमाना अपि भावा वितथा एव। एवमेव स्वप्नजागरितयोः प्रतीयमानो भेदोऽपि मिथ्यैव। वस्तुतः स्वप्नजागरितयोरभेद एव।

अद्वैतनामकं तृतीयं प्रकरणम्—"अद्वैतं समनुप्राप्य" इत्यादिकया अद्वैतप्राप्तिरुपदिष्टा।

एवमेव अलातशान्तिनामके चतुर्थेऽपि प्रकरणे "बुद्ध्वा पदमनानात्वम्" इत्यादि वचनैः अद्वैत एवोपसंहारः कृतः।

मीमांसाश्लोकवार्तिके (पृ० ६६३) "स्वयं च शुद्धरूपत्वादभावाच्चान्यवस्तुनः। स्वप्नादिवदविद्यायाः प्रवृत्तिस्तस्य किं कृता" इत्यादिना अद्वैतवादः पूर्वपक्षतयोपस्थापितोऽस्ति। तथा मीमांसाभाष्यटीकाकृता प्रभाकरेण—यदि परं ब्रह्मविदामेष निश्चयो यदुपलभ्यते, तदसत्, यन्नोपलभ्यते तत्त्वमिति नमस्तेभ्यः। विदुषि नोत्तरं वाच्यमिति अत्र परिहारः, इति अद्वैतमतं स्पष्टं निर्दिश्यते।

व्याकरणदर्शनेऽपि "शब्दब्रह्मविवर्तभूतं जगत्" इति सिद्धान्तः। तत्र यदि शब्दतत्त्वस्य चेतनत्वमुपलभ्यते, तदा तेषामपि वेदान्तदर्शनानुगुणत्वमेव, नास्ति विवादावसरः।

उक्तं च भगवता बादरायणेन—अन्यभावव्यावृत्तेरिति स्फोटस्य चेतनत्व-ब्रह्मान्यत्वव्यावृत्तेरित्यर्थः। "न भेदादिति चेन्न, प्रत्येकमतद्वचनात्" इति सूत्रमपि अद्वैतपरम्। तथा हि—ब्रह्म निर्विकल्पमेकलिङ्गमिति यदुक्तम्, तन्न, प्रतिविद्यं ब्रह्मण आकारभेदात् चतुष्पाद् ब्रह्म, षोडशकलं ब्रह्म, वामनीत्वादिगुणं ब्रह्म इति। तस्मात् सविशेषं ब्रह्मवाच्यमिति चेन्न, प्रत्येकमतद्वचनात्, प्रत्युपाधिभेदं ब्रह्मणोऽभेदवचनात्, यश्चायमस्यां पृथिव्यां तेजोमयः, यश्चायमध्यात्मं शारीरः, पुरुषोऽयमेव सः—इत्यादौ इति। अत्रापि अद्वैतवादो ध्वनित एव।

अत्र विशिष्टाद्वैतभाष्यकाराः—"भेदादिति चेन्न, प्रत्येकमतद्वचनात्" इत्यादौ नञ्रहितं सूत्रं मत्वा "ईश्वरस्य उभयलिङ्गस्य तत्तद्देवताशरीरयोगरूपावस्थाभेदाद् अपुरुषार्थयोगः स्यादिति चेन्न, प्रत्येकं यः पृथिव्यां तिष्ठन्, य आत्मनि तिष्ठन् इत्यादौ अमृतत्ववचनेन तत्सम्बन्धप्रयुक्तापुरुषार्थः प्रतिषेधादिति व्याचक्रुः। तन्न रोचते तत्त्वविद्भ्यः।

"अरूपवदेव हि तत्प्रधानत्वात्" इदं सूत्रं शङ्कराचार्यरीत्या अनाकारमेव ब्रह्म प्रतिपत्तव्यमुपनिषदा, निराकारब्रह्मप्राधान्यात्, साकारवाक्यानामुपासनापरत्वात्। ततश्च अस्थूलादिवाक्यैर्ब्रह्मनिर्गुणमेवेत्यर्थः। विशिष्टाद्वैतिभिस्तु—उभयलिङ्गत्वं निर्दोषत्वं कल्याणगुणवत्त्वं च स्थापयितुमिदमधिकरणम्, तत्र पृथिव्यादिस्थानस्थत्व-प्रयुक्तदोषो नास्ति—इत्यनेन सूत्रेण प्रतिपाद्यते।

सूत्रार्थस्तु—अरूपवत्, अरूपसदृशं तद् ब्रह्म, प्रधानत्वात्, निर्वाहकत्वेन प्रधानत्वादिति, अरूपसदृशमित्यनेन कर्मवश्यत्वरहितमित्यर्थः, प्रधानत्वात् = निर्वाह-कत्वादित्यर्थ इति व्याख्यायते।

अत्रेदं विचार्यते—अरूपवदित्यस्य अरूपसदृशमित्यर्थे सादृश्यं केन रूपेणेत्या-कांक्षाया अपूरणाद् अरूपाणामाकाशादीनां ब्रह्मणश्च साम्यं केन रूपेणेति प्रश्ने भवदुक्ति-रेव नियामिका वाच्या। अपि च प्रधानत्वं निर्वाहकत्वं भवतु, तेन कर्मवश्यत्वराहित्यं कथं सिद्धयति, लोके देशप्रधानानां राज्ञां तदभावात्।

अपि च न स्थानतोऽपि इत्यत्र दोषराहित्यं साध्यम्, अध्याहार्यं नानुवृत्तम्। अपि च अरूपवदेवेत्युक्ते उभयलिङ्गत्वं साकारानाकारपरत्वे यथा स्वरसम्, तथा अरूपसादृश्ये न स्वरसम्, स्वशब्देनापि सूत्रकारेण अकर्मवश्यत्वोक्तिसम्भवेन लाक्षणिक-प्रयोगायोगादिति संक्षेपः।

एवं भगवद्गीतास्वपि अद्वैतवादः स्वारसिकः प्रतीयते । तथा हि—

मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ।
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ॥

अत्र प्रपञ्चमिथ्यात्वं स्वरसतः प्रतिभाति । प्रतिपन्नोपाधौ त्रैकालिकप्रतिषेधप्रतियोगित्वरूपमिथ्यात्वस्यात्राभावात् । मत्स्थानीति प्रत्यभिप्रायम् । न च प्रतिषेधः । क्षेत्रज्ञं चापि मां विद्धि इति जीवब्रह्मभेदप्रतिपादकम् । अत्र मामित्यस्य मच्छरीरं मन्नियम्यमित्यर्थकरणं श्रुतिबाह्यम् । गीताचार्यस्य तथैव कथनस्योचितत्वात्, शरीरिवाचिनः शरीरपरत्वस्य मन्मतेऽप्यभावात् ।

भगवत्पादैश्च बृहदारण्यकभाष्ये केषाञ्चिद् भर्तृप्रपञ्चप्रभृतीनां व्याख्यामुपक्रम्य "शोभनेयं कल्पना न तु श्रौती", "सर्वमेतद् बार्हदारण्यकम्" इत्युक्तम्, तच्चु स्वीयव्याख्यायाः श्रुत्यनुसारित्वं परव्याख्यायाः श्रुत्याशयबाह्यत्वे तात्पर्यं मन्तव्यम् ।

आचार्यपादैश्च पोषितो विस्तारितश्च योऽद्वैतवादः, स तु नाधुनिकः; अपि तु वेदादिसकलप्रमाणग्रन्थमूलक इति सिद्धम् ।

श्रीमता भगवता शङ्कराचार्येण समर्थितोऽद्वैतवादः, केवलाद्वैतवादः, निर्विशेषाद्वैतवादः, ब्रह्माद्वैतवादः, औपनिषदाद्वैतम्, इत्यादिनामभिः प्रसिद्धः । यतो ह्यत्र केवलं निर्विशेषं ब्रह्मैवैकं तत्त्वमुपनिषत्प्रतिपादितं सत्यमिति स्वीकृतम् । ब्रह्मातिरिक्तं सर्वं दृश्यमानं जगज्जीवश्च मिथ्या । दृश्यमदृश्यं च सर्वं ब्रह्मैव ब्रह्मणो जगतो जीवस्य च द्वैततया भानेऽज्ञानमविद्या वा कारणम् । अज्ञाने नष्टे भेदबुद्धेरपगमे सति जगज्जीवरूपस्य प्रपञ्चस्याभावो भवति । प्रपञ्चाभावे एकमद्वैतं ब्रह्मावभासते ।

एतदर्थं भगवत्पादैस्तदनुयायिभिश्च—अध्यासवादः, विवर्तवादः, अविद्या (माया), अनिर्वचनीयख्यातिः, प्रातिभासिकसत्ता, व्यावहारिकसत्ता, पारमार्थिकसत्ता, अभिन्ननिमित्तोपादानवादः, बिम्बप्रतिबिम्बवादः, अवच्छेदवादः, आभासवादः, अजातिवादः, दृष्टिसृष्टिवादादयश्च प्रतिष्ठापिताः ।

अध्यासः—

सकलप्रपञ्चस्य मूलकारणमध्यास एव । अयमध्यासो नैसर्गिको मिथ्याप्रत्ययस्वरूपः, कर्तृत्वभोक्तृत्वप्रवर्तको लोकव्यवहारहेतुः । अध्यासबलेनैव प्रमाणप्रमेयरूपः समस्तलोकव्यवहारः प्रवर्तते । अतस्मिंस्तद्बुद्धिरध्यासः कथ्यते । अध्यासमविद्यामपि मन्यते । अनेनाध्यासेन रज्जौ सर्पत्वारोपः, शुक्तौ च रजतत्वारोपो जायते । तेन रज्जौ सर्पबुद्धिः, शुक्तौ च रजतबुद्धिरुदेति । अविद्याया निर्वृत्तौ च रज्ज्वाः शुक्तेश्च वास्तविकं ज्ञानं जायते । एवमेव नित्यशुद्धबुद्धसच्चिदानन्दरूपे स्वप्रकाश्ये परमार्थरूपे ब्रह्मणि

दृश्यमानसकलश्चराचररूपः प्रपञ्चोऽवभासते। अत्रावभासनेऽध्यासोऽविद्याऽज्ञानं नैव कारणम्। अविद्योपगमे ब्रह्मसाक्षात्कारे जाते जागतिकः प्रपञ्चो विलीयते, पारमार्थिकं सद् रूपं ब्रह्मैव केवलमद्वैतमवतिष्ठते। अध्यासस्य सर्वमान्यं लक्षणं ब्रह्मसूत्रशाङ्कर-भाष्यस्योपोद्घाते उक्तम्—स्मृतिरूपः परत्र पूर्वदृष्टावभासः।

विवर्तवादः—

अध्यासेन सद्ब्रह्मणि असतः प्रपञ्चस्य प्रतीतिर्भ्रान्तिरूपा। अत इयं प्रतीतिर्न ब्रह्मणो विकारः परिणामो वा; किन्तु विवर्तः। विकारः परिणामो वा तात्त्विकोऽन्यथा-भावो यथा पयसो दधिरूपेण परिणामः। विवर्तश्च अतात्त्विकोऽन्यथाभावो यथा रज्जौ सर्पः, शुक्तौ रजतं च। एवमेव दृश्यमानमखिलं जगज्जीवस्य ब्रह्मणो विवर्तरूपम्, न परिणामरूपम्। यतो हि यथा रज्जौ सर्पबुद्धौ सत्यां भ्रान्त्यपगमे च रज्जुरेवाव-तिष्ठते, तथैव अविद्यानिर्वृत्तौ ब्रह्मसाक्षात्कारे जाते प्रपञ्चापगमे केवलं ब्रह्मैवावतिष्ठते।

एवञ्च जगदिदं ब्रह्मणो विवर्तरूपम्। विवर्तवादस्वीकारेणैव ब्रह्मणो निर्वि-कारत्वसिद्धिः, जगतोऽपारमार्थिकत्वसिद्धिः, ब्रह्मणश्चाद्वैतसिद्धिः।

अविद्या—

अयञ्चाध्यासो विवर्तश्चाविद्यया सिद्ध्यति। अविद्या-अज्ञानम्। सा चाविद्या ब्रह्मणः शक्तिर्मायाप्रकृत्यादिशब्दव्यपदेश्या, अनादिः, न भावरूपा, न चाभावरूपा; किन्तु भावाभावविलक्षणा, तत्त्वातत्त्वाभ्यामनिर्वचनीया, ब्रह्मणो भिन्नत्वाभिन्नत्वाभ्यां चानि-रूपणीया त्रिगुणात्मिका जगन्मूलभूता। सा च विशुद्धसत्त्वप्रधानतया माया, मलिनसत्त्व-प्रधानतया चाविद्येत्युच्यते। अस्मिन्मते मायाऽविद्ययोर्वास्तविको भेदो न मन्यते। इयमेव ईश्वर-जीवयोर्भेदं जनयति। मायोपाधिक आत्मेश्वरः, अविद्योपाधिक आत्मा जीवः। अविद्याया द्वे शक्ती स्तः—१. आवरणशक्तिः, २. विक्षेपशक्तिश्च।

आवरणशक्त्या नित्यं शुद्धं बुद्धं मुक्तमप्यात्मानमनित्यम् अशुद्धमबुद्धं बद्धं च मन्यते लोकः। स्वप्रकाशस्य चैतन्यरूपस्यात्मनः स्वरूपबोधे बाधिका भवतीयं शक्तिः। विक्षेपशक्त्या समस्तोऽयं जागतिकः प्रपञ्चो जायते। अविद्ययैव नामरूपात्मकं जगत्प्रति-भाति। जगतो विवर्तने उपादानादिकारणमित्थमाचार्यैर्निरूपितम्। संक्षेपशारीरकानु-यायिभिरीश्वरस्य चैतन्यमेव विवर्ततयोपादानकारणम्। माया तु केवलं द्वारकारणम्। वाचस्पतिमिश्रैस्तु रज्जुसर्पदृष्टान्तेन ईश्वरस्य चैतन्यभाग एव विवर्ततयोपादानकारणम्, माया तु नैव कारणम्; किन्तु सहकारिमात्रं न किमपि परिणाम्युपादानं कारणम्।

"अथ ब्रह्मैव परार्द्धमगच्छत्। तत्परार्द्धं गत्वा ऐक्षत कथं न्विमाँल्लोकान् प्रत्यवेयामिति। तद् द्वाभ्यामेव प्रत्यवैद् रूपेण च नाम्ना च" (शतपथब्रा० ११।१।२।३)।

भगवता शङ्करेण अविद्यायाः कृते इमे शब्दाः प्रयुक्ताः—मिथ्याज्ञानम्, मिथ्याप्रत्ययः, मिथ्याबुद्धिः, अव्यक्तम्, महासुषुप्तिः, आकाशः, अक्षरः, अध्यासः, माया चेति।

अविद्याया भेदः—

इयमविधा द्विविद्या—एका मूला, अपरा तूला। यथा हि—"अनिर्वाच्याविद्याद्वितयसचिवस्य" इति भामतीमङ्गलश्लोकव्याख्याने, कल्पतरौ—एका ह्यविद्या अनादिभावरूपा देवताधिकरणे वक्ष्यते। अन्या पूर्वपूर्वभ्रमसंस्कारः, तदविद्याद्वितयं सत्त्वासत्त्वाभ्यामनिर्वाच्यम्। एवमेवानावृत्त्यधिकरणे—"सम्यग्दर्शनविध्वस्ततमसाम्" इति भाष्यपदव्याख्याने भामत्याम्—"द्विधा अविद्यातमः"। अत्र कल्पतरौ द्विधा कार्यकारणरूपा। "रचनानुपपत्त्यधिकरणे प्रवृत्तेश्च" (ब्र० सू० २।२।२) इति सूत्रभामत्यामपि अविद्याया विक्षेपशक्तेर्वर्णनमस्ति। वृहदारण्यकभाष्यवार्तिके मूलविद्यामाह—अविद्या प्रथते मौली व्यक्ताव्यक्तात्मनाऽनिशम् (१।२।१३६), मूलाज्ञानस्य तूलाज्ञानहेतुत्वात् (प० पा० पृ० २९)।

अविद्याया आश्रयो विषयश्च—

अविद्याया आश्रयस्तथा विषय एक एव, उत द्वाविति विषये शाङ्करसिद्धान्ते मतद्वयमस्ति। भामतीप्रस्थानेऽविद्याया आश्रयो जीवः, ब्रह्म तु विषयः। विवरणप्रस्थानेऽविद्याया आश्रयो विषयश्च जीव एवेत्यङ्गीकृतम्। यथा भामतीप्रस्थाने—अन्तःकरणाद्यवच्छिन्नः प्रत्यगात्मा इदमनिदंरूपश्चेतनः कर्त्ता भोक्ता कार्यकारणाविद्याद्वयाधारः, अहङ्कारास्पदं संसारी सर्वानर्थसम्भारभाजनं जीवात्मा (अध्यासभामत्याम्)।

अपरत्रापि श्रीवाचस्पतिमिश्रेणैतदुपपादितम्। विवरणप्रस्थाने तु अविद्याया आश्रयविषयभेदविषयपरिहारेण तत्रैक्यं प्रतिपादितम्। यथा हि—'न तावदज्ञानम्, आश्रयविषयभेदापेक्षम्; किन्तु एकस्मिन्नेव वस्तुनि आश्रयत्वमावरणत्वं चेति कृत्यद्वयं सम्पादयति। स्वाश्रयापवरकप्रदेशे कृत्यद्वयसम्पादिततमोवत् प्रक्रियात्मकत्वादावरणत्वाच्च नहि तमो वस्तुद्वयापेक्षमवभासते।

एवमेवान्यत्रापि विवरणकारैः प्रतिपादितम्। मधुसूदनसरस्वतीभिः सिद्धान्तबिन्दौ प्रथमश्लोके श्रीपद्मपादाचार्य-श्रीवाचस्पतिमिश्र-श्रीसर्वज्ञात्ममुनीनां त्रयाणामपि एतद्विषयकः पक्षः सुष्ठु वर्णितः।

ब्रह्म—

सच्चिदानन्दरूपम्, जगतोऽधिष्ठानभूतम्, सजातीयविजातीयस्वगतभेदशून्यम्, एकमेवाद्वितीयं परमार्थतत्त्वं ब्रह्म इति व्यपदिश्यते। अत्र शाङ्करसिद्धान्ते—'इदं

सर्वं यदयमात्मा' इत्यादिश्रुत्या सार्वात्म्योपवर्णनमुखेन 'नेह नानाऽस्ति किञ्चन' इत्यादि श्रुत्या प्रपञ्चनिषेधमुखेन, 'एकमेवाद्वितीयं ब्रह्म' इत्यादि श्रुत्या सर्वविधभेद-प्रतिषेधमुखेन च ब्रह्म त्रिधोपलक्षितं भवति।

अखण्डाकारवृत्तेर्विषय उपहितं ब्रह्म शुद्धं वा—

अखण्डाकारवृत्तेर्विषय उपहितं ब्रह्मेति भामतीकारमतम्। तथा हि—तस्माद् निर्विचिकित्सवाक्यार्थभावनापरिपाकसहितमन्तःकरणं त्वंपदार्थस्यापरोक्षस्य तत्तदुपाध्या-कारनिषेधेन तत्पदार्थतामनुभावयतीति युक्तम्। न चायमनुभवो ब्रह्मस्वभावो येन न जन्यते; अपि तु अन्तःकरणस्यैव वृत्तिभेदो ब्रह्मविषयः। न चैतावता ब्रह्मणोऽपि परप्रकाश्यताऽऽपत्तिरिति वाच्यम्, शब्दज्ञानप्रकाश्यस्य स्वप्रकाशत्वानपायात्। कल्पतरौ परिमले चापि स्पष्टीकृतोऽयं विषयः।

जीवस्वरूपम्—

अविद्योपाधिकं ब्रह्मैव जीव इत्युक्तमस्ति शाङ्करभाष्ये (ब्र० सू० २।३।४६) अन्तःकरणावच्छिन्नं ब्रह्म जीव इत्यवच्छेदवादे द्रष्टव्यम्। अयं जीवो नाणुर्न मध्यम-परिमाणः; किन्तु विभुः। जीवस्य नानात्वमेकत्वं चेति पक्षद्वयम्।

मोक्षस्वरूपम्—

श्रवणमननादिना 'तत्त्वमसि' इत्यादिमहावाक्यार्थबोधाच्च अविद्याया निरासे जाते स्वस्वरूपप्रत्यक्षं मोक्षः। उक्तं च भगवत्पादैः—'ब्रह्मभावश्च मोक्षः' (१।१।४) इति। मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिरिति च। अविद्यानिवृत्तिरपि मोक्ष इत्यपि न मतान्तरम्, अभावस्याधिकरणरूपतायां स्वस्वरूप एव पर्यवसानात्। जीवन्मुक्तिरपि सम्मानिता आचार्यचरणैः श्रीशङ्करभगवत्पादैः।

अविद्यानिवृत्तिर्विद्ययैव सम्पद्यते, विद्या च तत्त्वमस्यादिमहावाक्यार्थबोधादुदेति। अतश्च ज्ञानमेव मोक्षस्य साधनम्। उक्तं च 'ऋते ज्ञानान्न मुक्तिः' इति।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥

❀

षण्मतस्थापनाचार्याः श्रीशङ्कराचार्याः

डॉ० श्रीगौरीनाथशास्त्री

कुलपतिचरः,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

❀❀❀

तत्र तावदेकैकमतस्य स्थापक एकैक आचार्यः प्रसिद्धः। एवं सति श्रीशङ्कराचार्याणां कथं षण्मतस्थापकत्वम्? षट्सु मतेषु मोक्षसाधने यदि भेदः स्यात्, तदा परस्परविरुद्धवादिन आचार्या अनुपादेयवचनाः स्युः। अपि च षण्मतानि—शैवम्, वैष्णवम्, शाक्तम्, गाणपत्यम्, कौमारमिति पञ्च, षष्ठं त्वद्वैतमेव। यद्यप्यद्वैतं श्रौतम्, न कस्यचिदाचार्यस्य मतम्, तथापि श्रुतिसिद्धत्वात् श्रुतिमतमिति व्याख्येयम्। यद्यपि सर्वाण्येतानि श्रुतिमूलकानि, तथापि प्राक्काले भेदभ्रान्त्या भिन्नभिन्नान्येवेति जना मेनिरे। भगवत्पादैस्तु—यथैकं नगरं गन्तुं बहवः पन्थानः सन्ति, तथा ब्रह्मभावरूपमोक्षं गन्तुं भिन्ना एते मार्गा इति न भ्रमितव्यम्। किन्तु ब्रह्मैव एकं तत्त्वं, तज्ज्ञानादेव ब्रह्मप्राप्तिरूपो मोक्षः। ब्रह्मण एव शिवविष्ण्वादयो देवाः। उपाधिभेदेन परस्परं भिन्नाः। 'स ब्रह्म स शिवः, स हरिः, सेन्द्रः, सोऽक्षरः परमः स्वराट्' इति श्रुतेः, 'इन्द्रं मित्रं वरुणमग्निमाहुः, अथो दिव्यः स सुपर्णो गरुत्मान्, एकं सद् विप्रा बहुधा वदन्ति विष्णुं यमं मातरिश्वानमाहुः' इति मन्त्रवर्णाच्च।

एकस्य निर्गुणस्य ब्रह्मणः कथं बहुभाव इति चेत्? उपाधिभेदादित्याह 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छत्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा' इति श्रुतेः। उपाधिश्च माया त्रिगुणात्मिका। गुणाश्च सत्त्वरजस्तमांसि। गुणविशिष्टमायाभेदादेकस्यैव ब्रह्मणो भेदः। माया च न सत्या; किन्तु सदसद्विलक्षणा। एकस्यैव ब्रह्मणस्तत्तद्व्यापारे तत्तदनुगुणसत्त्वादिगुणाश्रयणं न विरुध्यते—

भगवान् श्रीशङ्करः परब्रह्मणः सत्त्वप्रधानगुणांशेनावतीर्णः 'सत्त्वात् संजायते ज्ञानम्' इति वचनाज्ज्ञानप्रधानः। श्रीरामाद्यवताराः केवलसत्त्वाश्रिता न, अपि तु रजस्तमोभ्यां मिश्रिताः।

तत्र भगवत्पादास्तत्तद्देवतासु भक्तिजननाय तद्दाढर्याय च बहूनि स्तोत्राणि व्यरचयन्। तत्र ब्रह्मणः सविशेषरूपाणि पुरुषरूपाणि ब्रह्मविष्णुशिवरूपाणि त्रीणि। स्त्रीरूपाणि च लक्ष्मीसरस्वतीगौरीरूपाणि त्रीणीति सिद्धान्तबिन्दौ श्रीमधुसूदनसरस्वत्यः। तत्र 'ईश्वरात् ज्ञानमन्विच्छेत्' इति वचनान्मोक्षसाधनीभूतब्रह्मज्ञानप्राप्तये शिवभक्तेरन्तरङ्गसाधनत्वमभिप्रेत्याचार्यैः बहूनि शिवस्तोत्राणि व्यरच्यन्त। इयमत्र शास्त्रप्रक्रिया—निर्गुणे ब्रह्मणि मनसः समाधानं दुष्करम्।

'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते'॥

इति वचनात्। सगुणे तु श्रीकृष्णरामादिलीलाभावनया मनः सुप्रवेशम् पामराणामपि किमुत पण्डितानाम्। भगवद्भक्तानां तु—

'तेषां नित्याभियुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते'॥
'तेषामेवानुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता'॥

इत्युक्तेः सगुणभक्त्येश्वरानुग्रहात् स्वयमेव तत्त्वज्ञानं मनसि प्रादुर्भवति। अतः शिवभक्तिजननाय मृत्युञ्जयमानसपूजा आचार्यैं रचितानि शिवस्तोत्राणि च।

अत एव शिवभक्तिप्रधानायां शिवानन्दलहरीस्तुतौ भक्तेः स्वरूपमाचार्यैः प्रदर्श्यते—

'अङ्कोलं निजबीजसन्ततिरयस्कान्तोपलं सूचिका
साध्वी नैजविभुं लता क्षितिरुहं सिन्धुः सरिद्वल्लभम्।
प्राप्नोतीह यथा तथा पशुपतेः पादारविन्दद्वयं
चेतोवृत्तिरुपेत्य तिष्ठति यदा सा भक्तिरित्युच्यते॥' इति।

अत्र भक्तिप्रकर्षस्य पर्यवसानं भजनीयब्रह्माभेदमाह। तथाहि—अङ्कोलाख्यवृक्षबीजं वृक्षमूल एव पतति। तद्वज्जीवः स्वमूलकारणं ब्रह्मैव मोक्षार्थमाश्रयति। भगवांस्तु स्वाश्रितभक्तरक्षणपरो यथा—अयस्कान्तोऽय आकर्षति, तथा भक्तं स्वसंनिकर्षमाकर्षति। इयं द्वितीयावस्था। ततः साध्वी प्रोषितभर्तारं मनसि सदा चिन्तयन्त्येव निवृतबाह्यव्यापारा भवति यथा, तथा भक्तः भगवच्चिन्तनमात्रपरो यत् पश्यति, यत् स्पृशति, तत् सर्वं ब्रह्मैवेति चिन्तयति। ततस्तदुपरितनावस्थायां दृष्टान्तः—लता क्षितिरुहमिति। यथावृक्षं संवेष्ट्य स्थिता लता न पृथक् कर्तुं शक्यते। बलात्कारेण पृथक्करणे त्रुट्यति,

तथा भक्तो भक्तेर्विघ्नकरणे म्रियेतैव। तदुत्तरावस्थायां दृष्टान्तः—सिन्धुः सरिद्वल्लभम् इति। यथा नदी समुद्र एकीभवति तथा भक्तो ब्रह्मण्येकीभवति। अयमेकीभावो गौणः। एवमेव तत्त्वज्ञानादविद्यानाशे ब्रह्मभावः सुलभः।

आचार्या द्वादशे वर्षे नेपालदेशं प्राप्य तत्रत्यगुह्येश्वरीमाराध्य देवीपज्झटिकास्तुतिं चक्रुः। तत्र तस्मिन् स्तोत्र आचार्या वदन्ति—

द्रविडशिशुर्यतिशङ्करनामा ज्ञेयस्त्वत्पदपङ्कजधामा।
अस्य तथापि यदि भवबन्धस्तर्हि समाधिस्तेऽनृतसन्धः॥ इति।

आचार्याः श्रीचक्रस्थदेवताः प्रत्येकं स्तुवन्ति तेन तत्पूजापरा इति ज्ञायते—

'त्रैलोक्यमोहनमिति प्रथिते तु चक्रे
चञ्चद्विभूषणगणत्रिपुराधिवासे।
रेखात्रये स्थितवतीरणिमादिसिद्धी-
र्मुद्रा नमामि सततं प्रकटाभिधास्ताः॥

सर्वानन्दमये समस्तजगतामाकाङ्क्षिते बैन्दवे
भैरव्या त्रिपुराधया विरचितावासे स्थिता सुन्दरी।
आनन्दोल्लसितेक्षणा मणिगणभ्राजिष्णुभूषाम्बरा
विस्फूर्जद्वदना परावररहः सा पातु मां योगिनी॥ इति।

षण्मतस्थापनं नाम—उक्तानां मतानां वैदिकत्वस्थापनं परमपुरुषार्थत्वस्थापनं च। नैतद् वैष्णवाद्याचार्यैः कृतमिति विशेषः। न हि ते शिवालयं प्रविशन्ति। न वा गृहे शिवं पूजयन्ति। शिवपूजायामयमधिको विशेषः श्रीभगवत्पादैरुपनिबद्धः—

'अरहसि रहसि स्वतन्त्रबुद्ध्या वरिवसितुं सुलभः प्रसन्नमूर्तिः।
अगणितफलदायकः प्रभुर्मे जगदधिको हृदि राजशेखरोऽस्ति॥' इति।

कैश्चित् प्रभवो रहस्येव द्रष्टुं सुलभाः। केचित् सभास्वेव। भगवान् शिवस्तु रहसि वा प्रकाशे वा सुलभः। दृष्टा अपि प्रभवोऽस्मत्तो बहु धनमपेक्षन्त इति मत्वा न प्रसन्नाः। भगवांस्तु यत्र कुत्रापि पश्यतु सुलभः प्रसन्नश्च। गमनफलं च धनादिकमहापेक्षितादधिकं ददाति, 'आशुतोष उमापतिः' इति न्यायात्। यथा महाभारते जलं प्रार्थयमानाय तावदुदङ्काय भगवान् श्रीकृष्णोऽमृतं प्रादात्। शरीरव्यतिरिक्तमात्मानं जिज्ञासवे नचिकेतसे भगवान् यमो ब्रह्मसाक्षात्कारं ददौ।

भगवदर्पणं च प्रधानम्, नार्प्यमाणविषय उत्कर्षादिसापेक्षता। अत एव भगवान् गीतासु—

'पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रियमात्मनः' इत्याह।

इदं च शिवभक्तावपि समानम्। एतादृशमौदार्यञ्च यथा शिवस्य तथा गणपतेः, गुहस्य, अम्बिकायाश्च।

आचार्यैः शिवमानसपूजा, देवीमानसपूजा, देवीचतुष्षष्ट्युपचारः मन्त्रमातृकामानसपूजा, एवं निर्गुणब्रह्मोपासकस्य निर्गुणमानसपूजाऽपि निबध्यते भक्तानामुपकाराय। देवीमानसपूजा भगवत्पादीयमानसपूजासूत्तमं स्थानमर्हति।

देवीवेदपादस्तवे—

यत्रैव यत्रैव मनो मदीयं तत्रैव तत्रैव तव स्वरूपाम्।
यत्रैव यत्रैव शिरो मदीयं तत्रैव तत्रैव पदद्वयं ते॥

त्रिपुरसुन्दरीमानसपूजास्तोत्रान्ते च—

चक्षुः पश्यतु नेह किञ्चन परं घ्राणं न वा जिघ्रतु।
श्रोत्रं हन्त शृणोतु न त्वगपि न स्पर्शं समालम्बताम्।
जिह्वा वेत्तु न वा रसं मम परं युष्मत्स्वरूपामृते।
नित्यानन्द विघूर्णमाननयने नित्यं मनो मज्जतु॥ इति।

भगवत्पादानां प्रार्थना। इदानीं षण्मतस्थापनाचार्यत्वं भगवतः सप्रयोजनमुपपादनीयम्। भगत्पादावतारात् पूर्वं शैववैष्णवादिमतानि भिन्नभिन्नदेवताकानि भिन्नभिन्नप्रकाराणि भिन्नभिन्नफलानि भिन्नभिन्नप्रमाणभूततत्तदागममूलकान्यासन्। तदा तद्भक्तानां न तदाचार्याणां च परस्परं संघर्षः। तेन राज्यविभागोऽप्यभविष्यत्। यथा पाकिस्थानम्।

भगवत्पादकृतेन सर्वेषां मतानां तत्तद्देवतापूजनद्वारा खल्वैहिकामुष्मिकफलं मोक्षसाधनीभूतजीवब्रह्मैक्यज्ञानफलं च प्राप्तुं शक्यते। तेन सर्वेषां मतानां मोक्ष एव मुख्यं फलमिति निर्धारणात् तत्र च सगुणोपासनानां तत्तद्देवतानुग्रहद्वारा ब्रह्मज्ञानप्राप्त्या सर्वेषामपवर्गः सिध्यति।

अत एव मधुसूदनसरस्वत्यः 'कृष्णात् परं किमपि तत्त्वमहं न जाने' इत्याहुः। अप्पय्यदीक्षितास्तु 'शिवात् परतरं नो भजे' इत्याहुः। भाष्यव्याख्यातारः रामानन्दाश्च सर्वेषां वेदान्तानां रामाख्ये ब्रह्मणि समन्वयं ब्रुवन्ति

आत्मज्ञानविषये मीमांसानयतत्त्वम्

महामहोपाध्यायः पद्मभूषण-आचार्यश्रीपट्टाभिरामशास्त्री

❀ ❀ ❀

आस्तिक-नास्तिकभेदेन विभक्तास्सर्व एव दार्शनिकाः 'किमिदं जगत्' 'कस्मादिदं प्रावर्तिष्ट' 'तेन सहास्माकं सम्बन्धः कथमागतः' 'तस्य सम्बन्धस्य विच्छेदो भवितुमर्हति न वा' इत्यादीन् निषयान् स्वस्वप्रतिभानुसारेण चिन्तनशक्तिमुपयुज्य विवेचितवन्तः। तास्ताः क्रियाः क्रमेण विकासमुपयान्ति। पाकक्रियामेव पश्यामः—अति चिरन्तने काले जानपदा गोमयकण्डिकाभिरेव पाकक्रियां सम्पादयन्ति स्म, तदनु काष्ठैः पचन्ति स्म, तदनन्तरं मृत्तिकातैलं पाकसाधनत्वेन पर्यगृह्णन्, अधुना तु 'गेस्'पदाभिधं साधनं समायातं यथा, तथैव दार्शनिकविचारधारा अपि विकसिता अभवन्। एतावांस्तु विशेषः–पाकसाधनान्यपच्छेदन्यायेन दुर्बलान्यजनिषत, दार्शनिकविचारधारास्त्वविच्छिन्न-गुरुशिष्यपारम्पर्येण सम्प्रदायेन कथञ्चिज्जीवन्ति। सम्प्रदायो नामाविच्छिन्नगुरुशिष्य-पारम्पर्येण विद्याप्राप्तिरेव। पारम्पर्येण परिप्राप्तानां विद्यानां पठनं पाठनं स्वस्वसम्प्रदाया-नुसारेण ग्रन्थनिर्माणं लेखप्रकाशनमित्यादिकं प्रचलत्येव। एकेनापरं मतं खण्डितमित्येव तन्मतं लुप्तमित्यवधारयितुं न शक्यते। एवमत्र दार्शनिकैर्न्यायिस्स्वीकृतः—

'अन्यैस्सह विरोधे तु वयं पञ्चोत्तरं शतम्।
परस्परं विरोधे तु वयं पञ्च शतञ्च ते'॥ इति।

यस्य यस्य यादृशी चिन्तनधारा तत्तदनुसारेण विचाराः सम्प्रवृत्ताः। इमे विचाराः कामं भवेयुर्मिथो विरुद्धाः। विरोधोऽयं मिथः कलहायेति न प्रत्येतव्यम्। विरोधपरिहाराय बुद्धिरुपयोक्तव्या। तेन च बुद्धेराहारः कल्पितो भवति। यथा हि शरीरपोषणायाहारो भवति, तथैव बुद्धेः परिपोषणाय दार्शनिकचिन्तनं प्रवृत्तम्। सर्वोऽपि दार्शनिकः स्वीयं प्रमाणं तर्कञ्चोपस्थाप्य प्रमेयं साधयति। मानाधीना खलु मेयसिद्धिः। कोऽपि दार्शनिको विना प्रमाणेन स्वीयं प्रमेयं न साधयति।

तत्र प्रत्यक्षमेकमेव प्रमाणमिति निर्धार्य प्रवृत्तः कश्चन, प्रत्यक्षमनुमानञ्चेति द्वयं स्वीकृत्य प्रवृत्तोऽपरः, पूर्वोक्तप्रमाणद्वयेनोपमानमपि संयोज्य तृतीयः, शब्दमपि संयोज्य चत्वारि प्रमाणान्यवलम्ब्य चतुर्थः। एवं पञ्च षट् सप्ताष्टौ चेति प्रमाणानि स्वीकृत्य दार्शनिकाः प्रवृत्ताः। प्रमाणानां विकासेनैव दार्शनिकविचाराणामपि

वैशद्यमनुभूयते। न कोऽपि दार्शनिकः स्वबुद्धिमेव प्रमाणीकरोति। बुद्ध्या सुविचिन्त्य स्वीकृतप्रमाणेन तत्साधयतीति दार्शनिकानां पन्थाः। तत्तद्दार्शनिकसिद्धान्तानुसारेण यथा प्रमाणेषु क्रमशो वृद्धिस्तथैव दर्शनानामपि क्रमशो वृद्धिरजायतेति कथनं नायुक्तियुक्तम्। यद्यपि ते ते सम्प्रदाया अनिदम्प्रथमताकात्कालात् प्रवृत्ताः, न तत्र पूर्वापरभावो निर्णेतुं शक्यते, तथापि विकासवादिन ऐतिहासिकदृष्ट्या पूर्वापरभावं निर्णेतुं चेष्टन्ते। मम तु प्रतिभाति—चेष्टेयं मुधैवेति। शास्त्रानुसारेण पदार्थानां विवेचनम्, ऐतिहासिकदृशा तेषां विवेचनञ्च भिन्नं भवति। पाश्चात्त्यविद्वद्भिर्यो मार्गः प्रदर्शितस्तमेव वयमवलम्बमानाः कालगणनां सम्प्रति कुर्मः। ते हि वेदानामपि कालगणनायां प्रवृत्तास्तेषां पूर्वापरभावं निश्चिन्वन्ति। निश्चयश्च तेषां भाषाशैलीमात्रप्रयुक्तः। केवलं भाषाशैल्यैव निश्चयो न कर्त्तव्यः; किन्तु तत्र शास्त्रदृष्टिरपि योजनीया भवति। शास्त्राविरोधेनैतिहासिकी दृष्टिर्यदि फलति, तर्हि सैवोपादेयेति चिरन्तनी पद्धतिः। कस्मिंश्चिदुदाहरणे विषयमिमं परिशीलयामः—

वेदत्वेन स्वीकृतेषु ब्राह्मणग्रन्थेषु तत्र तत्र 'तदु चैके' 'तन्नादर्तव्यम्' 'तद्धैके' ''तदु तथा न कर्त्तव्यम्' इति दृश्यते। अनेन स्फुटमवगम्यते पूर्वापरभावः। तदेकत्र पश्यामः—किमैतिहासिकदृशा कर्तुं शक्यते न वेति? शतपथब्राह्मणे (१-२-४-११) 'तद्धैके स्रुक्संमार्जनान्यग्नावभ्यादधति, तदु तथा न कुर्यात् तस्माद् परास्येदेवैतानि' इति श्रूयते। एवं तैत्तिरीयब्राह्मणे (३-३-२) स्रुक्संमार्जनान्यग्नौ प्रहरति, तानि चैके वृथैवापास्यन्ति, तत्तथा न कार्यम्, तस्मात्तान्यग्नावेव प्रहरेत्' इत्याम्नायते। अनयोस्सन्दर्भयोरयमर्थः—जुहूपभृद्ध्रुवाणां पात्राणां संमार्जनं क्रियते वेदाग्रैर्दर्शपूर्णमासयोः। वेदो दर्भमुष्टिविशेषः। तदग्राणि संमार्जनानि कथ्यन्ते। तैः स्रुचां पात्राणां संमार्जनं क्रियते। संमार्जनानन्तरं तेषां प्रासनं कर्तव्यम्। एके तु तान्यग्नौ प्रक्षिपन्ति। तत्तथा न कर्तव्यम्, प्रासनमेव कर्तव्यमिति शतपथसन्दर्भस्यार्थः। तैत्तिरीयशाखायान्तु—एके तानि वृथैव प्रास्यन्ति तत्तथा न कर्तव्यम्, अग्नावभ्याधानमेव कर्तव्यमिति प्रतिपादितम्। अत्र शतपथतैत्तिरीयब्राह्मणयोः पूर्वापरभावः केनापि निर्णेतुं न शक्यः। शास्त्रीयदृशैवास्य परिहारोऽनुसन्धातव्यः। एतादृशानि स्थलानि सङ्ख्यातीतान्युपलभ्यन्ते वेदेषु। स्वबुद्धिमात्रेणास्य परिहारो दुष्करः। प्रमाणमवलम्ब्यैव परिहारः कर्तव्यः। यदि कदाचित्प्रमाणं किमपि न लभ्यते तर्हि शास्त्रानुसारेण तर्कमुपस्थाप्य परिहाराय यत्नो विधातव्यः।

तत्र सर्वेषु दर्शनेषु सूत्र-वार्त्तिक-भाष्य-व्याख्योपव्याख्यारूपेण क्रममवलोकयामः। उत्तरोत्तरस्य पूर्वं पूर्वमवलम्ब इति तावत्सिद्धम्। तत्र सूत्ररचनायाः किं मूलमित्यनु-

सन्धातव्यम्। मम चात्र प्रतिभाति—जगतीतले विशिष्य च भारते तादृशः कालो नासीत् यत्र च वेदविद्याचर्चया विना लोकास्तूष्णीमासन्निति। घोरारण्येषु तीव्रे तपसि वर्तमानाः कन्दमूलफलाशिनो महर्षयो मन्त्रद्रष्टारः स्वस्वानुभवविषयाणां मन्त्राणां गोष्ठीष्वर्थचर्चावसरे तत्तन्मन्त्रगतं तत्त्वं निश्चित्य स्वान्तेवासिनोऽध्यापयाम्बभूवुः। अद्यापि सम्प्रदायानुसारेणाधीतवेदविद्याः श्रोत्रिया मन्त्राणां सूक्तानाञ्चर्षिछन्दोदेवताः कीर्तयन्तस्तान् ऋषीन् स्मरन्ति। अनेन स्मरणेनाविच्छिन्नः सम्प्रदायोऽनुवर्तमानोऽस्तीति स्फुटमवगम्यते।

यथा हीदानीं वेदवचस्सु श्रद्धाविहीना भूयसा सन्ति तथाऽतिप्राचीनेऽपि काले केचनासन्नल्पसङ्ख्यया, वेदवचस्सु च विशेषेण श्रद्दधाना भूयांसोऽवर्तन्त। संख्ययाऽल्पीयांसोऽपि वेदवचस्सु विश्वासरहिता अपि दार्शनिकीं दृष्टिमादधाना अनल्पान् ग्रन्थान् न्यभान्त्सुस्ते। तेषां किं प्रमाणमिति जिज्ञासायां मूलपुरुषस्योपदेश एवेति वक्तव्यं भवति। एवञ्चोपदेशक्रमेणैव नास्तिकदर्शनान्यपि प्रवृत्तानीत्येष्टव्यम्। उपदेशश्च शब्दात्मकः, स चोच्चारणक्रियाभिव्यङ्ग्यः, श्रोत्रग्राह्यश्चेति मीमांसानयसिद्धः पन्थाः। 'येन येन प्रमीयते तत्तत्प्रमाणम्' इति न्यायेन शब्देनापि प्रमीयते, अतश्शब्दोऽपि प्रमाणमिति सिध्यति। ये च शब्दः प्रमाणमिति न स्वीकुर्वन्ति, तेषु भवत्प्रणीतानां ग्रन्थानां प्रमाणं किमिति पृष्टेषु तैर्वक्तव्यं भवेत् प्रमाणरहिता इति वा मूलपुरुषोपपदेशो वेति। अन्ततोगत्वा प्रामाण्यसिद्ध्यर्थं मूलपुरुषोपदेशः प्रमाणमिति तैर्बलाद्वक्तव्यमेव भवेत्। अवैदिका भवन्तु वैदिका वा तैर्मूलभूत उपदेशात्मको ग्रन्थविशेषः परिरक्ष्यत इति साम्प्रतं वयमनुभवामः।

अयमत्र निर्गलितोऽर्थः—वैदिका वेदं पुरस्कृत्य गच्छन्ति, अवैदिकाश्च मूलपुरुषोपदेशं पुरस्कृत्य गच्छन्ति। तत्र शून्यनैरात्म्यक्षणभङ्गुरादिवादिनां मूलपुरुषोपदेशः प्रमाणम्, वैदिकानाञ्च पुरुषदोषलेशासंस्पृष्टो वेदः प्रमाणम्। सर्वेषां शब्दात्मकं तत्त्वं मूलमित्यत्र न विवादः। शब्दस्तु स्वतो दोषयुक्तो न भवति, किन्तूच्चारयितृसम्बन्धादेव तत्र दोषः कल्पनीयो भवति। उच्चारयिता चेदाप्तस्तर्हि तत्र दोषसङ्गमो न भवत्येव यस्य च शब्दस्य केनापि सम्बन्धेन पुरुषसंस्पर्शो नास्ति, तत्र दोषः कथमुद्भाव्यताम्। शब्दैस्सह पुरुषस्य सम्बन्धस्त्रेधा भवितुमर्हति शब्दोत्पादकत्वेन, शब्दार्थसम्बन्धकरणेन, वाक्यवाक्यार्थसम्बन्धकर्तृत्वेन। त्रिविधा अपि सम्बन्धा महर्षिजैमिनिना भाष्यकृता शबरस्वामिना, वार्त्तिककारैर्भट्टपादैरन्यैश्च मीमांसकैः परिशीलिताः सुपरीक्षिताश्च।

सर्वोऽपि दार्शनिकः स्वाभिमतं कञ्चन मसृणं पन्थानं परिकल्प्य गच्छति। गच्छन् परैः पथि प्रक्षिप्यमाणं प्रस्तरखण्डादिकं दूरीकृत्य गच्छतीति समेषां दार्शनिकानां

सरणिः। तत्र भट्टपादानां सरणिर्विलक्षणा। इमे हि परम्परया समागते मसृणे पथि परैः प्रक्षिप्तान् क्षुद्रपाषाणान् दूरीकुर्वन्तोऽपि तान् आत्मसात्कृत्य स्वीये पथि नयन्ति। ते हि स्मृतीनां पुराणादीनां पौरुषेयाणां प्रामाण्यसाधनावसरे लिखन्ति—'सर्गप्रलयोपवर्णनमपि देवपुरुषकारप्रभावप्रविभागदर्शनार्थम्। सर्वत्र हि तद्बलेन प्रवर्तते तदुपरमे चोपरमतीति। विज्ञानमात्र-क्षणभङ्ग-नैरात्म्यादिवादानामप्युपनिषदर्थवादप्रभवत्वं विषयेष्वात्यन्तिकं रागं निवर्तयितुमित्युपपन्नं सर्वेषां प्रामाण्यम्' (तं० वा० पृ० १६८ पूना-संस्करणम्) धर्मतत्त्वनिश्चयेऽवैदिकानां नाधिकार इत्यत्रैव तात्पर्यं भट्टपादानाम्। चिन्तन-विशेषप्रसूता ये दार्शनिकविषया अवैदिकानां ते निरसिता अपि भट्टपादैस्तेषां वादिनां यन्महातात्पर्यविषयीभूतं विषयेष्वात्यन्तिकरागनिवृत्तिरूपं तत्स्वीकृत्य ते स्वीये पथि नीयन्ते। विषयवैतृष्ण्यावाप्तिः प्राधान्येन वैराग्याधीना। जगत्सम्बन्धिषु विषयेषु लोकानां तृष्णा सहजा। नीलकण्ठः कविराह—

'आकर्ण्यन्ते तपनतनयग्रामसंलापघोषाः
　आपृच्छ्यन्ते चिरजिगमिषासम्भ्रमाः प्राणवाताः।
मन्दं मन्दं ग्रसति नियतः कालपाशोऽपि कण्ठे
　नैवेदानीमपि विषयवैमुख्यमभ्येति चेतः' ॥

एतदर्थं जगच्छून्यमिति वा विज्ञानातिरिक्तं किमपि नास्तीति वा स्वं विहायान्यत्किमपि नास्तीति वा प्रतिपादनं वैराग्यातिशयजननायैव। अवैदिकानां वादाः कलहाय न समुत्पन्नाः। शान्तिप्रतिरूपफलजनकत्वेनैव सर्वाणि शास्त्राणि निर्मितानि। य एव सर्वशास्त्रसिद्धान्ताभिज्ञस्तस्य मनश्शान्तमेव तिष्ठति। एकदेशं ज्ञात्वा यस्तिष्ठति, सोऽशान्तहृदयो भूत्वा कलहाय प्रवर्तेत। मद्विरुद्धमयं वदतीत्येतावता कलहो न कर्तव्यः। तस्य मूलं किमप्यस्ति न वेत्यन्वेषणीयम्। अन्वेषणेन मूले लब्धे तत्तात्पर्यं किमिति बोद्धव्यम्। यदि तात्पर्यमपि न बुद्ध्यते, तर्हि तदुन्नेयम्। उन्नीते तात्पर्ये स्वतात्पर्यानुगुण्यं यदा पश्यति तदा कलहस्य कोऽवसरः। एतावानाशयो भट्टपादानाम्।

यथावस्थितश्शब्दः पुरुषसम्बन्धेनैव दोषवान् भवति न तत्र सहजो दोष इति पुरुषसम्बन्धश्च त्रेधा भवितुमर्हति, प्रकारत्रयस्य तत्र सम्भवो नास्तीति च प्रागवोचम्। पुरुषस्य शब्दानामुच्चारण एव व्यापारो न तु तन्निर्माणे, नापि तस्यार्थेन सम्बन्धकरणे। तादृशाश्शब्दा भवितुमर्हन्ति वेति विचारार्होऽयं विषयः। एतदर्थं वृद्धव्यवहारविहीनः कालः कश्चन लोक आसीन्न वेति निश्चेतव्यम्। आसीदित्युक्ते महत्सङ्कटमापतेत्। देश-

भेदेन प्रान्तभेदेन स्वस्वकर्मवशेन मानवशरीराणि प्राप्तवतां मिथो व्यवहाराय भाषाभेदेन शब्दान् समुत्पाद्य तेषामर्थेन सह सम्बन्धञ्च कारयित्वा मानवाः शिक्षणीया भवेयुः। तत्रापि सङ्कटमापतेत्—कर्तारः शिक्षकाश्चानेके उतैक एव कर्ता शिक्षकश्च। पक्षद्वयमपि दुरूपपादम्। लोके वृद्धव्यवहारविहीनः कालो नासीदित्युक्ते पूर्वोक्तसङ्कटान्मुक्तिर्लभ्येत। तदिदं शबरस्वामिन उपपादयन्ति—'न हि सम्बन्धव्यतिरिक्तः कश्चन कालोऽस्ति, यस्मिन्न कश्चिदपि शब्दः केनचिदर्थेन सम्बद्ध आसीत्। कथम्? सम्बन्धक्रियैव हि नोपपद्यते। अवश्यमनेन सम्बन्धं कुर्वता केनचिच्छब्देन कर्तव्यः। येन क्रियते तस्य केन कृतः। अथान्येन केनचित्क्रियेत तस्य केनेति नैवावतिष्ठते। तस्मादवश्यं अनेन सम्बन्धं कुर्वताऽकृतसम्बन्धाः केचन शब्दा वृद्धव्यवहारसिद्धा अभ्युपगन्तव्याः' इति।

सम्बन्धकर्तारमभ्युपेत्य विचारयामः—वेदशब्दानामपि सम्बन्धकर्तारमङ्गीकृत्य वेदाः केनचन प्रणीता इति वक्तव्यम्। तत्रार्थं बुद्ध्वा शब्दरचनेति क्रमेण शब्दरचना खल्वेष्टव्या। एवं सति कञ्चन मन्त्रमादाय विमृशामः—

'अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्'॥

अत्राग्नेः पञ्च विशेषणानि सन्ति। पौरोहित्यं कुर्वन्तोऽग्निमनुभूयैवाग्नेः पुरोहित इति विशेषणं सङ्गच्छते। एवमग्नेर्देवत्वमृत्विक्त्वं होतृत्वं रत्नधातमत्वञ्चानुभूयैव विशेषणतया प्रयोगमुपपद्यते। कोऽयं महात्मा यश्चेमानि बुद्ध्वाऽग्नेर्विशेषणत्वेन प्रयुक्तवान्। एवमादिकं सुविचिन्त्य जैमिनिर्निरुपद्रवं मार्गं प्रदर्शयामास। तमेव मार्गं शबरस्वामिनः परिष्कुर्वन्तस्तत्र तत्र वदन्ति—'यच्छब्द आह तदस्माकं प्रमाणम्', 'शब्दः किमिव न कुर्यात्' इति। धर्माधर्मयोः स्वरूपं शब्दातिरिक्तेन प्रमाणेन न खल्ववगन्तुं शक्यम्। अतश्शब्दप्रमाणे महानादरो मीमांसकानाम्। शब्दश्च भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवञ्जातीयकमर्थं शक्नोत्यवगमयितुं नान्यत्किञ्चनेन्द्रियम्। 'अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि' इति भट्टपादाः। वेदशब्दस्सर्वत्र तथाभूतस्यैवार्थस्य प्रतिपादको भवति। लौकिकश्शब्दस्तूच्चारयितृपुरुषसम्बन्धेन कदाचिदतथाभूतमर्थं ब्रूयात्। वेदवचस्तु उच्चारयिता आप्तो वा भवत्वनाप्तो वा वितथार्थप्रतिपादकं कदाचिदपि न भवति। अतस्तत्र महानादर आस्तिकदार्शनिकानाम्। अपौरुषेयत्वं वेदानामनभिलषन्तोऽपि केचन दार्शनिका ईश्वरोक्तिरिति स्वीकृत्य तेषां प्रामाण्यमास्थिषत। 'उपदेश' इति जैमिनिः, 'आप्तोपदेश' इति गौतमश्च वेदान् व्यवहरतः।

६

एतावता जैमिनेर्नये तावदाप्तत्वेनाभिमत ईश्वरो नास्तीति न मन्तव्यम्। उपनिषद्भागस्यापि वेदस्य प्रामाण्यं जैमिनिना साधनीयमेव। तत्र जैमिनिबादरायणौ मिथः संलपन्तौ संहिताब्राह्मणवाक्यान्यहं विवृणोमीति जैमिनिः, उपनिषद्वाक्यान्यहं विवृणोमीति च बादरायणः प्रवृत्तौ। अतो न कश्चन दोषः। वेदवेद्यत्वं धर्मस्य परमात्मनश्च समानम् 'सर्वैश्च वेदैरहमेव वेद्यः' इति भगवद्वचनात्। धर्मोऽपि चोदना-लक्षणः। धर्मशास्त्रमात्मशास्त्रमिति च पूर्वोत्तरमीमांसयोर्व्यवहारः। तत्राप्यन्तः-प्रविश्य विचार्यमाणे यथाऽर्थज्ञानं कर्मानुष्ठानं प्रति सामान्यसम्बन्धबोधकप्रमाणान्तर-निरपेक्षात् लिङ्गादङ्गं भवति, तथैवोपनिषत्प्रभवात्मज्ञानमपि तेनैव प्रमाणेनाङ्गं भव-तीति भट्टपाद-खण्डदेव-कमलाकरभट्टप्रभृतिभिस्समाश्रितमिति 'आत्मज्ञानविषये मीमांसानयतत्त्वम्'।

●

शङ्करः शङ्करः स्वयम्

पद्मश्रीः पं० रघुनाथशर्मा

❀❀❀

अस्ति दर्शनसूत्राणां श्रेयस्तमं निःश्रेयससिद्धये वेदव्यासेन विनिर्मितं व्याससूत्रम्। अस्ति च कर्मावबोधकं जैमिनिसूत्रं द्वादशाध्यायीरूपम्। तदिदं द्वयमेकं शास्त्रं शास्त्रद्वयं वेति विषयः। तत्रेदं सूत्रद्वयमेकशास्त्रमिति वैष्णवाः। शास्त्रद्वयमिति श्रीशङ्करभगवत्पादानुयायिनः। तत्र ज्ञानकर्मसमुच्चयो निश्श्रेयससाधनमिति वैष्णवाः। एतन्मते ज्ञानमुपासनारूपमुपनिषत्सु प्रसिद्धम्। तेन सह कर्मणां समुच्चयः संभवतीति वैष्णवानामाशयः। श्रीशङ्करभगवत्पादानुयायिनां त्वयमाशयः—ज्ञानमद्वितीयात्मतत्त्वज्ञानम्। तेन सह कर्मणां समुच्चयो न संभवति। ज्ञाते द्वैतं न विद्यत इति तेषां सिद्धान्तः।

द्वैतबुद्धिं विना कर्मासंभवात्। एवं वैष्णवाः पूर्वोत्तरमीमांसाद्वयात्मकमेकं शास्त्रं वदन्ति। पूर्वोक्तरीत्या च श्रीशङ्करभगवत्पादानुयायिनस्तु शास्त्रद्वयमिति। एवं च वैष्णवमते 'अथातो ब्रह्म जिज्ञासा' इति सूत्रस्यायमर्थः—'अथ धर्मावबोधानन्तरम्, अत कर्मब्रह्मावबोधयोः समुच्चयस्य निःश्रेयससाधनत्वाद् ब्रह्मजिज्ञासा ब्रह्मविचारः प्रारभ्यते। अत्र जिज्ञासापदस्य विचारे लक्षणा' इति।

श्रीशङ्करभगवत्पादानुयायिनस्त्वस्य सूत्रस्यैवमर्थं वर्णयन्ति—अथशब्द आनन्तर्यार्थः परिगृह्यते। तथा च साधनचतुष्टयसम्पत्त्यनन्तरमित्यथशब्दस्यार्थः। अतःशब्दो हेत्वर्थ इति शांकरभाष्यम्। अग्रे चातःशब्दः शाङ्करभाष्ये एवं व्याख्यातः—यस्माद्वेद एवाग्निहोत्रादीनां श्रेयः साधनानामनित्यफलतां दर्शयति—तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्यादिः। तथा ब्रह्मविज्ञानादपि परं पुरुषार्थं दर्शयति—'ब्रह्मविदाप्नोति परम्' इत्यादिः। तस्माद् यथोक्तसाधनसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा कर्त्तव्या। तस्य च ब्रह्मणो लक्षणं द्वितीयसूत्रे उक्तम्—"जन्माद्यस्य यतः" इति। अस्य सूत्रस्य वैष्णवा एवमर्थमाहुः—अस्य जगतो यतो जन्मादि जन्मस्थितिभङ्गं भवति, तद् ब्रह्म। तथा च ब्रह्मणो जगतः पारमार्थिकं जन्मादि वैष्णवा आहुः। श्रीशङ्करभगवत्पादानुयायिनस्तु ब्रह्मणो जगतो जन्मादि विवर्तभूतं मन्यन्ते। वस्तुभूतसृष्टौ ब्रह्मणो जगदाकारेण विकारापत्तेः।

तृतीयं सूत्रं "शास्त्रयोनित्वादि"ति । अत्र द्विधा समासं द्वयेऽपि मन्वते शास्त्रं योनिर्ज्ञापकं यस्य ब्रह्मणः, तत्त्वादिति । शास्त्रस्य योनिरुत्पत्तिकारणमिति षष्ठीसमासो वेति । तत्र विशिष्टस्य शास्त्रयोनित्वं वैष्णवा आहुः । जगतो विवर्तोपादनत्वं तु श्रीशङ्करभगवत्पादानुयायिनः प्राहुः ।

तत्तु समन्वयादिदं चतुर्थं सूत्रम् । अत्र वैष्णवा आहुः—कर्मणि प्रमाणन्तु शास्त्रं समन्वयात् । कर्मण्येव शास्त्राणां समन्वयात् । शब्दानां सिद्धार्थप्रतिपादकत्वाभावादिति । श्रीशङ्करभगवत्पादानुयायिनस्त्वाहुः—तच्छास्त्रप्रमाणकं ब्रह्म शास्त्राणां ब्रह्मणि सिद्धार्थे प्रामाण्यसंभवात् । दृष्टं हि लोके सिद्धार्थस्यापि वाक्यस्य प्रामाण्यं 'चैत्रपुत्रस्ते जातः' इत्यादौ । 'ईक्षतेर्नाशिब्दम्' इदं पञ्चमं सूत्रम् । इदं प्रकृतेर्जगदुपादानत्वप्रतिषेधपरं शास्त्रमुभयसंमतम् ।

'गौणश्चेन्नात्मशब्दात्' इति षष्ठं सूत्रम् । अस्मिन् षष्ठे सूत्रे आत्मशब्दो यदि वैष्णवैरवैष्णवैर्वा स्रष्टरि गौण उच्यते, तदेतन्न संभवति, आत्मशब्दात् । अतो मुख्ये एवात्माऽत्र स्वस्वमते वैष्णवैरद्वैतिभिश्चोच्यते ।

'तन्निष्ठस्य मोक्षोपदेशात्' इति सप्तमं सूत्रम् । अत्र तन्निष्ठस्य मोक्षोपदेशादप्यत्र गौण आत्मशब्दः ।

'हेयत्वावचनाच्च' इत्यष्टमं सूत्रम् । हेयत्वावचनादपि नात्र सूत्रे गौण आत्मशब्दः ।

स्वाप्यात्—स्वस्मिन्नप्ययादपि न गौण आत्मशब्दः ।

मुक्तौ गतिसामान्यादपि नात्र गौण आत्मशब्दः ।

स्वशब्देनात्मशब्देन श्वेताश्वतराणामुपनिषदि श्रुतत्वाच्च मुख्य एवात्र आत्मा उभयमते ।

आनन्दमयोऽभ्यासात् प्रकृत आत्मा आनन्दमय आनन्दप्रचुर आनन्दस्वरूपो वा श्रुतिषूक्तः, अतोऽपि न गौण आत्माऽत्र विवक्षितः । यद्युच्यते प्रकृते आत्मनि विकारः शब्दः प्रयुक्तः, अतो गौण एवात्मा इति चेन्न, आनन्दप्रचुरत्वाद् विकारशब्दस्तत्र प्रयुक्तः ।

तद्धेतुव्यपदेशाच्च—जगद्धेतुत्वेन व्यपदिष्टोऽत्रात्मशब्दः । जगद्धेतुत्वं च गौणे आत्मनि न संभवति, अचेतनत्वात् ।

मान्त्रवर्णिकमेव च गीयते—मान्त्रवर्णिकमेव चात्मतत्त्वमत्र गीयते, नहि गौण आत्मशब्दः मान्त्रवर्णिकः । इतरो मुख्यात्मनो भिन्न आत्मशब्दो गौणो नात्र गृह्यते । गौणे आत्मनि पूर्वोक्तधर्माणामनुपपत्तेः । भेदेन हि व्यपदिश्यते गौण आत्मा मुख्य आत्मा

चेति । कामाच्च नानुमानापेक्षा—'सोऽकामयत बहु स्यां प्रजायेय' इति कामना, श्रूयते, न त्वचेतने प्राकृते आत्मनि कामना संभवति, अतोऽनुमीयमानस्य प्राकृतस्य गौणस्यात्मनोऽत्र नापेक्षा, किन्तु मुख्यस्यैव ।

'अस्मिन्नस्य च तद्योगं शास्ति' इदं सूत्रम्, अतः पराणि च सूत्राणि प्रधानस्य सृष्ट्यादिकर्तृत्वखण्डनपराण्युभयोरप्याचार्ययोरभिमतानि ।

द्वितीयः पादो ज्ञानकर्मसमुच्चयपक्षमाश्रित्य श्रीरामानुजाचार्येण स्वपक्षे योजितः । ज्ञानकर्मसमुच्चयपक्षं प्रत्याख्याय ज्ञानादेव तु कैवल्यमित्यौपनिषदं मतमालम्ब्य श्रीशङ्करभगवत्पादैः स्वपक्षे योजितः ।

तृतीयः पादः श्रुतीरुदाहृत्य श्रीशङ्करभगवत्पादैः स्वपक्षे योजितः । श्रीरामानुजाचार्यैस्तु विशिष्टाद्वैतपक्षमालम्ब्य स्वपक्षे योजितः । अस्यां स्थितौ विशिष्टाद्वैतपक्षस्य श्रीशङ्करभगवत्पादैः श्रुतीरालम्ब्य प्रत्याख्याने कृते क्व तिष्ठतु विशिष्टाद्वैतमतम् ?

चतुर्थपादस्तु सांख्यमतप्रत्यख्यानपर उभयोरपि सम्मतः । द्वितीयाध्यायस्य पादत्रये सांख्यमतं प्रत्याख्यातमुभाभ्यामाचार्याभ्यां स्वस्वमतमालम्ब्य । तृतीये पादे स्वस्वमतानुसारेण जगत्सृष्टिर्वर्णिता । यद्यपि श्रीरामानुजाचार्यैर्विशिष्टाद्वैतपक्षो ब्रह्मसूत्रमालम्ब्य साधितः, किन्तूदाहृतानां स्वमतसाधिकानां श्रुतीनां स्वमते समन्वयं न कर्त्तुं प्रबभूव ।

चतुर्थपादेन प्राणविषयकः श्रुतिविप्रतिषेधः श्रीशङ्करभगवत्पादैः परिहृतः । श्रीरामानुजाचार्यैस्तु न सम्यक् श्रुतयः स्वमते व्यवस्थापिताः । इदन्त्ववधेयं ज्ञानकर्मसमुच्चयपक्षोन्मूलने सति न ब्रह्मसूत्रेषु पदमाधातुमर्हति श्रीरामानुजाचार्यमतम् । अत एव सर्वासूपनिषत्सु ज्ञानकर्मसमुच्चयपक्षः समूलमुन्मूलितः श्रीशङ्करभगवत्पादैः ।

तृतीयेऽध्याये नानाविधा गतयो वर्णिताः । तत्र नैव विवाद उभयोराचार्ययोः । यत्तु ब्रह्मसूत्रशाङ्करभाष्ये बौद्धमतं खण्डितम्, तत्तु न धम्मपदोपदिष्टबौद्धमतखण्डनम्, तत्तु प्रस्थानचतुष्टयखण्डनम् । यत्तु धम्मपदेऽद्वैतमतं खण्डितम्, तत्तु प्रस्थानचतुष्टयस्य खण्डनम् । यत्तु "मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमेव च । मयैव कथितं देवि कलौ ब्राह्मणरूपिणा" इत्यादिकं बहु तत्र तत्र प्रलपितं तद् वैष्णवानां न शोभते । तथा हि वैष्णवैर्भगवान् बुद्धो विष्णोरवतारत्वेन स्वीकृतः । नारायणकवचे च बुद्धः पाखण्डध्वंसी इत्युक्तः । नारदपाञ्चरात्रं च वेदानधिकारिणां कृते इति स्वीकृतमेव । तदलमान्यानां श्रीशङ्करभगवत्पादानां चरितेषु श्रुतिमनुगतेषु धूलिनिक्षेपैरिति निगद्य विर-

मामि। तदयमत्र निष्कर्षः—सगुणं ब्रह्मलोकेषु वैष्णवैः संप्रचारितम्। निर्गुणन्तु परं ब्रह्म शङ्करः समवर्णयत् ॥ अतो मतद्वयं युक्तं सुधीभिः समुपास्यताम्। श्रीकृष्णाख्ये परे तत्त्वे मनो नित्यं विधीयताम् ॥

वंशीविभूषितकरान्नवनीरदाभात्
पीताम्बरादरुणविम्बफलाधरोष्ठात्।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥ इति।

श्रीशङ्करभगवत्पादकृतो लोकोपकारः

श्रीएस्० सुब्रह्मण्यशास्त्री पण्डितराजः

❀ ❀ ❀

श्रीभगवत्पादा हि सहस्राधिकवर्षेभ्यः प्राग् भारतवर्षे पुण्यस्थले जनिं लब्ध्वाऽतिशीघ्रेण कालेन श्रीगोविन्दभगवत्पादान् गुरून्, श्रीगौडाचार्यान् परमगुरूंश्च साक्षात्कृत्य तयोः सकाशाद् वेदान्तोपदेशं प्राप्य तदाज्ञया काशीं प्राप्य तत्र प्रस्थानत्रयस्य भाष्याणि विरचय्य मन्दाधिकारिण उद्दिश्य उपदेशसाहस्रीविवेकचूडामणिप्रभृतीन् प्रकरणग्रन्थांश्च प्रणीयान्ते श्रीकाञ्चीनगराख्यमुक्तिक्षेत्रे स्वतनुं विससृजुरिति श्रीशिवरहस्याख्य इतिहासे नवमांशे षोडशाध्याये स्पष्टं दृश्यते। इदानीमपि काञ्चीमण्डले शिवालयेषु सर्वेषु तेषां प्रतिमा उपलभ्यन्ते, क्वचिद् व्यासप्रणामं कुर्वाणाः, क्वचिद् ध्याननिष्ठा इति।

यद्यपि तेषामवतारात् परं भूयान् कालोऽतीतः, तथापि तदीयग्रन्थाः शास्त्रचर्यारूपा वा शास्त्रनिर्णीतार्थप्रतिपादकप्रकरणरूपा वा मानवेन श्रद्धालुना श्रेयःप्राप्तय इतिकर्त्तव्यतामजानता किं विधेयमित्युपदिशन्तः सोपानपञ्चकादयो विलसन्ति। इदमेवोक्तं चुलुकीकृतसकलशास्त्रतात्पर्यैः श्रीमधुसूदनसरस्वतीस्वामिभिः सिद्धान्तबिन्दौ—'इह खलु साक्षात् परम्परया वा सर्वान् जीवानुद्दिधीर्षुर्भगवान् श्रीशङ्करोऽनात्मभ्यो विवेकेनात्मानं बोधयितुं दशश्लोकीं प्रणिनाय इति'।

श्रीपद्मपादाः पञ्चपादिकारम्भे—

> 'नमाम्यभोगिपरिवारसंपदं निरस्तभूतिमनुमार्धविग्रहम्।
> अनुग्रमुन्मृदितकाललाञ्छनं विना विनायकमपूर्वशङ्करम्॥'

इति लिखन्तः 'आचार्यः साक्षाद् भगवान् शङ्कर एव। तत्राचार्यरूपेण रूपान्तरग्रहणात् कैलासस्थशिवाद् भिन्नरूपोऽयमपूर्वः' इति जगदुः। पूर्वं न भवतीत्यपूर्वम्। पूर्वं हि कैलासे भगवान् सर्पाभरणः। अत्र त्वभोगिनः संन्यासिन एव तस्य परिवारः। तत्र भगवान् सर्वैश्वर्यवान्। अत्र तु निरस्तसुवर्णादिरूपैश्वर्यः। तत्र भगवान् उमार्धशरीरः। अत्र तु न तथासंन्यासग्रहणात्। अपि त्वनुमार्धशरीरः। आचार्यशरीरं भाष्यमेव। तत्रानुमानमर्धं दृश्यते, अर्धं च श्रुतिः। तथाहि भाष्ये प्रतिवादं 'श्रुतेः,

उपपत्तेश्च' इति श्रूयते कैलासे भगवानुग्रः संहाराधिकरात्। अत्र तु शान्तशरीरः शिष्यानुग्रहपरः। तत्र भगवान् कण्ठे कालरूपः जगद्रक्षणाय स्वयं हालाहलभक्षणात्। अत्र तून्मृदितकाललाञ्छनः। कालस्य यमस्य लाञ्छनम् अविद्या साऽऽचार्येण निराकृतेति। अपि च कैलासे भगवान् श्रीकुमारगणपतिभ्यां स्वपुत्राभ्यां परिवृतः। अत्र तु श्लेषेण विनायकनामा बुद्धो धिक्कृतः। एवं श्रीसंक्षेपशारीरकाचार्याः स्वग्रन्थे—

'वक्तारमासाद्य यमेव नित्या सरस्वती स्वार्थसमन्विताऽऽसीत्'।

इति लिखन्तो नित्या वेदस्वरूपा सरस्वती यमेव व्याख्याकारमासाद्य स्वमुख्यार्थसमन्विताऽभूदित्युपनिषदां मुख्यार्थो ज्ञातव्यश्चेदाचार्यभाष्यं पठेत्युपदिशन्तीव।

श्रीमधुसूदनसरस्वत्यस्तु—

मीमांसया कपटतो भुजगाम्बयेव स्वाधीनतामुपनिषद्विनतेव नीता।
येनोद्धृताऽमृतफलेन गरुत्मतेव तस्मै नमो भगवतेऽद्भुतशङ्कराय॥'

इति वदन्तो वैदिकीं कथां स्मारयन्ति। तथाहि—यजुर्वेदसंहितायां षष्ठकाण्डे श्रूयते—कद्रूः सुपर्णी च कश्यपप्रजापतेः पत्न्यौ। तयोः स्वलावण्यातिशयविषये स्पर्धाऽऽसीत्। जयशीलायाः कद्र्वाः सुपर्णी, तत्पुत्रो गरुडश्च यथाप्रतिज्ञं शुश्रूषां चक्रतुः। ततः कदाचिद् वैनतेयः 'दास्यनिवृत्तिः कथमिति कद्रूं पप्रच्छ। कद्रूर्देवलोके शक्रेण परिपालितममृतकलशमानीयतामित्याज्ञापयामास। गरुडोऽतिबलवान् अमृतकलशरक्षकान् जित्वाऽमृतमानिनाय। एवं भगवत्पादा अपि मीमांसकाभिप्रेतं वेदान्ताः कर्माङ्गकर्तृदेवताप्रकाशनपराः, स्वयं निरर्थकाः' इत्यभिप्रायं समन्वयाधिकरणोक्तयुक्तिभिर्निरस्य स्वातन्त्र्येण मुख्यममृतं मोक्षं फलं प्रतिपादयामासुः। तेन गरुडसाम्यं स्फुटम्। इममेव विषयम् 'अद्भुतशङ्करम्' इत्यनेन प्रतिपादयामासुः।

अन्यदपिश्रीपद्मपादाचार्याः स्वकृतभगवत्पादीयपञ्चसारविवरणे प्राहुः—

'इह खलु लोकानुग्रहैकरसनया कृतशरीरपरिग्रहो भगवान् शङ्कराचार्यः परमां विभूतिकाष्ठां प्राप्तः स्वयमेकाकिसंपदा लज्जमानो दुःखाकृतजनकारुण्याक्रान्तमानसश्च संस्तदनुग्रहाय समस्तागमसारसंग्रहरूपं ग्रन्थं चिकीर्षुः' इत्यादिना भगवतः कारुण्यातिशयमाहुः।

अत एव—'अशेषदुःखप्रशमाय नृणां वक्ष्ये जपादेः प्रवरं विधानम्' (प्र० सा० सं- पु० १०)।

'अथ श्रियो मन्त्रविधिः समासतो जगद्धिताय प्रतिवक्ष्यतेऽधुना (१२–१) इत्याद्युक्तम् ।

ईदृशकारुण्यमेव पञ्चपाद्यां 'लोकानुग्रहैकरसनया धृतशरीरस्य भगवतो भाष्यकारस्य मतभागमयितव्यम्' इत्याहुः ।

अपि च भामतीकारः—

'नत्वा विशुद्धविज्ञानं शङ्करं करुणाकरम् ।
भाष्यं प्रसन्नगम्भीरं तत्प्रणीतं विभज्यते ॥

इति ब्रुवन् भाष्यकारं करुणाकरमाह ।

अपि च 'विकल्पोऽविशिष्टफलत्वात्' इति तृतीयतृतीयगतं ब्रह्मसूत्रम् । सगुणविद्यास्वियमेव ग्राह्येति न नियमस्तासां ब्रह्मलोकप्राप्तिरूपफलस्याविशेषात्' इति तदर्थः । तेन ज्ञायते—यथा शाण्डिल्यविद्या-उपकोसलविद्या-पञ्चाग्निविद्या-इत्यादीनां सर्वासां विद्यानां ब्रह्मलोकप्राप्तिरूपफलमविशिष्टं तथा श्रीशिवस्य श्रीविष्णोः श्रीकुमारस्य श्रीगणेशस्य श्रीदेव्या वोपासनासु विकल्पेन यां काञ्चिद् विद्यां परिगृह्य ब्रह्मलोकं गन्तुं मानवः प्रभवति । ब्रह्मलोको हिं शिवलोक-वैकुण्ठादिसाधारणः सर्वसविशेषब्रह्मोपासकसाधारणस्तत्रैव च प्रदेशविशेषभेदाद् भिद्यत इति सिद्धान्तः ।

यदि निर्गुणं ब्रह्म ज्ञात्वा ब्रह्म ज्ञात्वा ब्रह्मभावं मोक्षं गन्तुमिच्छेत्, तदा सर्वासां सगुणविद्यानां तत्साधनत्वं सिद्धमेव । अत एव शङ्कराचार्याः षण्मतस्थापनाचार्या इति गीयन्ते । परां गतिं ब्रह्मलोकं वा निर्गुणं ब्रह्म वा प्राप्तुमिच्छन् मानवः शिवविष्णुकुमारगणेशदेवीनामन्यतमं देवताविशेषमाश्रित्य परगतिं प्राप्तुमर्हति । एवु देवेषु भेद औपाधिकः, न तु वास्तव इति तदभिप्रायः ।

अत एव सर्वज्ञः कवितल्लजः कालिदासः—'एकैव मूर्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम्' (कु० ६) इत्याह ।

सकलशास्त्रार्थतत्त्वज्ञा मधुसूदनसरस्वत्यश्च 'ब्रह्मणो ब्रह्मा, विष्णुः, शिवश्चेति त्रीणि पुरुषरूपाणि । सरस्वती लक्ष्मी गौरीति त्रीणि स्त्रीरूपाणि' इति स्पष्टमाहुः ।

श्रीशङ्कराचार्यैः सर्वे देवाः स्तुत्या महीकृताः । तत्रैकैकस्य देवताविशेषस्य सृष्टिस्थितिलयकारित्वं स्फुटम् । यथा श्रीगणेशभुजङ्गे—

चिदानन्दसान्द्राय शान्ताय तुभ्यं नमो विश्वकर्त्रे च हर्त्रे च तुभ्यम् ।
नमोऽनन्तलीलाय कैवल्यभासे नमो विश्वबीज प्रसीदेशसूनो ॥ इति ।

शिवे च—'अनाद्यन्तमाद्यं परं तत्त्वमर्थं चिदाकारमेकं तुरीयं त्वमेयम्' इति ।

श्रीशिवस्य रूपभेदेष्वपि ब्रह्मरूपत्वं भगवत्पादैर्गीयते । दक्षिणामूर्तौ 'रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यम्' इति श्रुतिप्रसिद्धं शिवस्य ज्ञानप्रदातृत्वं दक्षिणामूर्तिस्तोत्रे निबध्यते । यथा—

कान्त्या निन्दितकुन्दकोमलवपुः न्यग्रोधमूले वसन्
कारुण्यामृतवारिभिर्मुनिजनं संभावयन् वीक्षितैः ।
मोहध्वान्तविभेदनं विरचयन् बोधेन तत्तादृश-
देवस्तत्त्वमसीति बोधयतु मां मुद्रावता पाणिना ॥ इति ।

तथा निर्गुणब्रह्मशक्तिरूपत्वाद्देव्याः सर्वे देवा देवीं प्रणमन्तीति भगवत्पादैर्व्यज्यते—

वेधाः पादतले पतत्ययमसौ विष्णुर्नमत्यग्रतः
शम्भुर्देहि दृगञ्चलं सुरपतिं दूरस्थमालोकय ।
इत्येवं परिचारिकाभिरुदिते संमाननां कुर्वती
दृग्द्वन्द्वेन यथोचितं भगवती भूयाद् विभूत्यै मम ॥ इति ।

तथा विष्णुस्तुतौ तेषामन्यादृशी विष्णुभक्तिः प्रतिपाद्यते—

मत्स्यः कूर्मो वराहो नरहरिणपतिर्वामनो जामदग्न्यः
काकुत्स्थः कंसघाती मनसिजविजयी यश्च कल्किर्भविष्यन् ।
विष्णोरंशावतारा भुवनहितकरा धर्मसंस्थापनार्थाः
पायासुर्मां त एते गुरुतरकरुणाभारखिन्नाशया ये ॥ इति ।

मोक्षमार्गे प्रवृत्तस्य विषयेषु वैराग्यमावश्यकमिति तत्प्रकारं भगवत्पादा निरूपयन्ति—'वैराग्यबोधौ पुरुषस्य पक्षिवत् पक्षौ' इति । 'वैराग्यान्न परं सुखस्य जनकमिति च ।

एवं तत्तद्देवतानां सृष्ट्यादिकारित्वेन स्तुतिः । सर्वेषां जगतः पालकत्वं संहारकत्वं च युगपद् चेद् भवेतां तदैकेन सृष्टिः, अन्येन संहारः क्रियेतेति जगति प्रलयो भवेत् । अतस्तत्कथनं 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति' इति श्रुत्या ब्रह्मैव निर्गुणं तत् तत्कार्यं करोतीति । तस्यैव चतुर्मुख-

त्वरूपेण स्रष्टृत्वम्, शङ्खचक्रादिमत्त्वेन पालयितृत्वम्, त्रिशूलादिविशिष्टत्वेन संहर्तृत्वमिति न विरोधः। इत्थं च या काचिद् देवतातनूरुपास्येति विकल्पः।

निर्गुणमेव ब्रह्म तत्तद्रूपमङ्गीकृत्य सृष्ट्यादि करोतीति मतान्तरावलम्बिनामपि निर्गुणोपासनया मोक्षप्राप्तिं न निराकुर्मः। वेदपूर्वकस्तु नाधिकारो वेदानधिकारिणाम्। अयमेको भगवत्पादकृत उपकारः।

किञ्च, शिवमारभ्य 'नमस्ताराय' इत्युपदिष्टम्। तारः प्रणवः। स एव मतान्तराणामवलम्बनम्। एतेन हिन्दुमते परस्परकलहो नास्ति शिवविष्ण्वादिविषये भिन्नरूपेणोपास्याया देवतायाः स्वरूपेणैक्यात्।

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥

इति भगवदुक्तेश्चेति।

एवं च भगवत्पादैरद्वैतमतं श्रुतिबोधितं सर्वोत्तमत्वेनेतरमतानुयायिनां प्राप्यत्वेन च सुदृढमुक्तम्। इतरमतानि न स्वातन्त्र्येण मोक्षफलानि, अपि तु ब्रह्मलोकमात्रफलानि। इतरमतोपदिष्टतत्तद्देवताध्यानेन, पूजनेन च द्वैतमार्गे तत्तद्देवतानुग्रहद्वारा प्रवृत्तिर्भवति। अद्वैतब्रह्मसाक्षात्कारश्च जायत इति शम्।

श्रीशङ्करभगवत्पादीयाः कृतयः

स्वामी श्रीकाशिकानन्दो महामण्डलेश्वरः

❀ ❀ ❀

वेदानामनाप्तपुरुषभाषितत्वमत एवाऽप्रामाणिकत्वं चोद्घोषयद्भिः शून्यवादिप्रभृतिभिर्वैदिकधर्माणामनुपादेयत्वं लोकेषु प्रचार्य यदा धर्मस्य ग्लानिरापादिता; स्वीयमतप्रचाराभिनिवेशैः स्वमनीषाकल्पितानां शास्त्राभासनिरूपितानां च मद्यसेवनमांसभक्षणप्रभृतीनां वामाचारपरायणैर्धर्मत्वेन परिकल्पितानामधर्मरूपाणामभ्युत्थानं यदा समजायत, क्वचन शैवा वैष्णवविरोधिनः, क्वचन वैष्णवाः शैवविरोधिन इति रीत्या कृत्स्नं भारतवर्षं यदा परस्परविरोधजर्जरितसंघशक्तिकतया विखण्डितं "मुण्डे मुण्डे मतिर्भिन्ना"इति न्याये प्रत्यक्षोदाहरणविधया सामाजिकव्यवस्थानियमा यदा भग्नप्राया जाता, तदा तथाविधैरधर्म-धर्मक्षयादिपरिक्लिष्टहृदयानां साधूनां परित्राणाय, विनाशाय च हिंसादिरतानां कापालिकप्रभृतीनां, प्रवृत्ति-निवृत्ति-लक्षणधर्मद्वयसंस्थापनायाऽवतीर्णस्य शङ्करस्य शङ्करभगवत्पादाभिधां दधानस्य द्वादशशताब्दी समपादि गतवर्षे। तदीयजन्मसमयविषयकविविधविवादजम्बालजालमुत्तीर्य निर्णयराजपथमधिरूढाः प्राप्य सर्वे विद्वांसस्तदीयग्रन्थविषयकविवादविपिनमपि सांप्रतं लङ्घयितुमभिलष्यन्ति। यतो हि ज्ञानावताररूपाणामाचार्य-महर्षि-महामुनिप्रभृतीनां द्विविधमवतारप्रयोजनं भवति। एकं तावत् तात्कालिकाऽधर्मावरोधनपूर्वकधर्मपरिरक्षणम्, यत् सर्वावतारसाधारणम्। अपरं तु चिरकालपर्यवसायिज्ञानधाराप्रवाहणरूपम्, यद् ग्रन्थनिर्माणप्रवचनपरम्परास्थापनादिसाध्यं भवति। व्यास-भगवत्पादप्रभृतीनां द्विविधमवतारप्रयोजनं भवति। एकं तावत् तात्कालिकाऽधर्मावरोधनपूर्वकधर्मपरिरक्षणम्, यत् सर्वावतारसाधारणम्। अपरं तु चिरकालपर्यवसायिज्ञानधाराप्रवाहणरूपम्, यद् ग्रन्थनिर्माणप्रवचनपरम्परास्थापनादिसाध्यं भवति। व्यास-भगवत्पादप्रभृतीनां द्वितीयमेतदतिप्रसिद्धम्। अत एव शरीरतो द्वादशवर्षशतके व्यतीतेऽपि भगवत्पादीयाः कृतयोऽद्यापि नवीनोन्मेषशालिन्यो ज्ञानप्रदाः प्रेरणाप्रदायिन्यश्च जनानां दरीदृश्यन्ते। तासु च कृतिषु काश्चिदधिकृत्य किञ्चिन्निवेदयितुमिदं वयं प्रस्तुमः, येन तदीयग्रन्थविषयं किञ्चिद्दिग्दर्शनं सम्पद्येत।

आचार्यप्रणीताः कृतयस्तिसृषु श्रेणिषु विभाजयितुं शक्यन्ते। प्रथमश्रेण्यां भाष्यग्रन्थाः, द्वितीयश्रेण्यां प्रकरणग्रन्थाः, तृतीयश्रेण्यां च स्तोत्रग्रन्थाः। आचार्यशङ्करभगवत्पादा भाष्यकारत्वेन सर्वत्र प्रसिद्धाः। प्रकरणग्रन्थव्याख्यातारोऽपि भाष्य-

कारत्वेन भगवत्पादं स्मृत्वा तदीयव्याख्यां प्रायः प्रारभन्ते। तथा च भाष्याणां प्राथमिकत्वं युक्तमेव। उपनिषत्सूत्रभाष्याद्यर्थरहस्यबोधोपयोगित्वात् प्रकरणग्रन्थानां द्वितीयश्रेणीकत्वं शक्यं संभावयितुम्। स्तोत्राणि पुनर्भगवद्भक्तिसमुद्भावनद्वाराऽधिकार-संपादकानीति चरमत्वं तेषां युज्यते। यद्यपि बहुषु स्तोत्रेषु वेदान्ततत्त्वावबोधनमपि दृश्यते, तथापि स्पष्टतरं तदीयतत्त्वाववोधकत्वं प्रकरणग्रन्थानामुपलभ्यते। (१) (क) ब्रह्मसूत्रभाष्यम्। प्रस्थानत्रयभाष्यकर्तृरूपेण विश्वविदितस्याऽऽचार्यस्य मुख्यरचना शारीरकभाष्यनाम्ना प्रसिद्धा, यामधिकृत्याऽऽहाचार्यवाचस्पतिः—"भाष्यं प्रसन्न-गम्भीरम्" इति।

एवमेवाह स्म श्रीमत्पद्मपादाचार्योऽपि। एतदीयं प्रसादगुणमवलोक्य साहित्यरसरसिका महीयांसः सोरस्ताडं संलपन्ति—"ब्रह्मसूत्रशाङ्करभाष्य-मस्माकं साहित्यग्रन्थो वर्त्तते।" स्वाभिप्रायाभिव्यञ्जनसामर्थ्यं शाङ्करभाष्येऽ-नितरसाधारणं प्राञ्जलवाक्यावलीषु पदे पदे विलोक्यते। दार्शनिकानां वैचारिकाणां कृते चातिगम्भीरसागरोपमं भाष्यमेतदिति मनोषिणामनुभवास्पदम्। भगवत्पतञ्जलि-विरचिते व्याकरणमहाभाष्ये प्राञ्जलत्वं भाषाया विलोक्यते। तादृशं प्राञ्जलत्वं पुनः शाङ्करभाष्य एव शक्यते वीक्षितुं भाष्येषु। भाष्यान्तरेषु दीर्घतरसमासानुप्रासादिकं क्वचन यद्यपि विद्यते; किन्तु न प्रावाहिकमुपलभ्यते कृत्रिममिव चावलोक्यते— "युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तपःप्रकाशवद् विरुद्धस्वभावयोरितरेतर-भावानुपपत्तौ सिद्धायां तद्धर्माणामपि" इत्यादिकं भाष्यं हि गङ्गाप्रवाहवदविच्छिन्न-प्रवाहमवलोकमानस्य कस्य वा मनसि प्रमोदतरङ्गाऽवलिर्नोद्भवति। सोऽयं भाषाप्रवाहोऽ-न्तपर्यन्तमैकरस्येन प्रवर्त्तमानः शक्यते वीक्षितुमध्येतृभिर्ब्रह्मसूत्रभाष्ये।

भाष्यगाम्भीर्ये व्याख्यापरम्परैव प्रथमं प्रमाणं बुभुत्सूनां कृते। भाष्यटीका पञ्च-पादिका पद्मपादाचार्यकृता भाष्यगूढार्थप्रदर्शनपरा परमगहना वर्त्तते। तदीयटीका विवरणनाम्नी विवरणप्रस्थानतया प्रसिद्धिं गता। तट्टीकाश्च तत्त्वदीपनादयो विद्वन्मूर्धन्य-विरचिता बह्व्यो विराजन्ते। तथैव भाष्यटीका भामती श्रीमद्वाचस्पतिमिश्रकृता भामती-प्रस्थानतया प्रसिद्धा। तदीयव्याख्या कल्पतरुः। तद्व्याख्याः परिमलादय पण्डितप्रकाण्डैर-प्पय्यदीक्षितप्रभृतिभिर्विरचिता विराजन्ते। न ह्येवंविधं भाष्यान्तरमस्ति यत्र प्रस्थानद्वयं शक्यदर्शनं भवति।

ब्रह्मैव पारमार्थिकसत्यं, जगतस्तु व्यावहारिकसत्यत्वमात्रम्, अत एव परमार्थदृष्ट्या मिथ्यात्वमेवेति सिद्धान्तमाश्रित्य प्रवृत्तेऽस्मिन् शाङ्करभाष्ये न

क्वचिदपि श्रुतार्थपरित्यागाऽश्रुतार्थपरिकल्पनारूपः कर्षाकर्षो वर्त्तते। "एकमेवाऽद्वितीयम्"इत्यादयः श्रुतयः परमार्थदृष्ट्या प्रवृत्ताः। "नेह नानास्ति किंचन" इत्याद्याश्च। "यस्मिन् पञ्च पञ्चजनाः" इत्यादयस्तु व्यवहारदृष्ट्या, सेयं व्यवस्था सर्वत्र। "तत्त्वमसी"त्यादिषु तस्य त्वमिति वा तदात्मकस्त्वमिति वा तदन्तर्यामिकस्त्वमिति वा ये व्याख्याकर्त्तारो व्याचक्षते, तेषां श्रुतार्थपरित्यागादि स्पष्टतर एव। कथंचिच्छब्दसाधनेऽप्यप्रयुक्तत्वदोषः प्रथमविग्रहे। न हि राजत्वमित्युक्ते राज्ञः सम्बन्धी त्वमित्यर्थः प्रतीयते। निषादस्थपतिन्यायाश्रयणे समासगौरवमपि। नामार्थयोरभेदान्वयनियमादितरार्थद्वयमप्ययुक्तमेव। इत्थमेव सोऽहमित्यस्य सः अहेयः इत्याद्यर्थकरणमपि स्वमताऽऽग्रहप्रयुक्तं स्फुटं वीक्ष्यते। एवं बहव आचार्या अद्वैतप्रतिपादकानि शतशो वाक्यान्यन्यथाऽन्यथा व्याख्यायाऽऽहुः—"तस्मान्न लेशमात्रेणाऽप्यद्वैतप्रतिपादनं श्रुतिषु विद्यत" इति। एतद् वीक्षमाणानां तटस्थानां मनसि संशयो जायेत यत् सर्वत्रैव व्युत्पत्त्यन्तरमाश्रित्य यः कश्चनापि सिद्धान्तो वर्णयितुं शक्य इति। यथाऽद्वैतमित्यस्य द्वैताभावार्थकत्वं निरसितुम् 'अः' विष्णुस्तस्य द्वैतमिति कश्चिद् ब्रूयात्। इज्येत्यस्य यज्ञार्थकत्वं निरसितुम् 'इः' कामस्तस्य ज्या = कोदण्ड इत्यादिरर्थः क्रियते। तथा च सर्वत्राऽव्यवस्थैव स्यात्। शाङ्करभाष्ये तु सर्वत्रैव यथाश्रुतार्थ एव कृतः। तादृशमर्थं कृत्वैव यत्र क्वचनानुपपत्तिस्तत्रार्थान्तरं प्रदर्शितम्। यथा—"आनन्दमयोऽभ्यासात्" इत्यत्र। श्रुतिस्मृतिपुराणेषु पञ्चकोशस्यातिप्रसिद्धत्वाद् अत्रत्यशाङ्करभाष्यखण्डनकारिभिरप्यन्यत्र पञ्चकोशवर्णनदर्शनात् तत्रार्थान्तराश्रयणावश्यकत्वात्।

अपरे तु प्रत्यवतस्थिरे सूत्राऽसम्बद्धं शास्त्राऽसम्बद्धं चाऽध्यासं प्रथममुपस्थाप्याध्यासभाष्येण तत्संस्कारमध्येतॄणां मनस्याधाय मनोवैज्ञानिकपद्धत्या कृत्स्नं शारीरकशास्त्रमद्वैतपरतया योजयामासाचार्यशङ्करः। न हि सूत्रेषु कुत्रापि केवलाद्वैतस्य जगन्मिथ्यात्वस्य वा वर्णनमुपलभ्यते। उपनिषदां शाङ्करपक्षसमर्थकत्वेऽपि ब्रह्मसूत्राणां रामानुजीयपक्षसमर्थकत्वमेवास्तीति। ते तु प्रतिवक्तव्याः—उपनिषद्वाक्यार्थमणिग्रथनपराणां सूत्राणामुपनिषद्भिरसमर्थितार्थपरत्वं कथङ्कारं शक्यं प्रतिपादयितुम्। न वा सूत्रानभिप्रेतमध्यासमध्येतृमनोमोहनाय प्रथममुल्लिलेखाचार्यशङ्कर इति युक्तियुक्तम्। सूचनाद्धि सूत्रम्। परमपुरुषार्थप्रतिपत्तये शारीरकशास्त्रनिर्माणमिति सर्वेषामौपनिषदानां मतम्। ब्रह्मजिज्ञासया च ज्ञानमेव फलतयोपतिष्ठते। नापि धर्मवद् ब्रह्मानुष्ठेयमिति ब्रह्मज्ञानमेवात्यन्तिकदुःखनिवृत्तिपरमानन्दप्राप्त्योः साधनं सूत्रेण सूच्यते। न च ज्ञानेन सत्यस्य वस्तुनो निवृत्तिरप्राप्तस्य प्राप्तिर्वा ज्ञाननिवर्त्त्यं संसारदुःखं ज्ञाननिवर्त्त्यरज्जूरगवन्मिथ्येति च तत एव सूच्यते। न च रज्जुज्ञानेन शुक्तिरजतनिवृत्तिर्दृश्यते। न च

ब्रह्मज्ञानेन जीवगतदुःखनिवृत्तिस्तथैव संभवितुमर्हति यदि जीवो ब्रह्मणो भिन्नः स्यात्। तत एव च जीवपरैक्यमपि सूच्यते। इत्थं च दुःखलक्षणसंसारमिथ्यात्वं जीवपरैक्यं च प्रथमसूत्रसूचितं यत्तदध्यासमन्तरेण नोपपद्यत इत्यध्यासनिरूपणं प्रथमं कृतं भाष्यकारेणेति कथं सूत्रासम्बद्धत्वादिदोषावसर इति। मिथ्याशब्दस्तु लोके रज्जूरगादावेव प्रसिद्ध इति जगतः प्रातिभासिकत्वमात्रताभ्रान्तिर्मा भूल्लोकानामिति न तच्छब्दप्रयोगो बहुलतया क्रियते। अनिर्वचनीयत्वलक्षणमिथ्यात्वं हि वेदान्तसम्मतम्। एवं च सूत्रारूढार्थ एव भाष्यकारेणाध्यासभाष्ये विवृत इति तदेतत् तीक्ष्णशेमुषीकाणामपि समालोचकानां बुद्धिपथं नारूढमिति भाष्यगाम्भीर्यमत एव सुसिद्धं भवति।

(ख) उपनिषद्भाष्यम्—वेदान्तशब्दस्योपनिषत्स्वेव मुख्या वृत्तिः। तदुक्तं वेदान्तसारे—"वेदान्तो नामोपनिषत्प्रमाणम्" इति। ग्रन्थान्तराणि तदुपकारीणि गौणीं वृत्तिमाश्रित्य वेदान्तसंज्ञां लभन्ते। तदुक्तं तत्रैव—"तदुपकारीणि शारीरकसूत्रादीनि च" इति। उपनिषद्वाक्यार्थविचारात्मकानि तन्निर्णायकानि च ब्रह्मसूत्राणि तद्भाष्यादीनि च। तत्र प्रायः सन्दिग्धवाक्यानामेवार्थनिर्णयो ब्रह्मसूत्रेषु कृत इत्यतः कृत्स्नोपनिषदां पदशो वाक्यशश्च व्याख्यानं मुमुक्षूणामपेक्षितम्। ज्ञानविज्ञानोत्पत्तिहेतुत्वादिति मुख्यानां दशोपनिषदां श्वेताश्वतरादीनां च भाष्याणि साधकानां हितकाम्यया निरमायिषत शङ्करभगवत्पादेन करुणामयेन। यद्यपि ब्रह्मसूत्रभाष्य इव प्रसादगुणः पदलालित्यमतिगाम्भीर्यं चोपनिषद्भाष्येषु नानुलक्ष्यते, तथापि व्याख्यानशैली समानैव। ब्रह्मसूत्रभाष्ये प्रसादाद्याधिक्ये यत्नाधिक्यमेव हेतुं निर्णयामः।

"यत्नात्करोमि यदि चारुतरं करोमि" इत्याद्युक्तिः प्रसिद्धैव। संशयविपर्यासनिरासस्य ब्रह्मसूत्रभाष्ये विशेषविषयत्वाद् यत्नाधिक्यं तत्रापेक्षितमेव। संशयादिनिरासे सति पद-वाक्यव्याख्यानमेव मुख्यतयोपनिषत्स्वावश्यकमिति नास्ति यत्नाधिक्योपयोगस्तत्र। उपनिषदामेव मुख्यत्वात् तत्र कुतो यत्नशैथिल्यमिति तु न शङ्कनीयम्। ब्रह्मसूत्राणां तद्भाष्यस्य चोपनिषद्व्याख्यारूपत्वात् तत्र यत्नाधिक्येन गतार्थत्वात्।

केचिदाधुनिकाः श्वेताश्वतरभाष्ये नृसिंहतापन्यादिभाष्ये च भगवत्पादीयतायां विप्रतिपद्यन्ते। तेषामत्रायमेव तर्को यत् प्रस्थानत्रयभाष्यटीकाकृता श्रीमदानन्दगिर्याचार्येण श्वेताश्वतरादिभाष्योपरि न टीका व्यधायि। तेन विज्ञायते यदिदं भाष्यजातमानन्दगिरेः पश्चाद्भावि भवितुमर्हति। किं च दशोपनिषद्भाष्यादिषु यादृशं गाम्भीर्यं दृश्यते, तद् श्वेताश्वरादिभाष्ये न दृश्यत इति। परं नात्र वयं सारं पश्यामः। श्रीमदानन्दगिरिपूर्ववर्त्तिना माधवाचार्येण संन्यासोत्तरविद्यारण्याभिधानेन स्वीये शङ्करदिग्विजये

श्वेताश्वतरादिभाष्योल्लेखस्य कृतत्वात्। विद्यारण्यस्वामिपादानां वैदुष्यमतिरोहितमेव विदुषां सर्वेषाम्। तदीयसमये श्वेताश्वतरादिभाष्यस्य शाङ्करभाष्यत्वेन प्रसिद्धिः, सादरं तैस्तदुल्लेखश्च तेभ्यः सुदूरपूर्वकालवर्त्तित्वं श्वेताश्वतरादिभाष्यस्य साधयति। तथा चानन्दगिरिभिस्तदव्याख्यानमसाधकमेव। ये त्वानन्दगिरीणां विद्यारण्यस्वामि-पूर्ववर्त्तित्वमूरीकुर्वन्ति, तैरैतरेयभाष्यानन्दगिरीये सायणमतोल्लेखः कथमागत इति समाधातव्यम्। तत्रानन्दगिरीये विद्यारण्यकृतदीपिकोल्लेखः सायणीयत्वेन स्पष्टमेव विहितोऽस्ति। यदि पुनरैतरेयभाष्यटीकाकृदानन्दगिरिरपर एव, ईशावास्यादिभाष्यटीका-कृच्चानन्दगिरिस्ततः पृथगेवेति स्वीक्रियते, तदा त्वेकतरेणाप्यानन्दगिरिणा कृत्स्नं दशो-पनिषद्भाष्यविवरणं न कृतमिति निश्चीयेत। तदा च प्रथमानन्दगिरिणा तावदैतरेया-दिभाष्यं त्यक्तम्, द्वितीयेनेशावास्यादिभाष्यं त्यक्तमिति स्वीकारे नृसिंहतापन्यादिभाष्य-मुभाभ्यां त्यक्तमित्यत्र को नामाश्चर्यहेतुः। प्रथमेनेशावास्यादिभाष्यटीकाकरणादव-शिष्टभाष्यमेव व्याख्यायि, द्वितीयेन चेत् स द्वितीयो विद्यारण्यपश्चाद्भावीति तावत्पर्यन्तं श्वेताश्वतरादिभाष्याणां भगवत्पादीयत्वेन प्रसिद्धत्वात्कुतो न तानि व्याख्यायिषतेति युष्मान् प्रत्येवायं प्रश्न आपतति। वयं तु पश्यामः—नृसिंहोत्तरतापनीयव्याख्यायां श्रीमद्विद्यारण्यैः "तदुक्तं वार्त्तिककृद्भिः" इत्यभिधाय "नृसिंहब्रह्मविद्यैषा व्याख्याता ज्ञानसिद्धये" इत्यर्धश्लोकोद्धरणान्न केवलं भाष्यमेवापि तु वार्त्तिकमपि नृसिंहतापिनी-भाष्योपर्यस्तीति प्रतीयते। श्रीमत्सुरेश्वराचार्याणामेव वार्त्तिककृत्त्वेन वेदान्तिभिः स्मरणात्।

यत्तु श्वेताश्वतरादिभाष्ये भाष्यान्तरवद् गाम्भीर्यं नास्तीति, तत्तु स्वमनीषा-कल्पनामात्रम्। एवं पुनर्ब्रह्मसूत्रभाष्यवत् प्रसादगाम्भीर्यादिकमुपनिषद्भाष्यादिषु नास्तीति तत्रापि भिन्नकर्तृकत्वमनुमीयेत। न चेष्टापत्तिः। कतिपयोपनिषद्भाष्ये वार्त्तिककारेण शङ्करभगवत्पादशिष्येण वार्तिकनिर्माणात्तादृशकल्पनाया अनुपपत्तेः। तस्माद् गाम्भीर्यादिविषये यदस्माभिः प्रागभिहितं तदेव समाधानम्।

यदपि भाष्यान्तरेषु योगवासिष्ठानुल्लेखात्, श्वेताश्वतरभाष्ये च तदुल्लेखात्तस्य भगवत्पादाऽकर्तृकत्वं साधयन्ति तदप्यकिंचिदेव। योगवासिष्ठस्य चिरपूर्ववर्त्तिताया इतिहाससिद्धत्वात्तदनुल्लेखस्य बहुतरपुराणानुल्लेखवदुपपत्तेः। समालोचकाः पञ्चम-शताब्द्याः प्रागेव योगवासिष्ठास्तित्वं स्वीकुर्वन्ति। महाभारतात् प्राग्वा पश्चाद्वा योग-वासिष्ठरचनेति विचारस्तु प्रकृतानुपयोगित्वादुपेक्ष्यते। सर्वथापि दृढतरविरोधिप्रमाणं यावन्नोपलभ्यते, तावदाचार्यकृतमेव श्वेताश्वतरादिभाष्यमपीत्येव मन्तव्यम्।

उपनिषद्भाष्येषु बृहदारण्यकोपनिषद्भाष्यं तैत्तिरीयोपनिषद्भाष्यं चेति द्वे विशेषोल्लेखयोग्ये विद्येते, तदुभयोपरि वार्त्तिककृद्भिः श्रीमत्सुरेश्वराचार्यैर्वार्त्तिकप्रणयनात्। उभयत्र पदशो वाक्यशश्च विशिष्टं व्याख्यानमपि स्पष्टं परिलक्ष्यते। ब्रह्मसूत्रभाष्यानन्तरमनयोर्महीयस्त्वं सुधीभिरभ्युपगम्यते।

मुख्यविषयस्तु सर्वासूपनिषत्सु समान एव। अवान्तरविषये तु क्वचिद्विप्रतिपत्तयो दृश्यन्ते। संन्यासाधिकारो ब्राह्मणानामेवेति बृहदारण्यकभाष्ये प्रतिपादितम्। वार्त्तिककारस्तु तत्खण्डनं कुर्वाणः प्रथमं त्रैर्वणिकसंन्यासाधिकारमभिधत्ते। पश्चात् सर्वस्यापि संन्यासमाह—

"कुतोऽधिकारनियमो व्युत्थाने क्रियते बलात्" इति।

विविदिषासंन्यासो ब्राह्मणानां विद्वत्संन्यासस्तु सर्वेषामिति केचिदत्र व्यवस्थामाहुः।

(ग) गीताभाष्यम्—यद्यप्युपनिषद्भ्योऽतिरेकमतिरिक्तार्थकत्वं वा गीतादेर्नाभ्युपगम्यत इति पृथक् तद्व्याख्या कुत इति प्रश्न उत्तिष्ठति, तथापि स्वयं ब्रह्मसूत्रकृता श्रुत्यर्थसमर्थनाय गीतादिस्मृतिवचनमुपस्थापितम्। तत्रापि मुख्यतया गीतावचनमेव सूचितमिति तदर्थव्याख्यानमुपनिषद्व्याख्यानवदुपयोग्येव। उपनिषदर्थनिर्णयोपयोगित्वादपि तथा। तदुक्तमीशावास्यभाष्यटीकायां "किं च प्रत्ययसंवादोऽपि बलवत्कारणं प्रसिद्धम्। विद्यते चोपनिषदर्थे गीतादिसंवादः" इति श्रीमद्भिरानन्दगिरिभिः। अपि च—

"स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा।
इति भारतमाख्यानं कृपया मुनिना कृतम्॥"

इत्यादिवचनं यदा पर्यालोच्यते, तदा गीताव्याख्यानं युक्ततरमेवाचार्यस्य। ये तु स्त्रीशूद्रादीनामध्ययनानधिकारवचनमयुक्तमनर्थकं चाधुनिकविचारवन्तो ब्रुवन्ति, तैरपि दुर्गमार्थत्वादेव साधारणजनानां त्रय्याः श्रुत्यगोचरत्वं समर्थयितुं शक्यते। क्व वा बहवो वेदवेत्तारोऽद्यत्वे। गीता पुनः सरलतरभाषानिबद्धा सकलजनसाधारणी सर्वैरधिकर्त्तुं शक्या। किन्तु तत्रापि सम्यग् विचारमन्तरा न यथार्थावगतिर्भवितुमर्हति। बहुभिर्विरुद्धार्थप्रतिपादनस्यापि कृतत्वादिति परमार्थमर्थं दर्शयितुं भगवत्पादास्तद्भाष्यमकार्षुः।

ज्ञानकर्मसमुच्चयं मोक्षसाधनतया बहवो वदन्ति। गीतायां तमेवार्थं ते स्थापयन्ति। शङ्करभगवत्पादास्तु ज्ञानकर्मसमुच्चयं निराकृत्य ज्ञानस्यैव साक्षान्मोक्षसाधनत्वं गीतायां स्थापयामासुः।

श्रीमद्रामानुजाचार्यास्तत्परवर्त्तिनश्च गीतायाः षट्कत्रयात्मकत्वं वर्णयन्ति । तत्र केचित् प्रथमं कर्मषट्कं, द्वितीयमुपासनाषट्कं, तृतीयं ज्ञानषट्कमिति निरूपयामासुः । यद्यप्युपक्रमोपसंहारादिपर्यालोचनायां न स्पष्टतया विभागोऽयमुपलभ्यते । द्वितीयाध्याये ज्ञानस्यैव प्राधान्यदर्शनात्; 'अशोच्यानन्वशोचः' इत्यादिना ज्ञानं प्रतिपादितम्; स्थितप्रज्ञलक्षणमन्ते प्रोक्तम्; षष्ठाध्याये योग एव मुख्यतया वर्णितः; नवमे राजविद्या प्रस्तूयते, तथापि प्रथमषट्केऽधिकतरकर्मवर्णनम् । द्वितीयषट्केऽधिकतरमुपासनावर्णनम् । तृतीयषट्केऽधिकतरज्ञाननिरूपणमित्येवं कथंचिद् विभागसमर्थनं संभवति । भगवत्पादास्तु नैवंविधं विभागमातिष्ठन्ते । तन्मते द्विविधो भवति धर्मः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च । उभयविधो धर्म एव वेदेषु तदनुसारिण्यां गीतायां च प्रतिपादितः । उपासना तु मानसं कर्मैव प्रवृत्तिलक्षणमिति न तत्पार्थक्यकरणमावश्यकम् । कर्मोपासनयोः सर्वत्र समुच्चयदर्शनाच्च । शिवविष्ण्वादिपूजनं कर्मोपासनोभयात्मकमेव दृश्यते । यज्ञादिकर्मस्वपि तत्तद्देवताध्यानाद्यात्मकोपासनमावश्यकम् । न च प्रेमलक्षणभक्तेः कर्मान्यत्वात्तत्प्रतिपादकभागस्यैव तृतीयत्वं स्यादिति वाच्यम्, इच्छादिवद् भावविशेषात्मकभक्तेः सर्वसाधनसहकारित्वेन पार्थक्यविरहात् साधनपोषणकारिण्यास्तस्याः कर्माद्यविरुद्धत्वात् । ज्ञानं पुनः कर्तृभोक्तृभावादिकं विघटयत् कर्माऽसहभावीति तस्य पार्थक्यं युक्तमिति भगवत्पादानामाशयः ।

(घ) विष्णुसहस्रनामभाष्यं त्रिशतीभाष्यमित्येवंविधान्यपि कतिपयभाष्याणि भगवत्पादीयत्वेन प्रसिद्धानि सन्ति । तेषां भगवत्पादकर्तृकत्वं बहवो यद्यपि विप्रतिपद्यन्ते । उत्तरं तु पूर्वतुल्यमेवेति नात्र पृथक् प्रक्रमामहे ।

अत्र च मनीषिण एवं वर्णयन्ति यद् भक्तिरपि परा मोक्षसाधनं भवति । भक्तावपि सर्वकर्मत्यागस्तत्र तत्र प्रतिपादितोऽस्ति ।

तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम् ।
प्रवृत्तं च निवृत्तं च श्रोतव्यं श्रुतमेव च ॥
मामेकमेव शरणमात्मानं सर्वदेहिनाम् ।
यहि सर्वात्मभावेन मया स्याद्यकुतोभयः ॥

इत्येवं भागवतादौ दर्शनात् ।

सन्ध्यावन्दनभद्रमस्तु भवते भो स्नान तुभ्यं नमः
भो देवाः पितरश्च तर्पणविधौ नाहं क्षमः क्षम्यताम् ।
यत्र क्वापि निषद्य यादवकुलोत्तंसस्य कंसद्विषः
स्मारं स्मारमघं हराणि तदलं मन्ये किमन्येन मे ॥

इत्यादिभक्तवरवचनाच्च। न चेच्छावत्प्रेम्णोऽपि कर्मसहकारित्वमेवेति युक्तं वक्तुम्, पराभक्तेः कर्माऽसहभावित्वात्। अन्यथा ज्ञानशून्येन प्रस्तरोपमेन कर्मणः कर्त्तुमशक्यत्वाज्ज्ञानस्यापि कर्मसहाभावित्वं कुतो न स्वीक्रियेत? परविद्यायाः कर्मविरोधित्वे तु तुल्यं ममापि। इत्थं च विष्णुसहस्रनामादिभाष्यं भक्तिप्रतिपादनाय प्रवृत्तमित्येव युक्तम्। तत्र ज्ञानभाष्यसहकारिणो भवन्ति प्रकरणग्रन्था भाष्यकारस्य। भक्तिभाष्यसहकारिणः स्तोत्रग्रन्था इति सर्वसंगतिरिति। मधुसूदनसरस्वतीस्वामिनोऽप्येनमेव पक्षं रोचयन्ते इति भक्तिरसायनादितः प्रतीयते।

(२) प्रकरणग्रन्थाः—श्रीमच्छङ्कराचार्यविरचिता बहवः प्रकरणग्रन्थाः प्रसिद्धाः सन्ति। तेषां संख्या सम्यङ्निर्णेतुं न पार्यते। अद्यत्वेऽपि बहवोऽप्रकाशिता वर्त्तन्ते, तथापि कतिचनात्र निर्निर्दिश्यन्ते। प्रकरणग्रन्थेषूपदेशसाहस्री मूर्धमणिरिव विराजते। अस्या आचार्यविरचितत्वे नैव कस्यचिद्विप्रतिपत्तिः। वार्तिककारैः सुरेश्वराचार्यैरुपदेशसाहस्रीगतानां बहूनां श्लोकानां स्वीयवार्त्तिकेषूद्धरणदर्शनात्। अस्या गद्यात्मकं पद्यात्मकं चेति भागद्वयमस्ति। प्रामाणिकटीकाकृतः सर्वेऽप्युभयमपि भागं व्याचचक्षिरे। पौर्वापर्ये तु नैकमत्यं दृश्यते। आनन्दगिर्याचार्या अन्ते गद्यभागं पठन्ति, रामतीर्थप्रभृतयस्तु प्रथममिति।

विवेकचूडामणिस्त्वाचार्यकृतोऽतिसरलो वर्त्तते। आवश्यक्यो वेदान्तप्रक्रियाः सर्वास्तत्र वर्णिताः सन्ति। एतद्ग्रन्थटीका प्राचीना कापि नोपलभ्यते।

आत्मबोधस्त्वाचार्यकृतो लघुग्रन्थः। तदीयटीका पद्मपादाचार्यकृता दृश्यते। तथा पञ्चीकरणमप्याचार्यकृतिरेव, यस्योपरि श्रीमत्सुरेश्वराचार्यकृतं वार्त्तिकमानन्दगिरिकृतटीका च विभासते। वार्त्तिकाभरणादयोऽपि व्याख्या बह्व्योऽत्र सन्ति, अपरोक्षानुभूतिरप्याचार्यकृतिरेव, यस्या व्याख्या श्रीमद्विद्यारण्यपादैर्विरचिता विराजते। तथा वाक्यवृत्तिरप्याचार्यीयैव। यदीयवचनानि प्रमाणत्वेन प्राचीनतरैराचार्यैरुदाहृतानि। अत्रत्यग्रन्थत्रयं लघुप्रस्थानत्रयत्वेनापि केचन वर्णयन्ति।

(३) स्तोत्रग्रन्थाः—आचार्यशङ्करभगवत्पादकृतानि परःशतानि स्तोत्राणि प्रसिद्धानि विद्यन्ते। सर्वत्राचार्यकृतत्वे गवेषकाणां विप्रतिपत्तिर्दृश्यते। तत्र भाषावैषम्यादयो हेतवश्च प्रदीयन्ते। बहवः स्वकृतस्तोत्रप्रचारप्रसारणकामाः शङ्कराचार्यनाम्ना स्तोत्राण्यकार्षुरिति केचिदाचक्षते। अपरे तु शङ्कराचार्यपीठाधिपतयः सर्वेऽपि शङ्कराचार्यपदवीका एवेति कतमेन शङ्कराचार्येण निर्मितानि स्तोत्राणीति नैव शक्यते

निर्णेतुमिति ब्रुवते। वयं पुनरिदमाचक्ष्महे—भाषावैषम्यं भिन्नकर्तृकत्वे निमित्तं न भवितुर्महति, समयभेदेन विचारभेदेन च तत्संभवात्। आचार्याः किल धर्मप्रचार-समये यत्र कुत्रापि देवालये तीर्थस्थाने वा जग्मुस्तत्रैव स्तुतेरावश्यकत्वादाशुकवित्वात् स्वयं स्तुतिं निर्मिमाणा एव तुष्टुवुः। शिष्याश्च तदानीं तदुल्लिलिखुः। तदानीं यथा-कण्ठागतशब्दा एव प्रायुज्यन्त इति रचनीयताबुद्ध्या कृतेभ्यः स्तोत्रादिभ्यो वैषम्यस्या-वश्यंभावितया तादृशं वैषम्यं भिन्नकर्तृकत्वे न हेतुः; किन्तु हेत्वाभास एव। तृतीये तु शङ्करपरम्पराया अविच्छिन्न प्रवाहतया प्रवृत्तत्वात् पावनत्वाच्च न मिथ्यानामनिवेश-संभावना विद्यते। केनचिन्निवेश्येत तथापि तच्छिष्येण सुज्ञेयत्वान्न तथा प्रथनं संभा-वितम्। तत्तत्पीठाधिपतीनां पृथक् स्व-स्वनामसद्भावेन केवलशङ्कराचार्यनाम्ना रचनाया अयोगाच्च।

यत्तु स्वस्वकृते शङ्कराचार्यनाम्ना प्रथनकल्पना क्रियते, तत्र तथा प्रथयितुः किं प्रयोजनं साध्यत इति दुर्भणम्। न हीह लोकपरलोकयोरन्यतरस्य सिद्धिः संभवति। न हि मिथ्याप्रथनकर्त्तुः परलोकः संभाव्यते। इहलोके पुनर्नास्त्येव तत्प्रयुक्तं यश आदिकम्। किं चैवंविधकल्पनां कुर्वाणस्य सर्वत्रैवानास्था संशयात्मता च स्यादिति सेयमपेशलैव कल्पना। एवमपि कस्मिंश्चित् स्तोत्रे नामोल्लेखविरहात् शङ्कराचार्यस्येयं भवितुमर्हतीति प्रामादिककल्पनया तन्नामापतनं सर्वथा न व्यासे-धामः। एवं कोऽपि धूर्त्तः शङ्कराचार्यनाम्ना स्तोत्रं रचितवानित्यपि सर्वथा निषेद्धुं न शक्यते, तथापि प्रमाणानुपलम्भात्तथा कल्पनं न रोचयामहे वयम्।

स्तोत्रग्रन्थेषु कस्य नाम प्रथमग्रहणार्हं कतमं द्वितीयमिति दुर्वचमेव। तथापि विपश्चितां दृष्ट्या सौन्दर्यलहर्याः प्रथमगणनार्हत्वं प्रतीयते। एतत्स्तोत्रोपरि लक्ष्मीधरा-चार्यविरचिता गम्भीरतरा टीका वरीवर्ति। डिण्डिमभाष्यादिकं च समुद्भासते। दक्षिणदेशतोऽष्टटीकाः किंचित्कालात् प्राक् प्रकाशिताः। अपरा अपि टीका अमुद्रिताः सन्तीति पुस्तकालयीयसूचीपत्रादितो ज्ञायते। विष्णुपादादिकेशान्तवर्णनं शिवपादादि-केशान्तवर्णनमित्याद्या अपि शब्दसौन्दर्यादितो महीयस्त्वं लभन्ते। गीतिकाव्यलक्षण-युक्तं भजगोविन्दस्तोत्रं तु कर्णकुहरयोः पतत् कमप्यानन्दं वैराग्यं बोधं चाधत्ते। काचन स्तुतिर्बोधप्रधाना। अपरा वैराग्यप्रधाना। इतरा दैन्यादिप्रधानेति वैविध्यं स्तोत्रेषूपलभ्यते। बह्व्यः स्तुतयो मुद्रिता विद्यन्ते। परःशताश्चामुद्रिता एवाद्यावधि।

एवं प्रसिद्धरचनाविचारणोत्तरं कतिचनाऽप्रसिद्धा अपि रचना गरीयस्यो वर्त्तन्ते। तत्र योगसूत्रभाष्यविवरणं शङ्कराचार्यकृतं किंचित्समयात् प्राग् दक्षिण-

भारते मुद्रितम् । तस्य शङ्कराचार्यकृतत्वे विप्रतिपद्यन्तां काममाधुनिकगवेषकाः । परं तस्याचार्यकृतत्वे बह्व्यो युक्तयो दृश्यन्ते । प्रथमं तु पुष्पिकैव प्रमाणम् । वाचस्पतेस्तत्त्ववैशारदीतोऽप्यधिकं गरीयस्त्वं बिभर्त्तीत्यपरं कारणम् । बहवस्तु पाठभेदा व्यासभाष्यगतास्तत्र प्रदर्शिताः सन्ति । किन्तु वाचस्पतिपाठः कुत्रापि नोद्धृत इति वाचस्पतेः प्राग्वर्त्तित्वात् तत्पूर्वमितरशङ्कराचार्यासंभवात् तृतीयं तत्प्रमाणम् । यद्यपि टिप्पणीकारेण शास्त्रं निमित्तमिति फक्किकाव्याख्यायां वाचस्पतिमतं तन्मार्गदर्शिपूर्वाचार्यमतं वेति लिखितमस्ति, तद्दृष्ट्वा च वाचस्पतिमतमेवेति निश्चित्य केचन वाचस्पत्युत्तरभावित्वमपि साधयितुं प्रायतन्त, परं सर्वमपि तदसंगतमेव । वाचस्पत्यभिप्रेतार्थस्य तत्राननुवादात् । यत्किंचिच्छब्दसाम्यमात्रमेव तत्र । तदिदं मया मत्कृततद्व्याख्यायां स्पष्टं निरूपितमिति नात्र पुनः प्रयतिष्ये । अन्ते तु तत्र शङ्कराचार्यस्तुतिरूप एक श्लोको दृश्यते । स तु भामतीगतस्वविषयकश्लोकवच्छिष्यकृतो निवेशितो वा कुतश्चिदापतितो वा स्यात् । सर्वथाप्यतिप्रौढिमानं बिभ्रतस्तस्य शङ्करभगवत्पादकृतत्वमेवास्माकं प्रतिभाति । सांख्यकारिकाटीका जयमङ्गला तु न प्रौढतरेति नात्र तद्विषये किंचिद् वक्तुं पारयामः । सर्वदर्शनविचारमात्राय सा लिखिता वा शङ्कराचार्येति नामान्तरपाठभेदाद् व्यक्त्यन्तरकृता वेति निश्चेतुमशक्यत्वात् ।

आभिः शास्त्रलक्षणाभिः कृतिभिः शस्त्ररूपाभिः सुहृदो दुर्हृदश्चाचार्यो जिगाय। क्वचित्तदुपदेशामृतेनाऽऽसिच्य वशीचकार तपस्विनो यमिनो नृपादींश्च । क्वचिच्छास्त्रार्थे पराजित्य दुर्हृदोऽपि वशमानिनाय । स्वयं भारतपरिभ्रमणं विधाय धर्मं प्रचारयन्नेव साधूनां साधुत्वं परित्रायमाणां दुष्कृतां दुष्कृत्त्वं विनाशयंश्च विलक्षणप्रकारेणावतारकार्यं सम्पाद्य वैदिकधर्मं पुनः संस्थापयामास । एताश्च कृतयोऽद्यत्वेऽपि पूर्ववदेवाज्ञानसन्तमसापहरणपटीयस्यो विराजन्ते प्रचारसापेक्षाः । द्वादशशताब्दीसमारोहावसरे ततः परं चैताः कृतयो जनमानसेषु नवीनोन्मेषमादधाना विजयन्तामित्येवाशास्महे वयमिति शम् ।

वैदान्तिकोऽद्वैतवादः

डॉ० बलजिन्नाथपण्डितः

❀ ❀ ❀

वस्तुतस्तूपनिषत्प्रतिपादित एव दर्शन-सिद्धान्तोऽद्वैतवेदान्तसिद्धान्तः। परमुपनिषदां व्याख्यातारो हि भिन्नभिन्नदृष्टिभाजः। तत्र माध्वा द्वैतदृष्टिप्रधानाः सन्तः पाशुपतगुरुवदद्वैतपदेन मुक्तस्य जीवस्य ब्रह्मणा साकमांशिकं सादृश्यमेव प्रतिपादयन्ति, नाभेदं तयोः। शिवभोगोत्सुकाः शैवसिद्धान्तगुरवोऽपि तत्तुल्यप्राया एवांशतः। कश्मीरेषु भगवद्भास्करेण दक्षिणे च श्रीनिम्बार्केण स्वर्णकुण्डलन्यायेन जीवजगद्ब्रह्मणां परस्परमभेदे विद्यमानेऽपि भेदोऽप्यङ्गीकृतः। ततस्तद्विचारतो द्वैताद्वैतवाद एवोपनिषत्सारः। रामानुजीया वैष्णवाः श्रीकण्ठमतानुयायिनश्च शैवा दाडिमीफलतत्कणन्यायेन स्वात्मन्यभिन्नेऽपि ब्रह्मणि स्वगतं भेदमङ्गीकुर्वन्तो विशिष्टाद्वैतदृष्टिमेवोपनिषदां सिद्धान्तं प्रख्यापितवन्तः। चैतन्यमहाप्रभुणा तयोरचिन्त्यो भेदाभेदः प्रतिपादितः। विष्णुस्वामिवल्लभाद्या वैष्णवाः, श्रीपतिप्रभृतयो वीरशैवाश्च जीवब्रह्मणोः सामरस्यप्रायमभेदं प्रतिपादितवन्तः। शाङ्करे वेदान्ते जगदुपपत्तये ब्रह्मणः सकाशादतिरिक्तस्य मायाविद्याप्रायस्याशुद्धतत्त्वस्य स्वीकारं वैष्णवा एते अशुद्धिप्रयोजकं मन्यमानाः स्वमतं विशुद्धाद्वैतं कथितवन्तः, वीरशैवाश्च सामरस्यम्। उभयेषां मते ब्रह्मण ऐश्वर्यमेवैकमात्रं जीवनिकायस्य जडप्रपञ्चस्य चाभासस्य कारणम्। ब्रह्मैव ऐश्वर्यलीलाविलासतः क्रीडञ्जीवजगद्रूपतया बन्धनलीलामभिनयति। स एव पुनर्भक्तियोगाद्यभ्यासतो मोक्षलीलां रूपयतीति पारमैश्वर्यमण्डितं परं ब्रह्मैव वस्तुतः सर्वमिति तेषामेवंविधाऽद्वैतदृष्टिः। परमेवं विशुद्धमद्वैतं प्रतिपादयन्तोऽपि ते गुरवो ब्रह्मण आधिदैविकमेव स्वरूपं बहुमन्यमानास्तस्य चिन्मात्रमयं शुद्धं स्वरूपमवहेलयन्तो विशिष्टाद्वैतवादसामीप्यमेवोपयान्ति। सालोक्यसायुज्यकल्पां स्थितिमेव परं मोक्षमुपदिशन्तो वस्तुतः भेदलेशं स्वीकुर्वन्त्येव।

इत्थमेतेषां सर्वेषामपि विचारकाणामुपदेशेषु द्वैतगन्धो नैव सर्वथाऽपाकृतोऽस्तीति पश्यन्तो विद्वांसः कतिपयशताब्दीकालादद्य यावाच्छाङ्करमेवाद्वैतमुपनिषत्सिद्धान्तसारतया बहुमन्यते। सर्वस्मिन्नपि भारते महतां विद्याकेन्द्राणां मध्ये प्रायशः शाङ्करस्यैवाद्वैतवादस्य बहुमानोऽद्यापि वर्तते। असावद्वैतवेदान्तवादो गौडपादाचार्येण सम्यग् विकासमुपनीतस्तस्य प्रशिष्येण चार्यशङ्करेण सुव्याख्यातः, सुप्रचारितः सुप्रतिष्ठापितश्च भारतवर्षे सुप्रभूतेषु विद्याकेन्द्रेषु। तदनुसारं ब्रह्मैवैकमात्रं परमार्थसत्यं तत्त्वम्।

तच्च सच्चिदानन्दस्वरूपं सर्वतोऽसीमं सर्वथा चानवच्छिन्नमपरिमितचिन्मात्ररूपम् । मायात्मकोपाधिवशादेव । तद् ब्रह्म सृष्ट्यादिकर्तृत्वेनाभासतेऽनाद्यविद्योपहतैश्च जीवं- रीश्वरतया ज्ञायते । परं वस्तुतो जीवा , जगद् ईश्वरश्चेति त्रयमपि स्वप्नदृष्टवस्तुजातवद- सत्यमेव; यतोऽविद्याप्रभावत एवाभासते । समुदितायां विद्यायां त्रयमप्येतद्विद्युद्विलायं प्रविलीयते, एकमेव चापरिमितचिन्मयं ब्रह्मावशिष्यते । तन्मते एतदेवाद्वैतमुपनिषदुप- दिष्टम् । उक्तं हि श्रीगौडपादैः—

अनादिमायया सुप्तो यदा जीवः प्रबुद्ध्यते ।
अजमनिन्द्रमस्वप्नमद्वैतं बुद्ध्यते तदा ॥ (मां० का० १-१६)
न कश्चिज्जायते जीवः सम्भवोऽस्य न विद्यते ।
एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते ॥ (तदेव–३-४८)
तस्मान्न जायते चित्तं चित्तदृश्यं न जायते ।
तस्य पश्यन्ति ये जातिं खे वै पश्यन्ति ते पदम् ॥ (तदेव–४-२८)

यच्च गौडपादादिभिर्ब्रह्मणः सृष्ट्यादिकर्तृत्वमुक्तं कारिकासु, यच्च व्याख्यातं तथा शङ्कराचार्येण तट्टीकायां, ब्रह्मसूत्रभाष्यप्रारम्भे च ईक्षत्यधिकरणे, तत् सर्वम- विद्योपहतजीवदृष्ट्यपेक्षयेति तैः स्वयं निर्दिष्टं लीलाकैवल्यसूत्रभाष्ये । उक्तं हि तत्र स्पष्टम्—

"न चेयं परमार्थविषया सृष्टिश्रुतिः, अविद्याकल्पितनामरूपव्यवहारगोचरत्वात्, ब्रह्मात्मभावप्रतिपादनपरत्वाच्चेति नैव विस्मर्तव्यमिति ।" (ब्र० सू० शां० भा० २-१-३३)

आरम्भणाधिकरणेऽपि— "तदेवमविद्यात्मकोपाधिपरिच्छेदादक्षमेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च परमार्थतो, विद्ययापास्तसर्वोपाधिस्वरूप आत्मनीक्षित्रीशितव्य- सर्वज्ञत्वादिव्यवहार उपपद्यते" (तदेव–२-१-१४) ।

इत्थमीश्वरस्येश्वरत्वमपि मायोपाध्यवच्छिन्नमविद्यावशादेव च सम्भाव्यमानं प्रतिपादयन्तो जगतश्च वन्ध्यासुतकल्पतयाऽसत्यत्वं घोषयन्तो ब्रह्मतत्त्वमैश्वर्यहीन- माकाशकल्पं शून्यमेव फलतः प्रतिपादयन्ति । न च तथा सम्मतमुपनिषदाम् । तासु पदे पदे ब्रह्मणः सृष्ट्यादिसम्पादनस्वभावत्वं परमेश्वरत्वं च बहुधा जोघुष्टम् । तत एव केचन वैष्णवास्तानद्वैतवेदान्तिनः "प्रच्छन्नबौद्धा इमे" इति घोषितवन्तः । श्रीसोमानन्दाद्याः पराद्वैतवादिनः शैवास्तथाविधं ब्रह्म माध्यमिकाचार्यसम्मतशून्यतुल्ययोगक्षेमं पश्यन्तः पार- मैश्वर्यस्वभावत्वं वास्तविकस्य परब्रह्मणः प्रतिपादयन्तोऽसम्भवस्यापि वस्तुनः सम्भवत्व-

सम्पादिनीं मायां ब्रह्मणो नैसर्गिकस्वभावभूतानां शक्ति प्रख्यापयन्तः पारमैश्वर्यमण्डितं परं ब्रह्म घोषितवन्तः। क्षेमराजाचार्येणोद्धृते भट्टनायकस्तोत्रवाक्ये कविवाण्योक्तमेतत्—

नपुंसकं महादेव परं ब्रह्म फलेत् कियत्।
तत्पौरुषनियोक्त्री चेन्न स्यात् त्वच्छक्तिसुन्दरी ॥
(सं० नि० पृ० १८)

आचार्याभिनवगुप्तपादैरप्ययमविद्यावाद एवमालोचितः—

"अत एव भेदाभेदयोर्विरोधं दुस्समर्थमभिमन्यमानैरेकैरविद्यात्वेनानिर्वाच्यत्वमपरैश्चाभासलग्नतया सांवृतत्वमभिदधद्भिरात्मा परश्च वञ्चितः।" (ई० प्र० वि० २-३-१४) इति। "अन्तर्गतविश्ववीर्यसमुच्छलत्तात्मक-विसर्ग-विश्लेषानन्दशक्त्येकधनं ब्रह्म, बृहद् व्यापकं, बृंहितं च, न तु वेदान्तपाठकाङ्गीकृत-केवलशून्यवादाविदूरवर्ति-ब्रह्मदर्शन इव" (प० त्री० वि० पृ० २२१) इत्यैश्वर्यशक्तिहीनस्य ब्रह्मभावस्यालोचना।

अनाद्यविद्याकृते विश्ववैचित्र्याभासे यत्तर्कमूलकमसमञ्जसत्वं तदाक्षिप्तं सुविस्तरत ईश्वरप्रत्यभिज्ञाविमर्शिन्याम्। तद्यथा—"चिद्रूपस्यैकत्वं यदि वास्तवं भेदः पुनरयमविद्योपप्लवादित्युच्येत, तदा कस्यायमविद्योपप्लव इति न सङ्गच्छते। ब्रह्मणो हि विद्यैकरूपस्य कथमविद्यारूपता न चान्यः कश्चिदस्ति वस्तुतो जीवादिर्यस्याविद्या भवेत्। अनिर्वाच्येयमविद्येति चेत्, कस्यानिर्वाच्येति न विघ्नः। स्वरूपेण च भाति न च निर्वाच्येति किमेतत्। युक्त्या नोपपद्यते इति चेत्, संवेदनतिरस्कारिणी का खलु युक्तिर्नाम। अनुपपत्तिश्च भासमानस्य काऽन्या भविष्यति" (ई० प्र० वि० २-४-२०)।

अपरं च—"सद्रूपमेव ब्रह्माभिन्नं चकास्त्यविकल्पके, विकल्पबलात्तु भेदोऽयम् इति, चेत्, कस्यायमविकल्पनव्यापारो नाम। ब्रह्मणश्चेद् अविद्या योगो, न चान्योऽस्ति। अविकल्पकं च सत्यं विकल्पकमसत्यमिति कुतो विभागो, भासमानत्वस्याविशेषात्" (ई० प्र० वि० २-४-२०) इत्यादि बहुविस्तरेयमालोचना तत्र। अन्ते पुनर्न्याय एवं प्रस्तुतः—"तस्माद् वास्तवं चिदेकत्वमभ्युपगम्यापि तस्य कर्तृत्वलक्षणा, भिन्नरूपसमावेशात्मिका क्रिया नोपपद्यते। परामर्शस्वरूपं तु स्वातन्त्र्यं यदि भवति, तदोपपद्यते सर्वम्। परामर्शो हि चिकीर्षारूपेच्छा। तस्यां हि सर्वमन्तर्भूतं निर्मातव्यमभेदकल्पेनास्ते इत्युक्तम्—

स्वामिनश्चात्मसंस्थस्य भावजातस्य भासनम् ।
अस्त्येव न विना तस्मादिच्छामर्शः प्रवर्तते ॥"

(ई० प्र० १-५-१०)

तदनन्तरं शास्त्रार्थस्तत्रेत्थमुपसंहृतः—"तेन स्वात्मरूपमेव विश्वं सत्यरूपं प्रकाशात्मतापरमार्थम्, अत्रुटितप्रकाशाभेदमेव सत् प्रकाशपरमार्थेनैव भेदेन भासयति महेश्वरः, इति तदेवास्यातिदुर्घटकारित्व-लक्षणं स्वातन्त्र्यमुच्यते ।" इति (तदेव) । तदेतत् परब्रह्मणः स्वतन्त्रेच्छात्मकमीश्वरत्वमेव ह्युपनिषत्सु तत्र तत्र स्फुटतया गीतं सदप्यवहेलनापक्षे प्रक्षिप्तं विवर्त्तवादिभिः । किमत्र कारणम् ? कथमाचार्यशङ्करेणाप्येवं कृतम् ?

उच्यते—वस्तुतो हि बौद्धानां विज्ञानवादं तेषामेवास्त्रेण छेत्तुमाचार्यवर्येणैन-मनाद्यविद्यावादं स्वीकृत्यौपनिषदो ब्रह्मवादस्तथाविधायां स्थितौ प्रापितो गौडपाद-सरणिमनुसरता यथासावद्वैतवादः शून्यवादसहोदरतामिवाप्तवानन्येषां दर्शनकाराणां दृष्टौ । यथैव हि तैर्बौद्धविज्ञानवादिभिरविद्याया अनादित्वं स्वीकृत्यैव जगदाभासस्योपपत्तिः प्रस्तुताऽभूत्, तथैव गौडपादशङ्करादिभिर्विवर्त्तवादिभिरपि तेषामेवानुकरणं कुर्वद्भिर्निजा तर्कयुक्तयोऽनाद्यविद्यामाश्रित्यैव प्रस्तुताः । वादविवादप्रक्रियायां द्वयोरपि वादिप्रतिवादिपक्षयोर्या त्रुटिः समाना भवति नासौ दोषतया गण्यते । न च तदविद्यावाद-दूषका अभूवंस्तत्काले । ततो दोषमिममपनेतुं नैव कश्चन यत्नः कृतो विवर्त्तवाद-गुरुभिः ।

सुसूक्ष्मया दृष्ट्या चेद् विचार्येतात्र विषये तदेतत् स्पष्टतां याति यदाचार्य-शङ्करेणासावनाद्यविद्याश्रितो विवर्त्तवादः तर्कपक्षाङ्गभूततयैव प्रख्यापितो बालानां बुद्धिभ्रमपरिहारार्थम्, न पुनर्वास्तविकमोक्षावाप्त्युपायतयेति । ये तावदुत्तमाधिकारिजन-योग्या वास्तविका मोक्षोपायास्तेषां निरूपणं तैः प्रपञ्चसाराख्ये तन्त्रे कृतम् । तच्च तन्त्रं पद्मपादाचार्येण व्याख्यातम् । एवमेव ततः पूर्वं त उपाया गौडपादाचार्येणापि निजे श्रीविद्यारत्नसूत्रे निरूपिता अभूवन् । पुनः सारभूता वास्तविकाद्वैतस्थिति-साक्षात्कारानुकुला वैदान्तिकाः सिद्धान्तास्तेषामभिव्यञ्जनमाचार्यशङ्करेण सौन्दर्य-लहर्यामाचार्यगौडपादेन च सुभगोदयस्तुतौ बहुधा कृतमस्ति । तत्र सुकोमलया काव्य-कलया प्रतिपादितास्ते दर्शनसिद्धान्ताः कस्य सहृदयस्य विचारकस्य कृते नानन्दसन्दोह-करास्तुष्टिप्रदाश्च । तदिदमत्र वेद्यं यत् प्रस्थानत्रयीभाष्येषु यास्तर्ककर्कशा युक्तयस्ता

बालानां वाक्कलहप्रियाणां कृते निबद्धा अद्वैतरसचमत्कारेच्छावतां सहृदयानामुत्तमाधिकारिणां कृते पुनः सौन्दर्यलहर्यादावभिव्यक्ततां नीता मोक्षोपायभूता उपासनापक्षसिद्धान्ताः; विशेषतोऽद्वैतयोगयुक्तय इति ।

अद्यापि शाङ्करेषु मठेषु सर्वत्र श्रीविद्योपासनायाः प्राधान्येन प्रचारो वर्तते। सुकर्कशानां तर्काणां तत्र न तथा प्रसरः। अग्रे शाङ्करपरम्परायामेव विद्यारण्येन मुनिना संगृहीतः श्रीविद्यार्णवाख्यस्तन्त्रग्रन्थो यो ज्ञानविज्ञानरत्नाकरकल्पः। अर्वाचीने युगे शाङ्करपरम्परासु यः सुप्रभावशाली ज्ञानविज्ञानसम्पन्नश्च वेदान्तविद्यागुरुरसौ तत्रभवान् भास्करराय:। नासौ प्रच्छन्नबौद्ध इति कोऽपि मन्यते। न च तस्याविद्यावादाश्रिते विवर्त्तवादे कोऽपि विशेषाग्रहः। पारमैश्वर्यसिद्धान्तप्राधान्यप्रख्यापकोऽसौ श्रीविद्योपासनपरो वैदान्तिकाद्वैतवादगुरुः। ततः प्रतीयते यच्छङ्कराचार्यादीनां पुरातनगुरूणामपि हार्दिको विश्वासः पारमैश्वर्यसिद्धान्त एव। विवर्त्तवादस्तु तैः शुष्कतर्कपक्षतयैव प्रतिपादितो न यथार्थतत्त्वसाक्षात्कारात्मकदर्शनदृष्ट्येति।

बहवो ह्यद्यतना विचारका एवं मन्यन्ते यज्जगतो वन्ध्यासुतकल्पतायाः प्रचारेण भारतीया जनाः राष्ट्रीयाः समस्याः प्रति तथा गजनिमीलिकामाश्रितवन्तः सततगत्या यथा राष्ट्रप्रगतिविषये वयं नितरामवनतिगर्त्तेषु सुचिरं निमग्नाः। अद्यापि न वयं सत्प्रबोधदशां प्रति यत्नशीला इति भारतस्यावनतिहेतूनां मध्ये वेदान्तविद्योपदिष्टं जगतो मिथ्याभासरूपत्वमेव मुख्यतां भजत इति। एष आक्षेपोंऽशतः सत्य एव प्रतिभाति। परं नासौ दोष आचार्यशङ्करादीनाम्। तैर्यो विवर्त्तवाद उपदिष्टोऽसौ साधनचतुष्टयसम्पन्नानामधिकारिसाधकानामेव कृते, न पुनर्जनसाधारणकृते। भगवता श्रीकृष्णेनाप्युपदिष्टमभूत् तथा—

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ॥ इति ॥
मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये ॥ इति च वदता।

मनुनाप्युक्तमभूत् स्पष्टम्—

अनधीत्य द्विजो वेदाननुत्पाद्यापि वा सुतान्।
अनिष्ट्वा विविधैर्यज्ञैर्मोक्षमिच्छन् व्रजत्यधः ॥ इति।

पुरातनेऽपि युगे समुपदिष्ट एष सिद्धान्त ईशावास्योपनिषदि विद्याऽविद्ययोर्निरूपणावसरे। तत्र विद्यापेक्षया अविद्योपासनैव प्रथममवश्यकर्तव्यतयोपदिष्टा। केवलाविद्योपासकाः "अन्धं तमः" प्रविशन्ति; परं केवलविद्योपासकाः "ततो भूय इव तमः" प्रविशन्तो दृश्यन्ते।

वस्तुतो नवमशताब्दीतो वाचस्पतिमिश्रादिभिः समस्तदर्शनादिशास्त्रप्रवीणैर्विद्वद्भिर्वेदान्तस्य तर्कपक्षप्रधानाः पठनपाठनपरम्पराः शास्त्रार्थपरम्पराश्च नितरां प्रचालिताः। उपासनापक्षश्चाप्रधानतां प्रति प्रक्षिप्तः। मध्यकालीनानां राजपुत्रशासकानां सभासु शास्त्रार्थप्रवीणाः पण्डिताः सुचिरं सम्मानमलभन्ता तेन वेदान्तप्रचारकाः केवलं पठनपाठने, शास्त्रार्थकरणे, तदनुकूलग्रन्थनिर्माणे च तथा संलग्ना यथोपासनापक्षः शिथिलतां यातः। युगदैवतेनापि निजेन प्रभावेणोपासनापक्षो नितरां शैथिल्यमापादितः। तत एव वेदान्तविद्या सदुपयोगहीना सञ्जाता। अद्यत्वे तावत् परीक्षाः समुत्तितीर्षवोऽबोधा बालाः, उपासनक्रियास्वनादरभाजः पुस्तकाधीतविद्याः पण्डिताः, तपोबलविहीना मठाधीशाः, प्रायशः सर्वेऽपि साधनचतुष्टयरहिता एव जनाः विनाधिकारमेव वेदान्तविद्यास्वामित्वं भजन्ते। विरलविरल एव कश्चित् क्वचिदेव याथार्थ्येन वेदान्तविद्योपासकस्तदधिकारवांश्च पुण्येनैव लभ्येत। इत्थं दुरुपयोगहता वराकी वेदान्तविद्याऽत्र कलिकाले प्रच्छन्नबौद्धवादतुल्यकक्षतामुपयातास्ति। स एष कलिकालस्य प्रभावः।

परमस्माभिर्निराशाध्वान्तभीतैर्नैव भाव्यम्। यतो सर्वोऽपि जगद्व्यवहारोऽयं नाट्यदृश्यकल्पः। न च नाट्यकलायामेकरूपस्यैव दृश्यस्य सुचिरमभिनयश्चमत्कारकारी। ततो विश्वस्यते यत् केनापि कालेन महानाटकमेतच्चतुर्थपञ्चमसन्धिदशामासाद्य यदाभिनेष्यते, तदा सत्यमौपनिषदमद्वैतं तथा सुप्रचारमुपयास्यति, यथा तस्य व्याख्याश्चिरन्तनैः श्रीपतिप्रभृतिभिरर्वाचीनैः श्रीभास्कररायप्रभृतिभिरद्यतनीयैश्चाचार्यामृतवाग्भवाद्यैः कृताः सन्ति पारमैश्वर्यसिद्धान्तदृष्टया। यथोक्तमभिनवगुप्तपादैः बोधपञ्चदशिकायाम्—

> एतौ बन्धविमोक्षौ च परमेशस्वरूपतः।
> न भिद्येते न भेदो हि तत्त्वतः परमेश्वरे ॥ (बो० पं० द० १४)

आचार्यामृतवाग्भवैश्च श्रीविंशतिकाशास्त्रे—

> सभ्यो नटो विभावादिभावा रङ्गः स्वयं भवन्।
> स्वचरित्रानुकारेण स्वमेव भजते रसम् ॥ (विं० शा० १३)

श्रीसिद्धनाथेनाप्युक्तमभूत् पुरा—

> नेत्थं विभोर्विवर्तोऽस्ति परिणामश्च न क्वचित्।
> अथवा द्वयमप्यस्तु तथाप्यस्य न खण्डना ॥ उद्ध०—(स्वं० प्र० पृ० ४)

तस्य स्वातन्त्र्यलीलया द्वयमप्येतदाभासतामिति तात्पर्यम्।

श्रीमच्छङ्करभगवत्पादाचार्या न्यायदर्शनं च

डॉ० श्रीशङ्करनारायणः
प्राध्यापकः, आड्यर्कोशस्थानम्
मद्रास

❀ ❀ ❀

प्रणम्य दक्षिणामूर्त्तिं शङ्करं चन्द्रशेखरम् ।
अक्षपादं च तत्तन्त्रविषये शाङ्करं मतम् ॥
अधिकृत्यागतयत्किञ्चिन्मीमांसिष्यामहे वयम् ।
सद्गुरून्नीतमार्गानुगमनोन्मुखचेतसः ॥

विदितमेवेदं श्रीमच्छङ्करभगवत्पादभारतीभावितभावानां विदुषां यच्छ्रीभगवत्पादाचार्याः स्वकीये शारीरिकभाष्ये द्वितीयद्वितीये तर्कपादे अष्टस्वधिकरणेषु सांख्यवैशेषिकबौद्धजैनमाहेश्वरभागवतान् विपक्षान् खण्डयन्ति, तथा द्वितीयप्रथमे द्वितीयेऽधिकरणेऽष्टाङ्गयोगस्मृतिम्, एवं तृतीयचतुर्थ आद्याधिकरणद्वयेऽन्यत्र च जैमिनीयं मतं निराकुर्वन्तीति । अत्रायं पूर्वपक्षः समुपतिष्ठते—एवमास्तिकदर्शनानां मध्ये कापिलपातञ्जलकाणादजैमिनीयेषु दर्शनेषु खण्डितेषु सत्स्वद्वैतिभिर्भगवत्पादैः किमिति न खण्ड्यत आक्षपादो नयो द्वैतवादप्रधानः ? इति । प्रश्नस्यास्य समाधानान्वेषणायास्मिन् लघुप्रबन्धे यथामति प्रयतिष्यामहे ।

अत्र च विषये प्रथमत इदमेव वक्तुं प्रभवामो वेदान्तसूत्रकृतो भगवद्बादरायणाचार्या भाष्यकृतो भगवत्पादाचार्याश्च नैकेषु स्थलेषु वैशेषिकं निराकुर्वन्ति । ये च तैस्तिरस्कृता वैशेषिकोपज्ञा वादाः परमाणुजगत्कारणत्ववादसमवायवादासत्कार्यवादादयस्ते सर्वे नैयायिकैः सबहुमानमनुसृता इति विदितं नः । तथा च वैशेषिकखण्डनेनैव नैयायिकोऽपि निराकृतो मन्तव्यः, अतिदेशन्यायादिति ।

अत्राह—प्रधानजगत्कारणवादिसांख्यस्मृतिप्रत्याख्यानेनैव तत्समानयोगक्षेमयोगस्मृतिप्रत्याख्यानस्यार्थतः सिद्धत्वेऽपि पृथग्योगप्रत्युक्त्यधिकरणरचनायामाचार्यप्रवृत्तिर्ज्ञापयति—एकप्रत्युक्त्या अन्यः सर्वात्मना प्रत्युक्त एवेति न मन्तव्यमिति । योगस्मृतेरिवाक्षपादस्मृतेरपि बहुशिष्टपरिगृहीतत्वं प्रसिद्धम् । नहि न्यायविरोधी दृश्यते शिष्टः कश्चित् । इत्थं च वैशेषिकनिराकरणेनैव नैयायिकोऽपि निरस्त आचार्यैरिति वादो न क्षोदक्षमः ।

किञ्च परमाणुसमवायादिवादनिराकरणप्रस्तावेऽयं वैशेषिकस्य वादः, एष काणादसिद्धान्तः, इयं च प्रक्रिया काणभुजामित्यादिरीत्यैव कणादवैशेषिकादिनामग्रहणपूर्वकं खण्डयन्ति भगवत्पादाः सूत्रभाष्य उपनिषद्भाष्येषु च। यद्यपि नैयायिकोऽपि परमाणुवादी, असत्कारणवादी च; तथापि तन्नामग्रहणपूर्वकमिमं वादं क्वचिदपि न खण्डयन्ति। तत्र किं कारणम्? अपि नाम नैयायिकपक्षपातिनस्ते? ओमिति चेत्, किंनिमित्तोऽयं पक्षपातः?

अथ तर्कपाद एव पत्यधिकरणे 'पत्युरसामञ्जस्यात्' (ब्र० सू० २.२.३१) इति सूत्रभाष्य ईश्वरः प्रधानपुरुषयोरधिष्ठाता भवन् निमित्तकारणमात्रं जगत इति माहेश्वराणां वादस्य निराकरणप्रस्तावे "वैशेषिकादयोऽपि केचित् कथञ्चित् स्वस्वप्रक्रियानुसारेण निमित्तकारणमीश्वर इति वर्णयन्ति" इति सूत्रपातनिकायामुक्त्वा प्रकृतखण्डनविषयीभूतस्यानुमानेनेश्वरास्तित्वं साधयितुर्माहेश्वरस्य मतेऽसामञ्जस्यपरम्परां प्रदर्शयन्ति भगवत्पादाः। तस्मिंश्चावसर ईश्वरस्य स्वार्थं परार्थं वा प्रवृत्त्यभ्युपगमे प्रवृत्तिनिमित्ता दोषा रागादय ईश्वरं प्रादुष्युः, ईश्वरमनीश्वरीकुर्युरित्यसामञ्जस्यप्रदर्शनसमये स्ववादपरिपोषणाय भगवत्पादाः "अपि च 'प्रवर्तनालक्षणा दोषाः (न्या० सू० १.१.१८) इति न्यायवित्समयः" इति न्यायसूत्रं प्रमाणयन्ति। अस्य च भगवत्पादवाक्यस्य तात्पर्यं वक्तुं प्रवृत्ता भामतीकाराः—"अपि च नैयायिकानाम् ईश्वरस्य निर्दोषत्वं स्वसमयविरुद्धमित्याह-**अपि चे**ति। अस्माकं तु नायं समय इति भावः" इति वदन्तो नैयायिका अप्यत्र निराकृता इति मन्यन्ते। इममेवाभिप्रायमुपोद्बलयति कल्पतरुः। अद्वैततत्त्वसुधाकारा आधुनिका अनन्तकृष्णशास्त्रिणोऽपि वाचस्पतिमिश्रपथानुगामिनः। एवञ्च नैयायिकं तन्नामनिर्देशपूर्वकं खण्डयन्त्येव भगवत्पादाः, तदपि तर्कपाद एवेति चेत्, अत्र ब्रूमः—भामतीमार्गं जानन्तोऽपि न तेन गच्छन्ति रत्नप्रभान्यायनिर्णयब्रह्मविद्याभरणकृत्प्रभृतयः। अत्र प्रकृतमाहेश्वरमतगतासामञ्जस्यप्रदर्शनमेव प्राकरणिकं भगवत्पादाभिमतमिति मन्यन्त इव ते। युक्तं चैतत्। नूनं कर्मारिण प्रदत्तं खड्गमादाय शत्रुणा सह अतिघोरे युद्धे प्रवर्तमाने तद्युद्धसमये तेनैव खड्गेन तमेव कर्मारं हन्तुं प्रवृत्तो योद्धा न साधुकारी भवति। अतः पत्यधिकरणे माहेश्वरमेव, न नैयायिकमपि, खण्ड्यं मन्यन्ते भगवत्पादा इति वैशेषिकादिनिराकरणं तु अर्थात् सिद्धमित्येव युज्यतेतराम्।

वस्तुतस्तु न्यायसूत्रकृतः अक्षपादाचार्या यत्रेश्वरास्तित्वं प्रसाधयन्ति, तत्र चतुर्थाध्याये आह्निके प्रथमे "ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्" (न्या० सू० ४.१.१९) इत्यारभ्य सूत्रेषु त्रिषु पुरुषकर्मफलदातृत्वेनैव ईश्वरं साधयन्ति, समनन्तरेषु सूत्रेषु त्रिषु

(न्या० सू० ४.१.२२-२४) मनुष्यशरीरादिसर्गस्य आकस्मिकत्ववादं निराकुर्वन्ति च। तथैव च व्याख्यातं वात्स्यायनाचार्यैः न्यायभाष्यकारैः। परमाण्वधिष्ठातृत्वेनेश्वरकारण-वादं नोपलभामहे न्यायसूत्रतद्भाष्येषु। कर्मफलदातृत्वेन ईश्वरसाधनमार्गः ब्रह्मसूत्रतृतीय-द्वितीये फलाधिकरणे (ब्र० सू० ३.२.३८-४१) बादरायणाचार्यैः भगवत्पादैश्च प्रदर्शितात् मार्गात् नातिदूरे दृश्यते परमाण्वधिष्ठातृत्वेन ईश्वरस्य जगत्कारणत्ववादो वैशेषिकोपज्ञः उद्द्योतकराचार्यैरेव स्वकीये न्यायवार्तिके ईश्वरप्रकरणे एवातिविस्तारं विचारितः, परिपोषितः प्रायश इदंप्रथमतया न्यायनयं प्रवेशितश्च। असत्कार्यवादस्य परमाणु-वादस्य समवायवादस्य च खण्डनावसरे भगवत्पादैरुद्द्योतकराचार्योपदर्शितानां तत्तद्वा-दानुकूलानां युक्तीनामपरामर्शात् (ता युक्तयः सुयुक्तयो दुर्युक्तयो वेत्यन्योऽयं विषयः) अनुमिमीमहेतरां भगवत्पाददृष्टिपथं नागतमेव भवेदौद्द्योतकरं न्यायवार्तिकमिति (उद्द्योतकराचार्याणां भगवत्पादानां च कालकृतपौर्वापर्यविचारो नोपयुज्यते प्रकृते)। अतो मन्यामहे—असामञ्जस्यप्रदर्शनपूर्वकं बादरायणाचार्यैर्भगवत्पादैश्च निराकृतो न्यायनयः पत्यधिकरण इति वादो न विचारक्षम इति।

अस्मिंश्च प्रकरणे प्रसङ्गादेतदपि वक्तव्यं भवति—अनुमानबलमाश्रित्य जगत्का-रणत्वेनेश्वरसाधने माहेश्वरमतलग्ना दोषाः प्रादुष्युरित्यसाधारण्या पुरोदृष्ट्या पश्यन्तः, शास्त्रप्रमुखेऽपि जगज्जन्माधिकरणेऽनुमानेनेश्वरसाधनमधिकरणार्थं इत्याशङ्क्य निरा-कुर्वन्तः, वेदवाक्यकुसुमग्रथनार्थत्वाद् वेदान्तसूत्राणां वेदवाक्यैरेवेश्वरावगतिप्रतिपादनम्, अनुमानं त्वेतदवगतिदार्ढ्यमात्रफलकमित्येवाधिकरणार्थ इति सिद्धान्तयन्ति भगवत्पादा इति ज्ञापनं चित्तमस्माकमाह्लादयति।

एवं पूर्वोक्तदिशा विमर्शे कृते पत्यधिकरणे भगवत्पादैर्नैयायिको न प्रतिमल्लकोटौ प्रवेशितः; अपि तु स्वसहायककोटाविति युक्तमुत्पश्यामः। तथा च नैयायिकस्य निरा-करणेन भगवत्पादा नैयायिकपक्षपातिन इति प्रतिपद्यामहे। किं कारणं त एतत्पक्षपातिन इति वक्तव्यं भवतीति।

अत्रोच्यते—सत्यम्, न्यायदर्शनपक्षपातिन इवोपलभ्यन्ते भगवत्पादाः। इयञ्च पक्षपातिता तत्र तत्र सूचितापि तैः। तथा हि—प्रथमाध्याये प्रथमे पादे समन्वयाधि-करणभाष्ये शास्त्रमात्रप्रमाणकं ब्रह्मेति सिद्धान्तव्यवस्थापनाय प्रवृत्ते विचारे "प्रतिपत्ति-विधिविषयतयैव ब्रह्म शास्त्रप्रमाणकम्' इति मीमांसकपूर्वपक्षमुत्थाप्य निराकृत्य "कर्तव्यशेषत्वेन ब्रह्मज्ञानं नोपदिश्यते, कर्मासहभाविनैव ज्ञानेन मोक्षः" इति, "तत्त्व-ज्ञानमोक्षप्राप्त्योरन्तरा कर्तव्यं न किमप्यस्ति" इति च प्रदर्श्य, वस्तुतस्तत्त्वज्ञानस्य

मोक्षः फलमेव न, मोक्षस्य स्वतः सिद्धत्वात्, तत्त्वज्ञानस्य तु मोक्षप्रतिबन्धकमिथ्याज्ञानादिनिवर्तकत्वमात्रमिति स्वपक्षस्थापने व्यग्रा भगवत्पादाः स्वपक्षानुगुणानि श्रुतिवाक्यानि नैकानि पठित्वा तेषामर्थस्य न्यायेनोपोद्बलयितुम्, तथा चाचार्यप्रणीतं न्यायोपबृंहितं सूत्रम्—दुःखमप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः (न्या० सू० १.१.२) इत्यक्षपादं न्यायसूत्रकारमाचार्यशब्देन निर्नामोपपदेन निर्दिश्य तदीयं सूत्रं न्यायैः परिपोषितमिति स्तुवन्तः प्रमाणयन्ति। एवंरीत्या गौरवातिशयो न कस्मैचिदपि बाह्यदर्शनकाराय प्रदर्शितो भगवत्पादैः।

यद्यपि भगवत्पादीयं मतम्—ब्रह्मात्मैक्यज्ञानं तत्त्वज्ञानम्, तस्माच्च ब्रह्मभावापत्तिर्मोक्ष इति, नैयायिकमतं तु आत्माद्यपवर्गान्तानां प्रमेयत्वेन पारिभाषितानां तथा परिगणितानां द्वादशानां यथार्थज्ञानमेव तत्त्वज्ञानम्, तत्फलं तु परिगणितैकविंशतिदुःखध्वंसो मोक्ष इति महान् भेदः, तथापि तत्त्वज्ञानान्मिथ्याज्ञाननाशः, ततो मोक्ष इत्येतावानंशो मतद्वयेऽपि समान इति कारणान्न्यायसूत्रं प्रमाणयन्ति, न्यायोपबृंहितमिति मुक्तकण्ठं वदन्ति च भगवत्पादाः। ये च न्याया एतत्सूत्रसूचिताः, यांश्च मनसिकृत्वा न्यायोपबृंहितमित्युक्तम्, ते नामास्माभिः प्रतन्यन्ते लघुप्रबन्धोऽयमलघुर्मा भूदिति भिया। एवं सत्यपि तावदेतावद्वक्तुं शक्यम्—योऽयं सूत्रोदाहरणसंदर्भविशेषः, योऽयं भगवत्पादानामक्षपादे गौरवातिशयः, येयं सूत्रप्रमाणीकरणरीतिः, एते सर्वे निःसन्देहं ज्ञापयन्ति यद् भगवत्पादाः किञ्चदिव नैयायिकपक्षपातिन इति। अस्मिंश्च विषय इदं प्रथमं ज्ञापकम्। द्वितीयं तु पत्यधिकरणभाष्ये तच्च पूर्वमेव दृष्टमस्माभिः।

ननु च भगवत्पादानां नैयायिकपक्षपातिता स्थापितैव पूर्वपक्षे। तामेव द्रढयति खलु भवानेतावता परिकरेण। तदुपरि खलु पृष्टम्—किं कारणं भगवत्पादा नैयायिकपक्षपातिन इति चेदत्रोच्यते—ये सांख्यादय आगमिकान्तास्तर्कपादे निराकृताः सूत्रकारैस्त एव वेदान्तिनां प्रतिपक्षतया परिगणनीया इति मन्यन्त इव भगवत्पादाः। यो यस्तर्कपादे निराकृतः, स वेदान्त प्रतिपक्ष इति व्याप्तेः। ननु तर्कपादादन्यत्र बहुषु स्थलेषु, मुख्यतया तृतीयचतुर्थे पुरुषार्थाधिकरणे तथा परामर्शाधिकरणे च जैमिनिनामोच्चारणपूर्वकं तन्मतं खण्डयन्ति सूत्रकाराः, जैमिनीयं तु मतं वेदान्तप्रतिद्वन्द्वि। यद्यप्येवं खण्डिता एवागमिकास्तर्कपादेऽन्तिमाधिकरणद्वये, तथापि शैवं पाञ्चरात्रं वाऽऽगमं प्रथमं प्रमाणं मन्यमाना अपि केचन वेदान्तिनां यूथे दृश्यन्ते। तथा च निर्दिष्टव्याप्तेरुभयथा व्यभिचार इति चेत्, बहुत्र खण्डितत्वेऽपि मीमांसकस्य वेदान्तिभिः प्रतिपक्षीयत्वानभ्युपगमात्। तत्र गमकं तु तर्कपादेऽनिराकृतत्वम्। अत एव पुरुषार्था-

धिकरणेऽपि जैमिनिर्निर्दिष्टः सूत्रकारैर्न प्रतिपक्षीयत्वेन, अपि तु शिष्यत्वेनैवेति अभिप्रयन्ति भगवत्पादहृदयज्ञाः प्रसिद्धा व्याख्यातारः।

अपि च प्रथमद्वितीये वैश्वानराधिकरणे "साक्षादप्यविरोधं जैमिनिः" (१.२.२८) तथा "संपत्तेरिति जैमिनिस्तथा हि दर्शयति" (१.२.३१) इति सूत्रयोः; एवं प्रथमचतुर्थे बालाक्यधिकरणे "अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके" (१.४.१४) इति सूत्रे च जैमिनिमतस्य सूत्रकारैरेव श्रुतिसंवादप्रदर्शन-परिपोषणात्। अन्यत्रापि अग्निहोत्राधिकरणे "अतोऽन्यापि ह्येकेषामुभयोः" (४.१.१७) इत्यत्र काम्यकर्मणां विद्यां प्रत्यनुपकारकत्वे जैमिनिबादरायणयोरुभयोरपि संप्रतिपत्तिप्रदर्शनाच्च। तथा च जैमिनिर्न परपक्षीयो मन्तव्यः।

वस्तुतस्तु जैमिन्याचार्यो मुख्यानां वेदान्ताचार्याणामन्यतम एवावगन्तव्यः। अत एव तस्य तत्तन्मतविशेषान् बादरायणाचार्यास्तत्र तत्रानुवदन्ति; यावद्वारं जैमिनि-मतानुवादः (स्याद्वा द्वादशवारम्), तावद्वारमन्येषामद्वैताचार्याणामात्रेयकार्ष्णाजिन्यौ-डुलोमिबादरिकाशकृत्स्नाश्मरथ्यादीनां मतानुवादो नोपलभ्यते ब्रह्मसूत्रेष्वित्यपि न विस्मर्तव्यम्।

आगमिका औपनिषदानां दृष्ट्या बाह्या एव; ये त्वागमिका वेदान्तिव्यपदेश-भाजः, ते वेदान्तमहाराजसौधं सूत्रकारसंरक्षितेन पूर्वद्वारेण राजद्वारेण न प्रवेष्टुं प्रभवन्ति; अपि तु पार्श्वद्वारेण येन केनचित् पश्चाद्द्वारेण वेति मन्यन्तेऽद्वैतशास्त्रमर्म-वेत्तारः। तथा च निर्दुष्टैवोपरिदर्शिता व्याप्तिः। एवञ्च नैयायिकस्य तर्कपादेऽन्यत्र चानिराकरणान्मन्यामहे—सूत्रकारा अपि किञ्चिन्नैयायिकपक्षपातिनः, तथा तदनुगामिनो भगवत्पादा अपीति।

अत्राधुनिकाः केचन भारतीयतत्त्वशास्त्रचरित्रविमर्शकाः प्रत्यवतिष्ठन्ते। तथाहि—बादरायणाचार्या न खण्डयन्ति नैयायिकमित्येतन्न तेषां तस्मिन् पक्षपात प्रयुक्तम्; अपि तु तेषां ततोऽपि पूर्वकालिकत्वप्रयुक्तम्। यतो न्यायसूत्रकर्ताऽक्षपादो ब्रह्मसूत्रकर्तुर्बादरायणादर्वाचीनः। न हि प्राचीनोऽर्वाचीनं खण्डयति, असंभवादिति। परन्त्वङ्गीकृत्यापि बादरायणाक्षपादयोः कालिकं पौर्वापर्यम्, वयमिमं प्रश्नमन्यथा समाधास्यामहे। तथा हि—अक्षपादाचार्येभ्यः पूर्वमप्यासीदेवान्वीक्षिकी विद्येति सोपपत्ति प्रदर्शयन्ति जयन्तभट्टाः स्वीयन्यायमञ्जर्या उपोद्घातप्रकरणे। चरित्रविमर्शकानां दृष्ट्यापि युक्तमेवैतत्। यतोऽक्षपाददतिप्राचीनः कौटिल्यो राजशास्त्रवेत्ताऽऽन्वीक्षिकीं विद्यां स्तौति—"प्रदीपः सर्वविद्यानाम्" इत्यादिना स्वकीयेऽर्थशास्त्रे विद्यासमुद्देशे।

छान्दोग्योपनिषदपि वादकथाव्युत्पादिकामिमां विद्यां वाकोवाक्यशब्देन निर्दिशति, अतिप्राचीने कालेऽपीयं विद्या पाठिता विद्यास्थानेष्विति सूचयति च। अतः पूर्वं विद्यमानस्य स्वेन ज्ञातस्यैव सतो न्यायनयस्य खण्डने न प्रवृत्ता ब्रह्मसूत्रकृत इति युक्तमुत्पश्यामः।

ननु सूत्रकारा नैयायिकं न निराकुर्वन्तीत्यभावरूपोऽयं हेतुर्नानुमानसाधको भवति। यतस्ते तं नानुमोदन्तेऽपि। एवञ्च ते तस्य विषये पूर्णं मौनमातिष्ठन्ते, एतच्च मौनं तेषां तस्य विषये सुतरामौदासीन्यप्रयुक्तमपि स्यादिति चेत्, तेषां तस्मिन्नादरस्य प्रकारान्तरेणानुमातुं शक्यत्वात्। तथाहि—ब्रह्मसूत्रेष्वधिकसंख्याकानि सूत्राणि पञ्चम्यन्तपदघटितानि परार्थानुमानात्मकन्यायप्रयोगहारतरलायमानहेतुरूपाणि भवन्ति नूनं सूचयन्ति यद् ब्रह्ममीमांसायां प्रवृत्तेभ्यः सूत्रकृद्भ्योऽत्यधिकं रोचते न्यायप्रयोगमार्गः, यश्च नैयायिकैर्दर्शितः परिष्कृतः परिरक्षितश्च सावधानम्, यस्माच्च कारणात् तच्छास्त्रमाक्षपादं न्यायशास्त्रमाहुः। तस्मात् साध्वेवोक्तं यद् बादरायणाचार्या न्यायदर्शनपक्षपातिनस्तदनुयायिनो भगवत्पादाश्चापीति।

विषयेऽस्मिन् मौलं कारणान्तरमपि दर्शयिष्यामः। न्यायशास्त्रस्यास्येदमेव परममुद्देश्यं यच्छास्त्रमेतदधीत्य प्रमाणादितत्त्वज्ञानं संप्राप्य वादकथाकुशलाः सन्तो विभिन्नशास्त्रेष्वधीतिनोऽध्यापकाश्च स्वस्वशास्त्रीयं तत्त्वज्ञानं फलं च प्राप्नुयुः, स्वकर्तव्यकर्माणि सम्यक् कुर्युः, धर्ममाचरेयुः, अभ्युदयं निःश्रेयसं च यथाविद्यमवाप्नुयुरित्येतावदेव। अत एवेमामान्वीक्षिकीम्—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता॥

इति वर्णयन्ति न्यायभाष्ये वात्स्यायनाचार्याः। यथार्थवाद एवायम्, नार्थवादः, यद्यपि न्यायशास्त्रस्य प्रमाणप्रमेयेत्यादिप्रथमसूत्रे निःश्रेयसाधिगमः शास्त्रप्रयोजनमित्युक्तम्, तथापि तस्या उक्तेरिदमेव तात्पर्यं यद् विभिन्नविद्यानां यथाविद्यं यद्यन्निःश्रेयसम्, तदधिगमः प्रमाणादितत्त्वज्ञानाद् भवतीति "तस्य शास्त्रस्य स्वतन्त्रतया किञ्चिद् वर्तते निःश्रेयसम्, तदेव प्रमाणादितत्त्वज्ञानादधिगम्यते" इत्यत्र तु तस्या उक्तेर्न तात्पर्यमिति प्रतिभाति। अत एव न्यायशास्त्राकरग्रन्थविषयान् विभिन्नाभिर्दृग्भिर्विमृश्योपक्रमोपसंहारादिभिः षड्विधैस्तात्पर्यनिर्णायकलिङ्गैः परिशील्य सुदीर्घं विचार्य च नैतच्छास्त्रं स्वतन्त्रतया मोक्षतात्पर्यकमिति सोपपत्ति निगमयन्ति पण्डितश्रेष्ठा लक्ष्मणशास्त्रिणो द्राविडाः स्वकीयायां भूमिकायां स्वेनैव परिष्कृत्य प्रकाशिते खण्डनखण्डखाद्यग्रन्थे।

एवं सर्वासामपि विद्यानां तटस्थ उपकारके चास्मिन् न्यायसूत्रे बादरायणाचार्याणां भगवत्पादानां च पक्षपात इत्यत्र किमाश्चर्यम् !

अन्यच्च, न्यायशास्त्रीयेष्वाकरग्रन्थेषु यत् समवायवादासत्कार्यवादाणुवादादिकं समुपलभ्यते,तत् सर्वं वैशेषिकोपदर्शितपथेनैव प्रवर्तितं पश्यामः। यद्यपि स्याद् युक्त्याधिक्यं कुत्रचिद् यथा न्यायवार्त्तिके। एवं शास्त्रान्तरेषु यत्रैतेषां वादानां खण्डनं दृश्यते, तत्र सर्वत्रेमे सिद्धान्ता वैशेषिकस्येति निर्देशपूर्वकं खण्डनं क्रियते, न तु नैयायिकस्येमे सिद्धान्ता इति निर्दिश्य क्रियत इत्यपि पूर्वमेवास्माभिः प्रदर्शितम्। परन्तु यदा दिङ्नागधर्मकीर्तिप्रभृतयो बौद्धा स्वग्रन्थेषु नैयायिकं खण्डयितुं प्रवर्तन्ते, तदा ते न्यायतन्त्रसिद्धप्रमाणानां तदङ्गभूतानां च निरसने प्रयतन्ते। एवमेतेभ्यो हेतुभ्यो वयमनुमास्यामहे यद् विभिन्नशास्त्राधीतिनामुपकाराय प्रमाणादीनां पदार्थानां तत्त्वप्रतिपादने तथा तेषामेवोद्देशलक्षणपरीक्षासु महती श्रद्धा न्यायतन्त्रस्येति। एतन्निमित्तेयं प्रमाणशास्त्रमित्यस्य शास्त्रस्य महती प्रसिद्धिः।

परन्तु यदा यदा वैशेषिकनय इव परमाणुसिद्धान्तादिकमधिकृत्य तत्स्थापनाय प्रवर्तन्ते न्यायतन्त्राकरकारास्तदा ते तत्र नैदम्पर्येण प्रवर्तन्ते;अपि तु तत्त्वबुभुत्सुभिस्तत्त्वज्ञानप्राप्तय एवं विचारः कर्तव्यः, ईदृशो वादः प्रवर्तनीयः, लक्षणस्वरूपमेव, कार्यकारणभावकल्पनेत्थम्, अयमनुमानप्रकारः, व्याप्तिरेवं ग्राह्या, इमे हेत्वाभासा यथार्थानुमितिप्रतिबन्धकाः। अतस्ते सर्वथा वर्जनीयाः, प्रतिपक्ष एवं निरसनीय इति सर्वान् बोधयितुमेव वैशेषिकतन्त्रसिद्धान्तसिद्धानर्थान् सामान्यतः सर्वैरप्यनतिप्रयासेन ज्ञातुं शक्यान् उदाहरणत्वेन स्वीकृत्यैवाऽऽकरकाराः प्रवर्तन्ते; यथा वैयाकरणाः स्वग्रन्थेषु रामहरिशम्भुप्रभृतीन् शब्दान् उदाहरणत्वेन समादाय शब्दनिष्पत्तिप्रतिपादने प्रवर्तन्ते; यथा चैतेषां न तत्तच्छब्दविशेषेषु नैदंपर्यम्,अपि तु तेषां शब्दानामन्तरात्मभूतायां सर्वसामान्यभूतायां प्रक्रियायाम्; यथा वा व्याकरणशास्त्रस्य परममुद्देश्यं विभिन्नशास्त्रेष्वधीतिनः, अन्ये च सर्वे सम्यक् शब्दस्वरूपं ज्ञात्वा सुशब्दान् प्रयुञ्ज्युः, स्वस्वशास्त्रार्थं यथावज्जानीयुः, व्यवहारं च सम्यक् कुर्युः, यथाशास्त्रं धर्ममाचरेयुः, अभ्युदयं निःश्रेयसं वा यथाविद्यं समवाप्नुयुरिति—तद्वदेवात्र प्रकृते न्यायतन्त्रेऽपि।

एवञ्च व्याकरणवन्न्यायशास्त्रमपीतरसर्वशास्त्रोपकारकं सामान्यं शास्त्रम्। एतन्मूलमेवेदं पाण्डित्यसमव्याप्तं वचनम्—"काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्" इति। आभाणकेऽस्मिन् काणादमिति कणादतन्त्रसिद्धान्तान् सामान्यतयोदाहरणत्वेनादाय प्रवर्तमानं न्यायशास्त्रमेवाहेति सुव्यक्तमेतत्। एवञ्च व्याकरणवत् सामान्यशास्त्र-

मिदं न्यायदर्शनं न कस्यापि खण्डनीयम्। यदि व्याकरणं न्यायतन्त्रं वा नाभविष्यत्, साधुशब्दात्मकज्योतिः, सुबद्धतत्त्वविचारज्योतिश्च नाभविष्यत्। तदुक्तं दण्डिना—'इदमन्धंतमः कृत्स्नं जायेत भुवनत्रयम्' इति। अतो मन्यामहे बादरायणाचार्याणां भगवत्पादानां च समादरः न्यायतन्त्रे।

नन्वेवं सति कथमेतन्नैयायिकाः सर्वदा सर्वत्र वैशेषिकसिद्धान्तानादायैव विचारे प्रवर्तन्ते, न कदापि मीमांसावेदान्तसांख्यानामन्यतमस्य कस्यचिदन्यस्य वा तन्त्रस्य सिद्धान्तानादाय ? इति चेत्, उच्यते—मीमांसाया वेदान्तस्य वा सिद्धान्तानादाय विचारे प्रवर्तिते, वेदवाक्यार्थविचारः सर्वथाऽनिवार्यो भविता, निरुक्तशास्त्रविषयस्य कर्मणो ब्रह्मणश्च वेदैकसमधिगम्यत्वात्। न च तादृशे विचारे सर्वेषां जनानामभूदधिकारः प्राचीनभारते। "उपायः सर्वकर्मणाम्" इति प्रशंसिताया आन्वीक्षिक्याः प्रचारः आ हालिकम्, आ च श्रोत्रियं संपाद्यतयेष्टः। अतः प्रत्यक्षप्रमाणविषया बहवः पृथिव्यादयोऽपि परोक्षा आत्मादय इवावश्यं विचारणीया भवन्ति, यतः प्रत्यक्षागमाभ्यामीक्षितस्यानु पश्चादीक्षणमन्वीक्षा, तया प्रवर्तत इत्यान्वीक्षिकी। अन्यथोपनिषद इवाध्यात्मविद्यामात्रमियं स्यात्। तस्मान्मीमांसाया वेदान्तस्य वा सिद्धान्तसिद्धा विषया उदाहरणत्वेन नाङ्गीकृताः।

यद्यपि "सांख्यं योगो लोकायतमित्यान्वीक्षिकी" इति कौटिलीयमर्थशास्त्रम्; तथापि सांख्यसिद्धान्तानां स्वीकारेऽपि वेदवाक्यार्थविचारोऽनिवार्य एव स्यात्, यतः सांख्याः प्रधानं जगत्कारणमनुमिममानास्तत्परतया श्रुतिवाक्यानि योजयन्तः प्रवर्तन्ते, यन्निराकरणाय ब्रह्मसूत्रकारैर्महता प्रयत्नेन प्रवर्तितो महान् समन्वयाध्यायः। किञ्च सांख्यैरीश्वरानङ्गीकारात् तत्सिद्धान्तमादाय विचारे निरीश्वरवादोऽपि स्थापयितव्यः स्यात्, स च सर्वथानिष्टः शिष्टानाम्। एवं लोकायतसिद्धान्तादानेऽपि। मन्यामहे—मुख्यतया निरीश्वरवादरूपादेकस्मान्निमित्तात् सांख्यं लोकायतमिति मतद्वयं भारतीयतत्त्वशास्त्राकाशे अस्तङ्गतप्रायम्। एवं वैदिकदर्शनत्वेन प्रसिद्धेषु दर्शनेष्वन्यतमस्यावश्यस्वीकरणीये संप्राप्ते वैशेषिकनय एवावशिष्टो दृष्टः। तस्मात् तमेव नयं योगापरनामानं 'सांख्यं योगो लोकायतमित्यान्वीक्षिकी' इत्यान्वीक्षिकीमुक्ताहारतरलायमानं स्वीकृत्य विचारे नैयायिकास्तथा प्रवर्तन्ते, यथा आ बालगोपालं जनानाम्, आ च वाचस्पति विदुषां च शास्त्रेऽस्मिन् प्रवेशोऽभिरुचिश्च स्यादिति युक्तमुत्पश्यामः।

तानीमानि कारणानि बादरायणाचार्याणां भगवत्पादानां च न्यायशास्त्रपक्षपातित्वे सामान्यानि। भगवत्पादानां विषये तु कारणान्तराणि असाधरणान्यपि

पश्यामः । तथाहि—यद्यपि सांख्यादि त्रयाणामान्वीक्षिकीत्वमभ्युपगम्य कौटिल्यः स्तौति आन्वीक्षिकीम् अर्थशास्त्रे 'विद्योद्देशे' इति दृष्टमेवास्माभिः पुरस्तात् । परन्तु न्यायभाष्यकृतो न्यायदर्शने प्रथमसूत्रभाष्ये प्रत्यक्षबाधितमनुमानमिव श्रुतिबाधितमपि तन्न्यायाभास इति तिरस्कृत्य तदुभयाबाधितैव न्यायविद्याऽऽन्वीक्षिकी मुख्या प्रदीपवत् सर्वविद्यानां प्रकाशयित्रीति प्रतिपादयन्ति । अयं च वादोऽतीव प्रियावहो भवति भगवत्पादानाम्; यतस्तेऽपि न्यायभाष्यप्रतिध्वनिरूपतया स्मृतिपादे "दृश्यते तु" (ब्र० सू० २.१.६) इति सूत्रभाष्ये, तथा तर्काप्रतिष्ठानसूत्रभाष्ये (२.१.११) च श्रुतिविरहितस्य शुष्कस्य तर्कस्यात्मलाभं निरस्य श्रुत्यनुगृहीतस्यैव तस्याश्रयणीयत्वमुपदिशन्ति । यतो मन्यामहे—वैदिकदर्शनभाष्यकाराणां मध्य आगमबाधितस्य न्यायाभासत्वमेवं सुव्यक्तं प्रदर्श्य तस्य वर्जनीयत्वस्थापने न्यायभाष्यकृतः प्रायशोऽग्र्यं स्थानमधितिष्ठन्तीति । धर्मजिज्ञासासूत्रभाष्ये "न चानुमानं प्रत्यक्षविरोधि प्रमाणं भवति" इति मात्रं वदन्तः शबरस्वामिनोऽपि न दर्शयन्ति श्रुतिबाधितानुमानस्य न्यायाभासताम् ।

अस्मिंश्च विषये मुख्यं कारणान्तरमपि प्रदर्शयिष्यामः । तथाहि—भगवत्पादानां प्रस्थानत्रयभाष्येषु तत्त्वज्ञानस्याधिकारिद्वारा कर्तव्यशेषत्वम्, ज्ञानकर्मणोः समुच्चित्य मोक्षकारणत्वमित्यादयो वादाः मीमांसकप्रभाविताः पुनः पुनः खण्डिता दृश्यन्ते। तेषामेषां वादानां निराकरणे यावान् प्रयत्नः क्रियते भगवत्पादैस्तावान् नान्येषां वादानां निराकरण इति प्रतिभाति । यद्यपि सांख्यो निराक्रियतेऽधिकतरप्रयत्नेन बहुतरवारम्, तथापीदं मनसि धारणीयमस्माभिर्यत् सांख्यः सूत्रकाराणामेव प्रधानः प्रतिमल्ल इति । अतः सूत्राणां भाष्यकृत्त्वेनैव, न तु स्वतन्त्रतया, तावान् प्रयत्नः क्रियते भगवत्पादैः सांख्यनिराकरणे । एवं पूर्वोपदर्शितवादनिराकरणप्रयासः, तथा तद्गतपौनःपुन्यमित्थमनुमापयतीव—इमे वादाः पूर्वमीमांसाप्रभाविताः सन्तो वेदविदां शिष्टानां मध्ये सुविस्तृताः सुदृढं बद्धमूलाश्चासन्; उपनिषदश्च कर्मकाण्डस्योपसर्जनभूता इत्यपि शिष्टा अमन्यन्तेवेति । यथाहुर्मधुसूदनसरस्वत्यः—

मीमांसया कपटतो भुजगाम्बयेव
स्वाधीनतामुपनिषद्वनितेव नीता । इति ।

अतस्तेषामेषां वादानां शिष्टसमूहात् समूलमुन्मूलने भृशं प्रयतन्ते भगवत्पादा इति च ।

अस्मिंश्च महति समुद्यमे यद्यप्यस्ति तेषां साहायकमभेद्यमजेयं श्रुतिबलम्, तन्मूलकं न्यायबलम्, तथा तेषामप्रतिमा प्रतिभा, अप्रतिभटं वादकौशलं च; तथापि

वैदिकदर्शनान्तरकाराणां संवादः सहायश्च यद्यलप्स्यत तर्हि हेम्नः परमामोदोऽभविष्यत्। वैदिकदर्शनकाराणां मध्ये सांख्यो वैशेषिकश्च तर्कपादे सूत्रकारैर्निराकृताविति तत्साहाय्येऽत्यन्तमनपेक्षा। सांख्योपजीवी च पातञ्जलोऽष्टाङ्गयोगः, तत्र च दर्शने न किञ्चिदुपलभामहे वाक्यमुक्तानां वादानां निराकरणपरम्। एवं त्रिषु दर्शनेषु दूरीभूतेषु सत्सु मीमांसकवेदान्तिनो वादकथायां वेदान्तिनोऽनुकूलोऽवशिष्टो नैयायिक एवोपलभ्यत उपकाराय। यतो वात्स्यायनाचार्या चतुर्थप्रथमेऽन्तिमे भागेऽपवर्गपरीक्षाप्रकरणे "प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः" (न्या० सू० ४.१.७०) इतिन्यायसूत्रभाष्ये "परं कर्मभ्योऽमृतत्वमानशुः" (वाज० सं० ३.१.१८) "न कर्मणा........ त्यागेनैके अमृतत्वमानशुः" (तै० आ० १०.१२.२) "ब्रह्मसंस्थोऽमृतत्वमेति" (छा० उ० २.२३.१) इत्येवमादीनि श्रुतिवाक्यानि बहूनि दर्शयित्वा महता संरम्भेण मोक्षं प्रति कर्मणः स्वतन्त्रतया वा कर्मसहभावितया वा कारणत्वं निराकुर्वन्ति। भगवत्पादा आत्मनोऽतीवानुकूलं प्रियावहं नैयायिकमतमिदं यथावकाशमात्मनीनं कृत्वोपयुञ्जते; यतस्तेषां वाक्येषु प्रकृतवादनिराकरणाय प्रवृत्तेषु वात्स्यायनवाक्यप्रतिध्वनिं शृणुमः। एवं न्यायशास्त्रबलमपि श्रुतिबलेन सम्यगुपयुज्य औपनिषदं ब्रह्मात्मज्ञानं स्वातन्त्र्येण मोक्षफलकमिति स्थापयित्वा मीमांसाकृतबन्धात् मोचितापि भगवती उपनिषद् भगवत्पादैः, तदप्युक्तं पूर्वनिर्दिष्टपद्यस्य उत्तरार्धे मधुसूदनसरस्वतीभिः—

येनोद्धृतामृतफलेन गरुत्मतेव
तस्मै नमो भगवतेऽद्भुतशङ्कराय॥ इति।

एतादृशोपकारप्रदातरि न्यायनये भगवत्पादानां पक्षपातिता स्वभावतः सिद्धा भवति। महापुरुषाः खलु ते। यतो हि महापुरुषः "कथञ्चिदुपकाराणां कृतेनैकेन तुष्यति।" अत एवोक्तमीमांसावादनिराकरणाय दुःखजन्मेत्यादि न्यायसूत्रं सबहुमानं प्रमाणयन्ति भगवत्पादाः, तथैव चोपदर्शितं पूर्वमस्माभिः।

न केवलमपवर्गपरीक्षाभाष्य एव, अपि तु "तदत्यन्तविमोक्षोऽपवर्गः" (न्या० सू० १.१.२२) इत्यपवर्गसूत्रभाष्येऽपि वात्स्यायनाचार्या भगवत्पादानां पुरोगामिनः। यतस्तत्रापवर्गस्य "एतामवस्थामपर्यन्तामपवर्गं वेदयन्तेऽपवर्गविदः तदभयमजरममृत्युपदं ब्रह्मक्षेमप्राप्तिः" इति स्वरूपं वृद्धसंमतिप्रदर्शनपूर्वकं कथयन्ति नूनमत्र न्यायभाष्यकारा अद्वैतिन इवापवर्गं ब्रह्मरूपमेव मन्यन्ते।

तानीमानि कारणानि, यतो भगवत्पादा न्यायनयपक्षपातिनः। अत एव न्यायदर्शनाद् वाक्यान्युद्धृत्य स्वपक्षपरिपोषणार्थमुपञ्जते ते। कानिचन तादृशवाक्यनि पूर्वं दृष्टान्यस्मभिः। वाक्यान्तराण्यपि द्रक्ष्यामः—

(१) बृहदारण्यकतृतीयाध्यायभाष्य आदौ याज्ञवल्क्याख्यायिकाया उपपत्ति प्रतिपादयन्तः "तद्विद्यसंयोगस्तैश्च सह वादकरणं विद्याप्राप्त्युपायो। न्यायविदां दृष्टः" इति वदन्ति। नूनमत्र ते 'ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः" (न्या० सू० ४.२. ४७) इत्याक्षपादं सूत्रमेव प्रतिध्वनयन्ति।

(२) छान्दोग्यषष्ठद्वितीयखण्डे प्रथममन्त्रभाष्ये, यथा तर्कपादे तथैव वैशेषिक-निराकरणसमनन्तरं वैनाशिकखण्डने प्रवृत्ता भगवत्पादाः "सदभावमात्रं हि प्रागुत्पत्तेस्तत्त्वं कल्पयन्ति बौद्धाः, न तु सत्प्रतिद्वन्द्विवस्त्वन्तरमिच्छन्ति" इति बौद्धमतं प्रदर्श्य, अत्र च विषये व्यतिरेकदृष्टान्तमेकं दिदर्शयिषवः—

"यथा असच्चासदिति गृह्यमाणं यथाभूतम्।
अविपरीतं तत्त्वं भवतीति नैयायिकाः॥"

[इति वाक्यमिदं वात्स्यायनीयमित्यविज्ञाय यः कश्चित्पाठः कल्पितो दृश्यते मुद्रितेषु छान्दोग्योपनिच्छाङ्करभाष्यपुस्तकेषु] इति वात्स्यायनीयं न्यायदर्शनप्रथमसूत्र-भाष्यस्थं वचनमेवानुभाषन्ते।

एवमनया दृष्ट्यैदंपर्येण भगवत्पादीयप्रस्थानत्रयभाष्याणां पर्यालोडने न्याय-शास्त्रकृद्वचसां साक्षादनुवादाः प्रतिध्वनयो वा उपलभ्येरन्। तदेवं न्यायनये भगवत्पादा-नामादरातिशयस्य श्रौतं कारणमप्येकमस्ति। तथाहि—"श्रोतव्यो मन्तव्यो निदिध्या-सितव्यः" (बृह० उ० २.४.७) इति बृहदारण्यकश्रुत्या श्रवणान्तरभावितया मननस्य विधानान्न्यायपूर्वकविचारात्मकस्य तर्कापरनामधेयस्य मननस्य मुमुक्षुभिरवश्यकर्तव्यता श्रुतिचोदिता, तादृशमननोपकर्त्री न्यायविद्येयं मुमुक्षूणां महत उपकाराय भवत्येवेत्यपि मन्यन्ते भगवत्पादाः।

परन्त्विदमत्र रहस्यम्—न्यायतन्त्रं प्रमाणानां प्रामाण्यं महत्याऽऽरभट्याऽऽदौ संस्थाप्यैव प्रवर्तते। प्रमाणतत्त्वज्ञानाद्धि प्रमेयतत्त्वज्ञानमिति नैयायिका मन्यन्ते। परन्तु सर्वेषामपि प्रमाणानां तथा शास्त्राणामपि प्रामाण्यमध्यस्तमेवेति महता प्रयत्नेन संस्थाप्यैव भगवत्पादाः शारीरकभाष्यमारभन्ते। अयं च प्रकारो न्यायशास्त्राख्यमहा-वनस्पतेर्मूले कुठार एव यद्यपि, तथाप्यात्मदर्शनात् प्रभृति प्रमाणानां प्रामाण्यमभ्युप-गच्छन्त्येव व्यावहारिकं भगवत्पादा इति तु न विस्मरणीयम्।

अन्ततोऽन्योऽपि विषय एकः। पूर्वमस्माभिरुपदर्शितरीत्या प्रत्यक्षागमविरुद्धं यत् तदेवानुमानम्, तदेव न्यायशास्त्रम्, सैवान्वीक्षिकी विद्या, यच्च तद्विरुद्धम्, न्याया-

भास एव सः। एवं न्यायशास्त्रस्य परममुद्देश्यं सर्वेष्वपि शास्त्रेष्वधीतिनामुपकारे योऽपि निर्दिष्टः पूर्वमेव। तस्मात् सर्वेषामपि वैदिकदर्शनकाराणाम्—न केवलमद्वैतिनामेवानुकूलवेदनीयमिदं न्यायतन्त्रम्। इदमेव कारणं यत् प्राचीना वैदिकदर्शनकाराः परस्परं विवदमाना अपि नैयायिकमैदंपर्येण न निराकुर्वन्ति। यतस्ते जानन्ति यन्न्यायशास्त्रस्य बलं तत् तेषामेव तत्तच्छास्त्रस्य वलमिति। तेषां च मतिः—

तस्मिन् जीवति वीरे तु हता अप्यहता वयम्।
न्यायशास्त्रे प्रतिहते जीवन्तोऽपि वयं हताः॥ इति।

तत्त्वमिदं ज्ञात्वैव नागार्जुनवसुबन्धुदिङ्नागधर्मकीर्तिप्रभृतयो बौद्धा न्यायशास्त्रमेवाक्षपादीयमादौ समूलमुन्मूलयिष्याम इति तत्खण्डने बद्धकङ्कणा अभवन्। परन्तु बौद्धं दर्शनम् आक्षपाददर्शनस्य मुख्यं प्रतिद्वन्द्वि भवद् देशाद् भारतादेवान्ततो निष्कासितमित्यहो वैचित्र्यं विधिविलसितस्य !

परन्तु यदा ख्रिस्तोः परं दशमशतमानान्ते परमशिष्टा नैयायिकमूर्धन्या उदयनाचार्यादयः किरणावलीप्रभृतीनि प्रशस्तपादभाष्यव्याख्यानानि वैशेषिकप्रकरणानि च लक्षणावलयादीनि च रचयितुमारेभिरे, तत आरभ्य वैशेषिकनयस्य, पूर्वमुदाहरणतयैवाभिमतस्य, प्रभावो नैयायिकेषु दिने दिने निरपबाधं वर्द्धितुमारेभे। एतत्प्रभावात् समनन्तरकालिका न्यायशास्त्राधीतिनो न्यायवैशेषिकोभयाधीतिनः संवृत्ताः। ते च गच्छता कालेन न्यायशास्त्राकरग्रन्थकाराणां यत् परममुद्देश्यं यच्चास्माभिर्ज्ञापितपूर्वं तद्विस्मरन्तो दर्शनान्तरकारैर्न्यायतन्त्रस्य दीयमानं सामान्यशास्त्रत्वप्रयुक्तं महागौरवमविगणयन्तः, प्रकृत्यैव न्यायशास्त्रप्रतिद्वन्द्विनोः बौद्धस्य भारतदेशेऽस्तंगतत्वेन घोरं भयनिमित्तं किञ्चित् पश्यन्तो न्यायशास्त्राकरग्रन्थान् अस्पृशन्तः, परमाणुवाद-शिष्टापरिगृहीतदर्शनान्तरकृदाघोषणमशृण्वन्तः, समवायवादमेव रसयन्तः, अक्षपादाचार्योपदिष्टान् षोडशपदार्थान् न्यायशास्त्रीयान् प्रायेण विस्मरन्तः, कणादोक्तान् द्रव्यादिषट्पदार्थान् यतः कुतश्चिदागतेनाभावेन सह सप्तत्वं गतानेव स्वकीयतन्त्रसिद्धान्तसिद्धपदार्थान् मानयन्तः, तर्कपदस्याप्यपूर्वव्युत्पत्तिं प्रदर्श्य द्रव्यादि सप्तपदार्थपरत्वं हठात् प्रकल्पयन्तः, स्वपरिवर्धितशब्दबोधविचारे परितुष्यन्तः, स्वयूथ्यशिरोमणिना वैशेषिकपदार्थखण्डनेन दुःखयन्तः, प्रमाणविषय एव न्यायमतम् अन्यत्र च सर्वत्र प्रधानतया मतं काणादमेवानुसरन्तः, न्यायवैशेषिकनयौ मिथुनीकृत्य परस्पराध्यासेन व्यवहरन्तः, नव्यनैयायिकत्वेनात्मानं प्रख्यापयन्तः, प्रमाणचतुष्टयाभ्युपगममात्रेणानुमेयनैयायिकभावं सुव्यक्तापरिहार्यवैशेषिकप्रभावं च सुदृढं धारयन्तः,

चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्यां आ विवेश ॥ (ऋ० सं० ४।५८।३)

इत्यृचा संस्तुतो भगवानग्निरिव नैयायिकवैशेषिकद्विशीर्षा प्रत्यक्षादिप्रमाणचतुःशृङ्गः, त्रिविधानुमानत्रिपादः, द्रव्यादिसप्तपदार्थहस्तः, असत्कार्यवादपरमाणुवादसमवायवादैस्त्रिधा बद्धः, महानयं देदीप्यमानो देवो नव्यन्यायः सर्वतन्त्राण्याविवेशेति रोरुवाणः सर्वतान्त्रिकवृषभो विराजते इति ।

काहं मन्दमतिः क्वेदं गभीरं शाङ्करं मतम् ।
दुरूहं न्यायजटिलमाक्षपादं तथा मतम् ॥
तथाप्याचार्यकृपया यत्किञ्चिच्चर्चितं मया ।
श्रीमच्छङ्करनारायणाख्येन चित्तशुद्धये ॥

प्रज्ञापराधादिह यद्दुरुक्तं
नोक्तं च यत् तद्विबुधाः स्वमत्या ।
सम्यग्विमृश्यैव गुणैकदृष्ट्या
मर्षन्तु शंसन्तु च मत्प्रबन्धम् ॥

वक्तारमासाद्य यमेव नित्या
सरस्वती स्वार्थसमन्विताभूत् ।
निरस्तदुस्तर्ककलङ्कपङ्का
नमामि तं शङ्करमर्चिताङ्घ्रिम् ॥

अद्वैतविशिष्टाद्वैतसिद्धान्तयोस्तोलनपर्यालोचनात्मको विचारः

पण्डितश्रीरामवदनशुक्लः

❀ ❀ ❀

तत्राद्वैतसिद्धान्ते सजातीयविजातीयस्वगतभेदशून्यं निर्विशेषं चिन्मात्रं ब्रह्म तत्त्वम्, इतरज्ज्ञातृज्ञेयं चिदचित्प्रपञ्चात्मकमैहिकामुष्मिकं सर्वं जगन्मिथ्याभूतम्। सदसदनिर्वचनीयाऽविद्याऽऽवरणविक्षेपशक्तिमती खल्वनादिभावरूपाऽस्ति। आवरणशक्त्या परब्रह्म तावदाच्छन्नं स्वं जीवं पश्यति, विक्षेपशक्त्या ज्ञातृज्ञेयं क्षित्यप्तेजोवाय्वाकाशस्वर्गनरकैहिकामुष्मिकं विविधरूपं पश्यति। आचार्यकृपया तत्त्वमस्यादिवाक्यजन्यस्वरूपानुसन्धानेनेतरमिथ्यात्वानुसन्धानेन चाविद्याया आवरणशक्तेर्नाशे सति; अनन्तरं विक्षेपशक्तेर्नाशे सति च स्वयं निर्विशेषचिन्मात्रमखण्डस्वरूपमानन्दस्वरूपमवतिष्ठते। भिन्नप्रवृत्तिनिवृत्तिकत्वे सत्येकार्थबोधकत्वं समानाधिकरण्यं यथा— 'नीलो घटः' 'पीतः पटः' इत्यादि सामानाधिकरण्यदर्शनेनाङ्गीक्रियते, तथाधिष्ठानाधिष्ठेयभावसम्बन्धेनैकार्थबोधकत्वं सामानाधिकरण्यमपि करचरणादिमत्त्वेन वक्रकोटरादिमत्त्वेन च दूरतो दृश्यमानस्य संशयात्मकरूपेण ज्ञानोत्तरं सन्निहिते स्थाणौ स्थाणुरेव पुरुष इति सामानाधिकरण्यं प्रतीयते। तथा "सदेव सौम्येदमग्र आसीत्" इति वचनेन "इदम्" पदेन प्रतीयमानेन बाधितेन जगता सतः परब्रह्मणश्चिन्मात्रस्य सत्पदवाच्यस्य समानाधिकरण्यं प्रतीयते। तेन फलतस्तत्र स्थाणुवच्चिन्मात्रं ब्रह्मैव तत्त्वम्प्रमीयते, तदेव तत्त्वमात्मैवेदं सर्वमित्यत्रापि अधिष्ठानाधिष्ठेयभावसम्बन्धेन सामानाधिकरण्यं प्रतीयते। तत्त्वमसीत्यत्रापि "त्वं" "पदार्थस्यालीकत्वेन बाधिताधिष्ठानयोः सामानाधिकरण्यमभ्युपगन्तव्यम्। निर्गुणश्रुतयश्च तस्मिन् ब्रह्मणि गुणात्यन्ताभावं बोधयन्ति—"पराऽस्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च" इत्यादि सगुणश्रुतयो ब्रह्मोपासनापरतया लापनीयाः। गुणाभावेऽप्युपासनायां गुणदृष्टेर्विधानात् पूर्वापराच्छेदन्यायेन प्रकीर्तिताभिर्निर्गुणश्रुतिभिः पूर्वकीर्तितसगुणश्रुतीनां बाधाच्च। "अस्मान्मायी सृजते विश्वमेतद्" इत्यत्र मायापदेन मिथ्यातोऽर्थः प्रोच्यते, मिथ्याभूतयाऽविद्यया मायाशब्दवाच्यया परमात्मा स्वात्मानं विविधं पश्यतीत्यर्थः। अविद्याया अनादित्वेन पूर्वपूर्वाविद्ययोत्तरोत्तराविद्याया ब्रह्मणि प्रादुर्भावः। तस्या अविद्याभावरूपत्वमनादित्वं नाश्यत्वञ्चाङ्गीक्रियते। अन्तःकरणा-

वच्छिन्नो जीवः, अन्तःकरणोपहितचैतन्यं ब्रह्म, अन्तःकरणे विविधाकारे चैतन्यस्य प्रतिबिम्बोदये सत्यन्तःकरणमेव ज्ञातृसुखिदुःखिरूपेण भासते। कस्यचित् पदार्थस्य प्रत्यक्षं विशिष्टरूपेण न भवति। 'नीलो घटः' इत्यत्र यदि नीलरहिते घटे नील-वैशिष्ट्यस्य प्रत्यक्षमङ्गीक्रियते, तदा नीलरूपस्याभाववति घटे नीलरूपवत्त्वस्वीकारे परस्परव्याहतिदोषस्स्यात्। नीलविशिष्टे घटे यदि नीलवैशिष्ट्यप्रत्यक्षमङ्गीक्रियते, तदा "नागृहीतविशेषणा बुद्धिर्विशेषमुपसङ्क्रामति" इति न्यायेन नीलरूपेऽपि नील-रूपवत्ताप्रतीतिः स्यात्। अतः सर्वं वस्तु प्रत्यक्षेण स्वरूपमात्रमेव भासते। इत्थं विशिष्टरूपेण न कस्यापि वस्तुनः प्रत्यक्षं, तथा सतिबोधितोऽपि विशिष्टोऽर्थः स्वरूपमात्रं प्रतीयते। अथ च यथा 'स्थूलोऽहं कृशोऽहम्, इत्यर्थे स्थूलत्वकृशत्व-जडधर्मभावेनाहमर्थो जडमात्रमङ्गीक्रियते, तन्न्यायेनात्मैवेदं सर्वमित्यत्रापि चिन्मात्रमेव तत्त्वं स्वीकर्तव्यम्। यथा साङ्ख्यमते—अन्तःकरणे चैतन्यस्य प्रतिबिम्बेन जानामि सुखी दुःख्यहमिति प्रत्यय उपजायते, तथाद्वैतवादेऽप्यन्तःकरणे मिथ्याभूते पुरुषस्य चैतन्यस्य प्रतिबिम्बभानेन ज्ञात्रादिप्रतीतिः, अतः पृथ्वीजलतेजवाय्वाकाशादिभानं भानमात्रम्, न तु पृथिव्यादिस्थितिः। अत ऐहिकामुष्मिकसकलभेदशून्यं चिन्मात्रं ब्रह्म, तत्र सकलपदार्थस्य भानमात्रं न सत्तेत्यद्वैतमतनिष्कर्षः।

विशिष्टाद्वैतसिद्धान्तविचारः—

विशिष्टाद्वैतसिद्धान्ते तत्त्वत्रयमङ्गीक्रियते—चिदचिदीश्वरश्च। चित्पदेन जीव उच्यते। स च बद्धमुक्तनित्यभेदेन त्रिविधः। बद्धो नामानादिकालजनन-मरणभोगभागो जीवः। भगवत्कृपाकटाक्षेण भगवदुपासनया मुक्तप्राकृतबन्धनो नित्यज्ञानशाली, आन-न्दानुभवविशिष्टो मुक्तो जीवः। अचिन्नाम जडाजडभेदेन द्विविधम्। तत्राजडरूपं नित्य-विभूतिर्धर्मभूतज्ञानं च। जडं नाम प्रकृतिः कालश्च। प्रकृतिर्महत्तत्त्वमहङ्कारः पञ्चत-न्मात्रा पञ्चभूतानि पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि मनश्च। नित्यविभूतिश्च—नित्यमुक्तस्वाभाविकानावधिकातिशयज्ञानबलवीर्यैश्वर्यशक्तितेजः सौशील्यवात्सल्य-मार्दवार्जवसौहार्दसाम्यकारुण्यगाम्भीर्यौदार्यचातुर्यस्थैर्यधैर्यशौर्यपराक्रमसत्यकामसत्य—सङ्कल्पकृतित्वकृतज्ञताद्यसङ्ख्येयकल्याणगुणगणौघमहार्णवलक्ष्मीनारायणधामवैकुण्ठो भगवत्सङ्कल्पाधीनविविधविचित्रानुकूलानन्दप्राप्तिस्थानम्।

अत्र प्रमाणानि श्रुतयः। तथा हि—"संयुक्तमेतत्क्षरमक्षर च व्यक्ताव्यतं भरते विश्वमीशः[1]।" अत्र "क्षर"पदेन प्रकृतिरुच्यते। "अक्षरं"-पदेन जीवः प्रोच्यते।

---

१. श्वेताश्वतरोपनिषद्—१-८।

व्यक्तं नामरूपविभागार्हतत्त्वम्। अव्यक्तं नामरूपविभागानर्हं तत्त्वम् "ईश"-पदेन परमात्मा प्रोच्यते। एतया श्रुत्या तत्त्वत्रयं प्रमीयते। अथ च "ज्ञाज्ञौ द्वावजावीशानीशावजा ह्येका भोक्तृभोगार्थयुक्ता[१]।" "ज्ञ"पदेन परमात्मा, "अज्ञ"-पदेन जीवः। ईशानीशपदाभ्यामीश्वरजीवावभिधीयेते। "भोक्तृभोगार्थयुक्ता' इत्यनेनाचिद्विशेषः प्रकृतिश्चोच्यन्ते।

इत्थं तत्त्वत्रयं श्रौतं स्फुटम्। "क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः[२]" इत्यत्र श्रुतौ पूर्वश्रुत्युक्तक्षराक्षरशब्दयोर्व्याख्यानं "प्रधानपदेन" क्षरस्य, "अमृताक्षर"-पदेन जीवस्य च। हरपदवाच्यस्य 'हरति-भोगमिति हरः' इति व्युत्पत्तिबलेन जीवो विशेष्यते। "ईशते देव एकः" इत्यनेनोभयोरीशनकर्ता प्रोच्यते, परमात्मा इत्थं तत्त्वत्रयं व्याकृतं भवति।

यदुक्तमत्र श्रुतौ योगाद् रूढेर्बलीयस्त्वेन हरस्य रूढ्यर्थः शिवः, स "एकदेवपदेनोच्यमान ईशनकर्तृत्वेन प्रोच्यते। "अमृताक्षरम्" इत्यत्रामृताक्षरयोरुद्देश्यविधेयभाव इति तन्न, "क्षरात्मानौ" इत्यत्र "आत्म"पदेन हरशब्दार्थस्य विवरणात्। "अमृताक्षरमित्यत्र "अमृताक्षर"पदस्य समस्तस्यार्थयोः खण्डयोरुद्देश्यविधेयभावस्वीकारे, एकप्रसरताभङ्गापत्तिः स्यात्। एकप्रसरता च समस्तपदार्थस्योद्देश्यत्वं विधेयत्वं वा, न तूद्देश्यविधेयभावः खण्डयोः।

एवं "भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्[३]" इति श्रुत्याऽपि भोक्तृपदेन जीवः भोग्यपदेन चित्तत्त्वम्, प्रेरितृपदेन परमात्मा चेति तत्त्वत्रयं स्फुटीक्रियते। "अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः"[४] "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्[५]" इति श्रुत्योः मायापदवाच्यप्रकृतिसहायः परमात्मा विश्वं सृजति। अत्र मायापदेन प्रकृतिरुच्यते। प्रकृतिसहायः परमात्मा जगत् सृजति, प्रकृत्या प्रजीवं बध्नातीत्यर्थः। तेन प्रकृतेर्बन्धनत्वम्, परमात्मनो बन्धकत्वम्, जीवस्य च बन्धनीयत्वमिति वैलक्षण्यप्रयोजकधर्मास्त्रिषु प्रोच्यन्ते। एवं "सकारणं करणाधिपाधिपः" इत्यत्र "कारणम्" अचित्परिणामभूतानीन्द्रियाण्युच्यन्ते। "अधिप"

---

१. श्वेताश्वतरोपनिषद् १-९।
२. ,, ,, १-१०।
३. ,, ,, १-१२।
४. ,, ,, ४-९।
५. ,, ,, ४-१०।

इति जीवः, अधिपाधिपः परमात्मा । अत्रापि तत्त्वत्रयं प्रतिपादितम् । एवं "प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितबन्धहेतुः[१]" इत्यत्र प्रधानं प्रकृतिः, क्षेत्रज्ञो जीवः उभयोर्गुणेशः = प्रकृतिगुणानां सत्त्वरजस्तमसामीशः परमात्मा । गुणेशपदेन प्रकृतिशासनकर्त्ता परमात्मा प्रोच्यते । स च गुणः परमात्मपरतन्त्रः, परमात्मा स्वेच्छया गुणेन जीवं बद्ध्वा जीवाय संसारं प्रयच्छति । स्वेच्छयैव गुणाज्जीवं मोचयतीति व्यक्तं भवति । अपि च—

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्ननन्यो अभि चाकशीति" ॥

इत्यस्मिन्मन्त्रेऽपि शरीरवृक्षरूपेण परिणतं यत् प्रकृतितत्त्वं तत्र सखायौ ज्ञानाश्रयभूतौ जीवेशौ परिषक्तौ विद्येते । तयोर्जीवेशयोर्जीवः स्वादु = सुखदुःखात्मकं कर्मफलम्, अत्ति = भुङ्क्ते । अन्यः परमात्मा गुणेशः सुखदुःखफलान्यभुञ्जानोऽभिचाकशीति = ज्ञानानन्दरूपेण प्रकाशते । अत्रापि तत्त्वत्रयमुद्घोषितमस्ति । तथा 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च[२]" इति श्रुतिवचनेन परमात्मनो दिव्यगुणवत्त्वं प्रोच्यते । शक्तिर्नाम विविधविचित्रदिव्यकार्यजनकतावच्छेदकधर्मवत्त्वम् । सा परमात्मनि स्वाभाविकी नित्यस्वरूपनिष्ठा नित्या धर्मरूपा, तथा ज्ञानमपि विलक्षणं बलमपि विलक्षणम्, क्रियाऽपि विलक्षणा । "य ईशेऽस्य जगतो नित्यमेव नान्यो हेतुर्विद्यते ईशनाय[३]" इति श्रुत्या परमात्मनोऽसाधारणं विश्वस्येशितृत्वं प्रोच्यते । तेन परमात्मनो गुणवैशिष्ट्यं सुव्यक्तम् । "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्[४]" इति श्रुत्या जीवानां निरुपाधित्वमनेकत्वं नित्यत्वम्, परमात्मनस्तु ततो विलक्षणनित्यत्वं चोद्घोष्यते ।

अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः ॥

इति श्रुत्या जीवस्य बद्धत्वं जीवविशेषाणां मुक्तत्वं जीवप्रकृतिभेदश्चोद्घोष्यन्ते । एवं "वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्[१] ।" इत्यत्र तमःपदेन सत्त्वरजस्तमसंवलिता प्रकृतिरुच्यते, तस्याः परस्तान्नित्यविभूतिः कीर्त्यते । सा नित्यविभूतिर-

---

१. श्वेताश्वतरोपनिषद्–६-१६; २. श्वेताश्वतरोपनिषद्–६-१७ ।
३. ,, ,, ६-८; ४. ,, ,, ६-१३ ।

परिच्छिन्ना, अनन्ता, एकपादादूर्ध्वं वर्तमाना, अधस्तात् परिच्छेद एकपादो विद्यते। ऊर्ध्वमपरिच्छिन्नेति नित्यविभूतित्वं सुस्पष्टं घोष्यते। "क्षयन्तमस्य रजसः पराके" इति श्रुत्या रजः पदोपलक्षितप्रकृतेरूर्ध्वं निवासकारी पुरुषविशेषः प्रतीयते। क्षयन्तमिति "क्षि" निवासे धातोः शतृप्रत्ययात् सिद्ध्यति। एतेनापि नित्यविभूतितन्निवासिपुरुषविशेषौ प्रोच्येते। "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" इति श्रुति वचनेनापि नित्यसूरयो नित्या जीवा नित्योपासनाकर्तारः प्रमीयन्ते। "ज्ञः कालकालो गुणी सर्वविद्यः[1]" इति श्रुतिवचनेन कालरूपं जडतत्त्वं श्रौतं प्रतीयते। "अस्मान्मायी सृजते" इति श्वेताश्वतरोपनिषन्मन्त्रे तावदीश्वरस्य मायासम्बन्धं प्रतिपाद्य मायाविशिष्टस्य तस्य सृष्टिकर्तृत्वाभिधानाच्चिदचिदीश्वररूपं जगत्, तस्य परस्परभेदः। ईश्वरस्य सर्वज्ञत्वादिगुणवत्त्वं चेत्येतत् सर्वं मायाकार्यमिति लाभात् तस्य सर्वस्य मिथ्यात्वे श्रुतेस्तात्पर्यं गम्यते।

अत एव "एको देवः" इति मन्त्रे "केवलो निर्गुणश्च" इत्यत्र निर्गुणशब्देन परमात्मनो गुणनिषेध उपपद्यते। अन्यथा गुणानां तात्त्विकत्वे तन्निषेधायोगात्, इति तु न शङ्क्यम्। "अस्मान्मायी सृजते" इति मन्त्रोक्तमायाशब्दार्थविवरणाय प्रवृत्ते "माया तु प्रकृतिं विद्यात्" इत्युत्तरवाक्ये पूर्वमन्त्रोक्तमायाशब्देन प्रकृतिरुच्यत इति विवरणात् प्रकृत्याख्योपकरणवानीश्वरः प्रकृतिरूपोपकरणेन जगत्सृजतीत्यर्थस्यैव लाभेन प्रकृतिकार्यतयोक्तस्य जगतो मिथ्यात्वासिद्धेः। "मायां तु प्रकृतिं विद्याद्" (श्वेताश्वतरोपनिषद्—४-१०) इति वाक्ये प्रकृतेर्मायात्वाभिधाने प्रकृतेस्तत्कार्यस्य च मिथ्यात्वप्रतीतिः स्यात्, न त्वत्र प्रकृतेर्मायात्वमभिहितम्। प्रकृतेर्मायाशब्देनाभिधानं तु विचित्रकार्यकरत्वात्, न तु मिथ्यात्वेन प्रकृतिर्हि विचित्रविविधसृष्टिकरी भगवत्सङ्कल्पेन प्रसिद्धा। मायाशब्दस्य न मिथ्यार्थे प्रयोगः; अपितु सत्येष्वर्थेष्वेव।

तथा हि—"मेघोदयसागरसन्निवृत्त्यादिषु मारीचमृगशरीरादिषु च आसुरास्त्रादिषु च सत्येषु तत्प्रयोगः। यथा—"मेघोदयसागरसन्निवृत्तिः" इत्युपक्रम्य विष्णोर्विचित्रा प्रभवन्ति मायाः' इत्यत्र मायाशब्देन मिथ्यात्वाभिधाने जगदीशितृत्वं परमात्मनि नित्यं श्रुत्योद्घोष्यते। ब्रह्मज्ञानेन जगतो मिथ्याभूतस्य नाशे सति तन्निरूपितेशितृत्वस्य नाशे सति परमात्मनीशितृत्वस्य नित्यत्वं भज्येत। अतो मायाशब्दस्य न मिथ्यात्वार्थकत्वमपि तु विचित्रकार्यकरशक्तिमत्त्वमेवार्थः। परमात्मनि जगतो नित्येशितृत्वं भगवती श्रुतिर्वा वदति। तथा हि "य ईशेऽस्य जगतो नित्यमेव नान्यो हेतुर्विद्यते ईशनाय[2]", "एको

---

१. श्वेताश्वतरोपनिषद् ५-३८, २. श्वेताश्वतरोपनिषद् ६-१६।

३. श्वेताश्वतरोपनि॰ ६-१७।

देवः" इत्यादि श्रुतौ निर्गुणपदेन गुणनिषेधो वक्तुमशक्यः। प्रमाणान्तरागोचरदिव्य-गुणानां श्रुत्या प्रतिपादनं कृत्वा श्रुत्यैव तेषां निषेध उन्मत्तप्रलापापत्तिः स्यात्। श्रुतिर्ह्य-पौरुषेयी पुरुषसम्बन्धकृतकर्णापाटवादिदोषशून्या, नोन्मत्तप्रलापशालिनी भवितुमर्हति।

यदुच्यते सगुणश्रुतिर्ब्रह्मण उपासनार्थं गुणान्विदधाति, तत्त्वज्ञानार्थं गुणान्निषे-धति इति—तत्त्वं निर्विशेषचिन्मात्रमेव, तदपि न।

"वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥"

इति श्रुतौ परमात्मन इव गुणानामप्युपासनाविषयत्वाभिधानेन गुणविशिष्टपर-मात्मध्यानं तत्त्वज्ञानमिति प्रमीयते, मोक्षोपायत्वं गुणविशिष्टपरमात्मतत्त्वज्ञानस्य गुणानां मिथ्यात्वाभिधाने उक्तत्वदीयविभागोक्तौ गुणविशिष्टपरमात्मज्ञानस्य मोक्षो-पायताभङ्गापत्तिस्स्यात्।

निर्गुणश्रुतौ श्रुत्यन्तरे परमात्मनो विशिष्टगुणाभिधानेन गुणपदेन सत्त्वादि-गुणानामेव ग्रहणम्। न हि गुणसामान्यनिषेधो निर्गुण इत्यत्र विवक्षितः सगुणश्रुतौ यथा गुणविशेषजिज्ञासा समुदेति गुणविशेषाणामेव विधानम्, तथा निर्गुणश्रुतावपि निषेध-प्रतियोगितया गुणविशेषजिज्ञासोदेति, अतो निर्गुणश्रुतौ परमात्मनि दिव्यगुणानां विधा-नात् सत्त्वादि गुणेषु पर्यवासानं बोध्यम्, सगुणश्रुतौ गुणविशेषजिज्ञासायामपहतपाप्मा "विजरो विमृत्युः" इत्यादि श्रुतौ हेयगुणानां निषेधाद् दिव्यगुणेषु पर्यवसानं बोध्यम्। यथा—"नगरे को विशेषः" इत्युक्तौ "न कश्चिद् विशेषः" इति प्रतिवचनेन विशेष-सामान्याभावः प्रतीयते। जिज्ञासातिविशेषाभाव एव प्रतीयते। इत्थं च "गुणान्वयो" इति मन्त्रे गुणपदेन सत्त्वादिगुणानां ग्रहणम्। जीवस्य गुणत्रयवश्यत्वम्, ईश्वरस्य गुणत्रयवश्यत्वाभावश्च तयोर्वैलक्षण्यान्तरमप्युक्तं भवति।

एतच्च 'तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगद्" इतीश्वरचिदचितोः प्रकार-प्रकारिभावः प्रोक्तः। ईश्वरस्य चिदचिदात्मकप्रपञ्चेन सह शरीरशरीरिभावः प्रोक्तः। अयमर्थो बृहदारण्यके विशदीकृतः। तथा हि "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरम्" इत्युपक्रम्य सर्वेषां पृथिव्यादीनां तमःपर्यन्तानां जीवात्मनश्चेश्वरशरीरत्वं प्रत्येकमभिधीयते। शरीरं नाम चेतनं पत्यपृथक्सिद्ध-विशेषणभूतं द्रव्यम् विशेषणप्रकार इत्युच्यते। अतः सिद्धमशेषं चिदचित्प्रकारं ब्रह्म एकमेव तत्त्वमित्यनयोपनिषदोपदिष्यत इति।

एवञ्चोपनिषदन्तराणामप्यस्मिन्नेव तत्त्वे तात्पर्यमित्यवश्याश्रयणीयम्, अन्यथा तत्तदुपनिषदां भिन्न-भिन्नतत्त्वे तात्पर्याङ्गीकारे वस्तुनि विकल्पायोगेन सर्वेषां तात्त्विकत्वासंभवाद् विनिगमाविरहेण सर्वासामुपनिषदामप्रामाण्यं प्रसज्येत। उपनिषदन्तरानुसारेणास्याः श्वेताश्वतरोपनिषद एवान्यविधे तत्त्वे तात्पर्यमस्त्विति तु न वक्तुं शक्यम्। आपाततो निर्विशेषब्रह्माद्वैतपरतया प्रतीयमानानामुपनिषदामेतदनुरोधेन निर्वोढुमशक्यताया उपपादितत्वात्।

प्रत्यक्षे विशिष्टविषयो न भासते, अपि तु स्वरूपमात्रम्, 'नीलो घटः' इत्यत्र नीलरूपविशेषणस्य तद्रहिते घटे वैशिष्ट्यभानस्वीकारे रूप-रूपाभावयोर्व्याहतिः स्यात्। रूपविशिष्टे रूपवैशिष्ट्यभानस्वीकारे "नागृहीतविशेषणा बुद्धिः विशेषमुपसङ्क्रामति" इति न्यायेन नीलरूपेऽपि नीलरूपवत्ताप्रतीत्यापत्तिस्स्यात्। अतो नीलो घट इति प्रत्यक्षे स्वरूपमात्रं भासते। तथा सर्वं खल्विदं ब्रह्मेत्यत्र न इदंपदवाच्यप्रपञ्चवैशिष्ट्यं भासते, अपि तु ब्रह्मस्वरूपमेव श्रुत्या भासते। तथा चात्मैवेदं सर्वमित्यादावपि, तन्न, नीलो घट इति प्रत्यक्षे नीलेन रूपेण घटेन च सह चक्षुषोः संयोगसंयुक्तसमवायसन्निकर्षसत्त्वे विशिष्टस्य भाने आपत्त्यभावान्न ह्युभयोः सन्निकर्षयोः सत्त्वेऽन्यतरस्य भानं स्यात्, न विशिष्टस्येत्यत्र काचित् साधीयसी युक्तिर्विद्यते। अत एतद्रीत्या 'सर्वं खल्विदं ब्रह्म' 'आत्मैवेदं सर्वम्'इत्यादौ स्वरूपमात्रं भासते न विशिष्टरूपमिति कथनं सन्न्यायविरुद्धम्। 'सर्वं खल्विदं ब्रह्म इत्यत्रानेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि'इति श्रुत्या सर्वेषां पदार्थानां जीवशरीरकब्रह्मात्मकत्वे सति पदार्थत्वस्वीकारात् 'इदं ब्रह्म' इत्यत्रेदम्पदेन परिदृश्यमानजगच्छरीरकं ब्रह्म प्रोच्यते। ब्रह्मपदेन निखिलकल्याणगुणविशिष्टपरमात्मा प्रोच्यते, उभयोर्ब्रह्मजगतोरेकविशेष्यपरमात्मबोधकत्वेनेदं ब्रह्मेति सामानाधिकरण्यमुपपद्यते। इत्थं "सदेव सौम्येदमग्र आसीत्" इति श्रुतावपि सत्पदेनानेन जीवेनेति श्रुतिन्यायेन सूक्ष्मचिदचिद्विशिष्टं ब्रह्म प्रोच्यते। इदंपदेन स्थूलचिदचिद्विशिष्टं ब्रह्म प्रोच्यते, उभयोरेकविशेष्यब्रह्मविषयकबोधजनकत्वात् सकलदर्शनसम्मतं भिन्नप्रवृत्तिनिवृत्तिकत्वे सति, एकार्थबोधकत्वरूपं सामानाधिकरण्यमुपपद्यते। श्रुतावेकपदेन सृष्ट्यवस्थायां जगति दृश्यमाननामरूपवत्त्वं निषिध्यते, एकपदेन कार्यकारणात्मकमेव बोध्यते, न तु तार्किकवत् कार्य-कारणयोरुपादानोपादेययोर्भिन्नत्वं स्वीक्रियते। अद्वितीयमित्यत्र अद्वितीयपदेन सजातीयद्वितीयरहितत्वबोधनेन सच्छब्दवाच्यस्यैवोपादानकारणत्वमुच्यते। अतः परमात्मन एव जगत् प्रति निमित्तोपादानत्वम्। सूक्ष्मचिदचिद्विशिष्टे ब्रह्मणि चिदचितोः सूक्ष्मत्वन्नाम नामरूपविभाग-

नर्हत्वम्। चिदचितोः स्थूलत्वं नामरूपविभागार्हत्वम्, परमात्मनि कार्य-कारणभाव-व्यवहारः स्थूलचिदचित्संसर्गकृतो न तु स्वाभाविकः। इत्थं तत्त्वमसीत्यत्रापि त्वंपदेन स्थूलचिदचिद्विशिष्टं ब्रह्म तत्पदेन सूक्ष्मचिदचिद्विशिष्टं ब्रह्म बुद्ध्वा सामानाधिकरण्यं बोध्यम्।

यत्तु निर्गुणश्रुत्या ब्रह्मणो निर्गुणत्वस्यापि प्रतिपादनादेकस्य ब्रह्मणः सगुणत्व-निर्गुणत्वयोर्विरोधात् तयोरेकस्यैव तात्त्विकत्वमवश्याङ्गीकरणीयम्, ततश्चापच्छेदाधिकरणन्यायेन निर्गुणवाक्येन सगुणवाक्यस्य बाधान्निर्गुणत्वमेव ब्रह्मणस्तात्त्विकमिति, तदसत्—"अपच्छेदन्यायस्यात्र प्रवृत्त्यसम्भवात्। स हि न्यायो विरोधपौर्वापर्यनियम-रहितप्रायश्चित्तशास्त्रद्वयविषयः। परस्परमन्वारम्भेण प्रसर्पतां पञ्चानामृत्विजां मध्य उद्गातुरन्वारम्भविच्छेदेऽदक्षिणाकयज्ञसमापनं पुनस्तस्यैव पूर्ववदित्सितदक्षिणाकस्य करणं प्रायश्चित्तम्, प्रतिहर्तुरपच्छेदे सर्वस्वदक्षिणादानं प्रायश्चित्तं विहितम्, तयोः पौर्वापर्येणान्वारम्भविच्छेदे विरुद्धयोः प्रायश्चित्तयोः प्राप्तौ किं प्रायश्चित्तं कर्तव्यमिति जिज्ञासायां पूर्वविच्छेदप्रायश्चित्तशास्त्रमबाधित्वोत्तरविच्छेदप्रायश्चित्तशास्त्रस्य प्रवृत्त्यसम्भवेन तस्य बलीयस्तया पूर्वविच्छेदप्रायश्चित्तशास्त्रं दुर्बलमिति पूर्वमीमांसया निर्णीतम्। अत्र ह्युद्गातृप्रतिहर्त्रोरपच्छेदस्य न पौर्वापर्यनियमो न वा तत्प्रयुक्तप्रायश्चित्तविरोधनियमः। अतोऽपच्छेदन्यायो विरोधपौर्वापर्यनियमरहितविषयः। प्रकृते तु सगुणनिर्गुणवाक्ययोर्विरोधो नियतः, पौर्वापर्यञ्च नियतम्। प्राप्तिपूर्वकत्वात् प्रतिषेधस्य गुणप्रापकसगुण-वाक्यस्य नियमेन पूर्वत्वात्। अतो नात्रापच्छेदन्यायस्य प्रवृत्तिसम्भवः। किञ्चापच्छेद-न्यायेन सगुणवाक्यस्य बाधाभ्युपगमे तस्य सर्वथाऽप्रामाण्यमेव स्यात्। प्रायश्चित्तशास्त्रस्य तु प्रयोगान्तरेऽनुष्ठापकत्वलक्षणप्रामाण्यसम्भवेन न सर्वथाऽप्रामाण्यप्रसङ्गः। स चापौरुषेयतया नित्यनिर्दोषेषु श्रुतिवाक्येषु कस्यचिदप्रामाण्य इष्टापत्तिः सुकरा। अत एवोत्तर-मीमांसायां तृतीयाध्यायद्वितीयपादे "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः" इति सूत्रेण कयोश्चिद् विधिनिषेधयोर्विरुद्धयोर्विषयभेदप्रदर्शनेन द्वयोरपि प्रामाण्यमेव व्यवस्थापितम्।

अत्रेदं तत्त्वम्—बृहदारण्यके चतुर्थाध्याये तृतीयब्राह्मणे "ब्रह्मणः" पृथिव्यप्तेजोवाय्वाकाशादिमूर्तामूर्तरूपाणि विधाय, अर्थात् "आदेशो नेति नेति" इति श्रुतिवचनेन निषेधो मूर्तामूर्तयोरापाततः प्रतीयते। परमात्मनः पूर्वश्रुत्या विहितानां मूर्तामूर्तरूपाणामादेशो नेति नेति वचनेन निषेधस्वीकारे विधिवाक्यानामप्रामाण्यं प्रसज्येत। अत आदेशो नेति नेति इत्युत्तरम्, भूयोरूपवत्त्वविधानेन नेति नेतीति वाक्ये पूर्वोक्तानां

मूर्तामूर्तरूपाणामियत्ता तन्मात्रवत्ता निषिध्यते। अनन्तरं भूयोरूपविधानादयमेवार्थः प्रकृतैतावत्त्वं प्रतिषेधतीति ब्रह्मसूत्रेण प्रतिपाद्यते। तेनोभयोः श्रुत्योः प्रामाण्यं स्थापितं भवति, तथाऽन्यत्रापि निर्गुणसगुणश्रुत्योर्विषयभेदेन व्यवस्थां कृत्वा प्रामाण्यमुपपादनीयम्, न परस्परं वृद्धत्वेन भासमानयोःश्रुत्योरप्रामाण्यमाशङ्कनीयम्। न हि गवोर्विरोध एका गौर्हन्तव्येति रीत्या लोके विरोधः परिहीयते; किन्तूभयोर्जीवनं रक्षित्वा विरोधः परिहीयते। अथ च "मा हिंस्यात् सर्वा भूतानि" इति वचनेन सर्वभूतानां हिंसा निषिध्यते। "अग्निषोमीयं पशुमालभेत" इति वचनेन अग्निषोमदेवताकपशुद्रव्यक-यागविधानेऽङ्गतया पशुहिंसाया विधानेन विरोधः प्रतीयते, तत्र विरोधपरिहाराय "मा हिंस्यात् सर्वाभूतानीत्यत्र सर्वभूतहिंसापदे यागीयपशुहिंसातिरिक्तत्वेन सङ्कोचे कृते "मा हिंस्यात् सर्वभूतानीति वाक्यस्य यागीयपशुहिंसातिरिक्तहिंसा-निषेधपरत्वम्, अग्निषोमीयेत्यादिवाक्यस्य यागीयपशुविधानपरत्वम्; किन्तूभयो-र्वाक्ययोर्विषयभेदेन प्रामाण्यं निर्वहति। यदुच्यते—विधिवाक्ये सर्वेषां गुणानां विधेया-नुपपत्तौ विशेषजिज्ञासायां विशिष्टे दिव्यगुणपरत्वं स्वीकर्तव्यम्—गुणनिषेधवचने तु न विशेषजिज्ञासा, यथा—'पशुना यजेत्' इत्यत्र विधिवाक्ये सर्वेषां पशूनां यागविध्यङ्गतया विधानानुपपत्त्या पशुविशेषजिज्ञासायां पशुयागप्रकरणे समाम्नातेन "छागस्य वपाया मेदसः प्रेष्यानुब्रूहि" इति छागविषयकवचनेन पशुना यजेदित्यत्र पशुपदेन छागं गृहीत्वा जिज्ञासाशान्तिर्भवति। निषेधवाक्ये निषिध्यमाने न विशेषजिज्ञासेति तन्न, निषेध-वाक्येऽपि निषेध्यविषये विशेषजिज्ञासायाः समत्वात्। अत एव निर्गुणवाक्ये विशिष्टगुण-विध्यनुरोधेन विशेषगुणानां सत्त्वादीनां परमात्मनि निषेध एवोचितः।

यदप्युक्तम्—प्रत्यक्षसिद्धस्य जगत एकमेवाद्वितीयमित्यत्र श्रुतिगताद्वितीय-वाक्येन जगतो बाधान्मिथ्यात्वम्। प्रत्यक्षाच्छास्त्रस्य बलीयस्त्वात् प्रत्यक्षसिद्धस्य विरुद्ध-शास्त्रबलेन बाधः, तदप्ययुक्तम्—अनन्यथासिद्धप्रत्यक्षसिद्धस्यार्थस्य न शास्त्रबलेन बाधो भवितुमर्हति, अन्यथा—"यजमानप्रस्तर" इति श्रुतिवाक्ये यजमानप्रस्तरयोरभेदकीर्तनेन प्रत्यक्षसिद्धस्य यजमानप्रस्तरभेदस्य बाधो न स्यात्, तथासति बाधमूलालक्षणाप्रस्तरस्य सदृशे श्रुत्युक्ता न स्यात्। तत्र हि स्रुगादिधारणाश्रयत्वेन सादृश्याद् यजमाने प्रस्तर-सादृश्यम् इति श्रुतिवचनेनोच्यते। अतोऽद्वितीयपदस्य न प्रत्यक्षसिद्धं च जगद्बाधकत्वमपि तु सजातीयाद्वितीयनिषेधात् परब्रह्मण एव जगदुपादानत्वं निमित्तत्वं न सिद्धं भवति। अथ च "यजमानमेवायजमानादुत्तरं करोति तस्माद्यजमानोऽयजमानादुत्तरः" इति प्राकरणिकवाक्यान्तरे प्रस्तरे यजमानत्वकीर्तनस्य यजमानेऽयजमानभूतवस्त्वन्तरोत्तरत्व-संपत्त्यर्थतयाऽन्यपरत्वं स्पष्टमिति चेत्—अत्राप्यद्वितीयमित्यस्यान्यपरत्वेनान्यथासिद्धत्वा-

न्यथासिद्धजगत्प्रत्यक्षबाधकता युक्ता। "सदेव सौम्येदमग्र आसीत्" इत्यत्र सत्पदेन प्रतिपादितस्य ब्रह्मरूपस्योपादानकारणस्य जगन्निमित्तकारणत्वमपि बोध्यम्। "एकमेवाद्वितीयमित्यत्राद्वितीयपदेन सच्छब्दवाच्यसमाभ्यधिकनिषेधात्। "तत्तेजोऽसृजत्" तदैच्छत् बहु स्यां प्रजायेय" इति वचनैः सच्छब्दवाच्यस्य निमित्तकारणत्वसामानाधिकरणत्वोपादानकारणत्वस्य कीर्तनात्।

यत्तु प्रत्यक्षप्रमाणस्यानादिभेदवासनामूलकतयाऽन्यथासिद्धत्वाद् दौर्बल्यम्। श्रुतीनामपौरुषेयतया भ्रमविप्रलिप्सा कर्णापाटवविशिष्टपुरुषसम्बन्धशून्यतया प्रमाणत्वेनान्यथासिद्धार्थप्रतिपादकतया प्राबल्यम्, तदपि न, मिथ्यावादिनामद्वैतिनां तु श्रुतीनामपि भेदवासनामूलकत्वेन तासामपि तन्मतेऽप्रामाण्यहतत्वात्, अपि चाद्वैतवादिभिरनादिमिथ्याभूताविद्यादोषवशात् सत्यभूतेऽधिष्ठाने ब्रह्मणि जगत्प्रपञ्चो मिथ्याभूतो भासमानोऽवगम्यते, यदि मिथ्याभूतेनाविद्यारूपेण दोषेण भ्रमोपपत्तिर्जगतः स्वीक्रियते, तदाऽधिष्ठानमप्यपारमार्थिकं कल्पयित्वा जगद्भ्रमसाम्राज्यं कथं नाङ्गीक्रियेतेति शून्यवादिनो माध्यमिकान्न विशेषोऽवलोक्यते।

यत्तु 'अहं स्थूलः', 'अहं कृशः' इत्यहमर्थस्थूलयोः सामानाधिकरण्यप्रतीतेरहमर्थः स्थूलत्वाद्याश्रयः पाञ्चभौतिकदेहः, न त्वात्मा, इति बाह्यैः प्रोच्यते। तथा "अहं ब्रह्मास्मि" इति श्रुतावहमर्थे ब्रह्मरूपताप्रतिपादनादहमर्थो ब्रह्मैव, न तु जीव इत्युच्यते, तन्न, जीवब्रह्मणोर्भेदस्य स्वरूपस्य च श्रुतिभिर्बहुशः कीर्तनाज्जडतत्त्वाज्जीवस्यापि भेदकीर्तनात् 'अहं स्थूलः' इत्यत्र स्थूलत्वविशिष्टदेहसंसृष्ट आत्मा प्रोच्यते। तथा 'अहं ब्रह्मास्मि' इत्यत्रापि पूर्वश्रुतिभिर्ब्रह्मजीवयोर्भेदस्य बहुधा कीर्तनात् 'अहं ब्रह्मास्मि' इत्यत्रापि शरीरात्मभावेन सामानाधिकरण्यं बोध्यम्। यद्यपि अधिष्ठानाधिष्ठेयभावकृतमपि सामानाधिकरण्यं संशयस्थले करचरणादिप्रत्यक्षदशायां 'स्थाणुः चोरु' इति सामानाधिकरण्यं प्रसिद्धम्, तथा 'अहं ब्रह्मास्मि' इत्यत्राप्यधिष्ठानाधिष्ठेयभावकृतसामानाधिकरण्यं स्वीक्रियेतेति तु न वाच्यम्, ब्रह्मणोरतिरिक्तस्याहमर्थस्य जीवस्य "द्वा सुपर्णा सयुजा सखाया', "क्षरं प्रधानममृताक्षरं हरः", "क्षरात्मानावीशते देव एकः" इत्यादिश्रुतिभिः ब्रह्मतत्त्वस्य जीवतत्त्वस्य चाचित्तत्त्वस्य च श्रुतिवचनैः परिकीर्तनादधिष्ठानाधिष्ठेयभावकृतं सामानाधिकरण्यं दूरापास्तम्। श्रुतिसिद्धयोर्जीवाचितोः पारमार्थिकत्वं निर्णीय को हि श्रद्धावान् मिथ्यात्वेनापलपेत्।

निर्गुणश्रुतीनामपहतपाप्मा विजरो विमृत्युरित्यादिश्रुत्युक्तहेयगुणनिषेधस्य निर्गुणपदेनोक्ततया "पराऽस्य शक्तिर्विविधैव श्रूयते" इति श्रुतिबलेन परमात्मनि

दिव्यकल्याणगुणवत्त्वबोधनान्निखिलहेयप्रत्यनीकं कल्याणगुणैकतानं ब्रह्म बोध्यम्, तथाऽचित्तत्त्वस्य नित्यविभूतिप्रकृतिकालरूपेण प्रसिद्धस्य "भोक्ता भोग्यं प्रेरितारं च मत्वा," "सदा पश्यन्ति सूरयः", "दिवीव चक्षुराततम्", "क्षयन्तमस्य तमसः पराके" इत्यादिश्रुतिभिः परिकीर्तनात् कल्याणगुणविशिष्टवन्नित्यविभूतिवैशिष्ट्यमपि परब्रह्मणोऽभ्युपेयम्। प्राकृतविभूतेश्च श्रुतिप्रमाणेन प्रत्यक्षप्रमाणेन च सिद्धतया न तस्याः कथञ्चिदपलापशङ्कावकाशः।

"सदेव सौम्येदमग्र आसीत्" इति श्रुतौ स्थूलचिदचिद्विशिष्टब्रह्मकारणीभूतसूक्ष्मचिदचिद्विशिष्टतत्त्वमुच्यते, तदेव तत्त्वम् आत्मैवेदं सर्वमित्यत्रात्मपदेनोच्यते। सर्वं खल्विदं ब्रह्मेत्यत्र ब्रह्मपदेनोच्यते, ऐतदात्म्यमिदं सर्वमित्यत्राप्यात्मपदेनोच्यते। अत्र सच्छब्दस्य सामान्यसत्यार्थप्रतिपादनार्थमात्मशब्दस्य जीवात्मपरमात्मोभयपरत्वेन साधारण्याद् ब्रह्मपदस्यापि प्रकृतिब्रह्मप्रजापतिब्राह्मणसाधारण्याद् विशेषार्थस्य निर्णयालाभेन पशुच्छागन्यायेन विशेषदेवनारायणपरत्वं निश्चीयते। तथा हि—पशुना यजेदित्यत्र पशुकरणकयागस्य विधाने पशुशब्दस्य लोमवल्लाङ्गूलादिमत्प्राणिपरत्वेन पशौ विशेषार्थजिज्ञासोदेति। तस्मिन्नेव प्रकरणे छागस्य वपाया मेदसः प्रेष्यनुब्रूहि इति तत्प्रकरणस्थमन्त्रे पशुविशेषच्छागस्य कीर्तनेनैकप्रकरणाम्नातयोः सामान्यविशेषवाचकशब्दयोः सामान्यशब्दस्य विशेषार्थपरत्वमिति पशुना यजेदित्यत्र पशुपदेन छागो निर्णीयते तथा कारणवाक्येषु प्रकरणेषु सदात्मब्रह्मपदानि श्रुतानि, तस्मिन्नेव जगत्कारणप्रकरणे नारायणोपनिषदि—ऋग्वेदशिरोभागे "अथ पुरुषो हि ह वै नारायणोऽकामयत प्रजाः सृजेयेति। नारायणात्प्राणो जायते मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी। नारायणाद् ब्रह्मा जायते। नारायणाद्रुद्रो जायते। नारायणादिन्द्रो जायते। नारायणात्प्रजापतिर्जायते। नारायणाद् द्वादशादित्या रुद्रा वसवः सर्वाणि च्छन्दांसि नारायणादेव समुत्पद्यन्ते। नारायणात् प्रवर्तन्ते। नारायणे प्रलीयन्ते। एतदृग्वेदशिरोऽधीते॥ १॥

"अथ नित्यो नारायणः। ब्रह्मा नारायणः, दिशश्च नारायणः। शक्रश्च नारायणः। कालश्च नारायणः। दिशश्च नारायणः। विदिशश्च नारायणः। उद्ध्वं च नारायणः। अधश्च नारायणः अन्तर्बहिश्च नारायणः। नारायण एवेदं सर्वं यद्भूतं यच्च भव्यम्। निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित्। य एवेदं वेद स विष्णुरेव भवति। स विष्णुरेव भवति। एतद्यजुर्वेदशिरोऽधीते॥ २॥

इति कारणवाक्येषु नारायणपदवाच्यस्य देवविशेषस्य जगत्कारणत्वं प्रमीयते। कारणवाक्येष्वेकप्रकरणाम्नाता सदादिशब्दानां तथा कारणवाक्यसमाम्नातस्य नारायणपदस्य विशेषस्य श्रवणदर्शनेन सदादिपदानां नारायणदेवविशेषपरत्वमध्यवसीयते। तेन "सदेव सौम्येदमग्र आसीत्" इत्यादिश्रुतेष्वपि सदादिपदानां कारणवाक्यश्रुतानां कारणवाक्यश्रुतनारायणदेवविशेषपरत्वं निर्णेयम्। यच्चुच्यते नारायणशब्दस्य—नराणां समूहो नारः, नारस्यायनं नारायणः। अथवा नराणां समूहो नारो जीवसमूहः, सोऽयनं यस्यासौ नारायण इति व्युत्पत्त्या नारायणशब्दस्य यौगिकत्वेन यत्र ब्रह्मत्वं सत्तर्केण सिद्धयेत्, स एव देवो नारायणपदेन ग्राह्यः स्यादिति नारायणपदेन देवविशेषो लक्ष्मीपतिर्वैकुण्ठनाथो न ग्रहीतुं शक्यत इति तन्न, तथासति नारायणपदे "पूर्वपदात्सञ्ज्ञायामगः" इति पाणिनीयेन सूत्रेण णत्वं न स्यात्, सञ्ज्ञायामेव तेन सूत्रेण नकारस्य णत्वविधानात्। "अट्कुप्वाङ्नुम्व्यवायेऽपि" इति सूत्रेण णत्वं वक्तुं न शक्यते, तत्र समानपदस्यानुवर्तनेन समानपदत्वयोर्नकाररेफयोः सत्त्व एव णत्वविधानात्। अतः "पूर्वपदात्सञ्ज्ञायामगः "इति सूत्रेणैवात्र णत्वं विधेयम्। नारायणपदे समानपदत्वं न विद्यते। निमित्तानधिकरणनिमित्तिमत्पदाघटितत्वस्य समानपदत्वपरिष्कारेण नारायणपदस्य निमित्तरेफानधिकरणनिमित्तमकारवदयनपदघटितत्वात्, अतो नारायणपदस्य योगरूढत्वेन लक्ष्मीनारायणपरतया सञ्ज्ञात्वेन "पूर्वपदात्सञ्ज्ञायामगः" इत्यनेन णत्वं सिद्धयति।

प्रमाणतन्त्रा विद्वांसो बहवः सन्ति भूतले।
इति कृत्वा निबन्धोऽयं पुरतस्स्थापितो मया॥

अत्रेदमाकलनीयम्—मीमांसकशिरोमणिः कुमारिलभट्ट ईश्वरमनङ्गीकृत्य वेदस्याशेषस्य प्रामाण्यं स्थापितवान्। वैदिकशिरोमणेः प्रतिपदं वेदेष्वीश्वरस्य सङ्कीर्तनात् कुमारिलभट्टस्येश्वरानङ्गीकर्तृत्वं न सम्भवति। अपौरुषेयत्वमूलकप्रामाण्यस्य वेदे स्थापनाय बौद्धानां सन्निधावीश्वरमनङ्गीकृत्य प्रामाण्यं स्थापितवान्। बौद्धान् पराजितवांश्चेत्यन्वारोहवादेन कुमारिलभट्टस्येश्वरानङ्गीकर्तृत्वं निर्णीयते, तथा वैदिकवंशसमुद्भूतस्य वेदानां प्रतिपदं प्रामाण्यमङ्गीकृतवतो विष्ण्वादिदेवनिष्ठस्य विकल्पोज्झितं विष्णुपरायणस्य श्रीशङ्करपादस्य नवजगन्मिथ्यात्वनित्यविभूतिमिथ्यात्वस्वर्गादिलोकमिथ्यात्वजीवनास्तिकत्ववादाः। मन्ये किञ्चिदन्वारोहवादेनैवेति सुधियो विमत्सरास्तत्त्वनिष्ठा आकलयन्त्विति।

श्रीशङ्कराचार्यविभावितस्तोत्रसाहित्यगत-भक्तिसाधनाविवेचनम्

डॉ० पारसनाथद्विवेदी
आचार्योऽध्यक्षश्च,
पुराणेतिहाससंस्कृतिविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

❀ ❀ ❀

वैदिकेतर-बौद्धादि-वाद-वारिद-व्रजं विघटय्य वैदिक-धर्ममय-स्वर्णिम-प्रभात-प्रभया विद्वद्व्रज-पुण्डरीक-पटलं प्रकाशयतो नितान्त-तान्त-स्वान्तानां दिग्भ्रान्तानामिव स्वसरणीय-सृति-भ्रष्टानां जनानां कृते प्राक्तन-पुण्य-पुरुष-प्रचारितां सरणिं समुपदिशतः कर्कशतर्क-कर-निकरैः दुष्तर्क-पङ्क-कलङ्कं धूलिसात्कुर्वतो दार्शनिक-दिनेशस्य श्रीशङ्करा-चार्यस्याभिधानं विश्व-विश्रुत-वैदुष्य-वैभवं वर्तते। लोकातिशायिमहापुरुषसुवो भारतभुवो दक्षिण-प्रान्तीय-कालटी-ग्राममधिवसतो विशिष्ट-विदुषः शशिशेखर-समर्चन-संसक्त-चेतसो भक्ति-भागीरथी-भरितस्य श्रीशिवगुरोः श्रीशिवगुरोर्निकेतनं साक्षाच्छिवावतारेण लोक-शङ्करेण शङ्करेण समलंकृतम्।

एवमनुश्रूयते यदेकदा रात्रौ स्वप्ने जटाजूटधारी कर्पूरगौरः सदाशिवः ज्योति-र्मयविग्रहेणाविर्भूय श्रीशिवगुरुं मधुरवचसा प्राह—'वत्स! प्रसन्नोऽस्मि ते भक्त्या, स्वाभिलषितं वरं प्रार्थयस्व। श्रीशिवगुरुः देवाधिदेवं महादेवं प्रणम्योवाच—देहि मे सर्वज्ञमेकं दीर्घायुष्यं च सुतम्। भगवानाशुतोषः विहस्योवाच—वत्स! यदि सर्वज्ञं सुतमिच्छसि, तदा दीर्घायुर्न स्यात्, यदि दीर्घायुष्यमिच्छसि, तदा सर्वज्ञो न भविष्यति। ब्रूहि, किमिच्छसि? दीर्घायुर्वा सर्वज्ञो वा। तदा धर्मैकप्राणः सदाशिवोपासनपरः शिवभक्तः श्रीशिवगुरुः सर्वज्ञं सुतमयाचत्। सदाशिवेन शिवेनोक्तम्—वत्स! सर्वज्ञं सुतमवाप्स्यसि, अहमेव तव पुत्ररूपेणावतरिष्यामि। एवं याते समये ६८६ वैक्रमाब्दे वैशाखशुक्लपञ्चम्यां शिवगुरोः शिवसदृशः सुतोऽजायत। शङ्करप्रसादेन जातत्वात्तस्य नाम शङ्कर इति जातम्।

असमय एव श्रीशिवगुरौ लेखलेखतामुपगते तदिच्छां पूरयन्त्या जनन्या पञ्चमवर्षे बालकस्य शङ्करस्य यज्ञोपवीतं विधाय गुरुकुलं प्रहितम्। गुरुगृहमधिवसता तेन शिवा-

वतारेण शङ्करेणाष्टवर्षावस्थायामेव सर्वा वेदविद्या समधिगता। द्वादशे वर्षे च सकलशास्त्रपारावारीणतामुपगतेनानेन बहुधा सम्प्रार्थिताऽपि ममतामयी माता विशिष्टा तद्विरहमसहन्ती संन्यासाश्रयणाय न स्वीयां स्वीकृतिमस्मै ददौ। एकदा सरिन्मध्ये ग्राहग्रस्तस्यास्य परित्राणं सन्यासं गगनगिरा समुपश्रुत्य प्राणपरित्राणं वाञ्छती जननी विवशा संन्यासाश्रयणायाज्ञां दत्तवती।

स्वीकृतसंन्यासोऽसौ नर्मदातीरवासिनं यशोभरविकासिनं योगशास्त्रप्रभाभासिनं पतञ्जलिरूपं श्रीशुकदेवशिष्यं विजिततिष्यं पद्मासनस्थं महायोगिनं, श्रीमद्गोविन्दपादाचार्यं गुरुं विधाय श्रुतिशासितमद्वैतमतं वर्षत्रयं यावदधीतवान्। प्रथमवर्षे हठयोगं द्वितीयवर्षे राजयोगं तृतीयवर्षे च ज्ञानयोगमधीत्य गुरोराशिषं स्वीकृत्य तदाज्ञां च शिरसि निधाय बौद्धादिमतपाखण्डविलुप्तप्रचारं परमपुनीतं श्रुतिनवनीतमद्वैतमतं समुपादिशन् विन्ध्यारण्यं प्रयागं ततो विद्याधिनाथस्य श्रीविश्वनाथस्य नगरीमात्मबोधरूपां वाराणसीं समधिगत्य वैदिकधर्मस्य प्रसारार्थं तदीयोपदेशं कर्त्तुमारेभे। तत्रैवैकदा शश्मशेखरो भगवान्भूतभावनो देवाधिदेवो महादेवः शङ्करस्य स्तुत्या तुष्टो भ्रमसङ्कुलमतवादान् विघटय्य ब्रह्मसूत्रस्याद्वैतपरां यथार्थां व्याख्यां विरचयेति समाज्ञप्तवान्। शङ्करोऽपि भगवतश्चन्द्रशेखरस्याज्ञां संप्राप्य हिमालयस्य तुङ्गशिखरानतिक्रम्य बदरिकाश्रममागत्य तत्र मूर्तिप्रतिष्ठां कृत्वा तदुत्तरभागस्थां व्यासगुहामधिगतवान्। तत्रैव निवसतानेन ब्रह्मसूत्रभगवद्गीतोपनिषत्सु प्रामाणिकीं व्याख्यां विधाय सनन्दनादिशिष्याः तदध्यापनेन कृतार्थीकृताः। क्रमेण च बहवो जनास्तच्छिष्यतया जीवनफलं लेभिरे। तच्छिष्येषु श्रीसुरेश्वराचार्य-पद्मपादाचार्य-हस्तामलकाचार्य-त्रोटकाचार्या अतीव प्रसिद्धा ग्रन्थविरचनसिद्धाः श्रवणातिथितां धारयन्ति।

षोडशवर्षवयसा तरसानेन विहितं सरस्वत्या लास्यं श्रुतिसन्दोहमधुरहास्यं भाष्यं विलोक्य को नाम जनोऽस्य भगवदवतारत्वे संदिहीत। उत्तरकाश्यां शास्त्रार्थोपायनप्रीतेन भगवता व्यासेन पुनः षोडशवर्षात्मकं कालं सम्प्राप्य तत्प्रचारार्थं भूयोऽपि तुहिनाद्रेरवततार। समस्तमेव भारतं वैदिकेतरमतकलङ्कपङ्कदूषितं शोधयितुं स्वीयामाचार्यपदवीं कृतार्थयताऽनेन सकलैव वसुन्धरा भारतवसुन्धरा दिग्विजययात्रया चमत्कृता। पुनरस्मिन् प्राचीनभारते भारते वैदिकधर्ममयो दिवाकरो दिव्यप्रभया रराजे।

महर्षेः व्यासस्याज्ञां सम्प्राप्य शङ्कराचार्यो दिग्विजयप्रसङ्गेन प्रथमं वेदरहस्यविदं विद्वत्प्रवरं भट्टपादं विजेतुं प्रयागाभिमुखं प्रतस्थे। तत्र दार्शनिकदिवाकरेण मीमां-

साचार्येण वैदिकधर्मरक्षणतत्परेण कुमारिलभट्टेन तदन्तिमावस्थायां मिलित्वा तदनुरोधेन विश्रुतवैदुष्यस्य मीमांसामण्डनस्य मण्डनस्य निवासभूमिं माहिष्मतीमधिगत्य जलाहरणाय गन्त्रीः दासीः मण्डनगृहमपृच्छत्। ताश्चाद्भुतशङ्करं शङ्करं दृष्ट्वोत्तरं ददुः—

स्वतःप्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरो गिरन्ति।
द्वारस्थनीडान्तरसंन्निरुद्धा जानीहि तन्मण्डनपण्डितौकः॥
फलप्रदं कर्म फलप्रदोऽजः कीराङ्गना यत्र गिरं गिरन्ति।
द्वारस्थनीडान्तरसंन्निरुद्धा जानीहि तन्मण्डनपण्डितौकः॥
जगद्ध्रुवं स्याज्जगदध्रुवं स्यात्कीराङ्गना यत्र गिरं गिरन्ति।
द्वारस्थनीडान्तरसन्निरुद्धा जानीहि तन्मण्डनपण्डितौकः॥

(शङ्करदिग्विजयः—८।६-८)

एवं ताभिर्दत्तमुत्तरं श्रुत्वा भगवान् शङ्करः शिष्यैः सहाश्चर्यचकितो मण्डनस्य गृहमगच्छत्। तत्र पिहितद्वारं गृहं दुष्प्रवेशमालोच्य स योगशक्त्या व्योममार्गेणाङ्गणान्तोऽवातरत्। तत्र व्यासं जैमिनिञ्चावलोक्य योगिश्रेष्ठः शङ्करः शास्त्रार्थकरणाय मण्डनमिश्रं निवेदयामास। ततस्तत्पत्नीरूपेण विराजमानां साक्षादिव शारदां शारदां माध्यस्थां विधाय परस्परशिष्यत्वपणे शास्त्रार्थे मीमांसामण्डनं मण्डनं विजितवान्। तदनु तदर्धाङ्गरूपया तद्धर्मपत्न्या पृष्ठेषु कामशास्त्रीयप्रश्नेषु ब्रह्मचर्यवशान्मौनमालम्ब्य षाण्मासिकमवधिं गृहीत्वा योगबलेन दिवङ्गतस्य श्रीमदमरुकभूपतेः शरीरे प्रविश्य कामकलाकौशलं कलयाञ्चक्रे। एतदवस्थेन शङ्करेण विरचितममरुशतकं सर्वानेव शृङ्गारशास्त्रीयमुक्तकानतिशेत इति विदन्त्येव विज्ञाः। अनन्तरञ्च शास्त्रार्थे तां मण्डनपत्नीं भारतीं विजित्य मण्डनमिश्रं शिष्यत्वेन स्वीकृत्य सुरेश्वराचार्येति तदभिधानं विधाय तेन सह वैदिकमतप्रचारार्थं भारतभुवो भ्रमणं चकार।

अथैकदा पद्मपाद-हस्तामलक-समित्पाणि-चिद्विलास-ज्ञानकन्द-विष्णुगुप्त-शुद्धकीर्ति-भानुमरीचि-कृष्णदर्शन-बुद्धिवृद्धि-विरञ्चिपाद-शुद्धानन्तानन्दगिरिप्रमुखैः सहस्रैः शिष्यवरैर्युतः सर्वा दिशः विजिगीषुः भगवान् श्रीशङ्कराचार्यः सेतुं प्रति प्रतस्थे। तत्र मध्यार्जुनं नाम शिवाविर्भूतिस्थलविशेषं प्राप्य भगवन्तं सदाशिवमुपेत्याब्रवीत्—भगवन्! सर्वोपनिषदर्थोऽसि, सर्वज्ञोऽसि, तस्मान्निगमादितात्पर्यगोचरो द्वैतमद्वैतं वेति संशयस्य सर्वेषां पश्यतां निवृत्तिं कुर्विति प्रार्थितो भगवान् सदाशिवो मध्यार्जुनेशो लिङ्गाग्रात्सावयवरूपेण निष्क्रम्य दक्षिणहस्तमुद्यम्य मेघवद्गम्भीरया गिरा 'सत्यमद्वैतं सत्यमद्वैतं सत्यमद्वैतमिति' त्रिरुक्त्वा लिङ्गाग्रेऽन्तर्दधे। पश्यतामेव सर्वेषां तद्देशस्थिताः तद्भक्ताः शङ्करमेव गुरुं मत्वोमागणपतीशार्काच्युतार्चापराः पञ्चयज्ञपरायणाः श्रुतिसंचो-

दितचारगाः शुद्धाद्वैतपरायणा बभूवुः[1]। ततः स शिष्यैः सह रामेश्वरं प्रति प्रतस्थे। तत्र तस्य शाक्तैर्विवादोऽभवत्। श्रीशङ्करः ताञ्शाक्तान्विजित्य रामेश्वरं संपूज्य चोल-पाण्ड्य-द्रविणांश्च वशे विधाय ततः काञ्चीं प्रति जगाम। शङ्कराचार्यः तस्यां काञ्च्यां मासत्रयमुषित्वा शङ्करप्रतिष्ठापूर्वकं शिवकाञ्चीति पट्टनं तत्प्राक्प्रतिष्ठित-श्रीवरदराजं विष्णुं समाश्रित्य विष्णुकाञ्चीति पट्टनं च निर्माय तत्सेवार्थमनेकभक्तजना-न्संपाद्य तद्देशवासिभिः पृष्टो भोक्तृभोग्यात्मकसकलप्रपञ्चस्य परमात्मरूपतां प्रतिपाद्य सर्वज्ञं नित्यशुद्धबुद्धमुक्तस्वभावं सकलविवर्ताधिष्ठानं ब्रह्म मुमुक्षुभिरुपासनीयमतो भवन्तोऽपि जीवात्मपरमात्मभेदं विहाय शुद्धाद्वैतब्रह्मोपासनया मुक्ता भवन्त्विति सम्यगुपदिश्य तद्देशवासिनो जनानपि शुद्धाद्वैतविद्यानिष्ठांश्चकार।

ततः सः स्वपादसरोरुहसेवनार्थं स्वयमागतानान्ध्रदेशीयानुगृह्य वेङ्कटाचलेशं प्रणिपत्य कलिङ्गदेशवासिभिः प्रार्थितः जगन्नाथपुरीं गत्वा तत्र जगन्नाथविग्रहं प्रतिष्ठाप्य ततोऽङ्गवङ्गकामरूपादि देशान् परिभ्रमन् सर्वज्ञपीठं शारदापीठमागत्य तत्र वासश्चक्रे। एवं भारतस्यैकता धर्मसूत्रेणैव शक्यसम्भवेति विचार्य स पूर्वपश्चिमोत्तर-दक्षिणदिग्भागेषु पुरी-द्वारकाबदरिकाश्रम-शृङ्गेरि-क्षेत्रेषु क्रमशो गोवर्द्धन-शारदा-ज्योतिः-शृङ्गेरी-समभिधानानां मठानां रचनांविधाय श्रीपद्मपाद-हस्तामलक-त्रोटका-चार्य-सुरेश्वराचार्यान् शिष्यान् तदाधिपत्ये नियुक्तवान्। मठेष्वेषु प्रथमप्रणीतत्वादधिक-समयनिवासात् प्रथमशिष्य-श्रीसुरेश्वराधिष्ठानादविच्छिन्नपरम्परावशादद्यावधि शृङ्गेरी-मठः शेखरायते।

श्रीशङ्कराचार्येण न केवलं वेदान्तग्रन्थानामेवापितु साधारणजनत्राणार्थमनेक-स्तोत्रग्रन्थानामपि प्रणयनं व्यधायि। प्रचण्डभानोश्च भानोर्दीधितिषु जलमिव प्रचण्ड-विचारकस्यास्य हृदये भक्तिसलिलमपि संलीनमासीदित्यनेन स्पष्टं प्रतीतिपथतामुपयान्ति। यथा विविधानि स्थानानि पावयन्ती लोकसन्तापं हरन्ती जनमनांसि मोदयन्ती भगवती जाह्नवी स्वावगाहिनो जनान् कृतार्थयन्ती दृश्यते। तथैव भक्तिभागीरथी कर्त्तव्यभावनां वहन्ती भक्तजनान् पावयन्ती विपत्पतिताञ्जनानुद्धरन्ती पावयति स्वावगाहिनो जनान्। भक्तिभावनाभावितान्तःकरणास्तदेकशरणाः स्वव्रतनिर्वाहाभरणा विश्ववन्दनीयचरणाः श्रीमच्छङ्कराचार्यपादा अपि भक्तिभागीरथ्यामवगाह्यात्मानमपावयन्।

सुखदुःखसमवाये संपद्विपद्बहुले जगतीतलेऽस्मिन् चतुरशीतिलक्षणयोनिषु जन्म-मरणपरम्परामनुभूयानेकजन्मार्जितपुण्यपुञ्जप्रभावैर्मानवशरीरमासादयति जीवलोकः।

---

१. श्रीमच्छङ्कराचार्यदिग्विजयस्य पञ्चदशसर्गतः।

तदिदमतिदुर्लभं मानवदेहमवाप्यापि नहि सर्वो जीवलोको[1] जन्ममरणपरम्परानुभवदुःखसागरमुत्तरीतुं प्रभवति, अपि तु गुरुकर्णधारभगवदनुकूलतारूपसमीरणसाहाय्येन संसारसागरं तरितुं प्रभवति। अधिकतरास्तु चतुरशीतिलक्षयोनिषु बंभ्रम्यमाणाः, कठिनतरां दुःखपरम्परामनुभवन्तः, पुनरपि जननं पुनरपि मरणमित्यनुसारं भूयोभूयो जन्ममरणचक्रे चङ्क्रमन्ते। नान्यत्साधनं विद्यते, ऋते भगवद्भक्तेर्जन्ममरणरूपसंसारसागरादुद्धर्त्तुमिति। भगवद्भक्त्यैव जीवात्मा जन्ममरणचक्राद्विमुक्तः शाश्वतं सुखमवाप्य मुक्तिभाजनतां भजते। अद्वैतवेदान्तदर्शनाचार्याणां भगवत्पूज्यपादश्रीशङ्कराचार्याणां मते केवलं ब्रह्मैव सत्यमन्यच्च सर्वं दृश्यप्रपञ्चं मायिकमसत्यं च (ब्रह्मसत्यं जगन्मिथ्येति श्रुतिः)। ब्रह्मज्ञानोदयेन दृश्यप्रपञ्चस्य निषेधादखण्डमद्वयमेकरसं चिन्मयं ब्रह्मैवावशिष्यते। एवं च यथाद्वैतवेदान्तदर्शनमद्वयब्रह्मज्ञानेन मोक्षाधिगममुद्बोधयति, तथैव भक्तिदर्शनमपि भगवत्तत्त्वसाक्षात्कारेणापवर्गद्वारमुद्घाट्य परमं पदं प्रापयति भक्तानिति। तस्मादात्मकल्याणाय मानवैर्मायासन्तरणपूर्वकं भगवत्स्वरूपसाक्षात्कारात्मकमुक्तिप्राप्तये तत्साधकत्वेनात्यन्तोपयोगिनी भगवद्भक्तिराश्रयणीया।

भज् सेवायामिति धातोर्भावे क्तिन्प्रत्यये सति निष्पन्नस्य भक्तिशब्दस्यार्थः प्रेम्णा भगवतः सेवैव प्रतीयते। अन्यव्यासङ्गनिरासपूर्वकस्वीयेष्टध्याननिष्ठचित्तासक्तिर्भक्तिरिति विदुषां मतम्। शङ्कराचार्यमतानुसारमङ्कोलबीजमङ्कोलं सूचिकाऽयस्कान्तोपलं साध्वी निजवल्लभं लतावृक्षं सरित् सरित्पतिं यथा प्राप्नोति, तथैव चित्तवृत्तिरपि यदा भगवन्तं साक्षात्कृत्य तच्चरणारविन्दद्वयमुपेत्य तिष्ठति, तदा सा भक्तिरुच्यते—

अङ्कोलं निजबीजसंसृतिरयस्कान्तोपलं सूचिका
साध्वी निजविभुं लताक्षितिरुहं सिन्धुःसरिद्वल्लभम्।
प्राप्नोतीह यथा तथा पशुपतेः पादारविन्दद्वयं
चेतोवृत्तिरुपेत्य तिष्ठति सदा सा भक्तिरित्युच्यते॥

(शिवानन्दलहरी—६१)

भगवता शङ्कराचार्येण विवेकचूडामणौ तु आत्मस्वरूपानुसन्धानमेव भक्तिः प्रोक्ता—

स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते।
स्वात्मतत्त्वानुसन्धानं भक्तिरित्यपरे जगुः॥

(विवेकचूडामणिः—३१)

---

१. शंकरदिग्विजयस्य पञ्चदशसर्गतः।

एवं परमात्मनः स्वरूपज्ञानं भक्तिरित्युच्यते। यथा ब्रह्मसद्भावस्योदयेन स्वरूपज्ञाने जाते कार्यकारणब्रह्मणोरद्वैतभावः समुदेति, तथैव प्रकृष्टाया भक्तेरुदयेन भक्तेन केवलं परमात्मैवानुभूयते। न तद्भिन्नः कश्चिदपरः पदार्थः क्वचिद् दृग्गोचरीभवति। तदानीं भक्तजनः कार्यब्रह्मस्वरूपं जगत्प्रपञ्चं कारणब्रह्मस्वरूपे परमात्मनि विलीनतामनुभवति। शङ्कराचार्येण मोक्षकारणसामग्र्यां भक्तिः श्रेष्ठा समुद्घोषिता—

मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी।

(विवेकचूडामणिः—३१)

एवं च ब्रह्मातिरिक्तध्येयशून्यनिर्विकल्पज्ञानसहोदरी भक्तिरेव भगवत्साक्षात्कारसाधनसमुदायेषु श्रेष्ठा। ऋते ज्ञानान्न मुक्तिरिति श्रुतेर्ज्ञानस्य मोक्षसाधनता प्रोक्ता। तथा च मोक्षोपलब्धिसाधनस्य ज्ञानस्यापि साधकोऽन्ते सर्वात्मनाऽऽत्मानं भगवते समर्पयति। इदं समर्पणं शरणागतिः भक्तिरेव। एवं ज्ञानस्याप्यन्ते भक्तावेव पर्यवसानम्। शङ्कराचार्यमतानुसारेण मृदाकारसाधने द्रवीभूतं ताम्रं यथा तदाकारतां भजते, तथैव घटादिरूपे व्याप्तं चित्तं तदाकारतां प्रपद्यते। यथा वा घटादिव्यङ्ग्यपदार्थाच्छादकान्धकारध्वंसकरालोको घटाकारतामियात्तथैव विषयावरणनिवर्त्तकं ज्ञानमपि तदाकारतां याति। अत एव सर्वार्थव्यञ्जकत्वाद्बुद्धिरप्यर्थाकारा प्रतीयते[1]। एवं द्रवीभूतमनसो भगवदाकारता सविकल्पकवृत्तिरूपता भक्तिः। द्रवीभावाप्राप्ताद्वयात्ममात्रगोचरा निर्विकल्पात्मिका मनोवृत्तिर्ब्रह्मविद्याब्रह्मज्ञानमिति। भक्तेः साधनं भगवद्गुणग्रथितग्रन्थश्रवणम्, ज्ञानस्य साधनं तत्त्वमस्यादिमहावाक्यश्रवणम्। भक्तेर्फलं भगवद्विषयकरतिप्रकर्षः, ज्ञानफलं सर्वविधानर्थहेतुभूताज्ञाननिवृत्तिः। एवं च भक्तिः सविकल्पकसमाधेर्ज्ञानञ्च निर्विकल्पकसमाधेर्द्वितीयमभिधानम्। भक्तिद्वारा सगुणब्रह्मस्वरूपं ध्यायन् सांसारिकविषयवितृष्णो जनो निर्गुणब्रह्मस्वरूपध्याने समर्थो भवति। अत एव मोक्षसाधनभूतायां सामग्र्यां भक्त्याय प्रथमं स्थानं प्रदत्तमाचार्यशङ्करेण। यथा चोक्तं विवेकचूडामणौ—'मोक्षकारणसामग्र्यां भक्तिरेव गरीयसीति'।

शङ्कराचार्यस्य स्तोत्रसाहित्ये एवंविधायां भक्तेर्महत्त्वं जेगीयते। शङ्कराचार्यस्येदं वैशिष्ट्यं यत्तेन स्वीये स्तोत्रसाहित्ये सगुणसक्रियविविधोपाधिविभासितमायाशबलितस्य ब्रह्मणो विविधरूपमयी लीलामयी माधुरी वर्णिता। काचिन्नायिकास्तोत्रादेराश्रयरूपेण न गृहीता। तेन यद्यपि स्वीयेषु दार्शनिकग्रन्थेषु निर्गुणं निष्क्रियं सर्वोपाधिशून्यं

---

१. उपदेशसाहस्री, स्वप्नप्रकरणम्—३.४।

मायालेशविरहितमद्वयमनन्तं ब्रह्म प्रतिपादितं तथापि व्युत्थानकाले भगवद्भजनहेतवे द्वैतमपि कल्पितम् । एवं शङ्कराचार्येण बहुजनहिताय बहुजनसुखाय सृष्टं स्तोत्रसाहित्यं भक्तिभागीरथ्यामवगाहनाभिलाषिणे भक्तजनाय वन्दनीयं तीर्थरूपं वर्तते ।

शङ्कराचार्यस्य स्तोत्रसाहित्ये नवविधाया भक्तेर्वैशिष्ट्यवर्णनं प्राचुर्येणोपलभ्यते । श्रवणं कीर्त्तनं स्मरणं पादसेवनमर्चनं वन्दनं दास्यमात्मनिवेदनमिति नवविधा भक्तिरुक्ता । तत्र श्रवणभक्तेर्माहात्म्यं प्रतिपादयन्नाचार्यशङ्करः स्वमन उपदिशन्नाह—हे मनः ! त्वमश्वगजादिसंयुतं प्राज्यं राज्यं पुत्रमित्रकलत्रादिक्षणभङ्गुरपदार्थांश्च परित्यज्य गुरुवाक्यानुसारं पार्वतीवल्लभं भज[1] । यतो हि श्रवणाभावे तत्त्वेऽज्ञाते निदिध्यासनाभावः स्यादिति । एवमेव शिवानन्दलहर्यां सुब्रह्मण्यस्तोत्रे चापि कथामृत-श्रवणस्य माहात्म्यमुपवर्णितम्[2] । कीर्तनभक्तेर्महत्त्वमुपवर्णयता शङ्कराचार्येण सौन्दर्य-लहर्यामुक्तम्—'हे भवानि ! मयि दासे सकरुणां दृष्टिं वितर' इति कामनाया भक्तो यदा 'भवानि' इति पदमुच्चारयति, तदैव नामसङ्कीर्तनेन प्रसन्ना भगवती तस्मै मुकुन्दादिसेवितां सायुज्यपदवीं प्रददाति[3] । भगवत्याः स्तुतिः ब्रह्म-शिव-षडानन-शेषप्रभृतिभिश्चतुर्मुखैः पञ्चमुखैः षण्मुखैः सहस्रमुखैर्वाऽशक्यगेया वर्तते । भगवत्या नामोच्चारणेन प्रतिवासरं मन्त्रजापेन सर्वपदार्थसौलभ्यादिवर्णनं कीर्त्तनभक्तेर्महत्त्वं प्रकटयति ।

स्वाराध्यनामरूपगुणप्रभावलीलाकथादिश्रवणानन्तरं सांसारिकविषयान् विस्मृत्य स्वाराध्यगुणादिस्मरणं स्मरणमुच्यते । श्रीशङ्कराचार्यस्य स्तोत्रसाहित्ये स्वाराध्यस्मरणेच्छा महत्त्वं च सर्वत्र दृष्टिपथमवतरति । स्मरणमेवोपासनासर्वस्वमत एवास्य स्तोत्र-साहित्येऽतीवहृद्यमनेकविधमुदाहरणमुपलभ्यते । शिवानन्दलहर्यां योगक्षेमकर्त्तुः समस्त-श्रेयसहितदृष्टादृष्टफलप्रदातुः सर्वव्यापकादिगुणगणैरलंकृतस्य शिवस्य स्मरणं मनःपक्षि-राजस्य शङ्करपादपद्मे वास-कामना मानसराजहंसस्य गिरिजाधीशस्य चरणसौधे स्वच्छविहारेच्छा मनःकानने आखेटलीलाविधातुः शिवस्य स्मरणमित्यादयो स्मरणभक्ते-

---

१. शिवापराधक्षमापनस्तोत्रम्—१३; २. तदेव ७ ।

३. भवानि त्वं दासे मयि वितर दृष्टिं सकरुणा-
मिति स्तोतुं वाञ्छन् कथयति भवानि त्वमिति यः ।
तदैव त्वं दिशसि निजसायुज्यपदवीं
मुकुन्दब्रह्मेन्द्रस्फुटमुकुटनीराजितपदाम् ॥ (सौन्दर्यलहरी—२२)

महत्त्वं द्योतयन्ति[1]। निखिलव्याधिनिवारकमुभयलोकसाधकं परमङ्गलमयं भगवच्चरणारविन्दसेवनं पादसेवनमिति। शङ्कराचार्येण प्रश्नोत्तरमालिकयामपारभवाब्धौ निमज्जमानस्य शिष्यस्य कृते विश्वेशपादाम्बुजदीर्घनौका कल्पिता। एवमेव शिवभुजङ्गे भवव्याधिशान्तिभेषजं भवाब्धिसंतरणक्षमं शीतांशुमौलिप्रियापादाम्भोजपोतं कल्पितम्।[2] सौन्दर्यलहर्यां तेन स्वशिरसि श्रुतिसंसेव्यचरणस्थापनाय प्रार्थना कृता। शिवानन्दलहर्यां शिवपादादिकेशान्ते विष्णुपादाब्जकेशान्ते चापि पादचरणारविन्दमाहात्म्यमुपवर्णितम्।

शास्त्रानुमोदितरीत्या संस्थापितयन्त्रप्रतिमादीनां समन्त्रकममन्त्रकं वा यथाशक्तिसम्भृतसामग्र्या पूजनमर्चनमुक्तम्। शङ्कराचार्येण शिवानन्दलहर्यां भगवतः शिवस्य पूजाफलं ब्रह्मपदं विष्णुपदं च निर्दिष्टम्। श्रीविष्णुः शिवार्चनसमये सहस्रनामावलिसहपद्मपुष्पसमर्पणात्मिकाऽर्चनायां पुष्पैकन्यूनतायां पुण्डरीकाक्षं नाम स्मरन् स्वकीयनेत्रकमलसमर्पणाय समुद्यतोऽभवत्। तदा भक्त्या प्रसन्नः पार्वतीपतिः तस्मै त्रैलोक्यपालकपदं प्रददौ[3]। त्रिपुरसुन्दरीमानसपूजास्तोत्रे देवीचतुष्षष्ट्युपचारपूजायां मन्त्रमालिकापुष्पमालास्तवे निर्गुणमानसपूजा-मृत्युञ्जयमानसपूजाप्रभृतिस्तोत्रग्रन्थेषु सर्वविधपूजया सह चतुःषष्ट्युपचारपूजाया अपि हृद्यं वर्णनं विद्यते। निर्गुणमानसपूजायां निर्विकार-

---

१. शिवानन्दलहरी—२१-३८, ४५-४७।

२. (क) अपारसंसारसमुद्रमध्ये निमज्जतो मे शरणं किमस्ति।
गुरो कृपालो कृपया वदैतद् विश्वेशपादाम्बुजदीर्घनौका ॥(प्रश्नोत्तरमालिका)

(ख) त्वमप्यम्ब मां पश्य शीतांशुमौलिप्रिये भेषजं त्वं भवव्याधिशान्तौ।
बहुक्लेशभाजं पदाम्भोजपोतं भवाब्धौ निमग्नं नयस्वाद्य पारम् ॥
(शिवभुजङ्गस्तोत्रम् – ३३)

३. (क) विष्णुर्यस्य सहस्रनामनियमादम्भोरुहाण्यर्चयन्
एकोनोपचितेषु नेत्रकमलं नैजं पदाब्जद्वये।
संपूज्यासुरसंहतिं विफलयँस्त्रैलोक्यपालोऽभवत्
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥(दशश्लोकी—७)

(ख) श्रीमन्त्राक्षरमालया गिरिसुतां यः पूजयेच्चेतसा
सन्ध्यासु प्रतिवासरं सुनियतस्तस्यामलं स्यान्मनः।
चित्ताम्भोरुहमण्डपे गिरिसुता नृत्तं विधत्ते रसाद्
वाणीवक्त्रसरोरुहे जलधिजा गेहे जगन्मङ्गला ॥
(मन्त्रमातृकापुष्पमालास्तव, १६)

ब्रह्मनिष्ठोपासनाया हृदयग्राहि मार्मिक वर्णनमुपलभ्यते। यद्धि निर्मायिकब्रह्मसमुपासक-समाधिसिद्धवीतरागयोगिसाध्यम्। एवं च तस्य स्तोत्रसाहित्ये विविधार्चनस्य विशदं वर्णनमुपलभ्यते।

भगवद्विग्रहस्वरूपयन्त्रप्रतिमादीनां दर्शनं कृत्वा करुणावरुणालयं भगवन्तं संस्मृत्य सश्रद्धः शरीरेण मनसा वा प्रणतिनिवेदनं वन्दनात्मिका भक्तिरिति भण्यते। शङ्कराचार्यस्य स्तोत्रेषु सर्वत्रैव वन्दनभक्तेर्माहात्म्यं वर्णितम्। षट्पदीस्तोत्रे सुर-सरस्वतीयमकरन्दविभूषितस्य सच्चिदानन्दमयपरिमलपरिपूजितस्य श्रीपतिचरणार-विन्दद्वयस्य वन्दना भवभयखेदच्छिदे कृता वर्तते[1]। एवमेव शिवपादादिकेशान्तस्तोत्रे उच्च-नीच-स्थावर-जङ्गमादिभेदभावनां विस्मृत्य कीट-वृक्षादीनां वन्दनोपलभ्यते[2]। स्वाराध्यदेवं जीवनसर्वस्वं सम्मानयन आत्मानं तस्य दास इति जानन् सर्वात्मना कृता सेवा दास्यात्मिका भक्तिरिति। शङ्कराचार्येण दास्यभावद्वारोपासनानिरतभक्तजनो-द्धारार्थं स्वस्तोत्रेषु दास्यभावनिरूपणं कृतम्। परमशिवस्य शिवस्य दास्यभावोपासको नन्दीश्वर एवास्यैव शापवशात् त्रैलोक्यजयी रावणो विनाशमुपगतः। दशश्लोक्यां नन्दीश्वरस्य दास्यात्मिकाभक्तेर्फलमुदाहृतम्[3]। सौन्दर्यलहर्यां 'हे भवानि! दासे मयि सकरुणां दृष्टिं वितरेति कथनात्पूर्वमेव भक्तो यदा 'भवानि' इति पदमुच्चारयति, तदैव नामसङ्कीर्त्तनेन प्रसन्ना भगवती तस्मै मुकुन्दादिसेव्यां सायुज्यपदवीं प्रददौ[4]। भगवतः प्रभावं रहस्यं च जानन्नपि मित्रभावेनोपासना सख्यभक्तिरुक्ता। शङ्कराचार्येण कृष्णा-ष्टकस्तोत्रे भगवतः व्रजशिशूनामर्जुनस्य च सख्यभावं कथितम्[5]। रामभुजङ्गस्तोत्रे सुग्रीवस्य मित्रता वर्णिता। एवं च व्रजवासिशिशवोऽर्जुनो व्रजवनिताः सुग्रीवो विभी-षणादयश्च सख्यभावोपासनयाऽलौकिकं महत्त्वं प्राप्तवन्तः। परमात्मनि स्वशरीरसमर्पण

---

१. दिव्यधुनीमकरन्दे परिमलपरिभोगसच्चिदानन्दे।
श्रीपतिपदारविन्दे भवभयखेदच्छिदे वन्दे॥ (षट्पदीस्तोत्रम्—२)

२. शिवपादादिकेशान्तस्तोत्रम्—४०।

३. गोविन्दादधिकं न दैवतमिति प्रोच्चार्य हस्तावुभा-
वुद्धृत्याथ शिवस्य सन्निधिगतो व्यासो मुनीनां वरः।
यस्य स्तम्भितवृत्तिरानतिकृता नन्दीश्वरेणाभवत्
तस्मिन् मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि॥
(दशश्लोकीस्तोत्रम्—५)

४. सौन्दर्यलहरीस्तोत्रम्—२२।

५. घनश्यामो वायो व्रजशिशुवयस्योऽर्जुनसखः (कृष्णाष्टकस्तोत्रम्—७)।

आत्मनिवेदनमिति। आत्मनिवेदनं भावसहितं भावरहितं च द्विविधमाख्यातम्। सुब्रह्मण्यभुजङ्गस्तोत्रे स्कन्दे स्वसर्वस्वसमर्पणं निगदितं तथा शिवानन्दलहर्यामात्मनिवेदनभक्तिरित्थं वर्णितं यद्धे शिव ! मे मनस्ते पदाब्जे वचस्स्तोत्रभणितौ करौ चार्यायां श्रुतिः कथाश्रवणे बुद्धिर्ध्याने नयनयुगलं मूर्त्तिविभवे सदा रमताम्[1]। सौन्दर्यलहर्यां जल्पो तपः सकलमपि शिल्पं मुद्रारचनागतिः प्रदक्षिणा भोजनमाहुतिः स्थितिः प्रणतिरिति निर्दिश्य भगवत्या आराधनविधौ स्वसर्वस्वसमर्पणाय कामना विहिता[2]। स्वाराध्यदेवे स्वसर्वस्वसमर्पणमात्मनिवेदनमिति सर्वत्र प्रतिपादितं शङ्करस्तोत्रग्रन्थेषु। एवं चाचार्यरचितेषु स्तोत्रग्रन्थेषु नवधाभक्तेः साङ्गोपाङ्गं सुस्पष्टं विवेचनमुपलभ्यते।

उपासना—समीप्यार्थकोपोपसर्गपूर्वकादुपवेशनार्थकासुधातोर्युचि टाप् प्रत्यये कृते सति उपासनाशब्दो निष्पद्यते। यस्यायमर्थः—स्वीयोपास्यदेवस्य समीपेऽन्तःकरणस्योपस्थापनमुपासना। उपासको ह्युपासनया स्वीयमन्तःकरणं स्वस्योपास्यदेवस्य पादपद्मयोरुपस्थायानल्पमानन्दमनुभवति। वरिवस्या सुश्रूषा परिचर्या चोपासनायाः पर्यायवाचिनः शब्दाः[3]। शङ्कराचार्येण शास्त्रसमर्थितं किञ्चिदालम्बनमुपादाय तत्सामीप्यमुपागम्य तैलधारावत् तदाकाराकारितचित्तवृत्तिसन्तानप्रवाहेण सुखेनासनमुपासनमित्याख्यातम्। यथा चोक्तं शांकरभाष्ये—

(क) उपासनं तु यथाशास्त्रसमर्थितं किञ्चिदालम्बनमुपादाय तस्मिन् समानचित्तवृत्तिसन्तानकरणं तद्विलक्षणप्रत्ययानन्तरितमिति विशेषः[4]।

---

१. मनस्ते पादाब्जे निवसतु वसस्स्तोत्रभणितौ
करौ चाभ्यर्चायां श्रुतिरपि कथाकर्षणविधौ।
तव ध्याने बुद्धिर्नयनयुगले मूर्त्तिविभवे
परग्रन्थान् कैर्वा परमशिवजाने परमतः॥
(शिवानन्दलहरीस्तोत्रम्—७)

२. जल्पो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादाक्षिण्यक्रमणमशनायाहुतिविधिः।
प्रणामः सर्वेशः सुखमखिलमात्मसमर्पणदिशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम्॥ (सौन्दर्यलहरी—२७)

३. वरिवस्या तु सुश्रूषा परिचर्या चाप्युपासना। (अमरकोषः)

४. छान्दोग्योपनिद्भाष्यभूमिकाशांकरभाष्यम्।

(ख) उपासनं नाम यथाशास्त्रमुपास्यार्थस्य विषयीकरणेन सामीप्यमुपगम्य तैलधारावत्समानप्रत्ययप्रवाहेण दीर्घकालं पदासनं उदुपासनमाचक्षते[१]।

(ग) उपासनं नाम समानप्रत्ययप्रवाहकरणम्[२]।

(घ) उपासनं च यथाशास्त्रं तुल्यप्रत्ययसंततिः।

असङ्कीर्णा च अतत्प्रत्ययैः शास्त्रोक्तालम्बनविषया च। प्रसिद्धश्चोपसनाशब्दार्थो लोके 'गुरुमुपास्ते, राजानमुपास्ते' इति[३]। उपासना हि भक्तिमूला। भक्तिमन्तरोपासना न सम्भवति, यतो हि भक्तिरस्त्युपास नायाः प्राणस्वरूपाः (ज्ञेया भक्तिः प्राणस्वरूपिणीति)। तदुपासना द्विधा निर्गुणोपासना सगुणोपासना चेति। उपासना ह्युपास्याधीनो, उपास्यं च ब्रह्म। तदपि ब्रह्म द्विविधम्—निर्गुणं सगुणं च। निर्गुणं ब्रह्म सजातीय-विजातीय-स्वगत-भेदशून्यमेकमद्वितीयम्। तदेकमपि ब्रह्मापेक्षितोपाधिसम्बन्धं निरस्तोपाधिसम्बन्धं चोपास्यत्वेनोपदिश्यते। द्विरूपं हि ब्रह्मावगम्यते, नामरूपविकारभेदोपाधिविशिष्टं तद्विपरीतं च सर्वोपाधिविवर्जितम्। विद्याविद्याविषयभेदेन ब्रह्मणो द्विरूपता, तत्राविद्यावस्थायां ब्रह्मणः उपास्योपासकादिलक्षणः सर्वो व्यवहारः[४]। समाधिकाले तस्य ब्रह्मणः साक्षात्कृतिरेवोपासना। तदनन्तरेण निरतिशयानन्दोपलब्धिः त्रिविधदुःखानामात्यन्तिकी निवृत्तिश्च न जायते। अत एव भगवती श्रुतिः कथयति—'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय'। किन्तु निर्गुणब्रह्मणः साक्षात्कृतिरतिकठिनाऽस्ति। अत एव प्रथमं सगुणोपासना कर्त्तव्येति मत्वा निर्गुणब्रह्मोपासनापेक्षया सगुणब्रह्मोपासनायाः श्रेष्ठत्वमुद्घोषितम। तत्रोपास्योपासकभावपर्यन्तं द्वैतभावोऽवश्यमेव तिष्ठति, किन्तु यदोपास्योपामकभावभेदो नश्यति, उपासकश्चोपास्येन सह तन्मयो भवति, तदा द्वैतभावो विनश्यति, अद्वैतभावश्चोदेति। सैवास्ति परमानन्दस्य चरमावस्था।

महाकाशतः परमाणुपर्यन्तमाब्रह्माण्डादिस्तम्बपर्यन्तं यावदपि वस्तुजातं तन्निखिलमपि तस्मिन्नद्वयब्रह्मण्येव समनुस्यूतम् (सर्वं खल्विदं ब्रह्म)। एवं च सगुणोपासनाऽपि निर्गुणब्रह्मणे एवोपासना। उपासनार्थं हि निर्गुणमपि ब्रह्म नामरूपादिगुणैः सगुणमुपदिष्टम्—

---

१. शांकरभाष्यम्, गीतायाम्—१२।३।

२. शांकरभाष्यम्—४।१।६।

३. शांकरभाष्यम्, तैत्तिरीयोपनिषद्—१।३।४।

४. शांकरभाष्यम्—१।१।१२।

"निर्गुणमपि सद्ब्रह्म नामरूपगतैर्गुणैः सगुणमुपासनार्थं तत्र तत्रोपदिश्यते, इत्येदप्युक्तमेव। सर्वगतस्यापि ब्रह्मण उपलब्ध्यर्थं स्थानाविशेषो न विरुध्येत, शालग्राम इव विष्णोरित्यतदप्युक्तमेव"[१]।

एवं च— "तस्यैतस्य ब्रह्मणः साक्षादुपलब्ध्यर्थमुपासनार्थं च हृदयाकाशः स्थानमित्युच्यते, शालग्राम इव विष्णोः। तस्मिन् हि तद्ब्रह्म उपास्यमानं मनोमयत्वादि-धर्मविशिष्टं साक्षादुपलभ्यते, पाणाविवामलकम्[२]।"

एवं सगुणोपासनां विनां निर्गुणब्रह्मोपलब्धिरसम्भवेति। तत्र सगुणोपासनाया विषया ब्रह्माविष्णुमहेशादीनां यथाविधि सुश्रूषाऽर्चनादयः। सामान्यजनैरग्राह्यत्वा-न्निर्गुणब्रह्मोपलब्धये सगुणोपासना सोपानसदृशीति मत्वा साधकः चित्तवृत्तिं निरोधयन् सगुणोपासनानन्तरं समाधिकाले समाहितचेतसा निर्गुणं ब्रह्म साक्षात्कृत्य जीवन्मुक्तो भूत्वा देहपातानन्तरं मुक्तिपदमाप्नोति।

निर्गुणस्य ब्रह्मण उपासना ओङ्कारध्यानद्वारा निष्पद्यते। यथा चोक्तं प्रश्नो-पनिषद्भाष्ये—'एतेनैवात्मप्राप्तिसाधनेनोङ्काराभिध्यानेनैकतरं परमपरं वा ब्रह्मानुगच्छति (५-२)' एवं च 'यथावदुपास्यमान ओङ्कारः ब्रह्मप्रतिपत्तये आलम्बनीभवति।' कठोपनिषदि प्रतिपादितं च—'तदेतद्ब्रह्म ओंशब्दवाच्यमोंशब्दप्रतीकं च।' एवं परापरब्रह्मणोः प्रतीकमेतदक्षरमोमिति। तदेतदक्षरं ब्रह्मेत्युपास्य यो यदिच्छति, तस्य तद्भवति[३]। तदेतदोमित्येकाक्षरं पदं परापरब्रह्मविषयत्वाद्ब्रह्मणः नेदिष्ठं परमा-लम्बनम्। तस्मात्परापरब्रह्मप्राप्तिसाधनत्वेनोङ्कारस्योपासनम्। तत्र परमक्षरं ब्रह्म पुरुषाख्यमपरं च ब्रह्म हिरण्यगर्भाख्यं प्राणाख्यं वा प्रथमजम्। तदेतत्परापराख्य-मोमित्येकाक्षरं ब्रह्म बाह्यविषयेभ्य उपसंहृतकरणः समाहितचित्तः भक्त्यावेशितः सन्नुपास्यः[४]। तदेवमुपास्यमान ओङ्कारः परापरब्रह्मसाधनंमित्युक्तम्।

उपासना द्विविधा—बाह्याऽऽभ्यन्तरी चेति। तत्र बाह्यैः पदार्थैः गन्धपुष्पादिभिः स्वेष्टदेवतासमाराधनं बाह्योपासना, भावनाप्रवणेन चित्तेन च स्वेष्टदेवतासमाराधन-

---

१. शाङ्करभाष्यम् – १।२।१४।
२. शाङ्करभाष्यम्—(तैत्ति०) १।६।७।
३. शाङ्करभाष्यम्—(कठो०) १।२।१५-१७।
४. शांकरभाष्यम्—(प्रश्न०) ५।१-२।

मान्तरोपासनमुच्यते। तत्रान्तरोपासनं विना निष्फलं भवति बाह्यमुपासनम्। अत एवान्तरोपासनं प्रथमं कार्यमिति प्रतिपादितं शक्तिसङ्गमतन्त्रे—'अन्तःपूजां समासाद्य बहिःपूजां समाचरेत्' योगिनीहृदये दीपिकायां च—'एतेन बाह्यपूजां सर्वामप्यादावन्तः कुर्यादिति सूच्यते' (३।९०) इति सुभगोदयवासनानाम्नि ग्रन्थे चिद्विलासस्तवे च बाह्याभ्यन्तरपुष्पप्राणाद्यनपेक्षिणी सेयमान्तरोपासना स्वस्मिन्नद्वये धाम्नि प्रतिष्ठापनसमर्था। एवञ्चान्तरा बाह्याश्चोपचाराः प्रदर्शिताः।

शाङ्करसम्प्रदाये सर्वदेवोपसना किम्वा सर्वभेदोपासना उत वा तन्माध्यमेन सर्वत्र समनुस्यूतसर्वकारणपरब्रह्मोपासना विविधरीत्या क्रियते। अत एव शङ्कराचार्येण तत्परब्रह्मणोऽनेकरूपोपासनायै विविधस्तोत्राणि विरचितानि। तत्स्तोत्रसाहित्यं साम्प्रदायिककटुतारूपभेदजन्यबाधादिकण्टकविहीनं तदुधानमस्ति, यत्र सहृदयहृदयं स्वभावनानुसारं यस्यां वीथ्यां याति, तत्रैव मनोहारि द्रव्यमुपलभ्य सर्वान्यविषयान् विस्मृतिगर्त्ते विलीय तत्सुषमालीनः स्वमपि विस्मरति। शङ्कराचार्यस्य स्तोत्रसाहित्यावलोकनेन ज्ञायते, यत्स त्रिपुरसुन्दर्याः समुपासक आसीत्। तेन स्वस्तोत्रेषु विशेषतः तस्या एव गुणगणान् वर्णयता स्वजीवनसाफल्यं विहितम्। अद्यापि तन्मठेषु इयमेवोपासनापद्धतिः प्रचलति। तस्य स्तोत्रसाहित्येषु श्रेष्ठतमाकृतिः सौन्दर्यलहरी, तस्या एवोपासनासरणिं प्रकटयति।

शङ्कराचार्यस्य समुपास्या श्रीविद्या वेदवर्णिता मोक्षप्रदा परमपावना प्राचीनतमा पद्धतिः। आचार्येणेयं विद्या गुरुपरम्परया प्राप्ता। आगमशास्त्रवर्णितासु दशविद्यासु तृतीया महाविद्या श्रीषोडशी अस्या एव परिणतिरूपा। असारेऽस्मिन् संसारे यत्र भोगो न तत्र मोक्षो यत्र मोक्षो न तत्र भोगः, किन्तु श्रीविद्यासेवकेभ्यो भोगमोक्षावुभावपि सहजरूपेण प्राप्येते[1]। मन्त्रशास्त्रानुसारं परमकारुणिको भगवाँश्चन्द्रशेखरः शिवः लोकानुग्रहार्थं मन्त्रसृष्टिर्विहिता। तत्राम्नायेषु श्रीविद्या ऊर्ध्वाम्नाये गण्यते[2]। परब्रह्मणोऽभिन्नः शिवः स्वस्थनैसर्गिकविमर्शात्मिकास्फुरताभिन्नशक्तिसमायोगाद् जगदुत्पादयति पाति संहरति च। तत्परिणामादेषाऽर्थमयीशब्दमयीचक्रमयीदेहमयी च सृष्टिर्जाता। तज्ज्ञानार्थं चतुर्दशविद्या प्रोक्ता। तासु सारभूता वेदास्तेष्वपि सारभूता गायत्री। तस्या रूपद्वयम्, तत्रैकं सर्वत्र

---

१. यत्रास्ति भोगो नहि तत्र मोक्षो यत्रास्ति मोक्षो नहि तत्र भोगः।
श्रीसुन्दरीसेवनतत्पराणां भोगश्च मोक्षश्च करस्थ एव॥ (अशेषकुलवल्लरी)

२. कामेशी ललिताबाला महात्रिपुरसुन्दरी।
त्रिपुराभैरवी ह्येता उर्ध्वाम्नायं प्रचक्षते। (बडवानलतन्त्रम्)।

सुस्पष्टं ख्यातम्। द्वितीयन्तु श्रीविद्या गुप्ततमा श्रुतिशासिता चेति[1]। इयं श्रीविद्या संकेतविद्या - महाविद्या-गुह्यविद्याऽऽत्मविद्यात्रिपुरात्रिपुरेशानीत्रिपुरसुन्दरी-ललिता-पञ्च-दशीविद्या-षोडशीविद्या-ब्रह्मविद्यास्वरूपा भुक्तिमुक्तिप्रदा प्रोक्ता। त्रि-त्रिगुणात्मकदेवेभ्यो ब्रह्मविष्णुमहेशेभ्यो वा त्रिगुणात्मिकामहाकाली-महालक्ष्मी-महासरस्वतीभ्यः पुरा-प्राचीनत्वाद् गुणत्रयातीताप्रत्यक्प्रकाशानन्दनिर्भरा त्रिपुरापदवाच्येति। पराशक्तिरूप-महाविद्याविवर्जितः शिवोऽपि शवतां याति[2]। सौन्दर्यलहर्यां हादिकादिविद्ये निर्दिष्टे[3]। तत्र कादिविद्या श्रेष्ठतमोक्ता[4]। कामराजसम्प्रदायसमुपास्या कादिविद्यासमुपासके न शङ्कराचार्येणेयं श्रीविद्या षोडशाक्षरीमहाविद्या ब्रह्मविद्यास्वरूपा सर्वानन्दमयी जगन्मयी सर्वसम्पत्करी सर्वसाम्राज्यप्रदायिनी भुक्तिमुक्तिप्रदा प्रोक्ता[5]। अनयैव विद्यया ब्रह्मणा

---

१. नैसर्गिकी स्फुरता विमर्शरूपास्य वर्तते शक्तिः।
तद्योगादेव शिवो जगदुत्पादयति पाति संहरति ॥
सावश्यं ज्ञेया यत्परिणामादभूदेषा।
अर्थमयो शब्दमयी चक्रमयी देहमय्यपि सृष्टिः ॥
तज्ज्ञानार्थमुपाया विद्यालोके चतुर्दश।
प्रोक्तास्तेष्वपि च सारभूता वेदास्तत्रापि गायत्री।
तस्या रूपद्वितयं तत्रैकं प्रपञ्च्यते स्फुटम्।
वेदेषु चतुर्ष्वपि परमत्यन्तं गोपनीयम्।
कामो योनिः कमलेत्येवं साङ्केतितैः शब्दैः।
व्यवहरति न तु प्रकटं यां विद्यां वेदपुरुषोऽपि ॥
(वरिवस्यारहस्यम्, प्रथमोंऽशः—४-८)
मोक्षैकहेतुविद्या सा श्रीविद्या नात्रसंशयः। (त्रिशती २६)

२. शिवोऽपि शवतां याति कुण्डलिन्या विवर्जितः। (सौन्दर्यलहरी, १)

३. सौन्दर्यलहरी—३१, ३२।

४. श्रीविद्यैव तु मन्त्राणां तत्र कादिर्यथा परा। (ललितासहस्रनामभाष्यम्, १७)

५. वर्णितुं नैव शक्येयं श्रीविद्या षोडशाक्षरी।
ब्रह्मविद्यास्वरूपा हि भुक्तिमुक्तिफलप्रदा ॥
षोडशार्णा महाविद्या ब्रह्मरूपा जगन्मयी।
सर्वानन्दमयी साक्षात्सर्वसाम्राज्यदायिनी। (दक्षिणामूर्तिस्तोत्रम्)।

सृष्टिकर्तृत्वं विष्णुना पालनकर्तृत्वं रुद्रेण संहारकर्त्तृत्वमवाप्तम्[1]। सौन्दर्यलहर्यां भक्तजनोपासनासौविध्यार्थमात्मशक्तिस्वरूपायाः श्रीविद्यायास्त्रिपुरसुन्दर्याः स्थूलसूक्ष्म-तुर्यादिरूपेषु स्थूलरूपस्य वर्णनं कुर्वता शङ्कराचार्येणाह—हे देवि ! सुधासिन्धुमध्ये पारिजातादिपरिवृते मणिद्वीपे कदम्बवनमण्डिते चिन्तामणिगृणे शिवाकारमञ्चे परमशिवपर्यङ्कनिलयां प्रकाशरूपेण शिवेनाभिन्नविग्रहां निर्भरानन्दरूपिणीं बालार्क-मण्डलाभासां त्रिनेत्रमण्डितां पाशाङ्कुशचापशरांश्च धारयन्तीं चिदानन्दलहरीं त्वां केचन धीरा एव भजन्ति[2]। तस्याः सूक्ष्मरूपं तु सद्गुरोः पुण्यजनैः सौभाग्येनोपलभ्यते, तृतीय-रूपस्य साक्षात्कृतिः विरला एव साधकसत्तमाः परमपवित्रेण मनोमयेन्द्रियेणैव कर्त्तुं शक्नुवन्ति। तुरीयस्वरूपं तु वाङ्मनसागोचरम्, तस्य साक्षात्कृतिस्तु मुक्तजनैरेव कर्त्तुं शक्या। एवं पूर्वोक्तरूपा भगवती त्रिपुरसुन्दरी ललिता त्रिपुरा त्रिपुरेशानी षोडशी श्रीविद्याऽऽत्मविद्यादि शब्दबोधिता परब्रह्मसम्पृक्तादिशक्तिरेव शङ्कराचार्यस्य समु-पास्याऽस्ति। यथा चोक्तम्—

शास्त्रं शरीरमीमांसा ध्येया त्रिपुरसुन्दरी।
आचार्याः शङ्कराचार्याः प्राप्तव्यं परमं पदम् ॥

श्रीचक्रम्—यथा देवता मन्त्ररूपा तथा यन्त्रमपि मन्त्रमयं प्रोक्तं यथा मन्त्रो देवतारूपस्तथा यन्त्रमपि देवतारूपमुच्यते[3]। यथा सर्वव्यापको निर्गुणो निष्क्रियश्चात्मा शरीरावच्छिन्नः सगुणरूपतां धारयन् स्वकर्मविपाकानुसारं भोगापवर्गौ प्राप्नोति,

---

१. अनयैव पुरा ब्रह्मा सृष्टिकर्तृत्वमाप्तताम्।
हरिः पालनकर्तृत्वं रुद्रः संहारकर्तृताम् ॥ (दक्षिणामूर्त्तिसंहिता)

२. सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे।
शिवाकारे मञ्चे परमशिवपर्यङ्कनिलयां
भजन्ति त्वां धीराः कतिचन चिदानन्दलहरीम् ॥ (सौन्दर्यलहरी—८)
साक्षी प्रकाशरूपेण शिवेनाभिन्नविग्रहा।
तत्रासने समाचीना निर्भरानन्दरूपिणी ॥ (सौन्दर्यलहरी, ९२)

३. यन्त्रं मन्त्रमयं प्रोक्तं देवता मन्त्ररूपिणी।
मन्त्रवत् पूजिता देवी सहसैव प्रसीदति ॥
यथा मन्त्रो देवतारूपस्तथा यन्त्रमपि देवतामेवात एवेष्टसाधनक्षमं भवति।
(शारदातिलकम्—२४।१)

तथैव साधकोऽपि उपासनार्थं देवानावाह्य यन्त्रे संस्थाप्य शास्त्ररीत्या सविधि सम्पूज्य देवप्रसाद्भोगापवर्गौ सम्प्राप्य कृतार्थतां याति। अत एव यन्त्रं देवतारूपं मन्यते। देवतारूपयन्त्रेण विना कृता पूजा निष्फला भवति। सर्वेषु यन्त्रदलेषु श्रेष्ठं यन्त्रराजमिदं श्रीयन्त्रं श्रीचक्रं वा। त्रिपुरसुन्दर्या उपासनास्थलं श्रीचक्रराजनिकेतनम्। श्रीशङ्कराचार्याः सौन्दर्यलहर्यां श्रीयन्त्रस्वरूपं प्रतिपादयन्नाह—

(क) चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पञ्चभिरपि
प्रभिन्नाभिः शम्भोर्नवभिरपि मूलप्रकृतिभिः।
चतुश्चत्वारिंशद्वसुदलकलाश्रत्रिवलय—
त्रिरेखाभिः सार्द्धं तव शरणकोणाः परिणताः॥
(सौन्दर्यलहरी—११)

(ख) चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पञ्चभिः।
नवचक्रैश्च संसिद्धं श्रीचक्रं शिवयोर्वपुः॥
(भैरवयामलम्)

बहिर्यागोऽन्तर्यागश्च—श्रीयन्त्रे शक्तिमावाह्य तद्यन्त्रं साक्षाद्भगवतोस्वरूपं मन्वानः शास्त्ररीत्या तत्पूजनं बहिर्यागो मानसी पूजा चान्तर्याग इति[1]। तत्रान्तरपूजाऽन्तर्यागो वा समयाचारो बाह्यपूजा बहिर्यागो वा कुलाचारश्चोच्यते[2]। तत्र बहिर्यागस्य दक्षिण-वाममार्गाविति द्वावुपासनाप्रकारौ निर्दिष्टौ। तत्र दक्षिणमार्गे नैवेद्यादयः सात्त्विकपदार्था भवन्ति, वाममार्गे तु मद्यं मासं मीनं मुद्रा मैथुनञ्चेति पञ्चमकारस्योपयोगो भवति[3]। शङ्कराचार्यस्तु दक्षिणमार्गानुयायी साधक आसीत्, यतो हि तस्य स्तोत्रसाहित्ये मकार-पञ्चकस्य चर्चाऽपि न विद्यते। अन्तर्यागे साधको यदा भौतिकजगदपेक्षयोच्चकक्षां प्रविश्याध्यात्मिकक्षेत्रे विचरति, तदा भौतिकस्थूलपदार्थैर्विना हि भावनामयं श्रीचक्रं पूजयन् तद्भावनाभाविवस्तदभिन्नो भवति। परमानन्दमयी स्वात्मानुभूतिरूपाऽलौकि-कानुभवैकगम्याऽवस्थैवान्तर्यागः। यागेऽस्मिन् प्रकाशाकाशहस्ताभ्यामुन्मनीस्रुचा धर्मा-धर्मारूपकर्मसमर्पणं कृत्वा जीवन्मुक्ततां याति।

---

१. अन्तर्यागो नामाधाराद्राजदन्तान्तं तैजस्तन्तोर्विभावनं मानसी देवपूजा वा।
बहिर्यागः पात्रासादनादिशान्तिस्वान्तः कर्मसमूहः। (सौभाग्यभास्करः—५)

२. समयाचारो नामान्तरपूजारतिः कुलाचारो नाम बाह्यपूजारतिरिति रहस्यम्।
(लक्ष्मीधरभाष्यम्—८)

३. मद्यं मासं च मीनं च मुद्रा मैथुनमेव च।
मकारपञ्चकं प्राहुर्योगिनां मुक्तिदायकम्॥

सर्वव्यापिकायाश्चिच्छक्तेः स्वमहिम्नि प्रतिष्ठाभावनाऽऽसनम्, आकाशादिप्रपञ्च-रूपायाश्चित्छक्तेश्चरणेषु संलग्ननामरूपात्मककमलस्य सच्चिदानन्दस्वरूपैकभावनात्मक-निर्मलजलेन प्रक्षालनं पाद्यम्, सूक्ष्मप्रपञ्चात्मककराश्रितनामरूपात्मकमलस्य सच्चिदा-नन्दरूपैकभावनारूपस्वच्छाम्भसा प्रक्षालनमर्घ्यप्रदानम्, भावनारूपाणां कवलीकरणमा-चमनीयम्, सच्चिदानन्दादिभावनासलिलैरखिलावयवसंस्पर्श एव स्नानम्, उक्तावयव-संसक्तभावनारूपवृत्तिविषयताया वृत्त्यविषयतारूपभावनावस्त्रेण प्रोञ्छनं देहप्रोञ्छनम्, अजरामरत्वनिर्विषयत्वाद्यनेकधर्मात्मकाभूषणैर्धर्मिणामभेदभावनैवाभूषणसमर्पणम्, स्व-शरीरनिष्ठपार्थिवांशसंसक्तजडतामपनयन् चिन्मात्रभावनैव गन्धलेपनम्, स्वदेहनिष्ठा-काशीयवायवीयतैजसांशानां चिन्मात्रभावनैव पुष्पधूपदीपादिसमर्पणम्, अमृतांशस्य चिन्मात्रभावना नैवेद्यार्पणम्, षोडशान्तेन्दुमण्डलस्य चिन्मात्रभावना ताम्बूलार्पणम्, परापश्यन्तीवैखर्यादिशब्दानां नादद्वारा ब्रह्मण्युपसंहारः स्तुतिक्रिया, विषयोन्मुख-चित्तवृत्तीनां विषयनिरसनपूर्वकब्रह्मण्युपसंहार एव प्रदक्षिणक्रिया, चित्तवृत्तीनां विषयान् परावर्त्य ब्रह्मैक्यप्रवणं प्रणतिनिवेदनमित्ययमन्तर्यागः। अस्मिन्नेव यागे शङ्करा-चार्यो रत आसीत्। तेन हि सौन्दर्यलहर्यां स्वसमाराध्यकादिविद्यानिरूपणावसरे रहस्यमिदं संकेतेन व्यक्तम्। एवंविधाः योगिनः समस्तमपि विश्वं ब्रह्मरूपं समस्तमपि लौकिककार्यकलापं भगवदाराधनं मन्वते। तेषां सकलमपि जागतिकं व्यवहारमेवा-त्मार्पणबुद्ध्या भगवत्याः सपर्या। अत एव मूलाधारचक्रे क्षितितत्त्वं मणिपुरे जलतत्त्वं स्वाधिष्ठानेऽग्नितत्त्वमनाहतचक्रे वायुतत्त्वं कण्ठे गगनतत्त्वं भ्रूमध्यस्थिते विशुद्धचक्रे मनस्तत्त्वं विजित्य सहस्रारचक्रे ज्योतिरूपायाः कुण्डलिन्याः परमशिवेन सह विहरणं कुण्डलिनीबोधनक्रिया चान्तर्यागार्थमेव निरूपिता।

शांकरमते स्तोत्रनिर्दिष्टेयमेवोपासनापद्धतिः यामनुसृत्य साधकोऽन्ते साधनायाम् परमलक्ष्यं मुक्तिपदमाप्य जन्ममरणचक्राद्विमुक्तः सच्चिदानन्दमयब्रह्माभिन्न = परम-शान्त्याधिगमेन कृतार्थतां याति। एवं शङ्कराचार्येण सनातनधर्मोपासनासरण्याश्रय-भूतदेवादीनां महत्त्वं स्वीये स्तोत्रसाहित्ये प्रादर्श्य साधनाक्षेत्र एव नहि, अपितु साहित्य-क्षेत्रेऽपि नूतनादिक् प्रदर्शिता।

उपासनाफलम्—तदेवमुपासकाः स्वस्वाभीष्टसिद्ध्यर्थं स्वस्वस्वभावानुसारं साधनमवलम्ब्य तत्तत्प्रतीकोपासनायां तत्तत्स्वाभीष्टदेवोपासनायाञ्चाग्रेसरा भवन्ति। तत्तदुपास्यदेवोऽप्युपासकान् स्वाभिमुखीकृत्य तेषामीप्सितं फलं प्रपूरयति। एवं च तदेक एव परमात्मा तत्तत्प्रतीकरूपेण तत्तद्गुणविशिष्टः समुपास्यो भवति। एवं तत्तत्प्रतीक-रूपस्य तत्तद्गुणविशेषविशिष्टस्य ब्रह्मणः यथागुणोपासनं फलभेदाय कल्पते। यो हि

यथायथं समुपासते, स यद्यदिच्छति तत्तदेव प्राप्नोति। यथा चोक्तं शाङ्करभाष्य-भूमिकायाम्—

"एक एव तु परमात्मेश्वरः तैस्तैर्गुणविशेषैर्विशिष्ट उपास्यो यद्यपि भवति, तथापि यथागुणोपासनमेव फलानि भिद्यन्ते। तं यथा यथा उपासते, तदेव भवति" (शा० भू० १।१।१२)।

अन्यत्राप्युक्तम्—

"यत्र तु गुणविशेषसम्बन्धं प्रतीकविशेषसम्बन्धं वा ब्रह्मोपदिश्यते तत्र संसारगोचराण्येवोच्चावचानि फलानि दृश्यन्ते" (शाङ्करभाष्यम्—१।१।२४)।

एवं च गुणविशेषसम्बन्धेन प्रतीकविशेषसम्बन्धेन वा ब्रह्मण उपासनेनोच्चावचानि विविधफलानि दृश्यन्ते। यथा हिरण्यगर्भोपासनेनाणिमादिसिद्धिः ओङ्कारोपासनेन ब्रह्मलोकप्राप्तिः, विज्ञानप्रतीकब्रह्मोपासनेन ज्ञानैश्वर्यप्राप्तिः, ज्ञानकर्मसमुच्चायानुष्ठानेन वैराजपदप्राप्तिश्चेति। एवं च कानिचिदुपासनानि कर्मसमृद्धिफलानि, कानिचिदभ्युदयसाधनानि, कानिचिदुपासनानि कैवल्यसंसृष्टिफलानि क्रमयुक्त्यर्थानि च। तान्येतान्युपासनानि मनोवृत्तिरूपाणि वस्तुतत्त्वावभासकत्वादद्वैतज्ञानोपकारकाणि, आलम्बनविषयत्वात् सुखसाध्यानि च। तदेतत्सर्वमप्युपासनमिष्टफलसाधनपरमद्वयब्रह्मसिद्धिप्राप्तिकरं च। शङ्कराचार्येण तु स्वेष्टदेवतात्रिपुरसुन्दर्याः समुपासनेन तद्गुणानुवादकीर्त्तनेन च स्वजीवनयात्रायामलौकिकीं सफलतामधिगता। एवं च भारतसमुद्धारार्थमनेकानि लोककल्याणकराणि कार्याणि कृत्वा काश्मीरक्षेत्रे सर्वज्ञपीठमधिरुह्य शिवावतारेण लोकशङ्करेण शङ्करेण द्वात्रिंशवत्सरे कैलासवासता समधिगता। एतत्पवित्रचरित्रसंग्रहात्मकमिदं पद्यं प्रसिद्धमेव—

चतुर्वेद्यष्टमे वर्षे द्वादशे सर्वशास्त्रवित्।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्॥

जगद्गुरुश्रीशंकराचार्याभिमतं गीतारहस्यम्

डॉ० श्रीधरभास्करवर्णेकरः,
नागपुरम्

❀ ❀ ❀

जगद्गुरुश्रीशङ्कराचार्यचरणैः श्रीमद्भगवद्गीतोपनिषद्भाष्यस्य प्रथमाध्यायारम्भे तथा द्वितीयाध्यायस्य "अशोच्यानन्वशोचस्त्वम्' इत्यस्मान् श्लोकात् प्राक् स्वाभिमतं गीतारहस्यं युक्तियुक्तैर्वचोभिः प्रतिपादितम्। "तस्माद् गीतासु केवलाद् एव तत्त्वज्ञानात् मोक्षप्राप्तिः, न कर्मसमुचितादिति निश्चितोऽर्थः। (अ० २) 'तस्मात् केवलादेव ज्ञानान्मोक्ष इत्येषोऽर्थो निश्चितो गीतासु सर्वोपनिषत्सु च।' (अ ३) इत्येतद् गीतारहस्यं सुनिश्चितं प्रतिपाद्य तदेव सर्वत्र गीतासु प्रकरणशो विभज्य तत्र तत्र दर्शितम्।

तदिदं जगद्गुरुसम्मतं गीतारहस्यमस्माभिः ४४ कारिकासु संक्षेपत उपनिबद्धम्। जगद्गुरुसम्मतं गीतारहस्यं सम्यक् स्मृतिगतं कर्तुमिमाः कारिका अतीवोपकारिण्यो भवेयुरित्याशास्महे।

वेदोक्तो द्विविधो धर्मो गीतासु प्रतिपादितः।
प्रवृत्तिलक्षणो ह्येकश्चान्यो निर्वृत्तिलक्षणः ॥१॥
धर्मस्य द्विविधो हेतुर्जगतः संस्थितिस्तथा।
प्राणिनोऽभ्युदयश्चान्यो निःश्रेयससमन्वितः ॥२॥
क्षीणे विवेकविज्ञाने विदुषां कामवर्धने।
ग्लानिमापद्यते धर्मो ह्यधर्मः कामवर्धने ॥३॥
ब्राह्मण्याधीनमेवेह वर्णाश्रमविभाजनम्।
ब्राह्मण्ये रक्षिते धर्मो वैदिकः स्यात् सुरक्षितः ॥४॥
ब्राह्मणत्वं विजानीयाद् भौमं ब्रह्म सनातनम्।
तद्रक्षणार्थं कृष्णत्वं प्राप नारायणः स्वयम् ॥५॥
शोकमोहाब्धिनिर्मग्नं पार्थं प्रत्याह केशवः।
द्विविधं वैदिकं धर्मं सर्वंलोकादिधीर्षया।
प्रचीयते हि धर्मोऽसौ पाल्यते यो गुणाधिकैः ॥६॥

सङ्ग्रहः सर्ववेदार्थसाराणामीश्वरोदितः ।
व्यासः सप्तशतश्लोकैस्तमेवोपनिबद्धवान् ॥७॥
निःश्रेयसं परं ज्ञेयं गीताशास्त्रप्रयोजनम् ।
सहेतुकस्य संसारस्यात्यन्तोपरमो हि तत् ॥८॥
निःश्रेयसं तदाध्यात्मज्ञाननिष्ठास्वरूपिणः ।
प्राप्यते धर्मतः सर्वकर्मसंन्यासपूर्वकात् ॥९॥
भगवाननुगीतासु गीताधर्मप्रयोजनम् ।
समस्तकर्म संन्यासपरमित्यब्रवीत् स्वयम् ॥१०॥
वर्णानामाश्रमाणां योऽभ्युदयैकप्रयोजनः ।
प्रवृत्तिलक्षणो धर्मः स स्वर्गप्राप्तिसाधनम् ॥११॥
फलाभिसन्धिरहितो ब्रह्मार्पणधिया तथा ।
प्रवृत्तिलक्षणो धर्मोऽनुष्ठेयः सत्त्वशुद्धये ॥१२॥
सत्त्वशुद्धतया ज्ञाननिष्ठापात्रत्वमाप्तवान् ।
विन्दते परमं ज्ञानं निःश्रेयसफलप्रदम् ॥१३॥
प्रवृत्तिलक्षणो धर्मो गीतासु प्रतिपादितः ।
ज्ञानोत्पत्तिनिदानत्वान्निःश्रेयसपरो हि सः ॥१४॥
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये ।
हेतुः प्रवृत्तिधर्मस्य गीतावाक्येऽत्र दृश्यते ॥१५॥
तं शाश्वतं वैदिकमेव धर्मं
द्विधा हि निःश्रेयसमात्रहेतुम् ।
तथा परं ब्रह्म च केशवाख्यं
गीतामहाशास्त्रमभिव्यनक्ति ॥१६॥
यो हि सम्यग् विजानीते गीताशास्त्रार्थमान्तरम् ।
समस्तपुरुषार्थानां स सिद्धिमधिगच्छति ॥१७॥

(गीता-द्वितीयाध्यायप्रास्ताविकम्)

शोकमोहादयो दोषाः संसारोत्पत्तिहेतवः ।
विषादयोगो बोद्धव्यस्तदुत्पत्तिप्रबुद्धये ॥१८॥
विवेकः शोकमोहाभ्यां विज्ञानं चाभिभूयते ।
ततः स्वधर्मं संत्यज्य प्रतिषिद्धे प्रवर्तते ॥१९॥

यथा स्वयं प्रवृत्तोऽपि क्षात्रधर्मे निजेऽर्जुनः ।
उपरम्य ततो मेने परधर्मं हितावहम् ॥२०॥
स्वधर्मेऽपि प्रवृत्तानां प्रवृत्तिः प्रायशो नृणाम् ।
फलाभिसन्धिसहिता साहंकारा च दृश्यते ।
फलाभिलाषाऽहंकारौ धर्मदोषकरावुभौ ॥२१॥
सकामकर्मतो बुद्धिर्जायते पापपुण्ययोः ।
तत एव हि संसारे जीवोऽयं परिवर्तते ॥२२॥
इष्टजन्मसुखानिष्टजन्मदुःखाप्तिलक्षणः ।
संसारः परिहर्तव्यः शोकमोहसमुद्भवः ॥२३॥
समस्तकर्मसंन्यासपूर्वकादतिनिर्मलात् ।
आत्मज्ञानादृते नैव निवृत्तिः शोकमोहयोः ॥२४॥
निमित्तीकृत्य तत् पार्थं शोकमोहसमाकुलम् ।
भगवानदिशद् गीतां सर्वानुग्रहहेतवे ॥२४॥

(पूर्वपक्षः)

कुरु कर्मेति ब्रुवतोऽभिप्रायः श्रीहरेः स्फुटो नूनम् ।
ज्ञानाद्धि कर्मसहितात् कैवल्यप्राप्तिरिति वदन्त्येके ॥२५॥
धर्म्यं युद्धमकृत्वा पापं स्यादिति निवेदयन् कृष्णः ।
श्रौतं स्मार्तं हिंसाक्रूरं कर्मापि मुक्तये प्राह ॥२०॥

(उत्तरपक्षः)

कैवल्यप्राप्तये ज्ञान-कर्मयोगसमुच्चयम् ।
ये दर्शयन्ति गीतासु तेषां हि तदसन्मतम् ॥२८॥
सांख्य-योगाभिधं बुद्धिद्वयं लोकेषु वर्तते ।
ज्ञान-कर्माभिधा द्वेधा निष्ठा गीतोदिता ततः ॥२९॥
षड्विक्रियाविहीनत्वादकर्तात्मैति या मतिः ।
सा साङ्ख्यबुद्धिः सांख्याख्यज्ञानिनामुचिता मम ॥३०॥
प्रायेण सांख्यबुद्धेः प्राग् योगबुद्धिः प्रजायते ।
ययात्मा देहसम्भिन्नः कर्ता भोक्तेति भासते ॥३१॥
धर्माधर्मविवेकेन मोक्षसाधनकर्मणाम् ।
निरन्तरमनुष्ठानं तद् योग इति कथ्यते ॥३८॥

योगबुद्धिं समाश्रित्य येऽन्तःकरणशुद्धये ।
योगाख्यं कर्म कुर्वन्ति ते योगिन इति स्मृताः ॥३३॥
ज्ञान-कर्माभिधं निष्ठाद्वयं प्राहेश्वरः पृथक् ।
पश्यन्नेकत्र पुरुषे बुद्धिद्वयमसम्भवम् ॥३४॥
बृहदारण्यकेऽप्येतद् निष्ठाद्वयमुदीरितम् ।
यत्राकामस्य संन्यासः प्रोक्तं कर्म च काम्यतः ॥३५॥
यदि स्यात् सम्मतः श्रौतकर्मज्ञानसमुच्चयः ।
गीतासु नोपपद्येत विभागवचनं तदा ।
ज्यायसी चेदिति प्रश्नः पार्थस्यापि न युज्यते ॥३६॥
असम्भवमनुष्ठानमेकेन ज्ञानकर्मणोः ।
न चेदिदं हरेरुक्तं शृणुयादर्जुनः कथम् ॥३७॥
अश्रुतं च कथं बुद्धेर्ज्यायस्त्वं कर्मणोऽर्जुनः ।
ज्यायसीत्यादिभिर्वाक्यैर्मृषाऽध्यारोपयेत् प्रभौ ॥३८॥
उक्तः स्याद् यदि सर्वेषां ज्ञानकर्मसमुच्चयः ।
पार्थस्यापि कृते तर्हि स एव हि निवेदितः ॥३९॥
उभयोरुपदेशेऽपि प्रश्नोत्तरसमाश्रितः ।
'यच्छ्रेय एतयोरेक'मिति नैवोपपद्यते ॥४०॥
शीतं च मधुरं चान्नं भोक्तव्यं पित्तशान्तये ।
इत्युक्तेऽन्यतरश्रेयोजिज्ञासा नोपपद्यते ॥४१॥
पार्थप्रश्नोऽथ कल्प्येत कृष्णोक्तानवधारणात् ।
तदुत्तरे कथं नोक्तो बुद्धि-कर्म-समुच्चयः ॥४२॥
लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्तेति चोत्तरम् ।
पृष्टादननुरूपं तन्नेश्वरस्योपपद्यते ॥४३॥
समुच्चयस्तथा बुद्धेः श्रौतवत् स्मार्तकर्मणा ।
नाभिप्रेतोऽन्यथा सर्वं विभागवचनं वृथा ॥४४॥
युद्धं कर्म क्षत्रियस्य स्मार्तमित्यपि जानतः ।
उपालम्भो वृथा 'घोरे कर्मणी'त्यर्जुनस्य च ॥४५॥
तस्माद् गीतासु नैवेषन्मात्रेणापि प्रदर्श्यताम् ।
कर्मणा द्विविधेनात्मज्ञानस्य हि समुच्चयः ॥४६॥

कर्मण्यभिप्रवृत्तस्याज्ञानरागादिदोषतः ।
सत्त्वशुद्धतया ज्ञानं सर्वं ब्रह्मेति जायते ।।४७।।
निवृत्तं ज्ञांनतो यस्य कर्म वा तत्प्रयोजनम् ।
स हि कर्म प्रवृत्तश्चेल्लोकसंग्रहहेतवे ।
तस्मिन्नपि न सम्भाव्यो ज्ञानकर्मसमुच्चयः ।।४८।।
यथा भगवति क्षात्रकर्मज्ञानसमुच्चयः ।
न सम्भवति निष्कामे तथा तादृशि पण्डिते ।।४९।।
न करोमीति तत्त्वज्ञो मन्यते भगवत्समः ।
फलं च नाभिसन्धत्ते क्रियमाणस्य कर्मणः ।।५०।।
काम्ये यज्ञे प्रवृत्तस्य कामे सामिकृते हृते ।
क्रियमाणः पुनर्यज्ञो निष्कामः खलु जायते ।
प्रमाणं भगवद्वाक्यं—"कुर्वन्नपि न लिप्यते" ।।५१।।
"कर्मणैव हि संसिद्धिमास्थिता जनकादयः" ।
वाक्यमेवंविधं ज्ञेयं प्रविभज्यैव तत्त्वतः ।।५२।।
अथ चेज्जनकाद्यास्ते नैव तत्त्वविदो मताः ।
कर्मणा चित्तशुद्धिं ते प्राप्ता इत्यवगम्यताम् ।।५३।।
'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये' ।
इत्यस्मिन् भगवद्वाक्ये ज्ञेयं कर्मप्रयोजनम् ।।५४।।
न हि निःश्रेयसप्राप्तिर्ज्ञानि-कर्मसमुच्चयात् ।
अभिप्रायेण गीतायास्तत्त्वज्ञानात्तु केवलात् ।।५५।।

●

श्रीशङ्करभगवत्पादकृतस्य स्याद्वादनिरसनस्य मीमांसा

डॉ० गणेशीलालसुथारः (सूत्रधारः)

सहाचार्यः

संस्कृतविभागे,

जोधपुरविश्वविद्यालयस्य

❀ ❀ ❀

वेदान्तार्थसम्प्रदायविद्भिः परमकारुणिकैर्दुःखपङ्कमग्नजगदुद्दिधीर्षुभिः श्रीशङ्करभगवत्पूज्यपादैः शारीरकमीमांसाभाष्ये न केवलं वेदान्तवाक्यानां तात्पर्यं निरूप्य ब्रह्मसूत्रग्रथितमौपनिषद्दर्शनं प्राकाश्यमनायि, अपितु सम्यग्दर्शनप्रतिपक्षभूतानां साङ्ख्यन्यायवैशेषिकसौगतविवसनानां समया अपि निरस्ताः। न ह्रीदं वेदान्तशास्त्रमुच्छृंखलतर्कशास्त्रवत् पुरुषोत्प्रेक्षामात्रनिबन्धनाभिः श्रुतिनिरपेक्षाभिर्युक्तिभिः स्वपक्षस्थापनाय परपक्षप्रत्यवस्थानाय वा प्रववृत इति तेषामुद्घोषः[1]। न हि वेदान्तवाक्यानि निर्णेतव्यानीति धिया निर्णीतानि, किन्तु मोक्षमाणानां तत्त्वज्ञानोत्पादनायेति वाचस्पतिमिश्रस्फोरितं तात्पर्यम्[2]। सम्यग्दर्शनार्थोऽस्ति वेदान्तनिर्णयः। परपक्षप्रत्यवस्थानात् स्वपक्षस्थापनं श्रेय इति कृत्वा वेदान्तार्थनिर्णयेन स्वपक्षस्थापनं सूत्रकारैर्बादरायणाचार्यैः प्रथममकारि। मुमुक्षूणां मोक्षसाधनत्वेन सम्यग्दर्शननिरूपणाय प्रवृत्तेऽस्मिन् शास्त्रे केवलं स्वपक्षस्थापनमेव कर्तुं सङ्गतम्, परद्वेषजनकं परपक्षप्रत्यवस्थापनं न कर्त्तव्यमितीमां शङ्कां निरसन्तः श्रीशङ्करभगवत्पादा अवोचन्नेवम्—"बाढमेवम्, तथापि महाजनपरिगृहीतानि महान्ति सांख्यादिशास्त्राणि सम्यग्दर्शनापदेशेन प्रवृत्तान्युपलभ्य भवेत्केषाञ्चिन्मन्दमतीनामेतान्यपि सम्यग्दर्शनायोपादेयानीत्यपेक्षा। तथा युक्तिगाढत्वसंभवेन सर्वज्ञभाषितत्वाच्च श्रद्धा च तेषु। इत्यतस्तदसारतोपपादनाय प्रयत्यते[3]।" भामतीभाष्यरत्नप्रभाकाराभ्यां वाचस्पतिमिश्रगोविन्दानन्दभगवत्पादाभ्यां भाष्यकृत्कृतपरपक्षप्रत्यवस्थानं प्रबलयुक्तिभिरुपापादि[4]। तयोर्मतानुसारेण तत्त्व-

---

१. ब्रह्मसूत्रशाङ्करभाष्यम–२,२,१।

२. भामती–२,२,१।

३. ब्रह्मसूत्रशाङ्करभाष्यम्–२,२,१।

४. भामतीभाष्यरत्नप्रभे–२,२,१।

निर्णयप्रधाना खल्वियं कथाऽऽरब्धा, तत्त्वनिर्णयश्च परमतेष्वश्रद्धां परपक्षदूषणं वान्तरेण न सिद्ध्यति । सा चाश्रद्धा तेषु भ्रान्तिनिबन्धनत्वनिश्चयं विना न सेद्धुमर्हति, अतस्तत्त्वनिर्णयाय वीतरागेणाऽपि परपक्षो दूष्यते, न तु परपक्षतयेति न वीतरागकथाव्याघात इति । यत्र विजिगीषयापरपक्षोऽधिक्षिप्यते, तत्र स सरागतामापादयतीति । सम्यगेवाभाषिष्ट भाष्यरत्नप्रभाकारः—"परपक्षबुद्ध्या हि निरासो द्वेषमावहति, न तु तत्त्वनिर्णयेच्छया कृत इति मन्तव्यम् ।[१]" तदेवं भाष्यकृद्भिः परपक्षं परिहृत्य स्वपक्षः स्थूणानिखननन्यायेय स्थिरीकृतः ।

साङ्ख्ययोगन्यायवैशेषिकसौगतानां समयान् निरस्य श्रीशङ्कराचार्यैरार्हतानां समयमप्यपासितुं प्रयत्नोऽकारि । श्रुत्यननुसारिणां सौगतानां विवसनानां च समयान् निरसितुं श्रीशङ्करभगवत्पादैः श्रुतिवाक्योद्धरणं विनैव तर्कानुभवौ व्यपाश्रितौ । दार्शनिकप्रवरेणाचार्यदातेमहाभागेन तेषां परपक्षप्रत्ययवस्थानपद्धतिविषये यदुक्तं तदिह प्रसङ्गप्राप्तं विचारणार्थमुदाह्रियते—"What he (Śaṁkara) wants is justice for him as well as for his opponent. And so he meets his opponent in the way in which he is required to meet. A believer in the Vedas will find Śaṁkara equally a believer, a non-believer will find him as if he too is a non-believer. Śaṁkara never brings in the Śruti-passages in favour of his position when he is confronted by a Jaina or a Buddhist. He meets them on the plat form of reason alone.[२]" श्रुतिमनवलम्ब्य युक्तिमात्रव्यपाश्रयेण स्वपक्षसाधकानां दार्शनिकानां मतस्य निराकरणं वेदान्तवाक्योपन्यासं विना स्वतन्त्रयुक्तिभिरेव कर्तुं श्रीशङ्करभगवत्पादानमभीष्टमिति तैः स्वयमप्यवदातीकृतम् । तद्यथा—"सांख्यादयः स्वपक्षस्थापनाय वेदान्तवाक्यान्यप्युदाहृत्य स्वपक्षानुगुण्येनैव योजयन्तो व्याचक्षते, तेषां यद्व्याख्यानं तद्व्याख्यानाभासं न सम्यग्व्याख्यानमित्येतावत्पूर्वं कृतम् । इह तु वाक्यनिरपेक्षः स्वतन्त्रस्तद्युक्तिप्रतिषेधः क्रियत इत्येष विशेषः"[३] ।

निबन्धेऽस्मिन् श्रीशङ्करभगवत्पादकृतार्हतस्याद्वादनिरसनं समीक्ष्यते । सर्वप्रथममह्रीकसम्मतान् सप्तपदार्थानुद्दिश्य तेषां स्वीयतन्त्रसङ्केतमात्रकल्पितान् बहुविधान्

१. भाष्यरत्नप्रभा—२,२,१ ।

२. **Vedanta Explained, Vol. II (Second edition), p. 448.**

३. ब्रह्मसूत्रशाङ्करभाष्यम्—२,२,१ ।

प्रभेदांश्च सङ्केतयन्तोऽवोचन् यत्तैः सर्वत्र सप्तभङ्गीनयो नाम न्यायो योज्यते। वाचस्पतिमिश्रभाष्यरत्नप्रभाकाराभ्यामेत आर्हतसम्मताः पदार्थाः प्रभेदैः सहोपन्यस्ताः[१]। स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च नास्ति चावक्तव्यश्चेत्येते सप्तभङ्गा अपि तैः पतिगणिताः[२]। अनेकान्तवादापरपर्यायः स्याद्वादोऽयं सप्तभङ्गीनयमिममपेक्षते। तथा चोक्तम्—

"स्याद्वादः सर्वथैकान्तत्यागात्किंवृत्तचिद्विधेः।
सप्तभङ्गनयापेक्षो हेयोपादेयविशेषकृतम्[३] ॥'

स्याच्छब्दः खल्वयं निपातस्तिङन्तप्रतिरूपकोऽनेकान्तद्योती। तथा चाभ्यधायि—

"वाक्येष्वनेकान्तद्योती गम्यं प्रतिविशेषणम्।
स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपकः[४] ॥

अस्यार्थविषये भाष्यरत्नप्रभाकारोऽप्यभाषिष्ट—"स्यादित्यव्ययं तिङन्तप्रतिरूपकं कथञ्चिदर्थकम्[५]।" वस्तुन्यस्तित्वादिधर्मवाञ्छायां सप्तैते भङ्गाः प्रयुज्यन्ते। आर्हता आक्षिपन्त्येवम्—यद्येकान्ततो वस्तुनोऽस्तित्वमेवाभ्युपेयते, तर्हि तत् सर्वथा सर्वदा सर्वत्र सर्वात्मनास्त्येवेति न तदीप्साजिहासाप्रयुक्तः कश्चित् क्वचित् कदाचित् कथञ्चित् प्रवर्तेत निवर्तेत वा प्राप्तस्याप्रापणीयत्वाद्धेयहानस्य चानुपपत्तेः। तदेवमेकान्तपक्षे व्यवहारस्य विलोपः प्रसज्येत। अनेकान्तवादाभ्युपगमे तु क्वचित् कदाचित् कस्यचित् कथञ्चित् सत्त्वे प्रेक्षावतां प्राप्तिपरिहारावुपपद्येते। तस्मात्सर्वस्यानेकान्तत्वादेकरूपब्रह्मवादस्य बाध इति।

इत्थं समुपस्थिते आर्हतानां सप्तभङ्गीनयापेक्षे स्याद्वादे श्रीशङ्करभगवत्पादास्तं दूषयन्तोऽवोचन्नेवम्—"एवमेवैकत्वनित्यत्वादिष्वपीमं सप्तभङ्गीनयं योजयन्ति। अत्राचक्ष्महे—नायमभ्युपगमो युक्त इति। कुतः? एकस्मिन्नसंभवात्। न ह्येकस्मिन्धर्मिणि युगपत्सदसत्त्वादिविरुद्धधर्मसमावेशः संभवति शीतोष्णवत्[६]।" भाष्यतात्पर्यस्फोरण-

१. भामतीभाष्यरत्नप्रभे-२,२,१।
२. तत्रैव।
३. भामत्याम् (२,२,१.) उद्धृतम्।
४. तदेव।
५. भाष्यरत्नप्रभा-२,२,१।
६. ब्रह्मसूत्रशाङ्करभाष्यम्-२,२,१।

कुशलेन वाचस्पतिमिश्रेण प्रसन्नगम्भीरभाष्यग्रन्थमिमं व्याचक्षाणेन यत्तात्पर्यं न्यरूपि, तद् भाष्यकारमतं स्फुटयति[1]। श्रीशङ्करकृतप्रत्यवस्थानस्यास्याशयमनवधारयन्तो जैनदार्शनिकास्तन्मतमधिक्षिपन्तीति प्रतीयते। भाष्यग्रन्थस्यास्यायमेवाभिप्रायः प्रकाशते यदार्हततन्त्रे परिणामिनित्यत्वेनाभिमतेषु वस्तुतोऽनित्येषु घटादिपदार्थेष्वार्हता अस्तित्वादिभङ्गसप्तकं योजयन्तु नाम, का नो हानिरस्मदभ्युपगतानिर्वचनीयताया एवार्थाक्षिप्तत्वात्। परन्तु परमार्थसति नित्ये एकस्मिन् ब्रह्मण्यपि ते स्वीयतन्त्रसङ्केतमात्रपरिकल्पितं सप्तभङ्गीनयमवतारयन्तीति प्रेक्षावतां चित्तमनुरञ्जयितुं न क्षमन्ते। परमार्थसति धर्मिणि परमार्थसतां युगपत्सत्त्वादीनां विरुद्धधर्माणां परस्परपरिहारस्वरूपाणां समावेशो न सम्भवति। अद्वैतमतानुसारेण ब्रह्मात्मा सर्वथा सर्वदा सर्वत्र सर्वात्मनाऽस्त्येव न नास्ति। अतस्तत्र सप्तभङ्गीनयापेक्षः स्याद्वादो न योजनीय इति शाङ्करमताकूतम्। 'शीतोष्णवत्'[2] इत्येवमुदाहरणवाक्येन परमार्थसति तमः प्रकाशवद्विरुद्धस्वभावयोः पारमार्थिकयोः सदसत्त्वयोरेकत्रानवस्थानलक्षणविरोधः प्रादर्शि। न चाद्वैतराद्धान्ते परमार्थसद्ब्रह्मणो व्यतिरिक्तः कोऽप्यन्यः परमार्थः अन्यथाऽद्वैतानुपपत्तेः। अनाद्यविद्याविजृम्भितस्य प्रपञ्चस्य व्यावहारिकी सत्ता, न तु पारमार्थिकी। परमार्थतो न स ब्रह्मणो भिन्नसत्ताकः। अत एव ब्रह्मवादेऽनेकान्तवादो न सङ्गच्छते।

नन्वेवं सति न तत्प्राप्तये यत्नः स्यादिति चेन्न, अप्राप्तिभ्रान्त्याऽपि यत्नसम्भवात्। यथा सर्वथाऽप्राप्तस्य प्राप्तये प्रयत्नो भवति तथैव ग्रीवावनद्धग्रैवेयकमिव प्राप्तमपि भ्रान्त्याऽप्राप्तं मन्यमानः प्रयतते। सर्वदा प्राप्तमपि ब्रह्मातिनिरूढनिविडवासनानुविद्धयाऽविद्ययाऽप्राप्तमिव मन्यते। शाङ्करवेदान्तमते परमार्थतो ब्रह्म नाप्यं न च संस्कार्यम्, न विकार्यं न चोत्पाद्यम्[3]। अवगतिपर्यन्तात्तत्त्वज्ञानाद् ब्रह्मविषयज्ञाननिवृत्तौ प्राप्तमप्यानन्दरूपमप्राप्तमिव प्राप्तं भवति, त्यक्तमपि शोकदुःखाद्यत्यक्तमिव त्यक्तं भवतीति। परमार्थतो हेयोपादेयशून्यब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात्पुरुषार्थः सिद्ध्यतीति शाङ्करमतम्[4]। कथं तत्र सप्तभङ्गीनयापेक्षो हेयोपादेयविशेषकृत् स्याद्वादः प्रवर्तेत ?

स्याद्वादमीमांसां कृतवद्भिर्जैनदर्शनशास्त्रग्रन्थोद्धारकैः पण्डितमहेन्द्रकुमारजैनमहाभागैरार्हतमतस्य श्रीशङ्करभगवत्पादकृतं प्रत्यवस्थानमधिक्षेप्तुकामैर्ब्रह्मस्वरूपनिरू-

---

१. भामती-२,२,१।
२. ब्रह्मसूत्रशाङ्करभाष्यम्-२,२,१।
३. तदेव-१,१,४।
४. तदेव।

पणे सप्तभङ्गीनयं योजयद्भिः परमार्थसतोर्ब्रह्मणो यन्नित्यत्वादिरूपेण सत्त्वमनित्यत्वादिरूपेण चासत्त्वमुपपादयितुं प्रयत्नोऽकारि,[१] न तदद्वैतवेदान्तमते सङ्गच्छते, ब्रह्माद्वैतस्यानिर्वाच्यत्वस्य चानुपपत्तेः। अनित्यपदार्थानां पारमार्थिकं सत्त्वमेव श्रुत्यनुगृहीतवेदान्तराद्धान्ते नाभ्युपेयते, तर्ह्यनित्यत्वादिधर्माणां ब्रह्मण्यसत्त्वप्रतिपादनेन किं प्रयोजनम्? अपि च, ब्रह्मणो यद्याकारान्तरेणासत्त्वमभिप्रेयते, तर्ह्याकारान्तरस्यैवासत्त्वं स्यान्न नु सदैकरूपस्य ब्रह्मणः। तदेवमनिर्वाच्यं निरतिशयं कूटस्थनित्यं ब्रह्म सप्तभङ्गैर्निरूपयितुं न शक्यते। विश्वविश्रुतदार्शनिकैरद्वैतवेदान्तशास्त्रमीमांसादक्षैः प्रोफेसर-के० सच्चिदानन्दमूर्तिमहाभागैर्ब्रह्मस्वरूपनिरूपणविषये श्रीशङ्करभगवत्पादमतं व्याचक्षाणैः—"No words can be applicable to Brahman, which has no species, genus, etc. Śaṅkara says that even the word 'reality' can not signify Brahman directly, but only imply it; for Brahman is devoid of all adjectives, and the word 'reality signifies being in general."[२] इति यदुक्तम्, तत्सर्वथा समीचनताकोटिमाटीकते। "ब्रह्मनिरूपणार्थं प्रयुक्ताः शब्दाः सामान्यशब्दव्यवहारसरणिमनुसृत्यैकार्थकरूपेण न ग्राह्याः, स्वसामर्थ्यातिशायिगूढतत्त्वनिरूपणप्रयत्नपर्यवसायित्वात्। सत्यप्येवं वयं तान् प्रयुञ्ज्महे, यतः 'प्रमाता मूकत्वमवलम्बितुं न शक्नोति'[३]।" इत्ययं तेषां सुविचारितो निष्कर्षः सर्वथोपपद्यते।

न चेयं ब्रह्मणोऽनिर्वाच्यता श्रीशङ्करभगवत्पादानां स्वमतिमात्रपरिकल्पिता, अपि तु श्रुत्यनुगृहीततर्केणोपकृता। तथा च श्रुतयः—"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह[४]।"

---

१. जैनदर्शन (श्री गणेशप्रसाद वर्णी जैन ग्रन्थमाला, काशी), द्वितीय संस्करण, पृ० ५२३.

२. Revelation and Reason in Advaita Vedānta (Motilal Banarasidass, Delhi, 1974), p. 62.

३. The conclusion is that words used for desribing Brahman are not to be understood univocally, according to the usual material mode of talking, for they at best attempt to describe a mystery which exceeds them, and we use them becouse 'one cannot keep silent'.–Ibid., p. 60.

४. तैत्तिरीयोपनिषद्, २,४,१।

"यद् वाचानभ्युदितं येन वागभ्युद्यते।
तदेवं ब्रह्म त्वं विद्धि नेदं यदिदमुपासते[१]॥"
"नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा।
अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते[२]॥"

अतो ब्रह्मस्वरूपनिरूपणविषये उपनिषत्सम्मतः श्रीशङ्करभगवत्पादसमर्थितो नेतिवाद एव साधीयानिति। आचार्यवर्यसच्चिदानन्दमूर्तिमहाभागैः सम्यगेव प्रत्यपादि—"It is, however, Śaṅkara's opinion that the best way of speaking about Brahman is the Netivāda (Via Negativa), for the logic of Netivāda does not involve any super-imposition.[३]" तदेवं ब्रह्मस्वरूपनिरूपणविषये सप्तभङ्गीनयापेक्षः स्याद्वादः प्रत्याख्यातो वेदितव्यः।

किञ्च, शाङ्करमतस्याभिप्रायं यथायथमवधृतवता श्रीवाचस्पतिमिश्रेणावदातीकृतं यत्प्रपञ्चः क्वचित् कथञ्चित् कदाचित् केनचिदात्मनाऽस्तीत्युच्यत एव[४]। तदपि व्यवहारतो न तु परमार्थतः। तदेवं वेदान्तिभिर्जैनानां सम्मतं घटादिजागतिकानित्यपदार्थानां कथञ्चित् क्वचित् कदाचित् केनचिदात्मनाऽस्तित्वमभ्युपेयत एव। सत्यप्येवं तेषां मतयोर्भूयो वैषम्यम्। वैदान्तिकमते जागतिकप्रपञ्चस्य तादृशमस्तित्वं व्यावहारिकमेव, न तु परमार्थदृष्ट्या वास्तवत्वम्। जैनानां मते तु तत्पारमार्थिकम्। येयं वैदान्तिकानां व्यावहारिकी सत्ता, साऽऽर्हतानां पारमार्थिकी सत्ता। तथा चाभ्यधायि नैयायिकप्रवरैः स्याद्वादमीमांसादक्षैः प्रोफेसरसात्कड़िमुखोपाध्यायमहाभागैः—"The empirical reality of the Vedāntist called Vyāvahārikasattā is the absolute truth of the Jaina, and the latter refutes to accompany the Vedāntist in his philosophical excursion into the transcendental plane, which the Jaina thinks to be an airy abstraction hypostatised, as it lacks the sanction of experience, which is the only proof of existence."[५] यदि जागतिकपदार्थानां प्रत्यय-

१. केनोपनिषद् (प्रथमखण्डः, ४)।
२. कठोपनिषद्–२,३,१२।
३. Revelation and Reason in Advaita Vedānta, p. 64।
४. भामती–२,२,१।
५. The Jain Philosophy of Non-absolutism (Motilal Banarasidass, Delhi) Second edition, p. 153.

मात्रं वास्तवत्वं व्यवस्थापयति, तर्हि शुक्तिमरुमरीचिकादिषु रजततोयादेरपि वास्तवत्वं प्रसज्यते ।

यद्यार्हतैरुच्येत यल्लौकिकानां प्रत्ययानामेषां व्यवहारेऽबाधनात् प्रपञ्चस्य परमार्थसत्त्वमभ्युपगन्तव्यम्, तर्हि लौकिकानां देहात्माभिमानस्याप्यबाधेन देहात्मत्वस्य पारमार्थिकत्वं स्वीकरणीयम् । यथा विवेकिनां विद्यया देहात्माभिमानो बाधितो भवति, तथैव प्रपञ्चस्य व्यावहारिकी अनन्तताऽपि बाध्यते । न च सप्तभङ्गीनयेन घटादीनां पदार्थानां तेनैवाकारेणाऽसत्त्वं प्रतिपाद्यते, किन्तु पटाद्याकारान्तरेण (पररूपेण वा) असत्त्वं विवक्षितमिति वाच्यम्, तस्याकारान्तरस्यैव घटादावसत्त्वात्, न तु घटस्यासत्त्वम् । तथा चाभाषिष्ट भाष्यरत्नप्रभाकारः—"न हि दूरस्थग्रामस्य प्राप्तेरसत्त्वे ग्रामोऽप्यसन् भवति, प्राप्यासत्त्वे प्राप्तियत्नानुपपत्तेः । अतो यथाव्यवहारं प्रपञ्चस्यैकरूपत्वमास्थेयम्[1] ।"

यद्यपि व्यवहारतो घटादिपदार्थेष्वनेकेऽस्तित्वाविरुद्धा गुणक्रियादयो धर्माः सन्ति, तथापि न हि तेषां प्रमात्मकज्ञानोत्पादनार्थं सप्तभङ्गान् लौकिकः परीक्षको वा योजयति । 'घटोऽयम्', 'डित्थोऽयम्', 'गौरयम्', 'शुक्लोऽयम्', 'कमण्डलुमानयम्', 'गच्छत्ययम्' इत्यादिज्ञानैरेव लोकव्यवहारोऽर्थक्रिया वा हानोपादाने वा संभवतः । न हि कश्चिदस्तिनास्त्यवक्तव्यादिभङ्गसप्तकमेकस्मिन्नेव विषये उल्लिखन् व्यवहरति । शङ्करमतानुसारेण वस्तुतो द्रव्यगुणादीनां पार्थक्यं नास्ति, तादात्म्यप्रतीतेः । सर्वत्र निरङ्कुशानेकान्तवादेऽभ्युपगते ऐकान्तिकप्रमाज्ञानोत्पत्त्यनुपपत्तौ लोको हानोपादानाय कथं प्रवर्तेत ? न हि सर्वत्रानेकान्तवाद उपयुज्यते । तथा च श्रीशङ्करभगवत्पादाः प्रत्यपीपदन्—"ऐकान्तिकफलत्वनिर्धारणे हि सति तत्साधनानुष्ठानाय सर्वो लोकोऽनाकुलः प्रवर्तेत नान्यथा[2] ।" परमार्थदृष्ट्या तु वेदान्तमतेऽनाद्यविद्याविजृम्भितस्य प्रपञ्चस्य सदसत्त्वविलक्षणत्वरूपमनिर्वचनीयत्वमेवाभिप्रेतम् ।

किञ्च, पदार्थनिरूपणे जैनानां सप्तभङ्गीनययोजनेन पदार्थानां परमार्थतो वेदान्तसम्मतमनिर्वचनीयत्वमेवार्थाक्षिप्तं भवति । स्याद्वादसमर्थकानां पण्डितमहेन्द्रकुमारजैनमहाभागानाम् "अवक्तव्य धर्म तो वस्तु की वास्तविक स्थिति बतलाने वाला है कि वस्तु का अखण्ड-आत्मरूप शब्दों का विषय नहीं हो सकता । कोई ज्ञानी अनिर्वचनीय अखण्ड वस्तु को कहना चाहता है,.... .... । पर इस समय भी वस्तु की अनन्तधर्मात्मकता की सीमा तक नहीं पहुँच पाता । लिहाजा कोशिश करने पर भी अन्त में

---

१. भाष्यरत्नप्रभा—२,२,१ ।
२. ब्रह्मसूत्रशाङ्करभाष्यम्—२,२,१ ।

उसे अवक्तव्य कहता है। शब्द में वस्तुतः इतनी सामर्थ्य नहीं कि वह समग्र वस्तु का पूर्णरूप से प्रतिपादन करे।···· ···· पर वर्णन करने वाला अपनी तथा शब्द की असामर्थ्य पर खीज उठता है और अन्त में बरवस कह उठता है कि—'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'···· ····। वस्तुतः पदार्थ स्वरूप से ही अनिर्वचनीय है···· ····[१]।" इति कथनेनानेन प्रपञ्चस्य वेदान्तसम्मता परमार्थतोऽनिर्वचनीयता वस्तुसद्ब्रह्मस्वरूपस्य च शब्दानिर्देश्यताऽप्रतिपिपादयिषिताऽपि प्रतिपादिता भवति। किञ्च, व्यवहारतो वस्तूनामनेकधर्मात्मकतायां प्रतीयमानायामपि परमार्थतोऽनिर्वचनीयता न व्याहन्यते।

प्रपञ्चस्याद्वैतसम्मतमिदमनिर्वचनीयत्वं विशदमुपन्यस्य प्रोफेसरसात्कड़िमुखोपाध्यायमहाभागैस्तद्विषये जैनदार्शनिकानां मतमेवं प्रत्यपादि—"The Jaina admits the truth of the premises, but does not think that the Vedāntist conclusion is inevitable."[२]; परन्तु नैतन्मतेन वेदान्तिमतं दूषितं भवति। वैदान्तिका अपि 'समो दोषः समः परिहारः' इति न्यायेन प्रतिक्षेप्तुं क्षमन्ते यदार्हताभ्युपगतनिगमनमपि नापरिहार्यम्। लौकिकानुभवयाथार्थ्यमात्रावलम्बेन श्रुत्यननुसारिणां जैनानां द्वैतसत्यत्वकल्पना नोपपद्यते। यत्तु प्रोफेसरमुखोपाध्यायमहाभागैः स्वकीये अनेकान्तवादसमीक्षाग्रन्थे नैकवारं शाङ्करमतनुभवविरुद्धं केवलतर्कव्यपाश्रयोत्याक्षिप्तं जैनमतं चानुभवाश्रितमनुभवानुगृहीततर्कोपकरणं वेति समर्थितम्,[३] तदपि वैदान्तिकानां पुनर्मीमांसामपेक्षते। श्रुतिवाक्यान्युदाहृत्य स्वपक्षानुगुण्येन योजयतां दार्शनिकानां मतं श्रीशङ्करभगवत्पादैः श्रुतिमवलम्ब्य श्रुत्यनुगृहीततर्कैः[४] प्रत्याख्यातम्। श्रुतिनिरपेक्षाभिः केवलाभिर्युक्तिभिर्ब्रह्मवादविरोधिनं स्वपक्षं योजयतां दार्शनिकानां मतं तैरपि श्रुतिवाक्योदाहरणं विनैव बीजप्ररोहसंरक्षणार्थैः कण्टकशाखावरणैरिव पारमार्थिकतत्त्वाध्यवसायसंरक्षणपरैः सत्तर्कैः प्रत्याख्यायि। तैर्ब्रह्मज्ञाने श्रुत्यादीनामिवानुभवादीनामपि प्रमाणत्वं प्रदर्श्यानुभवावसानत्वं निरदेशि। तथा च तेषामुक्तिः—"न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्। किन्तु श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणमनुभवावसानत्वाद्भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य" (ब्रह्मसूत्रशाङ्करभाष्यम् – १.१.२)।

१. अकलङ्कग्रन्थत्रयम्—(सिंघी जैनग्रन्थमाला, ग्रन्थाङ्क १२), प्रस्तावना, पृ० १०१-२।
२. The Jain Philosophy of Non-absolutism, p. 132.
३. Ibid., Pp. 70-72.
४. द्रष्टव्यो मन्निबद्धः 'आद्यशङ्कराचार्यस्य तर्कगवेषणा' इत्याख्यशोधलेखः सागरिकाया ऊनविंशवर्षस्य तुरीयाङ्के प्रकाशितः।

किञ्च, श्रीशङ्करभगवत्पादैर्यथापेक्षं लौकिकानुभवोऽप्युदाहृतः। न तैः प्रत्यक्षादीनां सांव्यवहारिकं प्रामाण्यमपाकृतम्। न ह्येतत्ख्यापनार्थं प्रमाणान्तरमपेक्ष्यते, तेषां स्ववचोभिरेव स्वतः प्रमाणितत्वात्। तद्यथा—"सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति। तथा च लोकेऽनुभवः—शुक्तिका हि रजतवदवभासते, एकश्चन्द्रः स द्वितीयवदिति[१]।" "तस्मात्प्राग्ब्रह्मात्मताप्रतिबोधादुपपन्नः सर्वो लौकिको वैदिकश्च व्यवहारः।"[२] "प्रसिद्धं चेदमन्वयव्यतिरेककुशलानामीदृशेन स्वप्नदर्शनेन साध्वागमः सूच्यत ईदृशेनासाध्वागम इति। तथाकारादिसत्याक्षरप्रतिपत्तिर्दृष्टा रेखानृताक्षरप्रतिपत्तेः।"[३] "एवं परमार्थावस्थायां सर्वव्यवहाराभावं वदन्ति वेदान्ता सर्वैः[४]।" विस्तरभियेहाधिकमनुक्त्वा स्याद्वादमीमांसादक्षाणां प्रोफेसरसात्कड़िमुखोपाध्यायमहाभागानां "जैनदार्शनिकानां वेदान्त्यादिदार्शनिकैः (Idealists) सह विवादस्य विषये न हि वयं निर्णायका भवितुमभिलषामः। तच्छ्रेष्ठत्वनिर्धारणरूपं महत्त्वाकाङ्क्षामयं कार्यं भाविसिद्धाधीनमिति कृत्वा अस्माभिस्त्यज्यते[५]। वेदान्त्यादिदार्शनिका वस्तुवादिजैनदार्शनिकानां तर्कोपपन्नं राद्धान्तं स्वीकरिष्यन्तीत्याशा कर्तुं न पार्यते। परन्तु येषां सम्प्रदायानां दार्शनिकानां जैनैः सहाधिकं सिद्धान्तसाम्यमासीत्, तैरपि सप्तभङ्गीनयस्याभिप्रायं ग्रहीतुं प्रयत्नो नाऽकारीति दयनीयम्"[६] इत्येतन्मतद्वयीं शाङ्करवेदान्तशास्त्रपरिश्रमशालिनां दार्शनिकानां विचारणाय उद्धृत्य विरस्यते।

●

---

१. ब्रह्मसूत्रशाङ्करभाष्यम्–१,१,१। २. तदेव, २,१,१४; ३. तदेव।

४. तदेव।

५. As regards the quarrel with the idealists, we do not want to act as umpire – an ambitious task which we leave to future prophets to adjudge —The Jaina Philosophy of Non-absolutism, p. 16•.

६. It can not be cxpected that the idealist logician will accept the logical theory of the Jaina Realist But the pity is that its implications were not sought to be understood even by those schools of thinkers who had much in common with the Jaina.—Ibid., p 171.

भगवत्पादानां जगद्गुरूणामाद्यशङ्कराचार्याणां दिव्यजन्मकर्मादिविषये किञ्चित्

आचार्यश्रीकुबेरनाथशुक्लः
कुलपतिचरः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

❀ ❀ ❀

आचार्यः शङ्करः केरलानां मालावारप्रान्ते कालटीनाम्नि ग्रामे नम्बूद्रीयब्राह्मणकुलमलञ्चकार। अस्य पितुर्नाम शिवगुरुर्यो हि दिव्यस्य बालकस्य जातकर्मादिसंस्कारं यथाविधि अकारयत्। शङ्कर इति नाम चाभ्यधात्। जातमात्र एवासौ शिवावतार इति शुभैर्लक्षणैः शरीरेऽङ्कितैर्लक्षितः। ख्रिष्ट्रीयाष्टमशताब्द्या अन्तिमे भागेऽसौ जात इति विदुषां मतम्।

बाललीला—

तृतीयेऽब्दे बालकस्य चूडाकर्मयथाशास्त्रं सम्पन्नम्। बालश्च वर्णान् पपाठ लिलेख च। इदमपि कैश्चिदुच्यते यत् कुलदेवी प्रसन्ना सती तं स्तन्यं पय अपाययत्। पञ्चमे वर्षे उपनीतोऽसौ वेदाध्ययने प्रवृत्तः।

दुर्भाग्यवशाद्बालस्य पिता स्वर्गं जगाम। दुःखिता माता तं गुरुकुलेऽध्येतुं प्रेषयामास। तत्र चाष्टवर्षवयस्को बालश्चतुरो वेदानध्यैष्ट।

बालो भिक्षार्थं कस्यचिद्दरिद्रस्य गृहं गतः। अकिञ्चना गृहिणी बलस्याद्भुतमलौकिकं रूपं वीक्ष्य लज्जिता धात्रीफलमेकं वटवे ददौ। शङ्करो दैन्यं विलोक्य तस्याः भगवतीं प्रार्थयामास। देवी च प्रसन्ना कनकामलकैस्तस्या गृहमपूरयत्।

संन्यासग्रहणम्—

अष्टमे वर्षे शङ्करोऽधीतविद्यो गुरुकुलान्निवृत्तो गृहमागमत्। मातुः शुश्रूषणे रतः संन्यासाश्रमं ग्रहीतुं मातरं पप्रच्छ। माता तदर्थं नानुमेने। एकदा स्नानाय नद्यामवतीर्णं शङ्करं नक्रोऽग्रहीत्। तदाऽसौ चुक्रोश मातरम्। अम्ब! नक्रगृहीतोऽहं मरणोन्मुखः। संन्यासाय अनुमन्यसे चेत्तर्हि जीवामि अन्यथा मरणं ध्रुवम्। माता शोकपरायणा मार्गान्तरमदृष्ट्वा संन्यासायानुमेने। ग्राहान्मुक्तो बालस्तीरं प्राप्य मातरमभिवाद्य स्थितः। मातस्त्वयानुज्ञात इत एव प्रव्रजिष्यामि दीक्षायै कृच्छ्राल्लब्धधृतिर्माता तमाह–मद्देहपाते अन्त्येष्टिं स्वयमेव विदध्याः। देहान्ते स्मर मां मातः समेष्येऽहं त्वदन्तिकम्,

इत्युक्त्वा मातरं प्रणम्य प्रतस्थे उत्तरां दिशम्। गुरुमन्वेषमाणोऽसौ रेवातटे स्थितं गोविन्दभगवत्पादानामाश्रमं जगाम। तत्र च विनीतः सर्ववेदान्तसिद्धान्तज्ञं गोविन्दं परमानन्दं गुरुं प्रणतोऽस्मीत्युवाच।

गुरुस्तमपृच्छत्—'कस्त्वम्'? शङ्कर उवाच—अहं न भूमिर्नापो न तेजो न वायुर्नाकाशं नैतेषां समूहः। अहं केवलः शिवोऽस्मि।

गुरुः प्रसन्नो भूत्वा शङ्करं धृत्या शान्त्या ज्ञानेन च योग्यं मत्वा संन्यासविधिना दीक्षितं चक्रे। शङ्करश्च दीक्षितो गुरोः कृष्णद्वैपायनप्रणीतब्रह्मसूत्राणि उपनिषदश्च यथाविधि अध्यैष्ट। तत्त्वमस्यादिभिर्वाक्यैरपेतद्वैतभावनोऽद्वैते ब्रह्मणि निष्ठः सञ्जातः।

भाष्यकरणाय गुरोराज्ञा—

शङ्करश्चतुर्वर्षपर्यन्तं तस्मिन्नाश्रमेऽध्ययनमकरोत्। एकदा वर्षर्तौ नर्मदावेगादाश्रमे सङ्कटग्रस्ते गुरौ च समाधिमाश्रिते शङ्करः कमण्डलुमादाय नर्मदायां प्रविष्टः प्रार्थयामास च नदीं वेगनिरोधाय। ततश्च प्रीतया नर्मदानद्या वेगो निगृहीत आश्रमश्च रक्षितः।

समाधेरुत्थितो गुरुः शङ्करं प्रोवाच। एकदा बदरीक्षेत्रे मुनीनां सन्निधावहं कृष्णद्वैपायनमपृच्छम्। महर्षे! ब्रह्मसूत्राणि काठिन्याद्विवरणमपेक्षन्ते। कृपया भवान् विकृतिं करोतु। ततः कृष्णद्वैपायनेन मुनिनोक्तं यत्तव शिष्यः शङ्करो भविता यो हि अवैदिकानि मतानि निरस्य सूत्राणां विशदं भाष्यं करिष्यति। स च काल इदानीमुपागतः। त्वमधीतसकलशास्त्र इदानीं वाराणसीं गच्छ। तत्र भाष्येण विशदीकृतं ज्ञानं छात्रेभ्यः प्रयच्छ। वाराणसीपतिर्विश्वनाथस्त्वामनुगृह्णातु।

शङ्करस्य भगवतः काशीगमनम्—

गुरुणाज्ञप्तः शङ्करः काशीं जगाम। तत्र विद्वद्भिः सह शास्त्रचर्चां कुर्वन्नसौ सुखेन न्यवसत्। चोलदेश्यः सनन्दननामा कश्चित् वेदज्ञो ब्राह्मणो गुरुं शङ्करमुपागतः। संन्यासार्हं तं विज्ञाय गुरुस्तं दीक्षितं चकार। स प्रथमः शिष्यः सनन्दननामकः। अन्ये च बहवः शिष्या अभवन्। कदाचित् शङ्करः शिष्यैः सह गङ्गातटत आगच्छन् मध्येमार्गमपत्यदारैः सहितमन्त्यजं ददर्श। पानोन्मत्तं तं दृष्ट्वा गच्छेति शङ्करोऽवदत्। स एनमाह—भो ब्राह्मण कं दूरीकर्त्तुमिच्छसि। चेतनाच्चेतनमन्नमयादन्नमयं वा। 'अयं विप्रः' 'अयं श्वपचः' इति भ्रमः कुतस्ते आयातः? क्व गतस्तवाद्वैतवादः। 'सर्वं खल्विदं ब्रह्म' 'ब्रह्मैवाहम्' इति। अयं चाण्डालोऽपि मम गुरुरिति शङ्करो मेने।

ततोऽसौ त्यक्तान्त्यजतनुं शिवमुमया देव्या सहायान्तमपश्यत्। प्रणतोऽसौ शिवमस्तौत्। शिवस्तमुवाच—श्रौतज्ञानं त्वयाधिगतम्। व्यासप्रणीतसूत्राणामुपनिषदां च भाष्यं कुरु। नास्तिकानां मतं च निरस्य वैदिकसिद्धान्तान् प्रतिष्ठापय।

बदर्यां श्रीगौडपादानुग्रहप्राप्तिः—

भगवतः शङ्करस्यानुग्रहमवाप्यासौ बदर्यां गुरुगोविन्दपादानां दर्शनार्थं जगाम। तत्र च श्रीगोविन्दगुरूणां गुरवो गौडपादाचार्या अपि दृष्टाः। शङ्करस्तौ प्रणम्य तत्र स्थितः। श्रीगोविन्दपादेनाभ्यर्थितस्तद्गुरुर्गौडपादाचार्यः तं व्यासप्रणीतब्रह्मसूत्राणामाशयं श्रुतिसम्मतं विस्तरेणोपदिदेश। गौडपादाचार्येण प्रस्थानत्रय्या भाष्यं कर्तुमादिष्टः शङ्करस्तथा प्रीतिकरं भाष्यं निर्ममे। भाष्यं च श्रुत्वा सर्वेऽपि सङ्गता मुनयो विद्वांसश्च शङ्करं जगद्गुरुत्वेन भगवत्पादशङ्कराचार्येत्युपाधिना चालङ्कृतवन्तः।

यद्यपि ब्रह्मसूत्राणां भाष्यमन्यैरपि आचार्यैः रामानुजनिम्बार्कमध्ववल्लभप्रभृतिभिः कृतम्, तथापि यादृशी लोकप्रियता शारीरकभाष्यस्य वर्त्तते, तादृशी अन्येषां भाष्याणां नास्ति। आचार्यशंकरस्य प्रथमं वाक्यमुपन्यस्यते येनैतत् सर्वेषां सुविदितं भविष्यति तत्तस्य शैली कीदृशी समीचीना तर्कसङ्गता प्रवाहयुक्ता मधुरैः शब्दैरलङ्कृता पाठकान् श्रोतॄंश्च मोहयति। अथातो ब्रह्मजिज्ञासेति प्रथमं व्याससूत्रमादाय भाष्यकारो व्याख्याति—युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिः, इत्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य तद्धर्माणां चाध्यासः, तद्विपर्ययेण विषयिणस्तद्धर्माणाञ्च विषयेऽध्यासो मिथ्येति भवितुं युक्तम्; तथापि अन्योऽन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यास्य इतरेतराविवेकेनात्यन्तविविक्तयोर्धर्मधर्मिणोः मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदम्, ममेयम्' इति नैसर्गिकोऽयं लोकव्यवहारः। अस्य वाक्यस्य व्याख्याऽऽचार्यवाचस्पतिमिश्रेण भामत्याम् अमलानन्दसरस्वतीमहोदयेन वेदान्तकल्पतरौ, आचार्याप्पयदीक्षितेन कल्पतरुपरिमले च षोडशपृष्ठेषु कृता। प्रस्थानत्रय्या भाष्यमाचार्यपादैः कृतम्। तत्पठित्वा नहि केवलं भारतीयाः; अपि तु विश्वस्य दार्शनिकाश्चकिता भवन्ति। विश्वस्य दार्शनिकेषु आचार्यपादानां प्रथमं स्थानमिति सर्वेऽपि दार्शनिका आमनन्ति।

दक्षिणामूर्तिदर्शनम्—

बदरीक्षेत्रे हिमवत्पृष्ठे जाह्नवीतटे चरन्तं गौडपादाचार्यं दृष्ट्वाऽऽचार्यः शंकरस्तं प्रणनाम। तस्याशिषापास्तमोहस्तत्रैव ध्यानमग्नश्च गुरुः शङ्करो भगवन्तं दक्षिणामूर्ति-

माद्यं गुरुं ददर्श, तं च परया भक्त्या श्रद्धया च ववन्दे। स्तुवन्तं तं परेशानो मुद्रया दीक्षयामास। तत्रैव बदर्यां गुरवो गोविन्दपादाः शैत्येन भृशं पीडिता आसन्। ततः शङ्करो गुरुरीशानं शिवं तप्तोदकलहरीं ययाचे (कुण्डं)। शिवेन च तप्तोदककुण्डं दत्तम्। साम्प्रतमपि बदर्यां तप्तजलकुण्डं शीतार्दितान् भृशं सुखयति।

बदर्यामालयनिर्माणम्—

कदाचिच्छंकरं भगवानच्युतः स्वप्ने ब्रवीत् यन्मम मूर्त्तिः सरिति भग्नास्ति। तामुद्धरालयं च कृत्वा पूजय। तदानीमेव अग्निशर्मानामको ब्राह्मणः कालटीग्रामतो मातुः सन्देशं धनं चादायागतः। तेनैव धनेनाचार्यो भगवत आलयं कारयामास। तमेवाग्निशर्माणं दीक्षितं कृत्वा पूजनार्थं न्ययुङ्क्त।

मातृनिर्याणम्—

प्रियं शिष्यं पद्मपादमालयं विस्तारयितुमादिश्य गुरुर्मातुर्दर्शनाय कालटीं गतः। तत्र गत्वा मातरं सादरं ननाम, तस्याश्च दुःखं जहार। मनोहरैः स्तोत्रैः ब्रह्म ध्यात्वा सा परं पदं गता। आचार्यश्च स्वयमेव तस्या अन्त्येष्टिमकरोत्, यथासौ मात्रादिष्ट आसीत्।

कुमारिलभट्टसमागमः—

मातुरन्त्येष्टिं कृत्वा तीर्थाटनप्रसङ्गे आचार्यः प्रयागं गतः। तत्र कुमारिलभट्टेन सह साक्षात्कारो जातः। कुमारिलेन प्रार्थितो गुरुस्तं दीक्षयामास, तदिच्छया च मगधं गतः। तत्र विश्वरूपेण विदुषा सहाचार्यस्य गुरोः शास्त्रार्थः सप्तदिवसं यावत् प्रचलितः। अन्ते च पराजितोऽसौ गुरोः शरणमाजगाम। गुरुस्तं संन्यासे यथाविधि अदीक्षयत् सुरेश्वर इति नाम च चकार। अयमेव सुरेश्वराचार्यः पश्चाद् गुरोराज्ञया काण्वतैत्तिरीयशाखोपनिषद्भाष्याणां वार्त्तिकं चकार।

कैलाशगमनं लिङ्गप्राप्तिश्च—

दत्तयोगिना सह शङ्करो गुरुः कैलासमगमत्। तत्र पार्वतीस्कन्दादिभिः सेवितं परमेश्वरं शिवं विस्मयाविष्टहृदयो ददर्श। श्रद्धया भक्त्या च प्रणनाम। प्रणमन्तं तं शङ्करो भगवान् प्राह—त्वं मदंशभूतोऽद्वैतबोधको नास्तिकानां मतानि निरस्य वैदिकधर्मप्रतिष्ठापकः। एतल्लिङ्गपञ्चकं गृहाण विश्वकल्याणाय यथाविधि स्थापयित्वा च पूजय। ततो दत्तयोगिना सहाचार्यः शङ्करो बदरिकावनं समागतः।

तीर्थयात्रा—

ततश्च दि प्रदक्षिणायां केदारेशं महाकालं सोमेशं प्रणवेश्वरं त्र्यम्बकं घुसृणेशानं नागनाथं भिषक्पतिं भीमेशं प्रणम्य श्रीशैलमागमत्। ततो गोकर्णं जगाम गोकर्णेशं निषेवितुम्। तत्र ब्राह्मणदम्पती मृतं पुत्रमङ्के निधायाचार्यमुपजग्मतुः। दयया द्रुत आचार्यस्तमजीवयत्।

अस्मिन्नेव प्रसङ्गे आचार्यस्तुङ्गभद्रानदीतटे विभण्डाश्रममासाद्य तत्र वासमरोचत। शारदां देवीं शृङ्गपर्वते प्रतिष्ठाप्य विद्यापीठं संस्थापयामास। तत्र शिष्यगणानध्यापयन् चिरमवसत्। पश्चात् सुरेश्वरं देव्याः पूजने शिष्याणामध्यापने च नियुज्य काञ्चीमभितो ययौ। ततश्च काञ्चीतः कन्याकुमारीं प्रस्थितः। ततो मधुरां सेतुं रामेश्वरं च ययौ। श्रीरङ्गमन्दिरे आकर्षकं यन्त्रं बिम्बाधो निधाय जम्बूवनमुपागमत्। तत्र च श्रीचक्रयुक्त-ताटङ्कौ नवरत्नविचित्रितौ कारयित्वा विधानेन देव्याः कर्णौ व्यभूषयत्। शिष्यैर्वृतः मध्यार्जुने चावसथं गतः। तत्रस्था द्वैतवादिनोऽद्वैतवादं नाभ्यपद्यन्त। ईशं सम्पूज्याचार्यो भगवन्तं प्रार्थयामास समाधानाय किमद्वैतं सत्यमसत्यं वा? शम्भुः स्पष्टं त्रिरवादीत् यदद्वैतं सत्यम्। ततश्च तत्रत्या जना अद्वैतसमर्थका अभवन्। ततोऽमृतघटेशानं निषेव्य वेङ्कटेश्वरं द्रष्टुं सप्तगिरिं ययौ। तत्र च बिम्बाधो धनाकर्षणयन्त्रकं स्थापयामास।

काञ्चीगमनम्—

ततो मोक्षपुरीं काञ्चीं गत आचार्यः गायत्रीमण्डपे पद्मासने कामपीठनिवासिनी कामदायिनी कामाक्षादेवी कामकोटीतिविख्याता निषण्णास्ते। आचार्यो राजानं राजसेनमुपदिश्य देव्याः शिवस्य विष्णोश्च पृथक् पृथग् देवालयत्रयं कारयामास।

सर्वज्ञपीठारोहणम्—

शिवकाञ्चीं विष्णुकाञ्चीं च पुरीद्वयं निर्मातुमादिदेश। कामाक्ष्याः पुरतो भूमौ भगवान् श्रीचक्रं स्वयमालिखत्। श्रीचक्रस्य पश्चाद्भागे च स्वर्णनिर्मितां कामाक्षीं प्रतिष्ठाप्य स्वयमेनामपूजयत्।

समवेतान् बुधान् विजित्य सर्वैरनुमतः सर्वज्ञपीठासनमारुरोह।

कामकोटिपीठारोहणम्—

सर्वान् विजित्याचार्यः कामकोटीति विश्रुतं पीठं स्वयमध्यास्त। उदारो विभुरा-चार्यः शङ्कर आदिदेश यद् यथाभक्ति जनाः शिवं विष्णुम् अम्बाम् गणेशं स्कन्दं वा भजन्ताम्।

पीठव्यवस्था—

उपदेशक्रमः परम्परागतः प्रचलेदित्युद्दिश्याचार्यः द्वारकायां जगन्नाथे बदर्यां श्रृङ्गपर्वते कालिका-विमलाज्योतिः-शारदापीठसंज्ञकान् चतुरः पीठान् संस्थापयामास। सुरेश्वरप्रमुखान् शिष्यांश्च व्याख्यानदेशिकस्थाने न्ययोजयत्।

आचार्यस्य ब्रह्मीभावः—

भूमिं प्रदक्षिणीकृत्याचार्यः निजशरीरान्तं ज्ञात्वा शिष्यैः सह काञ्चीपुरं गतः। तत्र कामाक्षीसदनं प्राप्य प्रदक्षिणां कृत्वा सौन्दर्यलहरीमुख्यैः स्तोत्रैः मातरं तुष्टाव। सर्वांश्च शिष्यादीन् तत्तत्कार्येषु नियोज्य परं पदमखण्डं ज्योतिः भेजे।

आचार्यमुद्दिश्येदमुच्यते—

अष्टवर्षे चतुर्वेदो द्वादशे सर्वशास्त्रवित्।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्॥

द्वात्रिंशद्वर्षात्मकेऽल्पे काले जगद्गुरुणा आचार्यशङ्करेण यानि कर्माणि कृतानि, केनापि कर्तुं न शक्यन्ते। नूनमसौ भगवतः शंकरस्यावतारभूतः। लेखनेन भाषणेन प्रवचनेन मठस्थापनेन विविधदेवालयस्थापनेन तीर्थयात्रया च भगवत्पादाः शङ्कराचार्याः वैदिकीं संस्कृतिं रक्षितवन्तः। अद्वैतवादः सिद्धान्तरूपेण संस्थापितः; परन्तु लोकसंग्रहाय भारतीयसंस्कृतेः रक्षणाय च आचार्यवर्यैर्मठा मन्दिराणि च निर्मापितानि। यथेच्छं जना इष्टदेवानां देवीनां चोपासनां कुर्युरित्यपि आचार्यः स्पष्टरूपेणादिदेश।

जन्मत एवासौ सन्न्यस्त आसीत्; परन्तु लोकव्यवहारोऽपि सर्वथा तेन रक्षितः। यथा भगवता कृष्णेन गीतायामुक्तं यन्नमे पार्थाऽस्ति कर्तव्यं त्रिषु लोकेषु किञ्चन; तथापि लोकसंग्रहार्थमहं कर्म करोमि, तथैव भगवत्पादैरपि लोकव्यवस्था यथा मर्यादिता सुरक्षिता च स्यादित्येतदर्थं महान् आदर्शः समुपस्थापितः। कृतज्ञश्च लोकः प्रातःस्मरणीयान् भगवत्पादान् जगद्गुरून् आद्यशङ्कराचार्यान् सर्वदा स्मरिष्यति इति मे दृढो विश्वासः।

प्रसंख्यानम्

श्रीमुरलीधरपाण्डेयः, आचार्यः, एम्० ए०
वाचस्पतिः, डी० लिट्०, राष्ट्रपतिसम्मानितः,
निदेशकः, शाङ्करवेदान्तकोशयोजनायाः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

❀ ❀ ❀

श्रीमद्भगवत्पादशङ्कराचार्यसमर्थितस्य निर्विशेषब्रह्माद्वैतवादस्याचार्यप्रमुखेषु केषुचित् प्रसंख्यानविषये ऐकमत्यं नास्ति। आचार्यबादरायणमण्डनमिश्रवाचस्पतिमिश्रामलानन्दश्रीधरमधुसूदनसरस्वतीप्रभृतयः प्रसंख्यानमङ्गीकुर्वन्ति। भगवत्पादश्रीशङ्कराचार्यसुरेश्वराचार्यानन्दगिरिप्रभृतयः प्रसंख्यानं नाद्रियन्ते।

श्रीमण्डनमिश्रप्रभृतय एवमभिप्रयन्ति यद् दशमस्त्वमसि इति वाक्यजन्यबोधसाक्षात्कारवत् 'तत्त्वमसि' (छा० उप० ६।८।७) इत्यादिमहावाक्यादिना ब्रह्मसाक्षात्कारो न जायते; किन्तु महावाक्येन केवलं ब्रह्म विज्ञायते। तदनन्तरम् उपासनया ब्रह्म साक्षात्क्रियते। अत एव 'विज्ञाय प्रज्ञां कुर्वीत' (बृ० आ० उप० ४।४।२१) इत्यादिश्रुतयः संगच्छन्ते। प्रज्ञाम् इत्यस्योपासनामित्यर्थः। इयमुपासना प्रसंख्यानशब्देनाभिधीयते। प्रसंख्यानार्थं च ध्यानभावनावृत्त्याम्रेडनचित्तैकाग्र्यप्रत्ययावृत्तिशब्दा ब्रह्मसिद्धौ[1] बृहदारण्यकोपनिषद्भाष्यवार्त्तिके[2] नैष्कर्म्यसिद्धौ[3] श्रीमद्भगवद्गीतायाः

---

१. तिस्रश्च प्रतिपत्तयो ब्रह्मणि प्रथमा तावच्छब्दात्, अन्या शब्दात् प्रदिपद्य तत्सन्तानवतीध्यानभावनोपासनादिशब्दवाच्या, अन्या ततो लब्धनिष्पत्तिर्विगलितनिखिलविकल्पसाक्षात्करणरूपा (ब्र० सि० नि० का० आदौ)।

२. आवृत्तिर्हि प्रसङ्ख्यानं शब्दबुद्धयोरिति स्थितम्।
(बृ० आ० उप० भा० वा०—सं० वा०)
अत्रानन्दगिरिः—श्रवणमननयोरावृत्तिस्त्वया प्रसंख्यानमभ्युपेतम्।

३. क. प्रसङ्ख्यानं नाम तत्त्वमस्यादिशब्दार्थान्वयव्यतिरेकयुक्तिविषयबुद्धयाम्रेडनमित्यभिधीयते, तच्चानुष्ठीयमानं प्रमितिवर्द्धनया परिपूर्णां प्रमितिं जनयति, न पुनरैकाग्र्यवर्द्धनयेति (नै० सि० ३।९०)।
ख. प्रसंख्यानस्य चित्तैकाग्र्यरूपस्य (त० ३।८९)।

नीलकण्ठीटीकायां[१] च व्यवहृता ।

एवमेव प्रसंख्यानेऽकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिरिति पातञ्जल-योगसूत्रे (४।२९) योगवार्तिककारेण प्रसंख्यानशब्दस्यार्थो विवेकसाक्षात्कारः कृतः । श्रीधनपतिना स्वीये श्रीमद्भगवद्गीताव्याख्याने भाष्योत्कर्षे 'ज्ञानविज्ञाननाशनम्' (गी० ३।४१) इति गीतोक्तविज्ञानपदव्याख्याने विज्ञाय प्रज्ञां कुर्वीत इति बृहदारण्यकोपनिष-दुक्तिमुद्धृत्य प्रज्ञाशब्दस्य निदिध्यासनरूपोऽर्थो निरूपितस्तत्रैव च निदिध्यासनमित्यस्य विवेकज्ञानमित्यर्थः कृतः ।[२] अत्रैव च श्रीश्रीधरस्वामिना विज्ञानमित्यस्य 'विवेकज्ञानजम्' इत्यर्थः कृतः[३] ।

इयं च प्रसंख्यानपदाभिधेयोपासनाध्यानभक्तिनिदिध्यासनशब्दैराचार्यभगवत्पा-दशङ्कर[४]-नीलकण्ठ[५]-श्रीधनपतिस्तत्र तत्र[६] गीतायां व्यवहृत्य ब्रह्मसाक्षात्कारफलोक्ता ।

श्रीमण्डनमिश्रप्रभृतयः कथयन्ति यदुक्तविधेन प्रसंख्यानेनैव ब्रह्मसाक्षात्कारो भवितुमर्हति, नान्यथा । यतो हि शाब्दं ज्ञानम् परोक्षरूपम्, जागतिकः प्रपञ्चश्च प्रत्यक्ष-रूपः, अतोऽत्र परोक्षापरोक्षरूपयोः शाब्दज्ञानसंसारप्रपञ्चयोर्न कश्चन विरोधः । प्रसं-ख्यानापरपर्यायेणोपासनेन साक्षात् वृतात्मतत्त्वस्य प्रपञ्चेन सह विरोधः । तेन सन्नपि

---

१. प्रत्ययावृत्तिलक्षणं प्रसंख्यानम् । (श्री० गी० १०।११ नी० का०)

२. ये तु ज्ञानम् आत्मविषयं विज्ञानं शास्त्रीयम् । यद्वा ज्ञानं शास्त्राचार्योपदेशजं विज्ञानं निदिध्यासनं विज्ञाय प्रज्ञां कुर्वीत इति श्रुतेरिति वर्णयन्ति, तेषां व्याख्याने प्रथमपक्षोऽरुचिग्रस्तः । अरुचिबीजं ज्ञानं विवेकज्ञानमिति पूर्वं स्वेन व्याख्यातम् । तच्चात्मीयं शास्त्रीयमेवेति विज्ञानपदेन पौनरुक्त्यम् । द्वितीयस्तु विशेषतस्तदनुभव इति भाष्यस्य निदिध्यासनपरत्वं व्याख्याय तदविरुद्धो बोद्धव्यः ।
(गी० ३।४१ भाष्योत्कर्षे)

३. यद्वा ज्ञानं शास्त्राचार्योपदेशजम्, विज्ञानं निदिध्यासनजम् । तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत इति श्रुतेः । (गी० ३।४१ श्रीधर्याम्) ।

४. ध्यानं नाम शब्दादिभ्यो विषयेभ्यो श्रोत्रादीनि कारणानि मनस्युपसंहृत्य मनश्च प्रत्यक्चेतरितर्येकाग्रतया यच्चिन्तनं तद्ध्यानम् । तथा ध्यायतीव को ध्यायतीव पृथिवी ध्यायन्तीव पर्वता इत्युपमोपादानात् तैलधारावत् संततोऽविच्छिन्नप्रत्ययो ध्यानम् । (गी० १३।२४ शा० भाष्ये)

५. भक्तियोगेन तैलधारावदविच्छिन्नप्रवाहिमनः प्रवाहप्रणिधानरूपेण योगेन ।
(गी० १४।२६ नीलकण्ठीटीकायाम्)

६. निदिध्यासनापरपर्यायेण ध्यानेनात्मनि बुद्धावात्मानं प्रत्यक्चेतनमात्मना ध्यान-संस्कृतेनान्तःकरणेन पश्यन्ति साक्षात् कुर्वन्ति ।
(गी० १३।२४ भाष्योत्कर्षे)

प्रपञ्चो बन्धाय दुःखाय वा न भवति। यथा सिंहोऽयं देवदत्त इत्यादि वाक्येषु समारोपितोऽपि सिंहव्यवहारो भयाय न भवति[1]।

प्रसंख्यापनपक्षं द्रढयन् पुनश्चेमे कथयन्ति यत् प्रमाणेन मिथ्यावभासा निवर्तन्ते; किन्तु कारणविशेषात् पुनरपि अनुवर्तन्ते। यथा देशान्तरे गते दिग्भ्रमो जायते, आप्तोपदेशाच्च निवर्ततेऽपि; किन्तु पुनरपि न कालान्तरे कारणवशात् पुर्नदिग्भ्रमो जायते, अर्थात् निवृत्तोऽदिग्भ्रमो जायते अर्थात् निवृत्तोऽदिग्भ्रमोऽनुवर्तते। परन्तु तत्र यदि आप्तोपदेशान्तरं पुनः पुनरभ्यासेन ज्ञानं दृढं क्रियते, तदा तत्र दिग्भ्रमो न जायते। एवमेव श्रुतिवचनेभ्यो ब्रह्मविज्ञाय प्रसंख्यानेन अर्थात् तत्त्वमस्यादिशब्दार्थान्वयव्यतिरेकयुक्तिविषयबुद्ध्याऽऽम्रेडनेन अर्थाद् श्रुतिवाक्यजबोधाभ्यासेन ध्यानेनोपासनया वा मिथ्यावभासा निवर्तन्ते ब्रह्मसाक्षात्क्रियते[2]।

---

१. उच्यते परोक्षरूपं शाब्दज्ञानम्, प्रत्यक्षरूपः प्रपञ्चावभासः। तेन तयोरविरोधेन प्रपञ्चावभासो नात्मासंस्पर्शी नाकिञ्चित्करः, न बन्धः। यथा प्रमाणान्तरादवसीयमानमाधुर्येऽपि द्रव्ये प्रत्यक्षरूप इन्द्रियद्वारस्तिक्तावभासः अद्रव्यसंस्पर्शी नाभासमात्रतयावतिष्ठते। तथा च द्रव्यं परमार्थतिक्तमिवानवसितमाधुर्यमिव दुःखाय भवति। उपासनादिना साक्षात्कृतात्मतत्त्वस्य तु विरोधात् सन्नपि प्रपञ्चावभासो नात्मसंस्पर्शी, देवदत्त इव सिंहावभासः सिंहो देवदत्त इति समारोपेऽवभासमानोऽपि तदसंस्पर्शी अकिञ्चित्करो न भयहेतुः। नित्यश्चात्मतत्त्वप्रकाशः तत्र न पुनर्विपर्ययावकाशोऽस्ति, शाब्दं तु प्रमाणाधीनं क्षणिकं ज्ञानम्, तत्र पुनरपि विपर्ययावकाशः, दृष्टं हि प्रमाणाननुसन्धाने पुनः सर्पभ्रान्त्या रज्जोर्भयम् (ब्र० सि० नि० का० १०९ का० पृ० १३४)।

२. क. अत्रोच्यते निश्चितेऽपि प्रमाणात् तत्वे सर्वत्र मिथ्यावभासा निवर्तन्ते हेतुविशेषादनुवर्तन्तेऽपि यथा द्विचन्द्रादिदिग् विपर्यासादय आप्तवचनविनिश्चितदिक्चन्द्रतत्त्वानाम् तथा निर्विचिकित्सादाम्नापादवगतात्मतत्त्वस्यानादिमिथ्यादर्शनाभ्यासोपचितबलवत्संस्कारसामर्थ्यान् मिथ्यावभासानुवृत्तिस्तन्निवृत्तयेऽन्यदपेक्ष्यम्। तच्च तत्त्वदर्शनाभ्यासो लोकसिद्धः यज्ञादयश्च शब्दप्रमाणकाः, अभ्यासो हि संस्कारं द्रढयन् पूर्वसंस्कारं प्रतिबध्य स्वकार्यं सन्तनोति।

(ब्र० सि० ब्र० का० २ का० पृ० ३५)

ख. तस्मात् तन्निवृत्तये विनिश्चितब्रह्मात्मभावेनापि साधानान्यपेक्ष्याणि।

(तत्रैव पृ० ३५)

ग. एवं तर्हि शब्दात् प्रमिते ब्रह्मणि तत्साक्षात्करणायोपसनादिप्रवृतेः वेदान्तानां प्रामाण्यमिति भावः।

(ब्र० सि० सि० का० ११ का० शङ्खपाणिव्याख्या पृ० १५९)

एवंभूतं प्रसंख्यानं प्रसंख्यानफलं च ब्रह्मसिद्धिव्याख्यायां शङ्खपाणिरित्थं स्पष्टयति—

"किन्तु स्वरूपाविर्भावमात्रं मुक्तिरिति वर्णितम्। स्वरूपाविर्भावश्च शब्दात् परोक्षतयावगतस्याद्वयात्मनः साक्षाद्भावः। स चानुचिन्तनस्य भोजनस्येव तृप्तिर्दृष्टं फलम्, ज्ञानाभ्यासेन प्रकर्षदर्शनात्[1]।"

भगवाञ्छङ्करस्तदनुयायिनश्च शब्दाज् ज्ञानानन्तरं ब्रह्मसाक्षात्काराय मध्ये प्रसङ्ख्यानं नाङ्गीकुर्वन्ति। ते कथयन्ति ब्रह्मविद्या सहकारिसाधनान्तरं विनैव ब्रह्मसाक्षात्कारे हेतुः[2]। इमं श्रीशङ्करसिद्धान्तं पोषयन् आचार्यश्रीसुरेश्वरः बृहदारण्यकोपनिषद्भाष्यवार्तिके श्रीमण्डनादिमतं दूषयति। विज्ञाय प्रज्ञां कुर्वीत (बृ० आ० उ० ४।४।२१) इति श्रुतेराशयमित्थं वर्णयति यत् तत्त्वमस्यादिवाक्यजज्ञानेन ब्रह्मयाथात्म्यमलब्ध्वा प्रज्ञां कुर्वीत केनेति व्यपेक्षायां विज्ञानेनेति लभ्यते। तस्माद् वाक्यजविज्ञानासाधननैरन्तर्येण ब्रह्मयाथात्म्यबोधिनीं प्रज्ञां कुर्वीत।[3] एतदर्थमाचार्यसुरेश्वरो बृहदा-

---

१. ब्र० सि० नि० का० १८२ का० शङ्खपाणिव्याख्या पृ० १५४।

२. विद्यायाश्च स्वातन्त्र्यात्। स्वतन्त्रा हि ब्रह्मविद्या सहकारिसाधनान्तरनिरपेक्षा पुरुषार्थसाधनेति च।

(बृ० आ० उप० शा० भा० ४।३।१ पृ० ५४५ पूनाप्रका०)

३. (क) अलब्धब्रह्मयाथात्म्यं ज्ञानं वाक्योद्भवं यतः।
तस्मात् प्रकुर्वीत साक्षाद् ब्रह्मैकगोचराम्॥
अपास्ताशेषसंसर्गं यया ब्रह्माधिगम्यते।
केनेति च व्यपेक्षायां विज्ञानेनेति गम्यते॥
तस्माद् वाक्योत्थविज्ञानसाधनाभ्यासतोऽनिशम्।
प्रज्ञां कुर्यादसंसर्गिब्रह्मयाथात्म्यबोधिनीम्॥
अपेताशेषसंसर्गं तयैव ब्रह्म गम्यते।
यतोऽशेषतमोहन्त्री प्रज्ञा सैवात इष्यते॥

(बृ० आ० उप० भा० वा० ८०३-८०८ पृ० १८५३ पूनाप्रका०)

(ख) अन्ये तु पण्डितम्मन्या सम्प्रदायानुसारतः।
विज्ञायेति वचः श्रौतमिदं व्याचक्षतेऽन्यथा॥

(तत्रैव ४।४।७९६ पृ० १८५२)

(ग) इत्येवमादिवाक्यानि गम्भीरन्यायवेदिनः।
केचिद् व्याचक्षते यत्नादत्र प्रतिविधीयते॥

(तत्रैव ४।४।८१ पृ० १८५३)

रणकभाष्यवार्तिके नैष्कर्म्यसिद्धौ च श्रीमण्डनमिश्रं पण्डितंमन्याः गम्भीरन्यायवेदिनः महामीमांसका इत्यादिपदैर्भृशमुपहसितवान् ।

श्रीधनपतिपण्डितेन शाङ्करभाष्यानुसारिणि स्वीये गीताभाष्योत्कर्षे उपासनापरपर्यायस्य प्रसंख्यानस्य ब्रह्मसाक्षात्काराय अकिञ्चित्करत्वमुक्तम् । तेनोक्तं यदुपासना अतस्मिन् तद्बुद्धिः भ्रमरूपा यथा शालग्रामशिलायां विष्णुबुद्धिः । अतो ये सूत्रविराडन्तर्यामिषु आत्मबुद्धिं कृत्वा उपासते, तेन यथार्थविदः[1] ।

एवं च प्रसङ्ख्यानपक्षं श्रीशङ्करश्रीमण्डनमिश्रश्रीसुरेश्वराचार्यश्रीमदानन्दगिरिप्रभृतयो निराकुर्वन्ति । किन्तु एतद् विपरीतं ब्रह्मसूत्रकारश्रीबादरायणश्रीवाचस्पतिमिश्रकल्पतरुकारश्रीमदमलानन्दश्रीमधुसूदनसरस्वतीप्रभृतयः प्रसंख्यानपक्षं समाद्रियन्त इति प्रतीयते । यथा बादरायणाचार्यः 'अपि च संराधने प्रत्यक्षानुमानाभ्याम्' (ब्र० सू० ३।२।२४) सूत्रितवान् । अत्र संराधनम् आराधनम् प्रसंख्यानमुपासनं वार्थः । श्रीमदमलानन्दः प्राणस्तथानुगमात् (१।१।२८) इति ब्रह्मसूत्रभाष्यभामतीव्याख्याने कल्पतरौ स्पष्टं कथयति यद् श्रीवाचस्पतिमिश्रो ध्यानजं ब्रह्मसाक्षात्कारं स्वीकरोति । एतदर्थ-

---

(घ) इति व्याचक्षते केचिद् विज्ञायेति वचः स्फुटम् ।
महामीमांसका धीरा अत्र प्रतिविधीयते ।

(तत्रैव ४।४।८९१ पृ० १८६६)

(ङ) आवृत्तिश्च प्रसंख्यानं कुर्यात्सातिशयं कथम् ।
न ह्यावृत्तौ प्रमाणस्य प्रमेयेऽतिशयो यतः ॥

(तत्रैव सं० का० ८१८ पृ० २२५)

(च) निराकुर्यात् प्रसंख्यानं दुःखित्वं चेत्स्वनुष्ठितम् ।
प्रत्यक्षादिविरुद्धत्वात् कथमुत्पादयेत् प्रमाम् ॥

(नैष्कर्म्यसिद्धौ ३।८९ पृ० १६०)

(छ) एवं तत्त्वमनीत्यस्माद् द्वैतनुत् प्रत्यगात्मनि ।
सम्यग् ज्ञातव्यमर्थस्य जायेतैव प्रमा दृढा ॥

(नै० सि० ३।७०)

१. उपासना हि नाम अतस्मिंस्तद्बुद्धिः । यथा शालग्रामे विष्णुबुद्धिरेवं सूत्रविराडन्तर्यामिष्वात्मबुद्धिरिति न तद्वन्तः सुनिश्चितार्था इति वक्तुं शक्यम् । (श्रीमद्भगवद्गीतायाम् ८।५ श्लोके नीलकण्ठीटीकायाम्) ।

मुपासनामभिप्रैति[1]। एवमेव श्रीनीलकण्ठश्चतुर्धुरीणः श्रीमद्भगवद्गीतायाम् (१३।२५) स्वीयटीकायामुक्तं यद् अमलानन्दो वेदान्तवाक्यजभावनया ब्रह्मसाक्षात्क्रियत इत्यङ्गीकरोति[2]। श्रीमधुसूदनसरस्वती तु स्पष्टतया न कुत्राप्युपलक्षितो यदयं प्रसंख्यानपक्षपाती। किन्त्वस्य हार्दैः श्लोकैर्वाक्यैश्चेत्थं प्रतीयते यदयं प्रसंख्यानमाद्रियते[3]।

श्रीश्रीधरस्वामिभिर्गीताशास्त्रस्यान्ते उपसंहारे एवंभूतस्य भक्त्यपरपर्यायस्य प्रसंख्यानस्य ज्ञानस्य चातीव युक्तिसहं सामञ्जस्यं प्रकाशितम्। तैरुच्यते यज् ज्ञानानन्तरं भक्तिर्जायते भक्तेश्च मुक्तिर्भवति। ज्ञानान् मोक्ष इति सिद्धान्तो भक्त्यवान्तरव्यापारं न वारयति। यया काष्ठैः पचति इत्यत्रावान्तरव्यापारं ज्वलनं न निवार्यते। तथैव विज्ञाय

---

१. ध्यानजसाक्षात्काराभ्युपगमो वाचस्पतेरेतत्सूत्रार्थाबोधादिति कैश्चिदयुक्तमुक्तम्—

अपि संराधने सूत्राच्छास्त्रार्थध्यानजा प्रमा।
शास्त्रदृष्टिर्मता तां तु वेत्ति वाचस्पतिः परम्॥
(ब्र० सू० १।१।२७ क० त०)

अत्रैवेदमप्युक्तम्—तस्य प्राणस्य प्रज्ञात्मना सहोपास्यत्वमुक्तमित्यर्थः। ब्रह्मणि प्राण इति। स एष प्राणोऽजरम् इत्यत्र प्राणशब्दो ब्रह्मवाचीत्यर्थः।
(ब्र० सू० १।१।२८ क० त०)

२. कल्पद्रुमाचार्यास्तु वेदान्तवाक्यजध्यानभावनाऽपरोक्षधीः।
(श्री० भ० गी० १३।२५ नी० क०)

३. (क) यद्भक्तिं न विना मुक्तिर्यः सेव्यः सर्वयोगिनाम्।
तं वन्दे परमानन्दघनं श्रीनन्दनन्दनम्॥
(श्री० भ० गी० सप्तमाध्यायान्ते श्री म० सू० स०)

(ख) ध्यानाभ्यासवशीकृतेन मनसा यन्निर्गुणं निष्क्रियं
ज्योतिः किंचन योगिनो यदि परं पश्यन्ति पश्यन्तु ते।
अस्माकं तु तदेव लोचनचमत्काराय भूयाच्चिरम्
कालिन्दीपुलिनोदरे किमपि यन्नीलं महो धावति॥
(तत्रैव त्रयोदशाध्यायस्यादौ)

(ग) पराकृतनमद् बन्धं परं ब्रह्म नराकृति।
सौन्दर्यसारसर्वस्वं वन्दे नन्दात्मजं महः॥ (तत्रैव चतुर्दशाध्यायान्ते)

(घ) वंशीविभूषितकरान्नवनीरदाभात्
पीताम्बरादरुणबिम्बफलाधरोष्ठात्।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात्
कृष्णात् परं किमपि तत्त्वमहं ज जाने॥
(तत्रैव पञ्चदशाध्यायान्तेऽष्टदशाध्यायान्ते च)

प्रज्ञां कुर्वीत इत्यत्र ब्रह्मविज्ञानानन्तरं प्रज्ञाम् =उपासनाम् अवान्तरव्यापारं कुर्वीत। ततो मोक्ष इति[1]।

मन्ये, इमामेव श्रीश्रीधरोक्तिं मनसि निधाय श्रीधनपतिपण्डितेन श्रीशाङ्कर-भाष्यानुसारिणि स्वीये भाष्योत्कर्षे व्याख्याने गीताशास्त्रस्यान्ते उपसंहारे एवमुच्यते यद् यदि मुक्तये ज्ञानानन्तरमवान्तरसाधने भक्तिः स्वीक्रियते, तदा कर्मैव साक्षान्मोक्ष-साधनं भवतु, भक्तिर्ज्ञानं चावान्तरव्यापारो भवतु। अतो ज्ञानानन्तरं मुक्तये भक्तिरवा-न्तरव्यापारो मा भवत्विति[2]।

अत्र गीतोपसंहारे श्रीमधुसूदनसरस्वती च कोऽहं वराकः श्रीमद्भगवद्वाक्याशयं यथार्थं वर्णयितुं शक्त इति वदन् मौनमाधत्त।

एवञ्च परस्परविरोधे यदि प्रज्ञापरपर्यायस्योपासनापरपर्यायस्य वा भक्तिशब्दस्यार्थो ज्ञानं विवेकज्ञानं वा स्वीकुर्यात्। सामान्यतोऽयमर्थो न स्वीक्रियते; किन्तु भगवता श्रीशङ्करेण[3]

---

१. तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय इत्यादि श्रुतिविरोधः शङ्कनीयः। भक्त्यवान्तरव्यापारत्वाद् ज्ञानस्य। नहि काष्ठैः पचति इत्युक्ते ज्वालानामसाधनमुक्तं भवति। किं च यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनाम्। देहान्ते देवः परं ब्रह्म व्याचष्टे॥ यमेवैष वृणुते तेन लभ्यः नान्येनेति समञ्जसानि भवन्ति। तस्माद् भक्तिरेव मोक्षहेतुरिति सिद्धम्। (गीताशास्त्रान्ते उपसंहारे श्रीश्रीधरस्वामी)

२. (क) तत्त्वसाक्षात् केवलादन्यनिरपेक्षान् मोक्ष इति गीताशास्त्रार्थसंग्रहः। (गीताशास्त्रान्ते उपसंहारे भाष्योत्कर्षे)

(ख) अज्ञान परिकल्पितस्य संसारस्य ज्ञानेनैव निवृत्तिर्युक्ता, न तु कर्मणा/उपास्तिक्रियया वा। तथासति मोक्षस्यानित्यत्वं सातिशयत्वं च प्रसज्येत इत्यन्यत्र विस्तरः। ....अवान्तरव्यापारकल्पनायां स्वकर्मणा समभ्यर्च्य सिद्धिं विन्दति मानवः इत्युक्तत्वात् कर्मैव साक्षाद् मोक्षसाधनं भक्तिर्ज्ञानं चावान्तरव्यापारः कुतो न स्यादित्यास्तां तावत्। (गीताशास्त्रान्ते उपसंहारे भाष्योत्कर्षे)

३. (क) भक्तिम् ज्ञानलक्षणाम् (गी० १८।५५ श्रीशङ्कराचार्यः)।

(ख) भक्तिः वृत्तिसंततिरूपा (गी० ७।१७ भाष्योत्कर्षे)।

(ग) प्रज्ञाम् निदिध्यासनम् (गी० ३।४१ भाष्यो० श्रीधर्यां च) निदिध्यासना-परपर्यायेण ध्यानेन (गी० १३।२४ भाष्यो०) ध्यानं नाम ....एकाग्रतया यच्चिन्तनं तद्ध्यानम् (गी० १३।२४ शा० भा०) भक्तियोगेन विवेक-ज्ञानात्मकेन भक्तियोगेन (गी० १४।२६ शा० भा०) निदिध्यासनसंज्ञकेन ध्यानेन विषयीकुर्वन्तीत्यर्थः। (गी० १२।३ म० सू० स०) विषयीकरणेन सामीप्यमुपगम्य तैलधारावत्समानप्रत्ययप्रवाहेण दीर्घकालं यदासनं तदुपासनम् (गी० १२।३ शा भा०)।

श्रीधनपतिपण्डितेन च तथार्थो गीताशास्त्रे (१८।५५, १३।२४) इत्यत्र स्वीकृतस्तदा श्रुतिवाक्येभ्यः सामान्यतो ब्रह्मज्ञानान्तरं प्रज्ञया ध्यानापरपर्यायेण निदिध्यासने ब्रह्म साक्षात्क्रियत इत्यर्थस्तात्पर्यं वा क्रियात् तदा श्रीशङ्कराचार्यश्रीमण्डनमिश्रप्रभृतीनां प्रसंख्यानविषये यथाकथञ्चित् सामञ्जस्यं सम्भवेत्। अतः परं समादरणीया वेदान्ताचार्या विभावयन्तु। इति शम्।

जीवपरिमाणविमर्शः

डॉ० पारसनाथद्विवेदी

उपाचार्यः, शाङ्करवेदान्ते

वेदान्तविभागे

सं० सं० विश्वविद्यालये वाराणसेये ।

❀ ❀ ❀

बुधचक्रचकोरेन्दुं शारदाम्बरभास्करम् ।
वन्दे देवस्वरूपाख्यं गुरुमात्मविदां वरम् ॥१॥

इह किंपरिमाणो जीव इति विचार्यते। कुतः पुनरियं विचारणा? श्रुतिवैविध्यात् । तथाहि "एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश" (मु० ३।१।९।) "बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः" (श्वे० ५।८) "आराग्रमात्रो ह्यवरोऽपि दृष्टः" (श्वे० ५।८) इत्यादिश्रुतयो जीवस्याणुपरिमाणत्वं गमयन्ति । "स एष इह प्रविष्ट आ नखाग्रेभ्यः" (बृ० १-४-७) "अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदि संनिविष्टः" (क० २-६-१७) "स वा एष पुरुषोऽन्नरसमयः" (तै० २-१-१) इत्यादिश्रुतयो जीवस्य मध्यमपरिमाणत्वं गमयन्ति । "स वा एष महान् अज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म" (बृ० ४।४।२५) "तत्त्वमसि" (छा० ६-८-७) "अहं ब्रह्मास्मि" (बृ० १-४-१०) इत्यादिश्रुतयश्च तस्य महापरिमाणत्वं गमयन्ति । एकत्र चैतस्यासम्भवात् किं परिमाणो जीव इति जायते विचारणा। तत्र सन्देहः, जीवः किमणुपरिमाणः, उत मध्यमपरिमाणः, आहोस्वित् महापरिमाण इति ।

अत्रोच्यते—मध्यमपरिमाणत्वं तावद् न सम्भवति महत्त्वादिबोधकश्रुतिबाधात् । न च मध्यमपरिमाणाङ्गुष्ठमात्रत्वमपि श्रुत्यैवोच्यते इति कथं श्रुत्यैव श्रुतेर्विरोध इति वाच्यम्, अङ्गुष्ठमात्रादिबोधकश्रुतीनां जीवपरिमाणविशेषबोधने तात्पर्यानवधारणात् । सर्वगतस्यापि आत्मनः हृदयेऽभिव्यक्तिस्थानमपेक्ष्य अङ्गुष्ठमात्रत्वादिप्रतिपादकश्रुतेः प्रवृत्तत्वात् । न हि व्यापकस्यात्मनः तावन्मात्रत्वमुपपद्यते । निरूपितञ्चैतद् हृद्यपेक्षया तु मनुष्याधिकारात् (ब्र० सू० १-३-२५) इति सूत्रे भाष्ये भगवत्पादैः । तस्य वाक्यस्य नाङ्गुष्ठमात्रत्वबोधने तात्पर्यम्, अपि तु विज्ञानात्मपरमात्मनोरभेदबोधन एव । अत एव अङ्गुष्ठमात्रत्वमुपक्रम्य ईशानो भूतभव्यस्येत्यादिना भूतभ-

व्यस्येशितृत्वमुक्तम्। अतः परमात्मैवाङ्गुष्ठमात्रशब्देनोच्यते, स एव विज्ञानात्मापि, परेण सदा जनानां हृदि संनिविष्ट इत्यादि वाक्येनावगम्यते। बाधितञ्च परमात्मनि अङ्गुष्ठमात्रत्वं कथं तदभिन्ने जीवात्मन्यपि संघटेत। ननु मास्तु अङ्गुष्ठमात्रत्वं जीवात्मनः शरीरपरिमाणत्वमस्तु; तथा च श्रुतिः "स एष इह प्रविष्ट आ नखाग्रेभ्यः" इति।

एवं च सति अहं अहमिति प्रादेशिकानुभवोऽपि उपपन्नः। देहेन्द्रियादि संघात-परिच्छिन्न आत्मा एव अहमिति प्रतीतिविषयः सर्वानुभवसिद्धः। मन्यन्ते चापि जैनाः देहपरिमाण आत्मा इति चेन्न, देहपरिमाणत्वे तस्य देहवत् सावयवत्वाद् अनित्य-त्वापत्तेः। उक्तञ्च अध्यासभाष्यभामत्यां श्रीवाचस्पतिमिश्रैः—"देहपरिमाणत्वे तु सावयवतया देहादिवदनित्यत्वप्रसङ्गः। किञ्चास्मिन् पक्षे अवयवसमुदायो वा चेतयेत्, प्रत्येकं वावयवाः। प्रत्येकं चेतनत्वपक्षे बहूनां चेतनानां स्वतन्त्राणामेक-वाक्यताऽभावात् अपर्यायं विरुद्धदिक्क्रियतया शरीरमुन्मथ्येत, अक्रियं वा प्रसज्येत। समुदायस्य च चैतन्ययोगे वृक्णे एकस्मिन्नवयवे चिदात्मनोऽप्यवयवो वृक्ण इति न चेतयेत्। न च बहूनामवयवानां परस्पराविनाभावो दृष्टः। य एवावयवो विशीर्णस्तद-भावे न चेतयेत्" (भा०भा० पृ० ८)।

परिच्छिन्नत्वादपि तस्यानित्यत्वमापद्येत। न हि परिच्छिन्नं नित्यं दृष्टम्। शरीराणाञ्चानियतपरिमाणत्वात्, आत्मनोऽपि अनवस्थितपरिमाणत्वापत्तिः। कदाचिद् हस्तिपरिमाणः कदाचित् पीपिलका परिणाम इति। अस्तु तथेति चेत्तर्हि मनुष्यशरीरपरिमाणः कर्मपरिपाकवशात् कदाचिद् मृतो हस्तिशरीरं प्राप्नुवन् तच्छरीरं न कृत्स्नं व्याप्नुयात्। हस्तिशरीरपरिमाणो मृतो मशकशरीरं प्राप्नुवन् न सम्मीयेत। अनवस्थित एव स्यात्। यदि चैतद्दोषस्य परिजिहीर्षया शरीरानुसारं संकोचविकासावपि आत्मनः स्वीक्रियेते, तदा परिणामित्वाद् अनित्यत्वापत्तिर्दुर्वारा। संकोचोऽपचयः, विकास उपचयः, एतौ च सावयवत्वेन व्याप्तौ जीवात्मनि सावयवत्वमपि आक्षिपेताम्। सावयवत्वे चानित्यत्वं ध्रुवमेव।

किञ्च, सावयवत्वे जीवात्मनोऽपचये कतिचिदवयवा नश्येरन्, उपचये च कतिचिदवयवा उत्पद्येरन् इति आगमापायिधर्मत्वाद् अनात्मत्वमेव शरीरादिवत् तस्य स्यात्।

अपि चावयवानामपगमोपगमो वा कुतः स्यात्। न च भूतादेव, अभौतिकत्वा-दात्मनः। यदि च धारादिवद् आत्मनः संकोचविकासशालित्वेऽपि सन्ताननित्यता,

परिणामिनित्यता वा स्वीक्रियते इत्युच्येत, तर्हि सन्तानस्य अवस्तुत्वे नैरात्म्यवाद-प्रसङ्गः, वस्तुत्वे आत्मनो विकारित्वादनित्यत्वप्रसङ्गो विकारित्वे च पुनर्विकृताविकृतात्मनोर्भेदात् प्रतिसन्धानानुपपत्तिः। न हि अन्येनानुभूतमन्येन प्रतिसन्धीयते। विकृतस्यानन्यवत्त्वे त्वनित्यत्वदोषः स्यादेव। अभ्युपम्यापि संकोचविकासौ अनियता-परिमाणतां च न निस्तारः। तथाहि मोक्षावस्थायां शरीराभावात् किंपरिमाणः स्यात्? अशरीरभावो मोक्ष उच्यते। न च यच्छरीरात् मोक्षस्तच्छरीरपरिमाण एव नित्य आत्मा तत्र स्वीक्रियते इति वाच्यम्, तद्वत् तत्पूर्वयोरपि आद्यमध्यमयोर्जीव-परिमाणयोर्नित्यत्वप्रसङ्गात्, तथा चैकशरीरपरिणामितैव स्यात्। एवञ्च पूर्वावस्थायां ततो महति शरीरे व्याप्तिः ह्रस्वे वा सम्मानं न स्यात्। यदि च मोक्षावस्थायां जीवस्य शरीरपरिमाणमनपेक्ष्य नियतपरिमाणता स्वीक्रियेत, तदापि स एव दोषः। अपि च तदा अविशेषेण सर्वदैव अणुर्वा महान् वा स्यात्। न शरीरपरिमाणः स्यात्।

किञ्च, शरीरपरिमाणतायां महत्त्वादिबोधिकाः श्रुतयो बाधिता भवेयुः। स एष आ नखाग्रेभ्यः प्रविष्ट इति श्रुतिस्तु न शरीरपरिमाणतां प्रतिपादयितुं प्रवृत्ता; अपि तु आ नखाग्रं तस्योपलब्धत्वप्रतिपादनापरेति शरीरपरिमाणवादोऽसंगतः। एवमन्या अपि मध्यमपरिमाणबोधिकाः श्रुतयः औपाधिकपरिच्छेदमितस्य व्यवहारसिद्धस्यात्मनोऽनुवादिका, न तु जीवात्मनोऽपरिच्छिन्नस्य परिच्छेदवादिन्य इति। प्रत्याक्षिप्तश्चायं जैनानां देहपरिमाणवादो भगवत्पादैः श्रीशङ्कराचार्यैः—'एवञ्चात्माऽकार्त्स्न्यम्" (२-२-३४) न पर्यायादप्यविरोधो विकारादिभ्यः (२-२-३५) अन्त्यावस्थितेश्चोभय-नित्यत्वादविशेषः (२-२-३६) जीवात्मनोऽणुत्ववादिन इति सूत्रेषु भाष्ये संगिरन्ते—

उत्क्रान्तिगत्यागतिश्रुतयो जीवस्य परिच्छेदं प्रापयन्ति। न हि अपरिच्छिन्नस्य व्यापकस्य तस्य उत्क्रान्त्यादयः सम्भवन्ति। सिद्धे परिच्छेदे प्रत्याख्याते च मध्यम-परिमाणत्वे, अणुपरिमाण एव जीव इति गम्यते। श्रुतयस्तु ताः सन्ति। "स यदा अस्माच्छरीरादुत्क्रामति सहैवैते उत्क्रामन्ति" (कौषीत० ३।३)" "ये वै केचन अस्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" (कौ० १।२) "तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे" (बृ० ४-४-६) एताभिः श्रुतिभिरुत्क्रान्त्यादयः स्पष्टमेव जीवस्य प्रतीयन्ते। तत्रोत्क्रमणं मरणं तावदचलतोऽपि जीवस्य देहस्वाम्यनिवृत्त्योपपद्यते, तथापि गत्यागतो तु अमध्यमपरिमाणस्य तस्याणुत्वे सत्येव उपपद्येयाताम्, नान्यथा।

न च "स वा एष महानज आत्मा" इत्याद्या महत्त्वबोधिकाः श्रुतयो जीवस्याणुत्वे उपरुध्येरन्निति वाच्यम्, तासां श्रुतीनां परमात्मपरिमाणबोधकत्वात् परमात्माधिकार एव पठितत्वात्।

अपि च, साक्षादेव जीवस्याणुत्वं श्रूयते—"एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश" (मु० ३।१।९) अत्र प्राणसम्बन्धा जीवात्मैव गम्यते, न परमात्मा। उन्मानेनापि जीवस्याणुत्वं गम्यते—बालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेयः (श्वे० ५।८) आ राग्रमात्रो ह्यवरोऽपि दृष्टः (श्वे० ५।८) तस्मादणुरात्मा। न चाणुत्वे तस्य शरीरव्यापित्वाभावात् सर्वाङ्गीणशैत्याद्युपलब्धिर्न स्यादिति वाच्यम्, चन्दनबिन्दुवत्तथासम्भवात्। यथा शरीरैकदेशस्थश्चन्दनबिन्दुः सकलशरीरव्यापिनमाह्लादं जनयति, तथा अणुरात्मा एकदेशस्थोऽपि सकलदेह व्यापिनीं शैत्याद्युपलब्धिं करिष्यति। "हृदि एष आत्मा" (प्रश्न० ३।६) "स वा एष आत्मा हृदि" (बृ० ४।३।७) इत्यादिश्रुतिभ्यो हृदि अवस्थानमणोरात्मनो गम्यते।

यदि च सावयवस्य चन्दनबिन्दोरणुसञ्चारेण देहव्याप्तिः सम्भवति, न तु निरवयवस्य जीवात्मन तथा सम्भवतीत्युच्यते, तदा मणिदोपकवत्तथा व्याप्तिसम्भवो द्रष्टव्यः। तथा हि, यथा मणिदीपादिः प्रकोष्ठैकदेशवर्त्ती अपि स्वगुणप्रभाद्वारा सर्वं वेश्माभिव्याप्य तिष्ठति, तथैव हृदिस्थोऽपि अणुरात्मा स्वगुणेन चैतन्येन सकलशरीरमभिव्याप्य तिष्ठति। एवञ्च धर्मिभूतज्ञानस्य जीवात्मन एकदेशस्थत्वेऽपि अणुत्वेऽपि तस्य धर्मभूतस्य ज्ञानस्य चैतन्यस्य सकलशरीरव्यापित्वं स्वीक्रियते।

न च गुणिव्यतिरेकेण गुणस्यान्यत्र वृत्तिः कथं स्यात्, न हि पटस्य शुक्लो गुणः पटव्यतिरेकेणान्यत्र वर्तमानो दृश्यते इति वाच्यम्, व्यतिरेकस्य गन्धवद् द्रष्टव्यत्वात्। यथा गुणस्यापि गन्धस्य गन्धवद्द्रव्यव्यतिरेकेण वृत्तिर्भवति, तथा अणोरपि सतो जीवस्य व्यतिरेकेण चैतन्यगुणस्य वृत्तिर्भविष्यति। एवञ्च सति गुणो नाश्रयविश्लेषयुक्तो गुणत्वाद् रूपादिवदिति न युक्तमनुमानं गन्धे व्यभिचारात्।

न च जीवात्मनश्चैतन्यगुणत्वे विवादः, श्रुत्या सिद्धत्वात्, अहं ज्ञानवानित्यनुभवाच्च। श्रुतिस्तावत् चैतन्यं गुणं जीवस्य निर्दिशति "न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते" "तदेषां प्राणानां विज्ञानेन विज्ञानमादाय" (बृ० २-१-१७) समस्तशरीरव्यापित्वमपि चैतन्येन गुणेन जोवात्मनो निर्दिशति श्रुतिः—"आलोक्य आ नखाग्रेभ्यः" (छा० ८-८-१)। भेदोऽपि तावत् चैतन्यस्य गुणस्य आत्मन उपदिशति श्रुतिः। विज्ञातुर्विज्ञातेरिति द्रष्टुर्दृष्टेरिति। एवमात्मा अस्तुरिति सिद्धम्। स चानेको ज्ञानगुण इति च। अत्रोच्यते—नेदं मतं श्रौतं युक्तञ्च दोषशतसमावृतत्वात्। तथाहि, "नान्योऽतोऽस्ति द्रष्टा श्रोता मन्ता विज्ञाता" (बृ० ३-७-२३) "एकमेवाद्वितीयम्" (छा० ६-२-१) "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" (बृ० ४-४-१९) "यदा ह्येवैष एतस्मिन्नुदरे दहरमन्तरं कुरुते अथ तस्य भयं भवति" (तै० २-७-१) इत्यादिश्रुतिशतैः

षड्भिस्तात्पर्यलिङ्गोपेतैरनुपचरितार्थैर्जीवात्मपरमात्मनोऽभेदो बोध्यते। "नेह नानास्ति किञ्चन" (बृ० ४-४-१९) "अतोऽन्यदार्त (बृ० ३-४-२) मित्यादिश्रुतिभिश्च उभयोर्भेदश्च निषिध्यते।

"उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा" (ब्र० वि० १२) "एक एव तु भूतात्मा भूते भूते व्यवस्थितः" (ब्र० वि० १२) "एको देवः सर्वभूतेषु गूढः" (श्वे० ६।११) इत्यादिश्रुतिभिश्च जीवात्मपरमात्मनोरौपाधिको भेदो व्यवहारसिद्धो बोध्यते। तत्रैवं सति जीवब्रह्मणोरैक्यं भेदश्चोपाधिप्रतीत इत्यबाधितप्रतीतिर्मन्तव्या। एवञ्च यावता ब्रह्मणा तावता जीवेनापि भवितव्यम्। व्यापकं चेद् ब्रह्म तदभिन्नो जीवोऽपि व्यापक इति साक्षादेव च महत्त्वमस्य श्रूयते—

"स वा एष महानज आत्मा" "महतो महीयान्" "सर्वगतश्च नित्यः"। निषेधति चाणुत्वं श्रुतिः "अस्थूलमनण्वह्रस्वमदीर्घम्" (बृ० ३-८-८) न च पर एवात्मा बोध्यते एताभिरिति युक्तम्, जीवब्रह्मणोरभेदात्।

न च साक्षात् अणुत्वबोधिका श्रुतय उपरुध्येरन् इति वाच्यम्, तासां श्रुतीनां बुद्ध्याद्युपाधिगुणेनाणुत्वव्यपदेशे तात्पर्यस्यावधारणात्। श्रूयते च—"बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रोऽह्यवरोऽपि दृष्टः" अत्र बुद्धिगुणेन आत्मगुणेन = शरीरगुणेन वा आराग्रमात्रतां दर्शयति। अथवा बुद्धिगुणेन तदधर्माध्यासेनाराग्रमात्रताम् अणुत्वम्, आत्मगुणेन देहधर्माध्यासेन च अवरतां परिच्छिन्नतां दर्शयति श्रुतिः, न तु स्वेनैव अणुर्वा ब्रह्मणोऽवरो वा जीव इति। एवञ्चाणुत्वं ब्रह्मभेदश्चेत्युभयमौपाधिकमेव। स्वतोऽपरिच्छिन्नस्यैकस्य व्यापकस्यात्मनो बुद्ध्यादिगुणोपाधिवशाद् घटमणिकमल्लिकादिवशादाकाशस्येव परिच्छिन्नत्वादिव्यपदेशः सिध्यति, अथवा अवरोऽपि न विद्यते वरः श्रेष्ठः परः यस्मात् स असावपरिच्छिन्नोऽपि बुध्यादिगुणोपाधिना दृष्टो व्यपदिश्यते इत्यर्थः। अत एव श्रूयते—

बालाग्रशतभागस्य शतधा कल्पितस्य च।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ इति।

अत्र स्वतोव्यापकस्य वालाग्रशतभागशतधा कल्पितस्येत्युक्तम्। न तु स्वत एव तथा। कल्पना चोपाधिभिरेव भवति। स्फुटमेव श्रुत्या कल्पिताणुत्वमुच्यते जीवस्य। ननु कथं कल्पनमिति चेत् आनन्त्याय, अनन्तभावं ब्रह्मात्मतां प्राप्तुमित्यर्थः। परमार्थतः स्वतोऽनन्तस्यापि जीवस्य आनन्त्यावाप्तिः ग्रैवेयकादौ सर्पादिभ्रान्तिनिरासाद् ग्रैवेयकादिप्राप्तिवदबोध्या। अन्यथा परमार्थतोऽणोरात्मनः कथमनन्तत्वप्राप्तिः स्यात्।

न च भगवत्प्रपत्तिरेवाणोरपि जीवस्यानन्त्यप्राप्तिरिति वाच्यम्, तथा सति भावप्रधाननिर्देशोऽसंगतः स्यात्, अनन्तं प्राप्नुयादित्युच्येत। न चानन्त्याय अविनाशाये-त्यर्थोऽत्र युक्तः, जीवस्यापि अविनाशित्वात्, श्रुतेरनुवादकत्वप्रसङ्गात्। यदि च पूर्वो-क्तरीत्या प्राप्तिप्रापणमेवात्र बोध्यते अविनाशित्वस्येत्युच्यते तदा आनन्त्येत्यस्यापरिच्छि-न्नत्वाय महत्त्वायेत्यर्थोऽपि मदुक्तो युक्त एव। महत्त्वबोधकश्रुत्यनुरोधात्। न चानन्त्यमे-वौपचारिकम्। उपपादितञ्चैतद् औपाधिकमणुत्वं जीवात्मनः श्रीशङ्करभगवत्पादैः "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्" (ब्र० २।३।२९) इति सूत्रे भाष्ये। तथाहि— तस्याः बुद्धेर्गुणाः सुखदुःखादयः सारः प्रधानं यस्यात्मनस्तत्त्वात् तद्व्यपदेशः कर्तृत्व-सुखित्वदुःखित्वादिव्यपदेशो न तु विभोरात्मनः स्वगुणेन।

एवञ्च सति बुद्धिगुणेनैव परिच्छिन्नवदाभासमानस्यात्मन उत्क्रान्त्यादयोऽपि सुतरामुपपद्यन्ते। यथा घटे नीयमाने तदवच्छिन्नाकाशोऽनीयमानोऽपि तथा व्यपदेश-भाक्, तथा बुद्ध्यादिलिङ्गस्य उत्क्रमणे गतौ आगतौ वा अपरिच्छिन्नस्यापि जीवात्मन उत्क्रान्त्यादिव्यपदेशः। यावदात्मदर्शनं बुद्ध्यादिगुणयोगस्य सत्त्वात् जीवस्य संसारित्वं न निवर्तते। आत्मनिश्चयात्तु निवर्तते। स च बुद्धियोगः सुषुप्तिप्रलययोः शक्त्यात्मना सन्नपि निद्रादिप्रतिबन्धनात् नाभिव्यज्यते प्रबोधे प्रसवे चाभिव्यज्यते पुंस्त्वादिवत्। बुद्धिरन्तःकरणम्। अदृष्टपरिपाककादाचित्कत्वात् शक्तिप्रतिबन्धाद् वा विभोरप्या-त्मनोऽन्तःकरणस्य नित्यं सन्निधानेऽपि न नित्योपलब्ध्यनुपलब्धी प्रसज्येते।

न चान्तःकरणमेव तर्हि व्यर्थम्, इन्द्रियविषयात्मसन्निधानाद् वस्तूपलब्धिः, असन्निधानात् शक्तिप्रतिबन्धाद् वा अनुपलब्धिरुपपन्नेति वाच्यम्, श्रुतियुक्तिभिरन्तः-करणस्योपपन्नत्वात् प्रामाणिकत्वाच्च। तथाहि आत्मनोऽविक्रियत्वात् शक्तिप्रतिबन्धो न युज्यते। निर्धर्मकत्वाच्चात्मनः शक्तिरूपधर्मस्याभावात्। नापीन्द्रियस्य शक्तिप्रति-बन्धो युक्तः, न हि तस्य पूर्वोत्तरयोः क्षणयोः अप्रतिबद्धशक्तिकस्याकस्याच्छक्तिप्रति-बन्धो युज्यते। तस्माद् विषयेन्द्रियादिसंनिधानेऽपि यस्यावधानानवधानाभ्यामुपलब्धिरनु-पलब्धिश्च भवतः, तन्मनोऽवश्यमभ्युपगन्तव्यम्। अनभ्युपगते हि मनसि युगपदनेकोप-लब्धिरपि प्रसज्येत। श्रुतिरपि मनःसद्भावं वदन्ती तस्य प्रतीन्द्रियमुपयोगं निर्वक्ति "मनसा ह्येव पश्यति मनसा शृणोति" (बृ० १।५।३)।

किञ्च, विषयेन्द्रियात्मनां योगे सति असति मनसि नित्यमेवोपलब्धिरनुपलब्धिर्वा स्यात्, न च भवति। तस्मान्मनोऽवश्यमभ्युपगन्तव्यम्। आत्मनोऽणुत्ववादिनाप्यन्तः-करणं स्वीकर्तव्यमेव युगपदनेकज्ञानान्यथानुपपत्त्या नित्योपलब्ध्यनुपलब्ध्यन्यथानुपपत्त्या

च । एवञ्च तद्‌गुणमादायैवोत्क्रान्त्यादीनामुपपत्तौ जीवात्मनोऽणुत्वे न किञ्चित् प्रमाणम् । न च साक्षादेव स्वशब्देन अणुरेष आत्मेत्यादिरूपेण श्रुतत्वात् कथमप्रामाणिकमात्मनोऽणुत्वमिति वाच्यम्, अत्रापि बुद्धिगुणयोगादेवात्मा अणुत्वेन व्यपदिश्यते, न स्वतोऽणुरस्ति । अन्यथा जीवात्मपरमात्मनोरभेदात् परमात्मनोऽपि अणुत्वापत्तिः स्यात् ।

अपि च स्वशब्देन श्रुतत्वादेवाणुत्वमुच्यते चेत् परमात्मनोऽपि अणुत्वमापद्येत, तस्यापि स्वशब्देनाणुत्वश्रुतेः । श्रूयते हि परमात्मप्रकरणे "स य एषोऽणिमा ऐतदात्म्यमिदं सर्वम्" "एष मे आत्मा अणीयान्" "व्रीहेर्वा यवाद् वा" (छा० ३-१४-३) किञ्च अङ्गुष्ठमात्रत्वस्यापि श्रुतत्वात् परमात्मनः तत्त्वापत्तिः स्यात् । अतस्तत्र यदि वा विभुत्वोपपत्तय उक्तश्रुतेरौपाधिकाणुत्वपरकत्वमाश्रीयते; तर्हि प्रकृतेऽप्युपाधिवशादेव जीवस्याप्यणुत्वश्रुतिरुपपन्नेति युक्तम् । एवञ्च सति जीवस्य विभुत्वबोधिकाः श्रुतयोऽप्युपपन्ना भवेयुः, अभेदश्चोभयोरिष्ट एव, "एक एव तु भूतात्मा भूते भूते व्यवस्थितः" "क्षेत्रज्ञञ्चापि मां विद्धि सर्वक्षेत्रेषु भारत" इत्यादिश्रुतिस्मृतिसमुदयात् । तस्मादेकस्यैव सर्वगतस्य निरवयवस्य चेतनस्याखण्डस्य विज्ञानरूपस्यात्मनोऽङ्गीकार उपाधिना सर्वव्यवहारोपपत्तेर्जीवस्य पृथक् परमार्थसत्ता नाङ्गीकर्त्तव्या नान्योऽस्ति द्रष्टा श्रोता मन्ता विज्ञातेति श्रुत्या परमात्मनोऽतिरिक्तस्य द्रष्टुः श्रोतुरभावबोधनात् । उपाधिपरिच्छेदादेवात्मन आराग्रमात्रत्वाङ्गुष्ठमात्रत्वयवश्यामाकमात्रत्वाणुत्वादिपरिच्छिन्नपरिमाणत्वव्यपदेशोऽन्यथा स्वशब्देन साक्षात् श्रुत्या परमार्थतोऽनेकपरिमाणतात्मनः प्रसज्येत ।

किञ्च, अयुक्तोऽपि जीवाणुत्ववादः । तथाहि, तस्याणुत्वे सकलशरीरव्यापिवेदना नोपपद्येत, सकलशरीरव्याप्त्यभावात् । ननु सकलशरीरव्यापित्वक्सम्बन्धादुपपद्यते इति चेत्तर्ह्येकदेशे कण्ठकतोदनेऽपि सकलशरीरगतवेदना प्रसज्येत । न च मन्दाकिनी सहित्वावगाहनजन्यसर्वशरीरव्यापिशैत्योपलब्धिवत् कण्ठकतोदने सर्वव्यापिवेदनाऽनुभूयते । चन्दनबिन्दुवद् दृष्टान्तोऽपि विषमः । चन्दनस्य सावयवत्वादवयवसञ्चारेण कथञ्चिद् व्याप्तिसम्भवेऽपि निरवयवस्यात्मनस्तथाऽसम्भवान्नहि जीवात्मनः सावयवत्वे प्रमाणमस्ति । तथा सति तस्यानित्यत्वादुत्पत्तिविनाशौ ध्रुवं प्रसज्येयाताम् ।

न चोत्पत्तिविनाशौ श्रूयते तस्य । "नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः" (२।३।१७) इति सूत्रे तदुत्पत्तिराक्षिप्ता । अविकृत एवात्मा अन्तःकरणोपाधिपरिवेशाज्जीवत्वमापन्न इति युक्तम् । शरीरैकदेशवर्त्ती चन्दनगन्धो गुणः सर्वशरीरव्यापीति न युक्तम् । न हि गुणो गुणिनं विहायान्यत्र सम्भवति । अन्यथा घटरूपमपि घटव्यतिरेकेणोपलभ्येत ।

यदि गुणो गुणिनं विहाय वर्तेत, गुणत्वमेव जह्यात्। किञ्च गुणे क्रियाया अभावात् तस्य गमनं नोपपद्यते। तस्मात् सूक्ष्मत्वादननुभूयमानरूपः चन्दनाणुरेव सर्वशरीरं व्याप्नोतीति मन्तव्यम्। न चैवं चन्दनस्य प्रक्षयः स्यादिति वाच्यम्, अदृष्टवशात् तदवयवपूरणात्।

प्रदीपप्रभावदिति दृष्टान्तोऽपि न युज्यते। नहि प्रदीपस्य प्रभा गुणः; अपि तु द्रव्यमेव तत्। सा संकोचविकासशालिनी प्रभा प्रदीपाद् निबिडावयवतेजसो भिन्नमेव द्रव्यं प्रविरलावयवं तेजो न गुणः। न च तथापि दृष्टान्तता युज्येतेति वाच्यम्, दार्ष्टान्ते तथाऽसम्भवात्। नहि जीवस्य चैतन्यं गुणः, चैतन्यस्य जीवरूपत्वात्। नहि चैतन्यं जीवाद् भिन्नमस्ति। न च जीवस्य ज्ञानरूपत्वे नहि विज्ञातुर्विज्ञातेर्विपरिलोप इत्यादि श्रुतिविरोध इति वाच्यम्, तस्या अपि श्रुतेर्बुद्धिगुणमादायैवोपपत्तेः। प्रतिबोधविदितं मतमित्यादिना प्रतिवृत्तिचैतन्योपलब्धेः प्रतिपादितत्वात्। किञ्च, विज्ञातुर्विज्ञातेरित्यत्र विज्ञात्रभिन्नविज्ञातेर्विज्ञात्यभिन्नविज्ञातुरिति वार्थस्य सम्भवात्। 'राहोः शिरः' इत्यादिवद्भेदेऽपि षष्ठीश्रवणात्।

किञ्चात्मनोऽणुत्वे तत्तदिन्द्रिययुक्तमनसा सह तत्तद्विषयेषु शीघ्रगमनशालित्वं मन्तव्यमन्यथा नेत्रेषु संयुक्तः श्रोत्रयोः संयोगाभावाच्छब्दोपलब्धिर्न स्यात्। गमनशालित्वे च चलत्वादनित्यत्वापत्तिः स्यात्। हृदिस्थत्वे तस्य सर्वेन्द्रियविषयादिसंयोगाभावाद्रूपादेरनुपलब्धिप्रसङ्गात्। गुणव्याप्तिपक्षस्य निरस्तत्वात् तस्मात् प्राज्ञस्य परमात्मनोऽणुमात्रत्वव्रीहियवमात्रत्वादेः प्राणमयत्वमनोमयत्वादेश्चोपपत्तिर्यथोपाधिभेदात् क्रियते। एवं जीवात्मनोऽप्यणुत्वादिव्यपदेशोऽन्तःकरणोपाधिमादायैव क्रियताम्। जीवस्याणुत्वपक्षो न श्रुतिसम्मतो न वा युक्तिसिद्धः। स चायमात्मा नित्यः सर्वगतः शुद्धबुद्धमुक्तस्वरूपः परब्रह्मरूपैकरसः श्रुतिषु श्रुतो मनसा विशुद्धेन मतो नीरन्ध्रमणिमयूखवदखण्डवृत्त्या गृहीतो विमुक्तये भवति। सा च वृत्तिः "अहं ब्रह्मास्मि, अहं ब्रह्मास्मि" इति शम्।

सत्कार्यवादसमीक्षा

श्रीएन्० आर्० कृष्णताताचार्यः
नव्यन्यायाध्यक्षः,
सदाशिवकेन्द्रीयसंस्कृतविद्यापीठम्
पुरी, ओडिसा

❀ ❀ ❀

आचार्यपादैः सूक्ष्मदृष्ट्या यद्यपि बहवो विषया अनुगृहीतास्सन्ति तत्तद्ग्रन्थेषु, तथापि तेष्वेकैकस्यापि विषयस्य पर्वतात्मकत्वाद् यत्किञ्चिदेकं सत्कार्यवादात्मकं विषयमधिकृत्यात्मानं कृतार्थयितुं निबन्धोऽयं प्रस्तूयतेऽस्माभिः ।

सदेव कार्यं भवति न त्वसदिति सत्कार्यशब्दार्थः सामान्यतः सर्वसिद्धान्तिनामभिमतः । तत्र कार्यत्वेन दर्शनात्पूर्वमसतः कार्यस्योत्पत्तिः कारणान्न भवति; किन्तु कारणे सूक्ष्मरूपेण सतः कार्यस्यैव कारकव्यापारेणाभिव्यक्तिर्भवतीति सत्कार्यत्वव्यपदेश इति सांख्याः ।

एकस्यैव वस्तुनः कारणत्वावस्था कार्यत्वावस्था चेति द्वेधा अवस्थायाः स्वीकारात् तादृशावस्थाद्वयविशिष्टवतो व्यक्तेरेकत्वेन सत्कार्यत्वमिति विशिष्टाद्वैतिनः । अर्थादवस्थाद्वयवतो वस्तुन एकत्वाद् असतः कार्यत्वावस्थाविशिष्टस्य कार्यात्मकवस्तुनोऽनङ्गीकारात् सत्कार्यत्वव्यवहार इत्याकूतम् । अवस्थामात्रस्यैवोत्पत्तिरिष्यते, न तु व्यक्तेरिति भावः । कारणव्यक्तिभिन्नायाः कार्यव्यक्तेरभावात् सत्कार्यत्वमित्याशयः ।

कारणभिन्नस्य सर्वस्यैव वस्तुजातस्य मिथ्यात्वादसतः कार्यस्योत्पत्तेरसंभवेन कारणादभिन्नमेव कार्यं भवति व्यावहारिकम्, न तु परमार्थत इति कार्यकारणयोरेकत्वेन सत्कार्यत्वमित्यद्वैतिनः ।

सांख्योक्तसत्कार्यवादनिरूपणम्—

तदिह प्रथमं सांख्योक्तसत्कार्यवादः प्रस्तूयते ।

"असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् ।
शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम्" ॥

इति सांख्यकारिकायां पञ्चभिर्हेतुभिः सत्कार्यवादो न्यरूपि ।

अयमाशयः—असदकरणादित्यस्य सदितरकरणादृष्टेरित्यर्थः। ततश्च कारकव्यापारादूर्ध्वमिव प्रागपि घटादिकार्यमस्तीति सत्कार्यव्यवहारो युज्यते। न ह्यसत् खपुष्पादि क्रियते, किन्तु सत एव घटस्य कारणादभिव्यक्तिः। यद्यत्र कारकव्यापारात् प्रागसतो घटस्यैवोत्पत्तिर्नेष्यते खपुष्पादिरूपतुच्छपदार्थस्य च सर्वदाऽसत्त्वेन तस्योत्पत्तिर्न संभवतीति नात्र खपुष्पादितुल्यतयाऽनुपपत्तिप्रतिपादनं युक्तमित्युच्येत, तदा कदाचिदसतः घटादेस्सर्वदा सत्त्वापत्तिः, सत्त्वासत्त्वयोरेकत्र विरोधात्। इत्थञ्च घटादेस्सर्वदैव सत्त्वस्वभाववत्त्वात् कारकव्यापारादूर्ध्वमिव पूर्वमपि कार्यमस्तीत्येवाभ्युपगन्तव्यमित्याशयः।

ननु न वयं खपुष्पादिवदसत्वभावं विकारजातमिति वदामः, अपि तु 'सन्घटः' 'असन्घटः' इत्यादिव्यवहारान्यथानुपपत्त्या सदसत्त्वे विकारजातस्य धर्मौ तौ च स्वकारणाधीनलब्धजन्मतया कदाचिदेव भवत इत्यङ्गीकुर्महे। तथा च यथा घटे पाकात् पूर्वं श्यामता पाकानन्तरञ्च रक्तता तथोत्पत्तेः प्राग्घटस्याऽसत्वं धर्मः पश्चाच्च तस्य सत्वं धर्म इति न सत्कार्यवादसिद्धिरिति चेन्न, धर्मिसत्त्वं विना धर्मसत्वस्यानुपपन्नतया कारकव्यापारात्पूर्वमपि धर्मिसत्ताया अवश्याभ्युपगन्तव्यतयोत्पत्तेः पूर्वमपि कार्यस्य सत्त्वं स्थितमिति न भवदभिमतं कार्यस्यासत्त्वं सिद्ध्यतीति भावः। किञ्च सत एव पदार्थस्य कारणेनाभिव्यक्तिरुपपन्ना। यथा पीडनेन तिलेषु तैलस्य, अवघातेन धान्येषु तण्डुलानाम्, दोहनेन च सौरभेयोषु पयसः, एवञ्च सदितरस्यासत उत्पत्तेरदर्शनादसदकरणादिति हेतुना सत्कार्यवादस्सिद्ध्यति। उपादानग्रहणादिति हेतुनापि सत्कार्यवादः साध्यते। उपादानशब्देन प्रधानकारणान्यभिधीयन्ते। ग्रहणमित्यनेन तेषां सम्बन्धोऽभिधीयते। सम्बन्धश्च कारणानां कार्येण साकम्। स च सम्बन्धः सत एव कार्यस्य भवति, न त्वसतः तस्मात् सत्कार्यवादः सुगमः।

इतश्च सर्वसंभवाभावादित्यनेनापि सत्कार्यवादस्सिद्ध्यति। तथाहि—तन्तुभ्यः पट एव जायते, न घटः। एवं कपालाद्घट एवोत्पद्यते, न तु पट इति नियमोऽनुभूयते। तत्र कारणं स्वासंबद्धमसत्कार्यमप्युत्पादयतीत्यभ्युपगम्यते चेत् तदाऽसंबद्धत्वविशेष्यात् कपालादपि पटोत्पत्तिस्तन्तुभ्यो घटोत्पत्तिश्च भवतु, न तथा भवति। तस्मात् सर्वस्मात्सर्वसंभवाभावात् कार्यविशेषसंबद्धकारणादेव तत्कार्योत्पत्तेर्दर्शनाच्च सत्कार्यवादो नापह्नोतुं शक्यः।

कपालस्य पटेन सह सम्बन्धाभावेऽपि पटोत्पादकत्वशक्तेस्तत्राभावादेव कपालेन पटोत्पत्यभावस्य घट एव जन्यते इति व्यवस्थायाश्च निर्वोढुं शक्यत्वेन न तत्र व्यवस्थोपपत्यर्थं सत्कार्यवादस्स्वीकर्तव्य इत्याक्षेपस्तु शक्तस्य शक्यकरणादिति हेतुना परिह्रियते।

अयमाशयः—यश्च कपालस्य घटोत्पादकत्वशक्तिरेवास्ति, न पटोत्पादकत्वशक्तिरिति शक्तिविशेषः प्रत्यपादि, सोऽपि कारणनिष्ठः कार्यसंबद्धो वाऽसंबद्धो वा ? प्रथमपक्षे (संबद्धत्वे) नासता सम्बन्ध इति सत्कार्यम्। असंबद्धत्वे सैवाव्यवस्था स्यात्। तस्माद् घटोत्पादकत्वशक्तेनैव कपालेन घटोत्पत्तेर्दर्शनाद् घटरूपकार्यसंबद्धमेव कपालरूपकारणं घटोत्पादकशक्तिमदिति शक्तस्य शक्यकरणादिति हेतुनापि सत्कार्यवादो निराबाधः।

एवं कार्यस्य कारणात्मकत्वादिति लिङ्गेनापि कार्यं सदिति ब्रूमः। कारणात्मकत्वादित्यस्य कारणाभिन्नत्वादित्यर्थः। कार्यस्य कारणाभिन्नत्वञ्च पटतन्त्वभिन्नस्तद्धर्मत्वादित्यनुमानेन साध्यते। अत्र च व्याप्तिः—यद् यतो भिद्यते, न तत्तस्य धर्मः इति। यथा गौरश्वस्येति दृष्टान्तः। प्रकृते पटस्य तन्तुधर्मत्वेन तन्त्वभिन्नतया तन्तोश्च कारकव्यापारात् प्रागपि सत्त्वेन तत्र पटरूपकार्यसत्वस्याप्यवर्जनीयतया कार्यस्य कारणाभिन्नत्वादपि सत्कार्यवादस्सिद्ध्यति। इत्थमत्र सांख्योक्तसत्कार्यवादः प्रादर्शि। अथ सांख्योक्तसत्कार्यवादसाधकहेतुषु पौनरुक्त्यादिशङ्का निरस्यते।

असदकरणादित्यादिहेतुषु पौनरुक्त्यादिशङ्कापरिहारः—

असदकरणादित्यनेनासतः पदार्थस्योत्पत्त्यभावदर्शनादित्यर्थस्य प्रतीतिर्भवति। तेन कार्येण संबद्धं सदेव कारणं कार्योत्पादनायालं न त्वसंबद्धमित्यर्थः फलितो भवति। ततश्च निरुक्तार्थस्यैवोपादानग्रहणादिति हेतुनापि बोधनात् कथमसदकरणादिति हेतुभिन्नतयोपादानग्रहणादिति हेतोरुपन्यासस्संभवति, अर्थाविशेषे पौनरुक्त्यापातादिति। एवमुपादानग्रहणादिति हेतुना यादृशोऽर्थोलब्धः, स एवार्थः सर्वसंभवाभावादिति हेतुनापि प्रतिपाद्यते, सर्वस्मात् सर्वोत्पत्तिर्न दृश्यते; किन्तु यत्र यत् कार्यं येन संबद्धं भवति, तदेव तत्र तत्कार्योत्पत्तौ कारणं न त्वसंबद्धमिति खलु तदर्थः।

एवं सर्वसंभवाभावादित्यनेनैव सर्वस्य सर्वोत्पादकशक्तिमत्त्वं नास्ति, अन्यथा सर्वस्मात् सर्वोत्पत्त्यापत्तिस्स्यादिति रीत्या शक्तस्य शक्यकरणादिति हेत्वर्थस्यापि लाभात्, तत्रापि पौनरुक्त्यं स्यादिति कथमत्र विभिन्नतया हेतूनुपन्यस्याचार्यैस्सत्कार्यवादः स्थाप्यत इति। अत्र वाचस्पतिमिश्रा इत्थं समाधानमन्वग्रहीषुः।

"एकैकस्यापि हेतोरसिद्धिशङ्कापरिहारार्थमग्रिमहेतूनामुपन्यासः" इति। अयमाशयः—कार्यं कारकव्यापारात् प्राक् सद् असदकरणादित्यनुमितिः। तत्र यथा पर्वतोऽग्निमान् धूमादित्यत्र धूमोऽस्तु, अग्निर्मास्त्विति शङ्कायां यदि वह्निर्न स्यात्, तर्हि धूमोऽपि न स्यादिति तर्कप्रयोगः साध्यासिद्धिशङ्कापरिहाराय क्रियते। तद्वदेव

प्रकृतेऽप्यसत उत्पत्त्यभावेऽपि कारकव्यापारात्प्राक् कारणे 'कार्यस्य सत्त्वं मास्तु' इत्याशङ्कायां सत्यां तत्परिहारायोपादानग्रहणादित्युक्तम्, तेन च कार्यसंबद्धस्यैव कारणस्य कार्योत्पादकत्वदृष्टेः कार्यस्य पूर्वमसत्त्वे तन्न युज्यत इति तर्केण परिहार-लाभात् तदर्थमुपादानग्रहणादिति हेतोरुपन्याससम्भवेन नात्र पौनरुक्त्यं शङ्कितुं शक्यम्। एवमुपादानग्रहणादित्यत्रापि तन्त्वादिरूपकारणाद् घटोत्पत्त्यभ्युगमे किं बाधकं तन्तुभ्यः पट एव जायते, इत्यत्र च किं विनिगमकमिति द्विविधजिज्ञासाया अपि पूरणार्थं सर्व-संभवाभावाच्छक्तस्य शक्यकरणादिति च हेतुद्वयमुपन्यस्तम्। तत्र सर्वसंभवाभावा-दित्यनेन बाधकम्प्रादर्शि। यतो हि तन्तुभ्योऽपि घटोत्पत्यभ्युपगमे सर्वस्मात् सर्वोत्पत्या-पत्तिः, तदभ्युपगमे च कार्यविशेषं प्रति कारणविशेषः कारणमिति व्यवस्थितकार्य-कारणव्यवहारविलयप्रसङ्ग इति बाधकं स्यात्। एवं तन्तुभ्यः पट एवोत्पद्यत इति विषये शक्तस्य शक्यकरणादित्यनेन विनिगमकमुपन्यस्तम्। तेन तन्तूनामेव पटोत्पाद-कत्वशक्तिसत्वादिति कथनाद्विनिगमकसिद्धिः।

किञ्च, असदकरणादिति व्यतिरेकमुखेन हेतुरुपन्यस्तः। यतो ह्यसतः करणा-भावदर्शनादित्येव तच्छब्दार्थत्वात्। उपादानग्रहणादिति हेतुस्त्वन्वयमुखेन प्रत्यपादि। एवं सर्वसंभवाभावादिति हेतुस्तु व्यतिरेकित्वेन शक्तस्य शक्यकरणादिति त्वन्वय-रूपेणेति तत्रापि वैलक्षण्यं दृश्यते। इत्थञ्चान्वयप्रयोगे व्यतिरेकप्रयोगे चार्थभेदस्य स्फुटत्वेन न पौनरुक्त्यशङ्कागन्धलेशस्संभवतीति पञ्चभिरपि हेतुभिस्सत्कार्यवादो निराबाधतया सिद्ध्यतीति सांख्याचार्याणां परमाभिप्रायः।

सांख्योक्तसत्कार्यवादे दूषणप्रतिपादनपूर्वकं विशिष्टाद्वैतवेदान्त्यभिमत-सत्कार्यवादनिरूपणम्—

अत्र विशिष्टाद्वैतिनः प्रत्यवतिष्ठन्ते। यदुक्तं कारकव्यापारात्प्रागसतो घटादेरु-त्पत्यभ्युपगमे सत्त्वासत्त्वयोरेकत्र विरोधेन कदाचिदसत्त्वं कदाचित्सत्त्वञ्च कार्यस्येत्यङ्गी-कर्तुमशक्यत्वेन कारणे सतः कार्यस्यैव कारकव्यापारेणाभिव्यक्तिर्भवतीत्यसदकरणादि-त्यनेन सत्कार्यवादस्सिद्ध्यतीति तत्रेदं विचार्यते। लोके कारकव्यापारजन्यस्येव पदार्थस्य कार्यत्वेनानुभवो वर्तते। तत्रभवद्भिः पृथुबुध्नोदराद्याकारं कार्यमपि नित्यपदार्थवत्पूर्वमेव वर्तत इत्यभ्युपगम्यते चेत् तदाऽनुभवविरोधः। किञ्च भवत्पक्षे कार्यकारणयोरभेदात् कारणभिन्नस्य कार्यस्य कारकव्यापारेणाभिव्यक्तिर्भवतीति कथनमप्यसमञ्जसम्। एवम् "अष्टौ प्रकृतयष्षोडशविकाराः" इत्यादिना प्रतिपादितस्य प्रकृतिविकृतिविभाग-स्यापि भङ्गापत्तिः प्रकृतेरेव सर्वकारणत्वेन सर्वस्यापि कार्यवर्गस्य तदभिन्नतया

भवत्पक्षे विभागानुपपत्तेः। अतोऽत्र कारणाद्भिन्नत्वेन दृष्टं कार्यं तेनाकारेण पूर्वं नासीदिति त्वयैवाकामेनापि स्वीकर्तव्यम्, नहि घटाकारेण निष्पन्नं वस्तु पुनरपि दण्डादिनिष्पाद्यं भवितुमर्हति। अपि च यत्कार्यम तद् व्यङ्ग्यम, यच्च कारकं तदेव व्यञ्जकमित्यपि न वक्तुं शक्यते। तथा सति घटादिव्यक्तिसामग्र्यैव मृत्पण्डादिरूपकारणगतानां कारकादीनामप्यभिव्यक्त्यापत्तिः; घटाद्यभिव्यक्तिं प्रति सामग्री दण्डः चक्रभ्रमणमित्यादिकं तादृशसामग्र्या घटादेरेवाभिव्यक्तिर्भवदभिमता, न तु मृत्पिण्डगतकरकादीनामिति वस्तुस्थितिः। परन्तु कारकाणामभिव्यञ्जकानां तथा कार्यकारणयोश्चाभिन्नत्वाङ्गीकारे घटाद्यभिव्यक्तिसामग्र्यैव मृत्पिण्डगतकरकादीनामप्यभिव्यक्त्यापत्तिः।

इतश्च सत्कार्यमिति प्रतिज्ञायां सत्त्वमात्रे साध्ये सिद्धसाधनं दोषः, कार्य सत्त्वमात्रस्योभयवादिसंप्रतिपन्नत्वात्। यदि कारकव्यापारात् प्राक् सत्कार्यमित्युच्येत, तदा कारकव्यापारात्प्राक्क्षणे कार्यं सदित्यर्थो लभ्यते। तेन कारकव्यापारशून्यकालेऽपि कार्यमस्तीत्युक्तं स्यात्, तथा च सति कारकव्यापारस्यासत्त्वमङ्गीकृतं स्यात्, तथात्र स्ववचनविरोधः, यतो हि कारकव्यापारस्यापि कार्यत्वेन तस्य पूर्वमसत्त्वाभ्युपगमेऽसत्कार्यवाद एवोक्तः स्यात्, न तु सत्कार्यवाद इति। इत्थञ्चासदकरणादिति हेतुरसिद्धः। एवमुपादानग्रहणादित्यनेन यत्कारणं कार्येण संबद्धम, तदेव कारणं भवितुमर्हतीति सत्कार्यवादस्सिद्ध्यतीति। तदपि न सुन्दरम्। किमनुभवबलादेवमुच्यते ? उताव्यवस्थाभयाद् वा ?

नाद्यः, कारणानां मिथःप्राप्तिवदनन्यथासिद्धनियतपूर्वभावित्वरूपकारणत्वातिरिक्तस्य कार्योत्पत्तेः प्राक्कारणे कार्यसंबन्धस्य कुत्राप्यदर्शनात्। किञ्च, न केवलमनुभवाभावः, अपि तु व्यभिचारोऽपि भवति, रज्जुघटयोः परस्परं संबन्धसत्त्वेऽपि जन्यजनकभावत्वादर्शनात्। तत्र यद्युभयोर्नित्यसंबन्धो नास्ति, अतो न जन्यजनकभाव इत्युच्येत, तदा प्रकृतेऽपि घटं प्रति निमित्तकारणभूतस्य कुलालस्य नित्यसंबन्धाभावातुल्यत्वेन जन्यजनकभावानुपपत्तिस्स्यात्, अस्ति तु जन्यजनकभावः।

न द्वितीयः, अनुभवविरोधात्। अनुभवश्च कार्यरहित (असंबद्ध) कपालरूपकारणसत्त्वे घटा एवोपद्यते, न पटः। एवं तन्तुसत्त्वे पट एवेति। तत्र तत्तद्वस्तुनः (कारणात्मकस्य) स्वभावस्यैव व्यवस्थापकत्वोपपत्तेर्नात्राव्यवस्था भयमूलकतया कार्यसंबद्धस्यैव कारणत्वमिति वादस्सङ्गच्छते। एवञ्चोपादानग्रहणादिति हेतुनापि न सत्कार्यवादस्सिद्ध्यति।

इतश्च "सर्वसंभवाभावात्" इत्यनेनापि न सत्कार्यवादस्साधयितुं शक्यते। उपदर्शितरीत्या तिलादिकारणपदार्थानां तैलादिकार्योत्पत्तौ तत्तत्स्वभावस्यैव नियामकत्व-

मभ्युपगम्य निर्वाहसंभवेन दृष्टस्य तिलादेः कारणत्वं विहायादृष्टायास्तन्निष्ठशक्तेः कारणत्वकल्पनञ्च कृत्वा तिलस्यैव तैलोत्पादकशक्तिमत्वात्तदन्यस्य च वस्तुनस्तदशक्तत्वादिति न सर्वस्मात् सर्वोत्पत्तिसंभव इति कथनं महते गौरवाय भवति। एवं निमित्तकारणीभूतपदार्थानां कार्योत्पादनशक्तिरस्ति न वा ? नास्ति चेत्, कथं तत्कार्यं प्रति निमित्तत्वमितरेषां वा कथमतन्निमित्तत्त्वम्। अस्ति चेत् सा किंरूपा ? यदि कार्यस्य सूक्ष्मावस्थैव तत्र शक्तिपदवाच्येत्युच्येत, तदा भवतां सिद्धान्तम् उपादानभूतप्रकृतावेव सूक्ष्मकार्यसत्वस्याङ्गीकारादपसिद्धान्तापत्तिर्निमित्तकारणे तदनभ्युपगमात्। अतोऽत्र शक्तस्य शक्यकरणादित्यनेनापि न सत्कार्यवादसिद्धिः।

एवं पटस्तन्त्वभिन्नस्तद्धर्मत्वादित्यनुमानेन कार्यकारणयोरभेदसिद्धेः कार्यस्य कारणात्मकत्वादिति हेतुना सत्कार्यवादस्सिद्धयतीति यद् भणितम्, तदपि न मनोरमम्। अश्वभिन्नत्वाद् गोरश्वधर्मत्वं न संभवति, तन्तुपटयोस्तु न तथा, पटस्य तन्तुधर्मत्वादिति गवाश्वदृष्टान्तेन कार्यकारणयोरभेदस्सिद्धयतीति खलु भवतामभिप्रायः। स च न संगच्छते; उपदर्शितानुमानस्य व्याप्त्याद्यभावेनासिद्धेः। अत्र पटस्तन्तुभ्यो न भिद्यत इति प्रतिज्ञा तद्धर्मत्वादिति हेतुरनयोर्विरोधो भवति। कुतः ? घटत्वं समवायसंबन्धेन घटवृत्तिधर्मं इति सर्वानुमतः। परन्तु तादृशघटत्वरूपो धर्मो न घटाभिन्नस्तत्र तद्धर्मस्य घटत्वस्य घटभिन्नत्वेनैवानुभवदर्शनादिति तद्धर्मत्वरूपहेतोस्तद्भिन्नत्वरूपविपरीतसाध्यं प्रत्येव साधकतया प्रतिज्ञाहेतोर्विरोधस्स्पष्टः। किञ्च यत्र यत्र तद्धर्मत्वं तत्र तत्र तदभिन्नत्वमित्यन्वयव्याप्तिः। उत यद् यतो भिद्यते न तत् तस्य धर्म इति व्यतिरेकव्याप्तिर्वा ? न प्रथमः। दृष्टान्तस्य वक्तुमशक्यत्वात्; प्रत्युत तद्धर्मत्वयोरेव दृष्टान्तस्य सत्त्वात्, तदभावे च व्याप्त्यसिद्धेः। न द्वितीयः। यद् यतो भिद्यते, न तत्तस्य धर्म इति व्यतिरेकव्याप्तिर्वक्तव्या। परन्तु तन्तुषु तन्त्वभेदस्य सर्वमतसिद्धतया तत्र तन्तुधर्मत्वरूपहेतोरभावेन तद्धर्मत्वरूपहेतोस्तन्त्वात्मकसपक्षव्यावृत्ततया केवलव्यतिरेकित्वायोगात्।

अयमाशयः--पृथिवी तावदितरेभ्यो भिद्यते गन्धवत्वादित्यत्र केवलव्यतिरेकिलिङ्गकानुमितिरिति व्यवह्रियते। तत्र पृथिव्यां जलादि पदार्थभेदो गन्धवत्वहेतुना साध्यते। व्याप्तिस्तु यत्र यत्र गन्धवत्वाभावस्तत्र तत्रेतरभेदाभावः (जलादिपदार्थभेदाभावः) यथा जलमिति व्यतिरेकव्याप्तिः। परन्तु तादृशस्थले पक्षविपक्षयोरेवानुभवो वर्तते, न तु निश्चितसाध्यवत्वरूपसपक्षस्य। यतो हि तत्र जलादिपदार्थे विपक्षः पक्षस्तु पृथिवी सपक्षस्तु न विद्यते। यदि स्यात्तदान्वयव्याप्तिरेव स्यात्। तस्मात् केवलव्यतिरेकिस्थले प्रायस्सपक्षाभावदर्शनात्प्रकृते पटस्तन्तुभ्यो न भिद्यते, तद्धर्मत्वादित्यत्र तन्तुषु तन्त्वभेदसत्वेन निश्चितसाध्यवत्वलक्षणसपक्षत्वसम्भवेन तद्धर्मत्वरूपहेतोः केवलव्यतिरेकित्वा-

योगात्। किञ्च प्रकृते तन्तुरूपसपक्षे तन्तुधर्मत्वरूपतद्धर्मत्वहेतोरसत्त्वेन तस्य सपक्षव्यावृत्तत्वम्, तथा विपक्षे तन्त्वभेदाभावरूपसाध्याभाववति घटादावपि तन्तुधर्मत्वरूपतद्धर्मत्वहेतोरविद्यमानत्वेन विपक्षव्यावृत्तत्वञ्चास्तीति सर्वसपक्षविपक्षव्यावृत्तत्वरूपासाधारणदोषाक्रान्ततया नात्र तद्धर्मत्वरूपहेतुना पटादौ तन्त्वभेदस्साधयितुं शक्यते।

इत्थञ्चोपदर्शितरीत्या कार्यकारणयोरभेदसाधकानुमानस्य दुष्टतया न तेनाभेदस्सिद्धयतीति सांख्योक्तसत्कार्यवादो न स्वारसिक इति विशिष्टाद्वैतिनामभिसन्धिः। इतोऽपि बहुपराक्रान्तमस्ति तत्त्वमुक्ताकलापादिग्रन्थेषु सांख्योक्तसत्कार्यवाददूषणविषये। परन्तु ग्रन्थविस्तरभिया तत् सर्वं नेह वितन्यते। विशिष्टाद्वैतिभिरेकस्यैव वस्तुनोऽवस्थाद्वयाङ्गीकारान्न सांख्यवत् तत्पक्षेऽनुपपत्तिः। तथाहि मृद्रूपकारणस्यैव कारणत्वावस्था कार्यत्वावस्था चेति द्वेधाऽवस्था स्वीक्रियते। तत्र पिण्डत्वाद्यवस्थाकारणत्वावस्थाशब्देन व्यपदिश्यते। पृथुबुध्नोदराद्याकारत्वावस्थाकार्यत्वावस्थाशब्देन व्यवह्रियते। अवस्थायाश्चोत्पत्तिरभ्युपगम्यते। परन्तु तादृशावस्थाद्वयवतः पदार्थस्यैकत्वेन सत्कार्यवादत्वव्यपदेशः। अर्थादवस्थाया आगन्तुकत्वेऽपि तदाश्रयस्यैकत्वेन कार्यकारणयोरभेदव्यवहारो भवति। तेन च सत्कार्यवादस्सिद्धयतीत्याशयः।

इत्थञ्च यथा सांख्यैः पृथुबुध्नोदराद्याकारविशिष्टं कार्यमेव कारणे सूक्ष्मतया पूर्वमस्ति, तस्यैव च कारकव्यापारादभिव्यक्तिर्भवतीति प्रत्यपादि, न तथैभिः प्रतिपाद्यते। तस्मादत्र सांख्यपक्षोक्तदूषणानां नावकाशः। किञ्च, सांख्याः केवलेनानुमानेन सत्कार्यवादं साधयन्ति, एते तु वेदमूलकत्वेनैवेत्यप्यस्य पक्षस्य वैशिष्ट्यम्। अपि च, ईदृशसत्कार्यवादस्वीकारेऽनुभवविरोधोऽपि नैव वक्तुं शक्यते। यथा 'एकः पुरुषः' इत्यत्र पुरुषे बाल्यत्वावस्थायाः स्थविरत्वावस्थायाश्च भिन्नत्वेऽपि तादृशावस्थाभेदेन पुरुषभेदानुभवाभावादेकत्वव्यवहारो दृश्यते, तथैव कारणनिष्ठावस्थाया भिन्नत्वेऽप्यवस्थाश्रयस्यैकत्वेन कार्यकारणयोरभेदोपपत्तेस्सत्कार्यवादत्वव्यवहारो युज्यत इति वैदिकमतावलम्बिनां परमाभिप्रायः। अत्र "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुतिः सत्कार्यवादानुकूलेत्यभिप्रायः।

अयं भावः—आरभ्यते आलभ्यते स्पृश्यत इत्यारम्भणम्, कृत्यल्युटो बहुलमिति कर्मणि ल्युट्। **वाचा**—वाक्पूर्वकेन व्यवहारेण हेतुनेत्यर्थः। विकारः—पृथुबुध्नोदरत्वादिलक्षणः संस्थानविशेषः। नामधेयम्-घट इत्यादि। मृत्तिकेत्येव सत्यम्-घटाद्यपि मृत्तिकाद्रव्यमित्येवोपलभ्यते प्रमाणेनानेनेति। तथा चोदकाहरणादिव्यवहारस्य घटेनोदकमाहरेत्यादि वाक्पूर्वकत्वात्तादृशव्यवहारविशेषसिद्धयर्थं मृद्द्रव्यमेव घटादिनामधेयान्तरसंस्था-

नान्तरभाग्भवतीति घटाद्यपि मृत्तिकाद्रव्यमित्येव प्रमाणेनोपलभ्यते, न तु द्रव्यान्तरत्वेनेति समुदितार्थलाभादनया श्रुत्या वस्तुनोऽवस्थामाधारीकृत्य सत्कार्यवादस्सिद्धयतीति विशिष्टाद्वैतवेदान्तिनां निगूढाभिसन्धिः । अयमर्थः श्रीभाष्ये प्रपञ्चितो वर्तते ।

सत्कार्यवादे नैयायिकोक्तदूषणं तत्परिहारश्च

(वेदान्त्यभिमत) सत्कार्यवादो न साधीयानित्यभिप्रयन्ति नैयायिकाः । तेषामयमाक्षेपः । एकस्यैव कारणस्य कपालादेर्द्वेधावस्था भवति, किन्तु कारणभिन्नं कार्यं नाङ्गीक्रियते, व्यक्तेरेकत्वादित्युच्येत, तदा कपालादिविषयककारणबुद्धयैव घटादिरूपकार्यस्यापि बोधापत्तिः, न तथाऽनुभूयतेऽस्माभिः । कपालविषयकबुद्धया तस्यैव बोधो न घटस्य घटविषयकबुद्धया तु घटबोधो भवति । एवञ्च कार्यकारणयोर्विलक्षणबुद्धिबोध्यत्वदर्शनान्न तयोरभेदस्सिद्धयति, तदभावे च न सत्कार्यवादस्स्यात् ।

एवं कार्यकारणयोरनन्यत्वाभ्युपगमे तदा तन्तुरूपकारणे तन्तुशब्दप्रयोगः पटरूपकार्ये च पटशब्दप्रयोगश्च न घटते. उभयोरभिन्नत्वे न भिन्नभिन्नशब्दप्रयोगासंभवात्, दृश्यते तु शब्दभेदः, नहि तन्तवः पट इत्युच्यन्ते, पटो वा तन्तव इति तस्माच्छब्दभेदहेतुनापि कार्यकारणयोरन्यत्वस्येव सिद्धया नात्र अनन्यत्वप्रयुक्तस्सत्कार्यवादस्सिद्धयति ।

किञ्च घटरूपकार्येणोदकाहरणं क्रियते मृत्पिण्डरूपकारणेन तु कुड्यं निर्मीयत इति कार्यकारणयोः प्रतिनियततया कार्यभेदो दृश्यते । यद्यत्र कार्यकारणयोरनन्यत्वमिष्यते चेत् तदा मृत्पिण्डेनाप्युदकाहरणापत्तिः, घटेन कुड्यनिर्माणापत्तिश्च स्यात्, अस्ति तु नियमः । इत्थञ्च कार्यकारणयोर्व्यवस्थितकार्यभेदादपि नानन्यत्वं सिद्धयतीति सत्कार्यवादासिद्धिः ।

एवं कार्यनियतपूर्वकालवृत्ति यत् तत्कारणं भवति, यश्च तादृशकारणजन्यस्तदनन्तरकालिकश्च भवति, स एव कार्यशब्देन व्यपदिश्यते । इत्थञ्च कार्यकारणयोरनन्यत्वाङ्गीकारे कालभेदानुपपत्तिस्स्यात्, दृश्यते तु कालभेदः । तस्मात् कालभेदादपि कार्यकारणयोरनन्यत्वप्रयुक्तस्सत्कार्यवादो न युज्यते । अथाकारभेदादप्यसत्कार्यवादं साधयामः । तथाहि यद्घटादिकं कार्यं तत्पृथुबुध्नोदराद्याकारमस्ति, यच्च मृत्पिण्डादि तत्पिण्डाद्याकारमस्ति, तत्र यदेव कारणं तदेव कार्यमित्युयते चेत् तदा द्वयोरभिन्नत्वेनाकारभेदानुपपत्तिः । आकारभेदस्तु दृश्यते । इत्थञ्च कार्यकारणयोराकारभेदेनाप्यनन्यत्वस्य वक्तुमशक्यतया नात्र सत्कार्यवादस्सुवचः । किञ्च, सत्यामेव मृदि घटो नष्ट इति व्यवह्रियते, यद्यत्र कार्यकारणयोरनन्यत्वम्, तदाऽयं व्यवहारो नोपपद्यते, कार्यस्य

कारणाभिन्नतया कार्यभिन्नकारणस्य सत्त्वात्। यदि भेद इष्यते चेत्कार्यकारणयोस्तदा नेयमनुपपत्तिः, मृदः कार्यः स्वरूपत्वाभावात् तद्भिन्नस्य घटस्य नाशविषयत्वव्यवहारे बाधकाभावात्। अतश्च व्यवहारानुपपत्यापि सत्कार्यवादोऽनादरणीयः।

एवं बहवस्तन्तव एकः पट इति प्रतीतिभ्यां कारणगतसंख्यायां: कार्यगतसंख्ययाश्च भेददर्शनादपि न कार्यकारणयोरभेदस्सिद्ध्यति, तदभावे च सत्कार्यवादासिद्धिः।

इत्थं कारकव्यापारवैयर्थ्यादपि न सत्कार्यवादस्साधीयान्। घटादिकार्यं न कपालादिभिः क्रियते, असदकरणादित्युच्येत तदा दण्डचक्रभ्रमणादिरूपकारकव्यापारस्य वैयर्थ्यापत्तिः, एतादृशव्यापारेण कार्यस्य साध्यत्वाभावात्, पूर्वत एव सत्त्वाभ्युपगमात्। पूर्वमसत्कार्यं कारणैरेवोत्पद्यत इत्यङ्गीक्रियते चेन्नेयमनुपपत्तिः, कार्येत्युपयोगितया कारकव्यापाराणां सकलत्वोपपत्तेः। एवञ्च कारकव्यापारवैयर्थ्यादपि न सत्कार्यवादो हृदयङ्गमः।

किञ्च, कार्यकारणयोरनन्यत्वपक्षे नित्यानित्यपदार्थविभागोऽपि न घटते। यज्जन्यं तदनित्यम्, यच्चाजन्यं तन्नित्यमिति च सामान्यतो व्यवहारो दृश्यते। तत्र घटादिकार्याणां कपालादिकारणजन्यत्वादनित्यम् आकाशादिपदार्थविशेषाणाञ्च किञ्चित्कारणाजन्यत्वान्नित्यत्वञ्चेति सर्वसंप्रतिपन्नम्। यद्यत्र घटादिकार्यवर्गस्यापि कारणजन्यत्वमनभ्युपगम्य कार्यकारणयोरभिन्नत्वेन सर्वदा वृत्तित्वं स्वीक्रियते, तदा घटादिरूपस्यानित्यकार्यस्यापि सदातनत्वरूपनित्यत्वापत्त्या पदार्थेषु नित्यानित्यविभागोऽपि न स्यात्। इत्थञ्च नित्यानित्यविभागस्यानुभवसिद्धत्वेन तदनुपपत्त्यापि न कार्यकारणयोरनन्यत्वप्रयुक्तस्सत्कार्यवादस्सिद्ध्यति। अथ कार्यं पूर्वं सत्वेऽपि कारणव्यापारेणैव तस्याभिव्यक्तेरभ्युपगमात् तादृशाभिव्यञ्जकतया कारकव्यापारस्य प्रयोजनवत्त्वोपपत्तेर्न तस्य वैयर्थ्यम्, न वा नित्यानित्यविभागानुपपत्तिरिति चेन्न, किमत्राभिव्यक्तिरुत्पद्यते? उत साप्यभिव्यज्यते वा? कार्यवत्। नाद्य., उत्पत्तिवादाभ्युपगमे, तस्याः पूर्वमसत्त्वेनासत्कार्यवादप्रसङ्गः। यद्यत्राभिव्यक्तेरप्यभिव्यक्तिरेवेति द्वितीयपक्ष आश्रीयते चेत् तदाऽनवस्थादोषः। कुतः? यश्चाभिव्यक्त्यभिव्यञ्जकस्तस्याप्यभिव्यक्तिः पुनश्च तस्याप्यभिव्यक्तिरित्यनवस्था परम्परा स्यात्। इत्थञ्चानवस्थादोषादपि कार्यस्याभिव्यक्तेरसम्भवादुत्पत्तिरेवाङ्गीकार्येति सत्कार्यवादसिद्धिस्तदवस्थैवेति नैयायिकानामाक्षेपः।

अत्र वेदान्तिन इत्थं समादधिरे—यदुक्तं तन्तुमृत्पिण्डादिविषयकबुद्ध्यपेक्षया पटघटादिविषयकबुद्धेराकारवैलक्षण्यमानुभाविकं नहि तन्तुषु पट इति बुद्धिः पटे वा तन्तुरिति बुद्धिर्जायते। तथात्रोक्ततर्कसहकृतेन—पटादयस्तन्त्वादिभिन्नतन्त्वाद्यविषयक-

प्रतीतिविषयत्वाद् घटादिवदित्यनुमानेन पटादिषु तन्त्वादिकारणभेदसिद्धिरिति न कार्यकारणयोरनन्यत्वप्रयुक्तस्सत्कार्यंवादस्सिद्ध्यतीति। तत्रेदं वदामः—अस्माभिरवयवातिरिक्तावयविनोऽनभ्युपगमात्तन्तुसंयोगविशेषविशिष्टानामेव पटत्वाच्च पटविषयकप्रतीतेस्तन्त्वविषयकत्वासिद्ध्या तन्त्वाद्यविषयकप्रतीतिविषयत्वरूपहेतोर्मतद्वयसिद्धत्वाभावेनान्यतरासिद्धेः। किञ्च तन्त्वाद्यविषयकप्रतीतिविषयत्वमित्यनेन तन्तुत्वेन तन्तुत्वावच्छिन्नाविषयकप्रतीतिविषयत्वरूपार्थलाभेन तन्तुत्वावच्छिन्नाविषयकप्रतीतिरित्यनेन प्रमेयत्वेन प्रमेयविषयकप्रतीतिमादाय तादृशप्रमेयत्वावछिन्नविषयकप्रतीतिविषयत्वस्य तन्तुषु सत्त्वेन तत्र तन्तुभेदरूपसाध्याभावाद्व्यभिचारदोषोऽपि स्यात्। तन्तोरपि प्रमेयत्वेन प्रमेयत्वावच्छिन्नविषयकप्रतीतिविषयत्वन्तस्यापि संभवतीत्याकूतम्। तथा च कारणत्वावस्थाविशिष्टस्यैव कारणसामान्यस्य कार्यत्वावस्थाविशिष्टवेषेणाभेदाभ्युपगमान्नात्र विलक्षणबुद्धिबोध्यत्वहेतुना सत्कार्यवादासिद्धिश्शक्यते वक्तुम्। एवं शब्दभेदहेतुरप्यसिद्धः। पटादिशब्दानामस्माभिस्संयोगविशेषविशिष्टतन्त्वादिवाचकताया एवाङ्गीकारात्। तन्तुत्वाद्यवछिन्नावाचकशब्दवाच्यत्वं तु तादृशप्रमेयादिशब्दवाच्येषु तन्तुषु व्यभिचरितम्।

एवं बहवस्तन्तवः एकः पट इति प्रतीतिव्यवहारयोरपि बहूनि धान्यानि, एको धान्यराशिरिति प्रतीतिव्यवहारयोरिवोपपत्तिः। तत्र यथैकत्वं बुद्धिविशेषविषयत्वात्मकसमुदायत्वगतमेव विषयः, तथाऽत्राप्यवस्थाविशेषरूपपटत्वगतमेव विषय इत्यङ्गीकारादनुपपत्यभावात्। इत्थञ्च संख्याभेदाद् व्यवहारभेदाच्च नासत्कार्यवादस्साधयितुं शक्यते। एवमेकस्यैव वस्तुनः कालभेदेन कार्यभेदोऽप्युपपद्यते। यतो हि मृद एव घटत्वावस्थायामुदकाहरणसाधकत्वं पिण्डत्वावस्थायाञ्च कुड्यनिर्माणसाधकत्वमिति कालविशेषावच्छेदेन सुलभतया नात्र कार्यभेदात् सत्कार्यवादसिद्धिः। यथा बाल्यकत्वावस्थाविशिष्टेन पुरुषेणाल्पपरिमाणविशिष्टं स्तोकगुरुत्ववच्च वस्तु गृह्यते, तेनैव युवत्वकालावच्छेदेन तद्विपरीतं गृह्यते, धार्यते च तद्वदेव कालभेदेनावस्थाविशेषसद्भावाभ्यामुपपद्यत इति न कश्चिद्दोषः। एवमाकारभेदोऽपि न भेदसाधक उपदर्शितरीत्या तस्यापि कालभेदेनोपपत्तेः।

किञ्च, कार्यकारणयोः पूर्वापरकालवर्तित्वेनानन्यत्वं न संभवतीति यदुक्तम्, तदपि बालिशभाषितम्। तालपत्रेण यत्र ताटङ्को निर्मीयते तत्र ताटङ्कत्वविशिष्टे विद्यमाने पत्रे यथा इदं ताटङ्को भविष्यतीति भविष्यत्वप्रतीतिरुपपद्यते, तथैव तन्तुषु विद्यमानेषु पटत्वावस्थायामिव तद्विशिष्टेऽपि भविष्यत्वप्रतीतेर्निराबाधतया कार्यत्वावस्थाश्रयस्यैकत्वेन पूर्वमपि सत्त्वेन केवलामवस्थामादायैव च प्रतीतेर्नात्र कालभेदहेतुनाऽसत्कार्यवादस्सम्भवति। एवमेव कारकव्यापारवैयर्थ्यादिदोषाणामपि नावकाशस्सम्भवति। अवस्थाया

उत्पत्तिस्वीकारेण तदर्थं कारकव्यापारादीनामावश्यकत्वात्। तत एव नित्यानित्यविभागानुपपत्तिरनवस्था वा न संभवति। तदेतत्सर्वमभिप्रेत्य विशिष्टाद्वैतसिद्धान्तस्थापकैः श्रीनिगमान्तमहादेशिकैरनुगृहीतं न्यायसिद्धाञ्जने— "अवयविनोऽस्माभिरनभ्युपगमाद् वुद्धिशब्दसंख्याकार्यादिभेदस्यावयव्यारम्भकतया भवदभिमतावस्थान्तरमात्रेण निर्वाहात्" इत्यादिना ग्रन्थेन। इत्थञ्च कार्यत्वावस्थाश्रयस्य कारणत्वावस्थाश्रयस्य चैकत्वेन सत्कार्यवादसिद्धिरिति विशिष्टाद्वैतिनामाशयः। एवमत्र वेदान्त्यभिमतसत्कार्यवादो नैयायिकोक्तदूषणोद्धारपूर्वकं सविमर्शं न्यरूपि। अथाद्वैतसिद्धान्तानुरोधेन सत्कार्यवादः उपस्थाप्यते।

अद्वैतसिद्धान्तानुरोधेन सत्कार्यवादनिरूपणम्—

अद्वैतसिद्धान्तस्थापकाः श्रीभगवच्छङ्करपादाः शाङ्करभाष्ये द्वितीयाध्याये प्रथमपादे आरम्भणाधिकरणे "तदनन्यत्वमारम्भणशब्दादिभ्यः" "भावे चोपलब्धेः" "सत्वाच्चावरस्य" "असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्" "युक्तेश्शब्दान्तराच्च" "पटवच्च" "यथा च प्राणादिः" इति सप्तभिस्सूत्रैश्श्रुतियुक्तिश्चाधारीकृत्य कार्यकारणयोरभिन्नत्वप्रतिपादनमुखेन सत्कार्यवादं प्रसाध्य जगतो ब्रह्मानन्यत्वं स्थापयाम्बभूवुः। तेषामयमाशयः—ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य जगतो व्यावहारिकसत्यत्वमात्राभ्युपगमेन परमार्थतोऽसत्यत्वेन घटपटादिरूपकार्यवर्गे परमार्थतो ब्रह्मभेदस्याभावात् ब्रह्मरूपकारणाभिन्नं जगद् भवति, अर्थाद्ब्रह्मरूपकारणभिन्नस्यैवासत्वात् जगदभेदस्सिद्ध्यतीत्यभिप्रायः। विषयेऽस्मिन् दृष्टान्तापेक्षायां "यथा सौम्यैकेन मृत्पिण्डेन संर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य"मिति श्रुतिमुखेन मृदभिन्नघटो दृष्टान्ततया प्रादर्शि।

अयमर्थः—एकेन कारणभूतेन मृत्पिण्डेन सर्वे घटशरावादि कार्यम्। मृन्मयं मृदात्मकम्। विज्ञातं स्यात्-विदितं भवति। विकारः—घटशरावादिः। नामधेयं—नाममात्रं वस्तुतो नास्तीत्यर्थः। वाचारम्भणं—आरभ्यत इत्यारम्भणं वाङ्मात्रेण केवलमस्तीत्यारभ्यत इत्यर्थः। मृत्तिकेत्येव सत्यमिति—मृद्रूपकारणमात्रं परमार्थः, अन्यश्च घटादिविकारो मिथ्येत्यर्थः। इत्थञ्च परमार्थतो मृद्रूपकारणभिन्नस्य सर्वस्य मिथ्यात्वेन कारणव्यतिरिक्तकार्यस्यैवाभावात् सत्कार्यवादस्सिद्ध्यतीत्याशयः।

अत्रेदं विचार्यते—सांख्योक्तसत्कार्यवादस्याद्वैतिनां सत्कार्यवादस्य च कोऽभेदः? अत्र वदामः। सांख्याः कार्याणां कारणानाञ्च परमार्थतो वृत्तित्वमभ्युपगम्य तयोरभिन्नतया कारकव्यापारात्प्रागपि कारणे कार्यमस्ति, तेन चाभिव्यक्तिर्भवतीति केवलेनानुमानप्रमाणेन साधयन्ति सत्कार्यवादम्।

अद्वैतिनस्तु—अभेदो भेदाभावः, स चैकत्वे पर्यवस्यति। तथा च कारणादन्यस्यैव कार्यस्याभावेनैकत्वरूपाभेदः कारणे सिद्ध्यतीति कार्यकारणयोरनन्यत्वप्रतिपादनमुखेन सत्कार्यवादं समर्थयन्ते। अयञ्च सत्कार्यवाद आगममूलको युक्तिमूलकश्च। तदुक्तं—श्रीशाङ्करभाष्ये—युक्तेश्शब्दान्तराच्चेति सूत्रव्याख्यानावसरे—"युक्तिस्तावद्वर्ण्यते दधि घटरुचकाद्यर्थिभिः प्रतिनियतानि कारणानि क्षीरमृत्तिकासुवर्णादीन्युपादीयमानानि लोके दृश्यन्ते। नहि दध्यर्थिभिर्मृत्तिकोपादीयते, न घटार्थिभिः क्षीरम्, तदसत्कार्यवादे नोपपद्येतेति।

किञ्च, सांख्यवदेभिः कारणे विद्यमानस्य कार्यस्याभिव्यक्तिर्नेष्यते यतो हि शाङ्करभाष्ये कारणे कार्यस्य प्राक्सिद्धत्वपक्षे कारकव्यापारो निरर्थकस्स्यादिति नैयायिकोक्तशङ्कामुद्भाव्य एकस्मिन्नेव देवदत्ते बाल्यत्वयुवत्वाद्यवस्थाभेदसत्त्वेऽपि यथा पुरुषस्यैकत्वम्, तथैव प्रकृतेऽपि मृद्रूपकारणस्यैवागन्तुककार्यत्वावस्थायाः स्वीकारात्तादृशावस्थोत्पादकत्वेन कारकव्यापारस्यावश्यकतया न कारकव्यापारवैयर्थ्यमिति समाहितम्। तथा च भाष्यसन्दर्भः—"यतः कार्याकारेण कारणं व्यवस्थापयतः कारकव्यापारस्यार्थवत्वमुपपद्यते। नहि देवदत्तः सङ्कोचितहस्तपादः प्रसारितहस्तपादश्च विशेषेण दृश्यमानत्वेऽपि वस्त्वन्यत्वं गच्छति, स एवेति प्रत्यभिज्ञानात्। तथा प्रतिदिनमनेकसंस्थानानामपि पित्रादीनां न वस्त्वन्यत्वं भवति, मम पिता मम भ्राता मम पुत्र इति प्रत्यभिज्ञानात्" इति।

एवञ्चैतत् सिद्धं यद् विशिष्टाद्वैतिवदद्वैतिनोऽपि कारण आगन्तुकीमवस्थामभ्युपगम्य सत्कार्यवादं पोषयन्ति; परन्तु विशिष्टाद्वैतिभिरवस्थायाः परमार्थतस्सत्वमभ्युपगम्यते, अद्वैतिभिस्तु व्यावहारिकसत्यत्वमेवेष्यते, नतु परमार्थसत्यत्वम्। तथाऽभेद इत्यस्यैकत्वे पर्यवसानात् कारणभिन्नस्य कार्यस्य वस्तुतोऽभावेन सत्कार्यवादत्वमद्वैतिनां पक्षे कार्यत्वकारणत्वावस्थाश्रयव्यक्तेरेकत्वेन कार्यकारणयोरभिन्नतया सत्कार्यवादत्वं विशिष्टाद्वैतिनां पक्षे त्रिष्वपि मतेषु भेदोऽनुसन्धेयः।

इत्थमस्मिन्निबन्धेऽस्माभिर्मतभेदेन सत्कार्यवादस्वरूपं तत्र युक्तायुक्तत्वं परस्परवैलक्षण्यञ्च यथामति प्रत्यपादि। इतोऽप्यत्र जिज्ञास्यविषयाणां सत्त्वेऽपि सारांशमात्रमुपपाद्यग्रन्थविस्तरभिया खल्वेतावतैवोपरम्यत इति शम्।

शङ्कर-ब्रेडलयोस्तुलनात्मकमध्ययनम्

पं० श्रीवशिष्ठमुनिमिश्रः
संस्कृत-हिन्दी-विद्यापीठम्, झारखण्ड

❀ ❀ ❀

तत्त्वस्यैकत्वमव्यक्त्यादिसापेक्षं भेदं न सहते, बुद्धिभेदात्। तत्त्वैकरूपतां कथं भेत्तुं प्रभवेत् तत्र साधनप्रकारो भिन्नो भवन् नाम, परन्तु तत्राऽपि सामञ्जस्यं सामरस्यं च जायते। सांस्कृतिकपरिवेशो विभिन्नदेशदार्शनिकविचारभेदस्य स्वाभाविकं कारणम्। तथा सत्यपि दृश्यते नु कस्यापि देशकालभेदभिन्नस्य दार्शनिकस्य विभिन्न-देशकालजातेन दार्शनिकेन सह विचारस्यांशतः साम्यम्। इमां चावलोक्य तुलनात्म-दर्शनाध्ययनक्रमे एष सन्देहो विचारपदवीमधिरोहति यत् पूर्वकालोत्पन्नदार्शनिक-विचारेऽनुप्राणितपरवर्तिदार्शनिक इति। अत्रैतिहासिकतथ्यस्य प्रमाणान्तरस्य चापेक्षा नून-मपरिहार्या। एकोनविंशशताब्द्यां भारतीयेन सह इंगलैंडदेशीयानां पारस्परिकं वैचारिकमादानप्रदानमासीत्। अतः शङ्करदर्शनस्य ब्रेडलेदर्शनस्योपरि परिलक्षितं साम्यं हठान्निषेद्धुं शक्यते। अतः शङ्करस्य यो हि सिद्धान्तस्तेन साम्यं ब्रेडलदार्शनिक-सिद्धान्ते वर्तत इति स्वीकर्तव्यम्।

शङ्करस्याद्वैतवादसिद्धान्तो ब्रेडलप्रदर्शितनिरपेक्षवादविचारप्रदर्शनेन साहाय्य-मापद्यत इति निश्चप्रचं वचः श्रूयते। कदाचित् केनचित् पुरुषेण ब्रेडलेमहोदयस्य समीप उक्तं यच्छङ्कराचार्याद्वैतसिद्धान्तस्य प्रभावो भवत्प्रदर्शितसिद्धान्ते वर्तते, तदा तेनोक्तं मया भारतीयाद्वैतवादो नावलोकितः। इमामुक्तिमाश्रित्यैतदेव वक्तुं शक्यते यद् घुणाक्षरन्यायेन शङ्करस्य प्रभावः परिलक्ष्यते। वस्तुतस्तु स्वतन्त्रा तावदुभयोर्वि-चारसरणिः। शङ्करो ब्रेडलेमहोदयश्च निरपेक्षतत्त्वमेव शब्दप्रयोगभेदमाश्रित्य स्वीकुर्वति। शून्यवादिनां मते शून्यस्य यदि चतुष्कोटिविनिर्मुक्तशब्दस्वरूपता, तदा तन्मते मूलं तत्त्वं निरपेक्षमेव। आचार्यः शङ्करः सद्रूपं ब्रह्म स्वीकरोति। तच्च ब्रह्म ब्रेडलेस्वीकृतेन 'ऐवसोल्यूट्' इत्याख्येन परमार्थतत्त्वेन साम्यं वैषम्यं च भजते। परमंशतः साम्यस्य सर्वथा निराकरणं तु सम्भवति। उभयस्वीकृतस्य तत्त्वस्य विहङ्गमदृष्ट्या विवरणमेवादावपेक्षितम्, येन तत्त्वस्वरूपावगत्यानन्तरं मापदण्ड-मवगत्य तत्सम्बन्धिविचारमवधृत्य नूनमेव तच्च साम्यं वैषम्यं वाऽस्ति न वेति वक्तुं शक्यते।

ब्रेडलेमहोदयमतेन सत्यस्य स्वरूपमेतदेव संक्षेपेण वक्तव्यं यद् विधिमुखेन तत्रापूर्णं सामञ्जस्यं निषेधमुखेन च आत्मविरोधहीनत्वमिति[1]। एतावता 'एंवसोल्यूट्' निरपेक्षत्वं स्वरूपतां न व्यभिचरति।

शङ्करमतेऽपि ब्रह्मण एव परमार्थसत्यत्वं विद्यते, तस्य च स्वरूपं विरोधहीनत्वं सामञ्जस्यमेव स्वीकर्तव्यम्। नूनमेव प्रदर्शितेयं विचारप्रक्रिया तावदेकस्यैव तत्त्वस्य रूपद्वयात्मिका। यत्र सामञ्जस्यं तत्र विरोधहीनताऽवश्यमेव भवेत्, उभयोः समानव्याप्तिकत्वात्। एवमेव यत्र विरोधशून्यता तत्र सामञ्जस्यं मन्तव्यमेव। यथा शङ्करेण न्यायसम्मतस्येश्वरस्याधिष्ठातृत्वविचारणायां सम्यगभिहितम्, प्रधानस्य जीवात्मकपुरुषस्य चाधिष्ठातृत्वरूपेण यदि स्वीक्रियते, तदेश्वरः प्रधानपुरुषयोरधिष्ठातृरूपेण जगतः कारणं न भवितुमर्हति, यतः उभयोरधिष्ठातृत्वेन रूपेणेश्वरस्य स्वीकारेऽसामञ्जस्यमपरिहार्यमेव। कीदृशं तदसामञ्जस्यमित्याशङ्क्य हीनमध्यमोत्तमरूपेण विभिन्नप्राणिनामुत्पादके रागद्वेषमोहादिदोषप्रसङ्गात्तत्राप्यनीश्वरत्वमेव प्रसज्येत। यदि प्राणिनां कर्मणामपेक्षां कृत्वा सृष्टौ वैषम्यमपरिहार्यमेव, अतो नास्त्यनीश्वरत्वप्रसङ्गावसरः। एतद्वक्तुं शक्यते यद् यथास्वीकारे विरोधिभावानां परस्परमाघातो नैवापरिहृतो जायते। यतः कर्मणः ईश्वरस्य च प्रवर्त्यप्रवर्तकरूपतायामन्योऽन्याश्रयदोषप्रसङ्गः स्यात्। एतद्दोषपरिहारार्थमीश्वरस्यानादित्वस्वीकारे वैचारिकविरोधसृष्टिः स्यात्, यतो वर्तमानकालस्येवातीतकालेष्वप्यन्योन्याश्रयदोषस्य समानत्वादन्धपरम्परान्यायः प्रसज्यते। विनैव दोषं स्वार्थे परार्थे वा न कोऽपि प्रवर्तते, स्वार्थप्रयुक्तप्रवृत्तः सन्नेव परार्थे प्रवर्तते। स्वार्थमूलिकायामीश्वरप्रवृत्तावनीश्वरत्वप्रसक्तिः कथमिव निराकर्तुं शक्येत्यादि। अतोऽसामञ्जस्यदोषत्वात्तच्छून्यत्वमीश्वरे न भवितुमर्हतीति जगतः कारणत्वं निराकृत्य ब्रह्मण एव संसारं प्रत्यभिन्ननिमित्तोपादनता प्रसाधिता। ईश्वरस्य प्रधानपुरुषयोरधिष्ठातृत्वेन जगत्कारणत्वं नोपपद्यते, कस्मात्? असामञ्जस्यात्। किं पुनरसामञ्जस्यम्? हीनमध्यमोत्तमभावेन हि प्राणिभेदान्विदधत ईश्वरस्य रागद्वेषादिदोषप्रसक्तेरस्मदादिवदनीश्वरत्वं प्रसज्येत। प्राणिकर्मापेक्षितत्वाददोष इति चेत्, न; कर्मेश्वरयोः प्रवर्त्यप्रवर्तयितृत्वे तावदितरेतराश्रयदोषप्रसङ्गात्।

---

1. "The character of real is to Possess everything phenomenal in a harmonious form" (Appearance and Reality, P. 123) "Reality is known to possess a positive character, but this character is at present determined only as that which excludes contradiction. (Idid)

नानात्वादिति चेत्, न; वर्तमानकालवदतीतेष्वपि कालेष्वितरेतराश्रयदोषविशेषादन्धपरम्परान्यायापत्तेः। अपि च "प्रवर्तनालक्षणादोषः" (न्यायसू० १।१।८) इति न्यायवित्समयः। नहि कश्चिद् दोषप्रयुक्तः स्वार्थे परार्थे वा प्रवर्तमानो दृश्यते। स्वार्थप्रयुक्त एव च सर्वो जनः परार्थेऽपि प्रवर्तत इत्येवमप्यसामञ्जस्यम्, स्वार्थवत्त्वादीश्वरस्यानीश्वरत्वप्रसङ्गात्। पुरुषविशेषत्वाभ्युपगमाच्चेश्वरस्य पुरुषस्य चौदासीन्याभ्युपगमादसामञ्जस्यम् (शा० भा० २।२।३७)।

आभासेष्वसामञ्जस्यप्रदर्शनार्थं ब्रेडलेमहोदयः आचार्यशङ्करस्येव सूक्ष्मेक्षिकया तार्किकं विवरणं प्रस्तुतवान्। सम्बन्धादिसामान्येन स्वीकृतविचाराणां पक्षे दोषोद्भावनपूर्वकं तत्रान्तरङ्गविप्रतिपत्तिनिरूपणं कृतवान्। यथा सम्बन्धस्य समस्यामादायोक्तं ब्रेडलेन यत् सम्बन्धः सदोभयनिष्ठो भवति। यथा भारतीयैरुच्यते—सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे द्विष्ठतया विशिष्टबुद्धिनियामकः। अतः संयोगो भवतु, समवायो वा संयोगत्वे गुणरूपत्वं समवायत्वेऽतिरिक्तपदार्थरूपत्वम्। परन्तु विचारे एतद् द्वयमप्यसमीचीनम्, यतः सम्बन्धस्य पदस्य विशेषणत्वे तेन पदस्य सम्बद्धता दूरङ्गता। यदि पदद्वये तस्य सम्बन्धस्य स्थितिः स्वीक्रियतेऽतदाऽपि स एव दोषः। यदि सम्बन्धः पदद्वयस्य समानधर्मो भवेत्, तदा पार्थक्यसम्पादनं कथमिव स्यात्? तथा चास्यां स्थितौ पदद्वयस्य पार्थक्यं नैव भवेत्। यतस्तन्मध्ये वास्तविकपार्थक्यसम्पादकत्वमेव नास्ति। एकात्मके वस्तुनि समवायकल्पनाऽपि न सम्भवति, यतस्तदान्येऽपि बहवो दोषा अहमहमिकया समापतेयुः[1]।

परमाणुकारणतावादखण्डनप्रसङ्गे शंकराचार्यः किञ्चिदंशतो भिन्नयुक्तिक्रमं प्रदर्श्य ब्रेडलेमहोदयानुरूपमेव समवाये संयोगे च विप्रतिपत्तिं प्रदर्श्य स्वविरोधमुपदर्शितवान्। तत्रोक्तम्—समवायोऽन्यपरमाणुषु समवेत इति न भवितुमर्हति, यत उभयोः साम्यमनवस्थितिञ्च विद्यते। यथा परमाणुभिरत्यन्तभिन्नो द्व्यणुकः समवायसम्बन्धेन तत्सम्बद्धो भवति, तथैव समवायोऽपि

१. **(The relation is not the adjective of one term, for, it so, it not relate, nor for the same....apart, for them again there is no relation between them, Nor is the relation their common property for then what keeps them apart? They are now not two terms at all, because not separate. And within this ne.v whole, in any case problem of inherence would break out in an aggravated form. (Appearance and Reality p. 27)**

समवायिभ्योऽत्यन्तं भिन्नोऽपि समवायरूपान्यसम्बन्धेन समवायादिभिः सह समवायोऽपि सम्बद्धः स्यात्। यत उभयोरेवात्यन्तभेदः समान एव, अतस्तत्रत्य-समवायोप्यन्यसमवायस्य कल्पना भवेत्, तथा सत्यनवस्थादोषः प्रसज्येत। यद्युच्येत—एतादृशीं प्रतीतिमादायैव ग्राह्यस्य समवायस्य समवायिभ्यो नित्यसम्बन्धरूपेण गृह्यते, नासम्बन्धो न वान्यसम्बन्धापेक्षः, अतस्तदर्थमन्यसम्बन्धकल्पना न युक्तिसङ्गतेति नानवस्थादोषः।

आचार्यः शङ्करः कथयति—एतत्कथनं प्रलापमात्रमेव, यतस्तथासति संयोगेऽपि संयोगिभिः सह नित्यसम्बन्धरूपेण सम्बन्धः स्यात्। संयोगोऽपि समवायस्येव विनैवान्यसम्बन्धं सम्बद्धो भवेत्। यदि संयोगिभ्यो विभिन्नपदार्थत्वात् संयोगः समवायस्यान्यसम्बन्धमपेक्षते, तदा समवायोऽपि समवायिभ्यो भिन्नपदार्थत्वादन्य-सम्बन्धमपेक्षते एव। संयोगो गुण इति गुणत्वादन्यसम्बन्धमपेक्षते, अगुणत्वादसमवायो नान्यसम्बन्धमपेक्षते—इयमपि युक्तिर्न समीचीना, यत उभयोरप्यपेक्षाकारणस्यार्थात् सम्बन्धिभिन्नता समानैव गुणपरिभाषा तु न सामान्यभूतेत्यन्यशास्त्रदृष्ट्याऽशास्त्रीयैर्वैशेषिकैरेव परिभाषितत्वात्।

अतः समवायस्यान्यपदार्थत्वेन स्वीकर्तॄणां मतेऽनवस्थादोषः स्यादेव—

"द्वाभ्यां चाणुभ्यां द्व्यणुकमुत्पद्यमानमत्यन्तभिन्नमणुभ्यामण्वोः समवैतीत्य-भ्युपगम्यते भवता। न चैवमभ्युपगच्छता शक्यतेऽणुकारणता समर्थयितुम्। कुतः, साम्यादनवस्थितेः। यथैव द्व्यणुभ्यामत्यन्तं भिन्नं सद् द्व्यणुकं समवायलक्षणेन सम्बन्धेन ताभ्यां संबध्यते, एवं समवायोऽपि समवायिभ्योऽत्यन्तभिन्नः सन् समवायलक्षणेनान्येनैव संबन्धेन समवायिभिः सम्बध्येत, अत्यन्यभेदसाम्यात्। ततश्च तस्य तस्यान्योन्यः सम्बन्धः कल्पयितव्य इत्यनवस्थैव प्रसज्येत। नन्विह प्रत्ययग्राह्यः समवायो नित्य-सम्बद्ध एव समवायिभिर्गृह्यते, नासम्बन्धः सम्बन्धान्तरापेक्षो वा। ततश्च न तस्यान्यः संबन्धः कल्पयितव्यः, येनानवस्था प्रसज्येतेति। नेत्युच्यते—संयोगोऽप्येवं सति संयोगिभिर्नित्यसंबद्ध एवेति समवायन्नान्यं सम्बन्धमपेक्षेत। अथार्थान्तरत्वात् संयोगः सम्बन्धान्तरमपेक्षेत, समवायोऽपि तर्ह्यर्थान्तरत्वात् संबन्धान्तरमपेक्षते। न च गुणत्वात् संयोगः सम्बन्धान्तरमपेक्षते। न समवायोऽगुणत्वादिति युज्यते वक्तुम्, अपेक्षाकारणस्य तुल्यत्वात्, गुणपरिभाषायाश्चातमनत्वात्। तस्मादर्थान्तरं समवायमभ्युपगच्छतः प्रसज्येतैवानवस्था। प्रसज्यमानायां चानवस्थायामेकासिद्धौ सर्वासिद्धेर्द्वाभ्यामणुभ्यां द्व्यणुकं नैवोत्पद्येत" (ब्र० शां० भा० २।२।१३)।

सामञ्जस्यं विरोधहीनता च—

एतद् द्वयमपि तत्त्वं शङ्करदृष्ट्या ब्रैडलेदृष्ट्या च मुख्या स्वरूपेण प्रयुक्तो भवति व्यूहापोहात्मकसूक्ष्मदृष्ट्याऽवगम्यते। परन्तु सूक्ष्मेक्षिकयाऽवलोकने त्वेतदस्त्रप्रयोगे त्वोभयोरस्ति भेदः। तात्त्विकविचारवेलायां तत्सिद्धान्तेनैवैतस्याभिव्यक्तिर्जायते। यथा तर्कमहत्त्वमाश्रित्य विचार्यताम्, संस्कृतिविशेषादर्शाभिसन्धितत्त्वं यदि पृथक् क्रियते, तदोभयोर्विचारयोरतिशयसाम्यं परिलक्षितं भवति। तर्कविषये यादृशीशङ्करस्यास्था दृश्यते, तथैव ब्रैडलेमहाशयस्यापि शङ्करः तर्कस्य प्रयोगं व्यवहारविषय एव करोति, अतस्तत्त्वज्ञानवेलायां श्रुतिमेवाभूतां मन्यते, यतस्तत्त्वज्ञानविचारेऽतिरिक्तः प्रामाणिकमार्गो नास्ति, श्रुतिसिद्धस्य तर्केणापि परिपुष्टिर्भवतीति चेत् सम्यगेव, परं तर्कानुसन्धानेन श्रुत्यर्थो नानुसन्धेय इति।

तान्यपि तर्कोपपत्तिभ्यां तत्त्वज्ञानस्योपकुर्वन्तीति चेदुपकुर्वन्तु नाम। 'तत्त्वज्ञानं तु वेदान्तवाक्येभ्य एव भवति (ब्रह्मसूत्रशा० भा० २।१।३)। बुद्धिप्रक्रिया यावत् प्रचलति तावदेवास्ति, नास्तीत्यादिकोटिरूपेण प्रचलति, किन्तु बुद्धेः पूर्वं येषां पदार्थानां स्थितिरस्ति, अर्थाद् बुद्धिमूलभूतवस्तुनि बुद्धेश्चौत्कारेऽसामर्थ्यं स्फुटं परिलक्षितं भवति। तत्र श्रुत्यैव तत्त्वज्ञानं करणीयम्। बुद्धिचिन्तनप्रक्रिया तर्केण च परमेव परं तत्त्वम्, यतश्चिन्तनप्रक्रिया सीमितपरिबद्धा, अतः स्वभावादेवेयं सापेक्षा, सापेक्षपरिधिपरिबद्धा निरपेक्षा न भवति, अत एवोक्तम्—"अचिन्त्याः खलु ये भावा न तांस्तर्केषु योजये" दिति तर्काविषयत्वाद् बुद्धिपरिकल्पिता निरपेक्षत्वं नास्तीति।

आचार्यशङ्करस्य विचारवैशिष्ट्यं बोधितमिदानीं ब्रैडलेमहोदयस्य तर्कविषयिणी धारणाऽभिव्यज्यते। अयमपि वस्तुवादिनामिव तर्कं यथार्थताया परिमापकं नैवाङ्गीकरोति। तदनुसारेण बुद्धिव्यापारस्य मौलिकप्रक्रियात्वेऽप्येतत्त् स्वीकरणीयमेव यदयं व्यापारः सदैव संश्लेषणात्मको विश्लेषणात्मको वा भवति। अत एव सापेक्ष इत्युच्यते। अस्मद्विचारो निर्णयात्मको भवति, अत एव सापेक्ष इत्युच्येत। अस्मद्विचारो निर्णयात्मको भवति, किन्त्वसो कदापि स्वभावेनैकात्मक एव न जायते। उद्देश्यविधेयरूपेण संश्लिष्टनिर्णयात्मकस्य वस्तुनो द्विधा विभागं करोति। तत्रोद्देश्यभूतं तत्त्वं तत् (that) इति शब्देन, इदम् (this) इति शब्देन वा सूचितो भवति, निरपेक्षाधिष्ठानरूपेण स्थितस्य तत्त्वस्य सत्यशब्देन सूचयितुं शक्यते, किन्तु तत्र या प्रकारता निर्दिश्यते, अर्थात् (what) इत्युच्यते, सा सा सम्बन्धनिष्ठेति सापेक्षैव वर्तत इत्यस्ति काऽपि विप्रतिपत्तिरिति। व्यवहारसञ्चालनाय प्रयुक्तप्रकारनिर्णय एवापेक्षित

एको मार्ग इति, यतोऽन्तःकरणकार्यकारिरूपेण बुद्धेरेष एव स्वभावः। बुद्धिः सदैव चिन्तनव्यापारमात्रमाश्रित्य तार्किकप्रक्रियायां प्रवृत्ता भवति, किन्तु सत्यं तु चिन्तनस्य (thinking), संकल्पस्य (willing) एवं भावनायाः (feeling) इत्येवमेकात्मकरूपतामाधत्ते। अत एवाचार्यशङ्करस्येव ब्रैडलेमहाशयोऽपि चिन्तनस्य कार्यकारिव्यवहारदशायामेव सदुपयोगं मन्यते[1]। आचार्यमण्डनो विधिविवेके कथयति "उपनिषदात्मतत्त्वं त्वनपेक्षविध्यन्तराद्वाक्यात् प्रतीयते" (वि० वि० पृ० २८१)।

वाचस्पतिमिश्रेणापि न्यायकणिकायामुक्तम्—विधिनिरपेक्षवेदान्तवाक्यादेवात्मतत्वस्य प्रतीतिर्भवतीति मण्डनमिश्रवाक्यस्य टीकायां वाचस्पतिमिश्रः कथयति—तिस्रः खल्विमाः प्रतिपत्तयः सम्भवन्ति। श्रुतमयी, चिन्तामयी साक्षात्कारवती च। इमास्तिस्रोऽपि प्रतिपत्तयो विधानायोग्याः, अतो वेदान्तवाक्यैर्विधिनिरपेक्षात्मतत्त्वस्य प्रतिपादनं जायते। एतदेव प्रतिपादितम्। "तत्तिसृणामपि प्रतिपत्तीनां विद्यानानर्हत्वादात्मतत्त्वप्रतिपादनपरत्वं हि वेदान्तानामुपपादितम्" (न्यायकणिका पृ० २८१)।

परमेतत्तु मन्तव्यमेव यत् तर्कप्रयोगं विना सांसारिकव्यवहारः सर्वथाऽसम्भव एव भवेत्। अतः आचार्यः शङ्करस्तर्कमपि स्वीकरोति, यतो व्यवहारदशायां तर्कस्य सर्वथोपेक्षा तु न सम्भाव्यते। किञ्च निर्दुष्टतर्कबलेनैव तर्कस्याक्षमत्वम्। अस्मिन् प्रसङ्ग एतत्तु न विस्मर्तव्यं यन्माध्यमिकबौद्धानां तर्क एव शरणम्, तर्कस्य बहुधा बहुविधश्च प्रयोगस्तैरङ्गीकृतं, निरपेक्षताया हानिमाकलय्यैव भावात्मकपक्षं प्रत्यौदासीन्यं तेन सर्वथा चेतसि निश्चितम्, सिद्धान्तप्रकाशने च तत्स्थिरीकृतम्। यद्यपि तर्कस्य भावात्मकता स्वस्वभाववशादेव तत्त्वस्य याथार्थ्यनिरूपणे सर्वथाऽक्षमा, तथापि व्यावहारिकोपादेयता तु तर्कस्य निवारयितुं न शक्यते, तदा कया चेतनया सह तत्त्वज्ञानमभीप्सितम्? अस्य प्रश्नस्योत्तरमाचार्यशङ्करस्य ब्रैडलेमहाशयस्य च सिद्धान्तयोः समानपदवीमधिरोहति। ब्रैडलेमतेन—sentient experience इति संज्ञा वर्तते। चिन्तनस्य सङ्कल्पस्य भावनायाश्चाविभक्ताभिव्यक्तिरेव। इदं च निरपेक्षतत्त्वेन सह तादात्म्यमप्यश्नुते। शङ्करमतेनैतदवगतिरपरोक्षानुभूतिर्वा। इयं च साक्षात् स्वभावस्य भवति। नात्र सन्देहो यदुभयोः प्रतिपादनशैल्यां वर्तते भेदः, परं विषयसाम्यं वर्तत एव। शङ्करमतेनावगतिः परोक्षानुभूतिः सम्यग्ज्ञानं वा वस्तुनिष्ठत्वादेकात्मकरूपतामेव विभर्ति? एतस्य तुलना क्रियताम्—Reality is experience and is one (Ibid P. 425)

---

१. Thought's relation therefore still must depend on what is empirical. (Ibid P. 4-5).

तस्यानुभवस्य सत्येन सह तादात्म्यं जायते—("we have found that reality is one, that it essentially is experience" (Ibid P. 451).

ब्रैडलेमहाशय एतादृशमैकात्म्यं निर्विकल्पानुभूतिश्च सत्येन सहाविच्छेद्यतादात्म्यापन्नं स्वीकरोति। (Experience is already in both worlds, and is one thing with their being. (Ibid. 9).

"सम्यग्ज्ञानमेकरूपम्, वस्तुतन्यत्वात्"। (ब्रह्मसूत्रशां॰ २।१।११)।

एवमेव शङ्करोऽपि बोधेन सह सत्ताया भेदं न मनुते। अस्मिन् प्रसङ्गे हेगलमहोदयस्य कथनमनायासेनैव स्मृतिपथमवतरति—"The real is rational and the rational is real." पूर्वोक्तविश्लेषणं साधारण्येनासम्भवदशापन्नमिवाभाति, किन्त्वेतस्य दर्शनव्याख्यावगतिप्रयासः क्रियते, तदा विप्रतिपत्तेरवकाशावसर एव नास्ति। शङ्करस्य ब्रैडलेमहाशयस्य निरपेक्षतत्त्वं समानमेव, तत्र भेदो न सम्भाव्यते।

सत्तैव बोधो बोध एव च सत्ता (ब्रह्मसूत्र शां॰ भा॰ ३।२।२१)।

अतस्तत्र ज्ञातृज्ञेयभेदः सर्वथाऽसम्भव एव। ब्रैडलेमहानुभावः कथयति—"Anything is absolute when all its nature is contained within itself. It is unconditional when every condition of its being falls inside it". "यदा सर्वे भेदा अस्मिन्नेव तत्त्वे विलयं गच्छन्ति, तदा कथमिव काप्यव्यवस्था भवेत्? एतदेव ज्ञानस्य विषयेण सह सम्यक्त्वम्।" व्यवस्थितार्थविषयत्वोपपत्तेस्तज्जनितस्य ज्ञानस्य सम्भवत्वम्। (ब्रह्मसूत्रशां॰ भा॰ २।१।११) प्रदर्शितहेतुना तत्र भ्रमस्य क्वापि सम्भावना नास्ति, यतः सर्वेषां सम्बद्धभेदानामस्मिन्नेव लयः सम्भूतः "It is free from chance of error when any opposite is quite inconceivable". वस्तुतो ब्रेडलेमहोदयस्यैतत् कथनं शङ्कराचार्यस्य सत्यत्वलक्षणे संघटते। "सत्यत्वं बाधाराहित्यम्"। तदेव बाधाराहित्यं पारमार्थितापरिचायकं तत्त्वं यत्र निरपेक्षताजन्यैकात्म्यं तिष्ठति—एकरूपेणावस्थितो योऽर्थः स परमार्थः (ब्र॰ सू॰ शां॰ भा॰ २।१।११)। एतत्तु मयाऽनुभूयते यद् ब्रैडलेमहानुभावस्य—Sentient experience वस्तुत एव शङ्करस्यापरोक्षानुभव एव, यत्र श्रुतिसमर्थनं प्रदर्शितमाचार्येण। अयं भेदस्तु तत्र लक्ष्यते यत्र ब्रैडलेमहानुभाव उभयव्यवस्थापनार्थं स्वभावनिर्देशार्थं कस्याप्यागमस्य साहाय्यं नानुसन्धत्ते। परमुक्तकथनेनैवैतत् सुव्यक्तं यत् तस्याशयः सैव रहस्यानुभूतिर्यस्याः सम्प्राप्तिर्मनीषिणां साक्षाद् अपरोक्षात् सञ्जाता, ब्रैडलेमहानुभावोऽपि स्वीकरोति यदेतादृशं ज्ञानमनुभूतिर्वा साधारणसम्बन्धाश्रितसापेक्षज्ञाना-

तीता एव । (We justify the natural wonder which delight to stray beyond our daylight world, and to follow paths that lead into half known, half unknowable regions. Our conclusion, in brief, has explained and has confirmed the irristible impression that all is beyond us) (Ibid. P. 486).

"Hence no single aspect of the world can in the end be explained, nor can the world be explained as the result either of any or all of them" (Ibid. P. 427).

एतत्तु स्वाभाविकमेव यदुभाभ्यां भिन्नैव प्रक्रियासिद्धान्तव्याख्यानेऽङ्गीकृता, परं विषयवस्तुनि साम्यं त्वतिशयमेव विद्यते । ब्रैडलेमहानुभावः कथयति—किं शङ्करस्य सदसद्भ्यामनिर्वचनीयमित्यनेनैव साम्यं न भजते । ब्रैडलेमहानुभावोऽपि स्वदर्शने तस्मिन्नेवार्थे तच्छब्दस्य प्रयोगं कुरुते (That experience should take place in finite contres and should wear the form of finite is in the end inexplicable). (Ibid., P. 200). नात्र सन्देहो यदनिर्वचनीयम्—अथवा inexplicable अनयोः समानार्थकत्वम् ।

शङ्करस्येव ब्रैडलेमहोदयोऽपि सत्तायाः सोपानपरम्परां—Degree of Reality स्वीकरोति । एतावान् भेदो यच्छङ्करदृष्ट्या चत्वारो निम्नलिखिताः प्रकाराः सन्ति—अलीकप्रातिभासिको व्यावहारिकः, पारमार्थिकश्च; किन्तु ब्रैडलेमहानुभावो येन रूपेण—Degree of Reality इत्यस्य व्याख्यानं करोति, तेन रूपेण सत्ताया असङ्ख्येयाः प्रकारा भवितुमर्हन्ति । तद्दृष्ट्या या सत्ता यावदधिकांश ऐकात्म्यव्याख्यानं कर्तुं शक्नोति, तावदंश एव तस्य सत्यत्वम्, अर्थात् तत्त्वसान्निध्यं भजते "The truth and the fact, which to be converted into absolute, would require less arrangement and addition, is more real and this is what we mean by degrees of reality and Truth. (Ibid., p. 323) ....an idea is more true in proportion as it approaches Reality. And it approaches Reality in proportion as it grows internally more complete. (Ibid p. 339). अयमाशयः—आभाससोपानपरम्परायाः कापि निश्चिता विरामरेखा नास्ति, परं शङ्करदृष्ट्या स्पष्टतस्त्रिधा विभागः कृतः । अन्यच्च आभासस्य प्रकारो निरपेक्षतत्वेन सह केन रूपेण सम्बद्धः ? एतस्य व्याख्यानार्थमविद्यायाः साहाय्यं स्वीकरोति, ब्रैडलेमहानुभावेन स्वमतसमर्थनार्थं कोऽपि दार्शनिक-

विधिर्नाङ्गीकृतः। शङ्करमतेन सम्बन्धप्रतिपादिकाऽविद्याऽनिर्वचनीया ब्रैडलेमतेऽपि पूर्वोक्तः सम्बन्धः—Inexplicable अनिर्वचनीयः (Ibid. Chapter XIX). अयमनुभवो बहुधा प्रकाशितः।

पूर्वोक्तविश्लेषणेनैतद्वक्तुं शक्यते यद् दार्शनिकव्याख्यानदृष्ट्या निरपेक्षेण सह सापेक्षसम्बन्धविषये शङ्करेण यादृशः समीचीनो निर्वाहः कृतः, ब्रैडलेमहानुभावस्तथा कर्तुं नैव समर्थोऽभवत्। ब्रैडलेमहोदयस्य प्रसरति परं कदाचिद् भ्रान्तः कदाचिच्च प्रज्ञापराधीनस्तिष्ठति। प्रशस्ता शङ्करसरणिर्ब्रैडलेमहानुभावेनाशंतः परीगृहीता इति शम्।

सांख्ये वेदान्ते च मोक्षतत्त्वम्

आचार्यश्रीकेदारनाथत्रिपाठी 'दर्शनरत्नम्'
भू० पू० दर्शनविभागाध्यक्षः,
काशीहिन्दूविश्वविद्यालयस्य

❀ ❀ ❀

तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः।
लिङ्गस्याविनिवृत्तेस्तस्माद् दुःखं स्वभावेन ॥ (सां० का०)

दुःखाभिसम्बन्धो बन्धः, तन्निवृत्तिरेव मोक्षः। दुःखाभिसम्बन्धश्च प्रकृत्याद्यविवेकात्। अतः प्रकृत्यादितो विवेकेनात्मतत्त्वज्ञानादविवेको निवर्तते, तन्निवृत्तेश्च दुःखाभिसम्बन्धो निवर्तते; दुःखाभिसम्बन्धनिवृत्तिरेव मोक्षः। तदानीं पुरुषः स्वस्वरूपेऽवतिष्ठेत। स्वस्वरूपावस्थानञ्च सच्चिदात्मके स्वस्वरूपेऽवस्थानं न त्वानन्दात्मकत्वमपि चिदात्मनः स्वरूपम्, यथा वेदान्तिनाम्। सुखाभिन्नस्यानन्दस्य त्रिगुणान्तर्गतसत्त्वधर्मतया निर्गुणे पुरुषेऽस्वीकारादिति सांख्यमतम्।

उक्तकारिकायां जन्मनोऽप्युपसंख्यानं कर्तव्यम्। तेन जन्मकृतं जराकृतं मरणकृतं च दुःखं स्वभावेन प्राणिनां भवति। तत्र जराकृतं यथा—बलीतरङ्गितगात्रत्वम्, दण्डमन्तरेण चङ्क्रमणासंभवः, सर्वेन्द्रियाणां विषयोपभोगेष्वसामर्थ्यम्, प्रबलकासश्वासता, सास्राविलेक्षणता, दन्तानामदृढत्वम्, वर्णविकृतिः, सर्वाङ्गशैथिल्यम्, मन्दा स्मृतिरित्येवमादि।

मरणकृतं यथा—वातादिवैषम्यात् समुपजनितानेकप्रकारव्याधिः, प्रभ्रश्यमानसकलेन्द्रियवृत्तिः, स्रस्ताङ्गः, ताम्रपीतास्राविलेक्षणो, भ्रमदाहश्वासपरिगतान्तर्मर्मसन्धिः, जलार्थं दिशोऽवलोकयन् सब्रह्मलोकेष्वपि लोकेषु चातारमबिन्दन् रागाद्यवशादनेककालात् पक्वेनात्मग्रहेण आत्मीयकार्यकारणोपसंह्रियमाणबुद्धिः, मन्दमन्देष्वपि स्मृतिप्रलम्भेषु दयितजनस्यात्मनश्चानुस्मरन् दशविधात् कुटुम्बाद् यत् प्रभ्रश्यते, तदवश्यंभावि सर्वसत्त्वानां प्रकृष्टोद्वेगकारि चाव्युत्पन्नञ्चापरिहार्यञ्चानियतकालञ्च महात्मभिः परमर्ष्यादिभिरन्धतामिस्रशब्देनापदिष्टं मरणकृतं दुःखम्।

जन्मकृतं यथा—अयं मातुरुदरे जरायुपरिवेष्टितशरीरेऽमेध्यपरिस्नुतो व्रण-मात्रायां गर्भधान्यां यथासुखमसंभवात् परिपीडितगात्रो मातुरशनायापिपासादिभिः पीड्य-मानो गर्भावासे दुःखमनुभूय पश्चात् संवृतेनास्थिद्वयविवरेण निःसृतो मूत्ररुधिरादि-परिषिक्तगात्रो बाह्येन वायुना सूर्यकिरणैश्च संस्पर्शादिभिरिव भृशं तुद्यमानः स्वसंवेद्यं दुःखमात्मनि वर्तमानमाख्यातुमसमर्थो जन्मदुःखमनुभवति प्राणी ।

तच्चेदं दुःखं प्रधानमहदहङ्कारतन्मात्रेन्द्रियभूतविशेषलक्षणस्य तत्त्वभेदस्य चैतन्यासंभवात् पुरुष एव चैतन्यशक्तियोगादुपलभ्यते । अत एव समीक्ष्योक्तमाचार्येण—'जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुष' इति ।

कारिकायां जन्मकृतदुःखग्रहणं न कृतम् । तत्रेदं कारणम्—जन्मकृतं हि दुःखं न सर्वव्यापि । यतो मानुषतिर्यग्योनीनामेव जन्मकृतं दुःखं भवति, न देवानाम् । तेषां तडिद्विलसितमिव क्षणमात्रेण शरीरप्रादुर्भावात् । जरामरणकृतं तु दुःखं देवेष्वपि न निवर्तते । अमरत्वं तु तेषां चिरस्थेमतयोपपद्यते । अजरत्वमपि मानुषादिभिर्वैलक्षण्या-दुपपन्नम् । तस्मात् प्राधान्याज्जरामरणकृतमेवोपदिष्टं दुःखं न जन्मकृतम् ।

ननु जरामरणदुःखस्यापि ग्रहणं निष्प्रयोजनम्, तयोरपि जन्मदुःखतुल्यत्वात्, नहि देवलोकेषु जरा मरणं वा श्रूयत इति चेन्न, स्मृतिवचनस्य प्रामाण्याद् देवेष्वपि जरामरणदुःखस्य सद्भावावगमात् । जीर्यतेऽनयेति जरा क्षय इति व्युत्पत्तिलभ्योऽर्थः । स च क्षयो देवभूमावप्यस्ति । अत एव स्मर्यते—

रजोविषाक्तरङ्गेषु वैवर्ण्यं म्लानपुष्पता ।
पतिष्यतां देवलोकात् प्राणिनामुपजायते ॥ इति ।

शक्रादीनां व्याधिश्रवणात् शरीरक्षयः । तथा प्रजापतेर्वायुरक्षीयत । दक्षाभि-शापाच्च सोमस्य क्षयः । तस्माद् देवभूमावपि जराकृतं दुःखमस्तीत्यवगम्यते । एवं मरणकृतमपि दुःखमस्ति, भूम्यन्तरगमनात् । तत्र ययातेरुदाहरणम् । तथा गोपथ-ब्राह्मण उक्तम्—

"देवानां ह वा पञ्चदश शतान्यासंस्तानि ब्रह्मकिल्विषादक्षीयन्त, ततस्त्रयस्त्रि-शदेवासत" इति ।

ननु कारिकायाम् 'आदि' शब्दस्याभीष्टस्यापि लोपाज्जरामरणकृतमित्यु-दाहरणमात्रम् । अतो जन्मकृतमपि दुःखमिहोपदिष्टमिति मन्तव्यमिति चेत्, न, सर्व-दुःखास्पदत्वाज्जरामरणकृतस्य दुःखस्य । यतो हि सर्वेषां दुःखानामास्पदं जरामरणकृतं दुःखं साधारणम् । तद्धि दुःखं बन्धुमित्राणामप्युद्वेगकारकं भवति, न तु जन्मकृतं दुःखं

बन्धुमित्राणामप्युद्वेगकारकं भवति, न तु जन्मकृतं दुःखं तथोद्वेजयति बन्धुमित्राणि। प्रत्युत सम्बन्धिनां प्रहर्षस्यैव निमित्तं भवति जन्मकृतं दुःखम्। अत आचार्येण कारिकायां जन्मकृतं दुःखं बुद्ध्वैव नोदाहृतमिति मन्तव्यम्। जरामरणकृतं तु दुःखं सर्वदुःखास्पदत्वेन प्राधान्यादेवोदाहृतमिति च मन्तव्यम्।

इदं हि दुःखं ब्रह्मादिस्तम्बपर्यन्तं भवति प्रजापतेरक्षिरोगश्रवणात्, इन्द्रस्य कामोपतापात्, नागानां सर्पसत्रायासात्, वैश्रवणस्य यस्काभिशापाद् हस्तिभावोपपत्तिः, जरत्कारोः पितॄणां च गर्तेऽवलम्बनात्, पिशाचानाञ्च मन्त्रौषधिमङ्गलप्रयोगैरुद्वासनात्। मानुषतिरश्चान्तु प्रत्यक्षत एव प्रायेण दुःखास्पदत्वात्। तस्मात् संसारे नास्ति प्रदेशो यत्र लिङ्गदेहेन सह दुःखमात्मानं न व्याप्नुयात्। अत एवं प्रयतितव्यं मानुषैर्यल्लिङ्गदेहस्यैवात्यन्तमुच्छेदः स्यादिति निपुणमुद्घाटितं कारिकायुक्तिदीपिकास्विति।

एवंविधत्रिविधदुःखानामत्यन्तनिवृत्तिरेव मोक्षापरपर्यायोऽत्यन्तपुरुषार्थः सांख्यसिद्धान्ते। यद्यपि दुःखानां बुद्धिधर्मतया तन्निवृत्तिरूपमोक्षोऽपि बुद्धेरेव धर्मो न तु नित्यशुद्धबुद्धमुक्तस्वरूपायाश्चितिशक्तेस्तथापि बुद्ध्यविवेकाद् बुद्धिधर्मान् आत्मन्यभिमन्यमानस्य पुंसो दुःखाद्यभिमानः स्वस्मिन्नेव भवतीति। अतो बुद्धिविवेकेनात्मतत्त्वज्ञानमेव तदभिमाननिवृत्तिहेतुः। अत एव सांख्ये हेयं हेयहेतुर्हानं हानोपायश्चेति चतुर्व्यूहो ज्ञेयत्वेनाभ्यपगम्यते।

सामान्यतो ज्ञानस्य वर्गद्वयं भवति—उच्चकोटिकं ज्ञानं निम्नकोटिकं चेति। अव्यक्ततत्त्वविस्तरस्य व्यक्तत्त्वस्य ज्ञानं निम्नकोटिकं भवति। उच्चकोटिकं ज्ञानं त्वव्यक्ततत्त्वस्य ज्ञानमस्ति। किन्तु चिच्छक्तिज्ञानं तूच्चतमकोटिकममन्यत। सांख्यदर्शनेन चेदमेव ज्ञानं प्रस्तूयते। तत्र पूर्वं व्यक्ततत्त्वज्ञानमनन्तरमव्यक्तस्य, व्यक्ताव्यक्तयोस्तुलनात्मकञ्च ज्ञानं प्रस्तूयते। इतोऽप्यनन्तरं चैतन्यस्य ज्ञानं तथा चैतन्यस्यापि व्यक्ताव्यक्ताभ्यां सह तुलनात्मकं ज्ञानं प्रस्तूयते। इदमेव च वास्तविकं तत्त्वज्ञानमस्तीति।

अद्यतनं तु विज्ञानं प्रकृतेर्वैभवज्ञान एव संलग्नम्। तदपि च प्रकृतेरनन्तशक्तित्वकारणादसंभवि। प्रकृतेरन्तज्ञानं सामस्त्येन स्वरूपज्ञानं वा न कथमपि सम्भाव्येत। विज्ञानं शून्यात्मकमिवास्ति, अध्यात्मं तु 'एक' संख्यात्मकमिवास्ति। एकसंख्यैव योजनया द्वित्वादिनवान्तां संख्यां प्रतिपद्यते। पुनः शून्ययोजनया दशविंशत्यादिशतान्तां सहस्रदशसहस्रलक्षादिपरार्धान्तसंख्याः प्रतिपद्यते। तात्पर्यमिदं यद् अध्यात्ममाधृत्यैव विज्ञानं विस्तरावसरं लब्धुमर्हति योगक्षेमं च निर्वाहयितुम्। अन्यथा तु शून्यतायाम-

सद्रूपतायामेव पर्यवसानमासादयेदिति। यथा काञ्चित् संख्यामनाश्रित्य सहस्रमपि शून्यानि मूल्यशून्यान्येव भवन्ति, तद्वदिदं विज्ञानमवगमनीयम्। परमात्मसृष्टेर्जगत्प्राणिनः सेवकरूपेण वर्तमानं विज्ञानं साधु वर्तताम्, संसारस्वामिभावाय चेष्टमानं विज्ञानं तु विश्वं ध्वंसयेत् स्वयमपि च ध्वंसेतेति निश्चप्रचम्।

"क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत !" इति गीतावचनं जीवमीश्वरस्यैवांशमिवांशमाह। इदमेव ज्ञानं वास्तविकमभिमतं भगवतः। "यत्तज्ज्ञानं मतं मम" इति चोक्तम्। इदमेव सेश्वरसांख्यमिति गीयते।

विज्ञानसम्बन्धे प्रश्नोऽयं समुदेति यत् किमतिदुर्ग्रहस्य मनसो निग्रहायामपि प्रयासो विज्ञानेन क्रियते ? यथा सभ्यताया अभिवृध्यै क्रियत इति। तदर्थं पक्षपातं स्वाच्छन्द्यं व्यपहाय नूनं तेनाध्यात्ममनुसरणीयम्।

वेदान्ते "अयमात्मा ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि" इत्यादि श्रुत्यनुसारेणात्मा ब्रह्मैवास्ति। ब्रह्म च नित्यशुद्धबुद्धमुक्तस्वभावमित्यात्मापि नित्यशुद्धबुद्धमुक्तस्वभाव एवेति सुप्रसिद्धम्। सांख्यपुरुषोऽप्यात्माऽपरपर्यायो नित्यशुद्धबुद्धमुक्तस्वभाव एवेति सांख्यप्रवचनसूत्रादावभिहितम्। एवं साम्ये सत्यपि विद्यते भेद एषः। नित्यशुद्धबुद्धत्वेनाऽऽत्मनो नित्यसद्रूपत्वमपरिणामित्वं च सूच्येते। बुद्धपदेन च नित्यचिद्रूपत्वमुभयमतेऽप्यात्मनोऽभ्युपगतम्। नित्यमुक्तत्वमुभयमते स्वाभाविकमपि किञ्चिद्भिन्नमास्ते। वेदान्ते मुक्तत्वमानन्दात्मकत्वम्। सांख्ये त्रिविधदुःखात्यन्तिकनिवृत्तिरूपम्। अत एव सांख्ये पुरुषः सद्रूपत्वेन चिद्रूपत्वेन च स्वीक्रियमाणोऽपि नानन्दरूपः स्वीक्रियते। आनन्दस्य सुखस्य सत्त्वगुणधर्मतया निर्गुणस्य पुरुषस्यानन्दधर्मत्वमपि न सम्भवि, किमु वक्तव्यं तस्यानन्दरूपतायाः।

वेदान्ते मायाश्रयेणात्मनो जगत्कर्तृत्वमभिमतम् "एतस्मादात्मन आकाशः सम्भूतः, आकाशाद् वायुः" इत्यादि श्रुत्यनुसारेण। सांख्ये तु "प्रकृतेर्महांस्ततोऽहङ्कारः" इत्यादि कारिकानुसारेण प्रकृतिरेव जगन्निर्मात्री, पुरुषस्तु "न प्रकृतिर्न विकृतिः पुरुषः" इत्युक्त्या पुष्करपलाशवत् सर्वथाऽसंस्पृष्ट एव जगद्रचनयेति। "तस्माच्च विपर्यासात् सिद्धम्" इति कारिका पुरुषस्य साक्षित्वं कैवल्यं माध्यस्थ्यं द्रष्टृत्वमेककर्तृत्वञ्च प्रतिपादयति। कैवल्यमत्रासङ्गत्वम्। कर्तृत्वञ्च गुणानामेव न पुरुषस्योदासीनस्य, नहि पुरुषो वस्तुतः कर्ता। वेदान्ते तु मायावीव कर्ता भवत्येव परमात्मा ब्रह्म सदसद्भ्यामनिर्वचनीयस्य जगत इति सिद्धान्तितम्।

मोक्षसम्बन्धे चायं सांख्यानुसारी पन्थाः—सांख्यपुरुषो हि भोग्येन प्रधानेन विश्वोपादानभूतेन महदाद्यात्मना परिणममानेन सम्भिन्नोऽसंसर्गाग्रहनिबन्धनाहङ्कर्तेति तादात्म्यवान् (अयं धर्म्यध्यासः), तद्गतं दुःखाद्यसंसृष्टत्वेऽपि स्वात्मनि विपर्यस्तः, तन्निवृत्त्यर्थं प्रधानमपेक्षते। तदुक्तं सांख्यकारिकायाम्—"कैवल्यार्थं तथा प्रधानस्य" इति। तथा च स्वभावतो दुःखसम्बन्धाद् नियुक्तस्यापि पुरुषस्य प्रतिबिम्बरूपदुःख-निवृत्त्यर्थं प्रतिबिम्बसम्बन्धेन दुःखविमोक्षार्थं वा प्रार्थना सम्भवति। अयं विज्ञानभिक्ष्व-नुसारी विमर्शः।

वाचस्पतिदिशा तु बुद्धिवृत्तिप्रतिबिम्बितः पुरुषो बुद्धिगतदुःखादिमानिव भवति। यथा दर्पणे प्रतिबिम्बितमाननं दर्पणगतमालिन्यवदिव भवतीति।

वस्तुतस्तु प्रधानमेव स्वदर्शनार्थं (स्वभोग्यत्वचरितार्थ्याय) यथा पुरुषमपेक्षते, तथा प्रधानमेव स्वकैवल्यार्थमपि पुरुषमपेक्षते, न कदापि पुरुषस्य प्रधानापेक्षा भवतीति एतदेवाभ्युपगमोऽस्ति। अत उक्तकारिका तावदेतद्रीत्यैव व्याख्येया भवति। यथा काचन स्त्री स्वभोगार्थं यतमाना पुनर्दुःखिता सती स्वकैवल्यार्थं तथेयं प्रकृतिरपि। पङ्ग्वन्धवदिति दृष्टान्तोऽपि तथाविधे एव। तत्रान्धकर्तृक एव पङ्ग्वन्धस्तत्त्यागश्च। अत एव—

"तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥"

इति कारिकाऽपि संगच्छते। पुरुषकैवल्यपक्षेऽपीदमेव समाधानम्। अन्यथा कर्तृत्व-भोक्तृत्वादिपरिणामरूपबन्धस्यापरिणामिनि पुरुषेऽसम्भवाद् बन्धसमानाधिकरणो मोक्षोऽपि पुरुषे न सम्भाव्येत, पुरुषविमोक्षार्थमिति वचनं चाकिञ्चित्करं भवेत्।

अतो राज्ञि जयपराजयाविव बन्धमोक्षावपि प्रकृतिगतावपि पुरुष उपचर्येते। तत्र राज्ञा सह भृत्यसम्बन्धे धनादिको हेतुः। पुरुषेण सह प्रकृतिसम्बन्धे तु विवेकाग्रह एव हेतुर्बोध्यः।

भोगप्रयोजकानादिसंयोगपरम्परायाः सत्त्वेऽपि कैवल्यार्थं पुनस्तद्विरोधिसंयोगो-त्पत्तिर्नानुपपन्ना "भोगाय संयुक्तोऽपि कैवल्याय पुनः संयुज्यते" इति तत्त्वकौमुदीवचनात्। न च पूर्वसंयोगादेव सृष्टिद्वारा कैवल्यमपि भवेदिति वाच्यम्, एकस्य विरोधिप्रयोजकत्वा-सम्भवादिति वंशीधरेण तत्त्वविभाकरे स्पष्टीकृतम्।

कैवल्यापरपर्यायो मोक्षोऽत्र सांख्ये त्रिविधदुःखात्यन्तनिवृतिरेव "अथ त्रिविध-दुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" इति सांख्यप्रवचनसूत्रात्। त्रिविधदुःखानामभि-

मानिकसम्बन्ध एव बन्धः, तन्निवृत्तिश्च मोक्ष इति तात्पर्यम्। निवृत्तेश्चाधिकरणात्मकत्वेन सा पुरुषस्वरूपान्नातिरिच्यते। बन्धनिवृत्तिश्च तत्त्वज्ञानादेव भवति, तत्त्वज्ञानं प्रकृतिश्च विवेकेन पुरुषतत्त्वज्ञानमेवेहोच्यते इति संक्षेपः।

वेदान्तेऽप्याविद्यकधर्मधर्म्यध्यास एव बन्धः, तत्त्वज्ञानेनाविद्यानिवृत्तिरेव च मोक्ष इति सिद्धान्तितम्। अत्रापि "परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इति श्रुतिप्रमाणाद् केवलेनात्मस्वरूपेणाभिव्यक्तिरेव मोक्षः, न तु तदवस्थायां केनापि धर्मान्तरेण आत्माऽभिव्यज्यते। अर्थात् औपाधिक· सर्वबन्धविनिर्मुक्तः शुद्धेनैव स्वस्वरूपेणात्माऽवतिष्ठते। तत्त्वज्ञानञ्च वेदान्तमते नित्यशुद्धबुद्धमुक्तब्रह्मात्मैकत्वविज्ञानमेव नान्यत्। मुक्ति प्रति ज्ञानकर्मसमुच्चयस्य हेतुत्वं वेदान्तवत् सांख्येनापि प्रतिषिध्यते। एवञ्च सांख्यस्य वेदान्तेन बहुधा साम्येऽपि कतिपयांशे मौलिको भेदो दृश्यते।

यथा अद्वैतवेदान्ते न केवलः प्रबन्ध इवाज्ञाननिबन्धनः आविद्यकः, किन्त्वात्मबन्धप्रयोजकत्वेन व्यवह्रियमाणं सर्वमेव पदार्थजातमाविद्यकमस्ति। सांख्ये तु न केवलः पुरुष एवैकं तत्त्वमस्ति, किन्तर्हि तदतिरिक्तान्यपि सन्ति चतुर्विंशतिस्तत्त्वानि प्रधानादीनि वास्तविकानि। अत्राप्ययं विशेषो यत् पुरुष एवैकं तत्त्वं नित्यशुद्धबुद्धमुक्तस्वभावमस्ति, अन्यानि तु त्रयोविंशतिस्तत्त्वानि सुखदुःखमोहात्मकतया न तथा सन्ति। प्रबन्धस्य विद्यानिबन्धनत्वेऽपि बन्धप्रयोजका इतरपदार्था नाविद्यकाः;किन्तु परमार्थसन्त एव पुरुषवत्। नहि भ्रमात् पुरुषप्रवृत्तिनिवृत्तिप्रयोजका रजतसर्पादिपदार्था न भवन्ति पारमार्थिकाः। पारमार्थिकाः सन्तोऽपि न स्वरूपतो बन्धप्रयोजका भवन्ति। तथात्वे प्रकृतेर्व्यापितया नित्यतया च मोक्षनियमानुपपत्तेः। तस्मात् सांख्ये तेषां प्रकृत्यादितत्त्वानां पारमार्थिकत्वेऽपि तद्विवेकाज्ञाननिमित्त एव बन्धस्तद्विवेकज्ञानाच्च बन्धनिवृत्तिरूपो मोक्ष इति स्थितम्।

एवं वेदान्त आत्मस्वरूपावबोध एव तत्त्वज्ञानम्, येनाविद्यायां स्वरूपाज्ञानात्मिकायां निवृत्तायां पुरुषो मुक्त इव भवति, न तु वस्तुगत्याऽमुक्तो मुच्यत इति। सांख्ये त्वियान् विशेषः—सांख्यीयं तत्त्वज्ञानं नात्मस्वरूपावबोधमात्रम्; परन्तु प्रकृत्यादिभ्यो विवेकेनात्मस्वरूपज्ञानमेव तत्त्वज्ञानमस्तीति। तेन च विवेकाज्ञानात्मिकाऽविद्या निवर्त्तते तथा स्वरूपतो मुक्तोऽपि पुरुषो मुक्त इव भवतीति। एवं बन्धमुक्तिप्रयोजकीभूते अज्ञानज्ञाने अपि न वस्तुगत्या पुरुषसम्बन्धिनी, तथा सति पुरुषस्य कूटस्थत्वभङ्गप्रसङ्गः स्यात्। किन्त्वतात्त्विक एव तयोः सम्बन्धः पुरुषेण। तात्त्विकस्तु सम्बन्धश्चित्तेनैवेति

सांख्यमतम् । तथा च सूत्रम्—"वाङ्मात्रं तु चित्तस्थितेः" इति । कारिकाऽपि चात्र भवति—"तस्मान्न बध्यतेऽद्धा" इत्यादिः ।

वेदान्तेऽपि स्वप्रकाश आत्मनि नाज्ञानज्ञाने वस्तुतः सम्बध्येते इति । सोऽयमुभयोर्मतयोर्बन्धस्याविद्यकत्वे पुरुषस्य स्वभावमुक्तत्वे समानेऽपि च वर्तते कश्चिन्मौलिको भेदः । सांख्यं हि प्रकृत्यादितः पुरुषस्य विवेके दुःखत्रयतस्तस्य मुक्तौ च मुख्यं प्रयत्नमाचरति, वेदान्तस्तु पुरुषस्वरूपमात्रावबोधे तस्य सच्चिदानन्दस्वरूपात्मकत्वावगमे च प्राधान्येन यतते । नूनमनयोर्वेदान्तस्याद्वितीयात्मतत्त्वावबोध एव श्रुतीनां परो निर्भर इति निर्विचिकित्सं प्रतीमः । कामं वेदान्तोऽपि नेति नेतीति प्रक्रियामाश्रित्य पूर्वं दृश्यजगतो विवेकपक्षपात्येष प्रतीयत इत्यलं विस्तरेण ।

भावरूपाविद्यानिरूपणम्

डॉ० एन्० आर० श्रीनिवासन्
मीमांसाधर्मशास्त्रविभागाध्यक्षः,
काशीहिन्दूविश्वविद्यालयस्य, वाराणसी

❀ ❀ ❀

लोके सर्वे प्राणिनः सुखप्राप्तये दुःखनिवृत्त्यर्थं च यथाशक्ति प्रयतन्त इति प्रसिद्धमेव। तत्र सति च शरीरे सर्वथा दुःखनिवृत्तिः सुतरां न संभवतीति शरीरस्यात्यन्तिकप्रहाणमावश्यकम्। तच्च तन्मूलकारणान्वेषणमन्तरा दुस्साधमिति किमस्य मूलकारणम्? का चास्य सूक्ष्मा सूक्ष्मतरा च प्रकृतिः? कीदृशश्चेतनाचेतनयोस्संबन्ध इति प्रथममवगन्तव्यम्। तदवगतिश्च वेदान्तशास्त्राध्ययनेन संभवति। इत्थं हि वेदान्ते 'इदं सर्वं यदयमात्मा', 'आत्मैवेदं सर्वं', 'ब्रह्मैवेदं सर्वं', 'नेह नानाऽस्ति किञ्चन' इत्यादयः श्रुतयः गीतादिस्मृतयः ब्रह्मसूत्राणि च प्रपञ्चेऽस्मिन् दृश्यमानानां सर्वेषां वस्तूनामैकात्म्यं 'नान्यः पन्था विद्यतेऽयनाय' इति आत्मैकत्वविज्ञानस्य मोक्षसाधनत्वं च प्रतिपादयन्ति। मोक्षसाधनीभूतमात्मैकत्वविज्ञानं च संसारावस्थायामविद्ययाऽऽत्मैकत्वस्य तिरोहितत्वात् न भवति। सा चाविद्या स्वरूपतिरोधानविविधविचित्रविक्षेपकरी सदसदनिर्वचनीया अनादिश्च। ईदृगविद्यासत्त्वे 'अनृतेन हि प्रत्यूढाः' 'नासदासीन्नो सदासीत्तदानीं' 'तम आसीत् तमसा गूढमग्रे प्रकेतं' 'मायां तु प्रकृतिं विद्यात्' 'इन्द्रो मायाभिः पुरुरूप ईयते' 'मम माया दुरत्यया' 'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते' इत्यादिश्रुतिस्मृतिवचनानि प्रमाणानि। 'अनृतेन हि प्रत्यूढाः' अनृतशब्देनाऽविद्याऽभिधीयते, अविद्यया प्रत्यूढाः प्रतीपं नीताः तिरोहिता इत्यर्थः। अनेनाविद्यायास्तिरोधायकत्वम्—'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यनेन विविधविचित्रविक्षेपकरत्वं 'नासदासीन्नो सदासीत्' इत्यनेन सदसदनिर्वचनीयत्वं 'अनादिमायया' इत्यनेन अनादित्वं चोक्तम्।

इयं चाविद्या भावात्मिका, उताभावात्मिका वेति विचार्य प्रत्यक्षानुमानश्रुत्यर्थापत्तिप्रमाणैस्तस्या भावरूपत्वं स्थिरीक्रियते।

तथाहि—'अहमज्ञो मामन्यं च न जानामि' इति प्रत्यक्षात्मकानुभवेन भावरूपाज्ञानस्य प्रत्यक्षवेद्यत्वमेष्टव्यम्। तत्र 'अहमज्ञः' इत्यस्य अज्ञानवानहमित्यर्थः। तच्चाज्ञानं भावरूपमेव न त्वभावरूपम्। अभावस्यानुपलब्धिप्रमाणगम्यत्वान्न प्रत्यक्षविषयत्वम्। कथञ्चिन्नैयायिकमतरीत्या तस्य प्रत्यक्षविषयत्त्वाभ्युपगमेऽपि नोपदर्शितानुभवे ज्ञानाभावो विषयः। 'भूतले घटो नास्ति' इत्यादिषु घटाभावप्रत्यक्षे धर्मिप्रतियोगिनोर्ज्ञानापेक्षा दृष्टा। प्रकृते ज्ञानाभावस्य प्रत्यक्षविषयत्वाङ्गीकारे धर्मितयाऽऽत्मनः,

प्रतियोगितया ज्ञानस्य चावगतिरस्तीति वक्तव्यम्, तथा सति ज्ञानस्य विद्यमानत्वे विरोधात् न तद् भावः संभवति, यदि ज्ञानं नास्तीत्युच्येत, तदा धर्मिप्रतियोगिज्ञानरूप-कारणाभावादेव न सुतरां तदभावप्रत्यक्षः संभवति। अज्ञानस्य भावरूपत्वे तु (प्रति-योगितदभावयोरेव भावाभावयोरेव परस्परं विरोधात्) साक्षिवेद्यत्वात् अस्मिन् प्रत्यक्षे भावरूपमज्ञानमेव विषयः। न नु ज्ञानाभावः।

एवमनुमानेनाप्यज्ञानस्य भावरूपत्वं साध्यते। तथाहि विवादाध्यासितं प्रमाण-ज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरण-स्वनिवर्त्य-स्वदेशगतवस्त्वन्तरपूर्वकमप्रका-शितार्थप्रकाशकत्वादन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति। अत्र प्रमाणज्ञानस्य ज्ञानप्रागभावनिवर्तकत्वं सिद्धमेवेति तत्साधने सिद्धसाधनरूपदोषः स्यादिति साध्यकोटौ स्वप्रागभावव्यतिरिक्तेति विशेषितम्। वस्त्वन्तरपूर्वकत्वमात्रस्य साध्यत्वे घटादिविष-यकप्रत्यक्षेऽपि प्रत्यक्षे विषयस्य कारणत्वमितिरीत्या विषयपूर्वकत्वाङ्गीकारात् पुनरपि सिद्धसाधनं स्यादिति स्वदेशगतेति निविष्टम्। तथा सति घटादेर्ज्ञानदेशगतत्वाभावेन नायं दोषः। अथ धर्माधर्मयोर्ज्ञानदेशगतत्वात् तत्पूर्वकत्वं प्रमाणज्ञाने विद्यत एवेति चेन्न, स्वनिवर्त्येति विशेषणदानात्। ज्ञानोत्पत्तिहेतुभूतधर्माधर्मयोर्ज्ञाननिवर्त्यत्वसद्भावेऽपि तद्भिन्नधर्माधर्मयोर्ज्ञाननिवर्त्यत्वाभावेन न दोषः। ननु 'रज्जुं दृष्ट्वा सर्प इति भ्रमेण जायमानस्य भयादेरपि रज्जुरेषा न सर्प इति ज्ञाननिवर्त्यम्, स्वदेशगतत्वम्, स्वप्राग-भावव्यतिरिक्तत्वं च विद्यते इति चेत्, न, स्वविषयावरणेति साध्ये विशेषस्य निवेशात्, भयादेः स्वविषयावारकत्वाभावात्। अपि च श्रुतौ 'एतदात्म्यमिदं सर्वं, सर्वं खल्विदं ब्रह्म, इदं सर्वं यदयमात्मा' इत्यैक्यमुपदिष्टम्। इदं च घटपटादिभेदेन परिदृश्यमानस्य प्रपञ्चस्य सत्यत्वे नोपपद्यते। अतस्तस्य मिथ्यात्वं वक्तव्यम्, तेषां च मिथ्यात्वं विना दोषरूपकारणं न सिद्ध्यतीति तत्कारणत्वेन दोषात्मिकाऽविद्याऽङ्गीक्रियते। एवमैक्यो-पदेशान्यथानुपपत्त्याऽविद्या सिद्धिः। किञ्च सुप्तोत्थितस्य न किञ्चिदवेदिषम् इति परामर्शान्यथानुपपत्तिरपि भावरूपाज्ञाने प्रमाणम्। 'न किंचिदवेदिषम्' इत्यत्र न ज्ञान-भावो विषयः, स्वापे ज्ञानाभावस्याननुभूतत्वात्। ज्ञानाभावानुभवे हि प्रतियोगिभूत-ज्ञानस्य विषयावच्छिन्नस्यावभासोऽभ्युपगन्तव्यः, तदभ्युपगमे सुषुप्तिव्याघातः। न चास्मरणलिङ्गजन्यं ज्ञानाभावविषयमनुमितिरूपमिदं ज्ञानमिति वाच्यम्, अस्मरणस्या-ननुभवव्याप्यत्वाभावात्, यतो हि पथि गच्छता पुरुषेण स्पृष्टमपि तृणादिकं न स्मर्यते। अतः सुषुप्तौ अनुभूतं भावरूपमज्ञानं स्मर्यते न किञ्चिदवेदिषमिति। इत्थं च प्रत्यक्षा-नुमानागमार्थापत्तिप्रमाणैरविद्याया भावरूपत्वं भगवच्छाङ्करमतेन निरूपितम्।

●

विज्ञानवादपर्य्यवेक्षणम्

डॉ० आदित्यनाथभट्टाचार्य्यः, एम्० ए०, पी-एच० डी०,

रीडर, वर्धमानविश्वविद्यालयस्य

संस्कृतविभागे

❀ ❀ ❀

वैभाषिकसौत्रान्तिकयोगाचारमाध्यमिकभेदेन चतुर्विधबौद्धसम्प्रदायानां मध्ये योगाचारा बौद्धा विज्ञानाद्वैतवादिनः। तत्र साकारनिराकारभेदेन विज्ञानस्य द्वैविध्याङ्गीकारात् केचित् साकारविज्ञानवादिनः, अन्ये निराकारविज्ञानवादिनः। किन्तु तत्र विज्ञानाद्वैतार्थे वर्त्तत एवोभयोरैकमत्यम्। तथा चान्तरं विज्ञानं विना नान्यत् किमपि वस्तु सदिति तेषां सिद्धान्तः[१]। स च सम्यग् यथोपपद्येत, यथामति तथोपरिष्टाद्विवेचयिष्यते।

विज्ञानवादोत्थितौ चिन्ताबीजम्—

अत्र प्रथमत एतदेव चिन्तनीयं यद् जागतिकवस्तुतत्त्वपर्य्यालोचनतत्परैस्तैस्तैराचार्य्यैः कथङ्कारं केवलं विज्ञानमेव वस्तु सदिति प्रतिपिपादयिषितम्? न हि वस्तुग्रहणमन्तरेण विज्ञानं कथमपि लब्धस्वरूपं भवेदिति साधारणानुभवः। दृश्यते च सर्वत्रैव किंचिद्वस्तुस्वरूपं प्रकाशीकुर्वदेव विज्ञानं लब्धप्रकाशं भवेत्। अतः सालम्बनीभूतविषयप्रकाशस्वभावानां विज्ञानानां स्वातिरिक्तं किंचिदालम्बनं विना स्फुरणमेव न घटते। व्यावहारिकेषु जीवनेषु च हानोपादानात्मकव्यवहारसिद्ध्यनुकूलतया विज्ञानं प्रयोजकं भवेत्। तथाहि विज्ञानेन वस्तुस्वरूपं सम्यङ् निश्चित्यैव जनैरनुकूलं तदुपादीयते, प्रतिकूलं च परिह्रियते[२]। अतो व्यवहारनिष्पत्तौ व्यवहारानुकूलवस्तुस्वरूपपरिज्ञानार्थमेव विज्ञानमावश्यकम्। तत्र च वस्तुमूलकतया व्यवहारस्य, विषयप्रकाशनस्य विज्ञानस्य सालम्बनीभूतवस्तुसापेक्षत्वं नितरामावश्यकम्। एवं स्थिते विज्ञानतद्ग्राह्य-

---

१. चित्तमात्रं भो जिनपुत्रा यदुत त्रैधातुकम् (दशभूमीश्वरसूत्रम्—पृ० ४६)।

२. प्रमाणेन खल्वयं ज्ञात्वाऽर्थमुपलभ्य तमर्थमभीप्सति जिहासति वा (न्यायदर्शनम्—१।१।१—वात्स्यायनभाष्यम्)।

विषययोर्महति भेदे पांसुलचरणानां हालिकानामपि ग्रहणयोग्ये विज्ञानमन्तरेण किंचिद्वस्तु नास्तीति चिन्तनावसर एव नोदियात्। अतो वस्तुतत्त्वविचारविचक्षणैः समासादितबुद्धिप्रकर्षैः सौगताचार्य्यैः कथमियं विज्ञानमूलीभूतवस्तुसत्तावलोपकारिण्यभिनवा कल्पना जगति प्रतिष्ठापिता ? तस्मान्निर्विषयविज्ञानस्य कुत्रापि कस्याप्यनुभवाभावेनासम्भवाद्विज्ञानजनक एव विषय इति युक्तिसिद्धम्। अतः स्वजनकीभूतानां विषयाणामपलापे कृते विज्ञानमेव नोत्पत्तुमीशत इति मूलोच्छेदिनीयं विषयलोपकल्पनाइत्येवं वस्तुतत्त्वपरिशीलनतत्पराणां विषयानुभवप्रसाधितसर्वव्यवहाराणां साधारणजनानां विदुषां च बुद्धिः प्रसरति। अतो विज्ञानास्तित्वं कथं केवलमेव चिन्तितं बौद्धाचार्यैस्तत्र काचिन्महती विचिकित्सा वरीवर्त्ति।

अनुभवं प्रति विषयसत्ताया नोपयोगः—

तत्र विषयानुभवयोः कार्यकारणभावनिराकरणे पूर्वपक्षः—

अत्र सौगताचार्य्याणां त्वयमभिप्रायः—व्यवहारविधौ वस्तुना प्रयोजनम्. तत्रैव च वस्तुविज्ञानं विना व्यवहारासम्भवाद् विज्ञानस्योपयोग इत्याविष्कृतं प्रतिवादिभिः। तत्र विज्ञानं विना व्यवहारो न सम्भवेदित्यस्मिन् पक्षे नास्ति नः काप्यसम्मतिः। किन्तु व्यवहारनिष्पादकविषयं विना विज्ञानं नैव लब्धात्मस्वरूपं स्यादिति यदुच्यते, तत्रैव वर्त्तते काचिद्विचारेच्छा। तथाहि—विज्ञानं प्रति विषयस्य जनकत्वं यदुक्तम्, तत्रेदं पृच्छयते,—किं विषयः स्वशरीरेणावस्थित एव विज्ञानं जनयेत्, आहोस्विद् यत्र ग्राह्यविषयो न विद्यते, तत्रापि संस्कारादिवशादनवस्थितोऽपि विषयो विज्ञानमवगाहते। यदि प्रथमः कल्पोऽभिप्रेतः स्यात्, तदा तद्देशे तत्काले तद्विषयकविज्ञानं प्रति विषयस्यापि तत्र तत्र सत्त्वमावश्यकम्। वस्तुतस्तु तदेव न घटते, स्वप्नादौ तत्तद्विषयसत्त्वमन्तरेणापि तत्तद्विषयकविज्ञानोत्पत्तिदर्शनात्। अतो विज्ञानोत्पत्तिविषयसत्त्वयोरन्वयव्यतिरेकासम्भवात् कथङ्कारं विषयस्य विज्ञानजनकत्वं सिध्यति ? तस्मान्नालं प्रथमः कल्पो विषयविज्ञानयोर्जन्यजनकभावं साधयितुम्। अथ यदि द्वितीयः कल्पस्तथाहि—स्वप्नादौ तत्तद्विषयसत्ताऽभावेऽपि तत्तद्विषयानुभवाहितसंस्कारवशादेव विज्ञानं तत्र तत्र समुत्पद्यते। अतो विषयस्य विज्ञानजनकत्वं न सर्व्वत्र साक्षात्, अपि तु क्वचित् साक्षात् क्वचित् परम्परया वा सेत्स्यति। तथा च, बाह्येन्द्रियसंयोगवशाच्चाक्षुषादिप्रत्यक्षस्थले विषयस्य साक्षादेव विज्ञानजनकत्वम्, स्वप्ने तु परम्परया। तथाहि, तद्विषयकसंस्कारं विना न तथाविधस्वप्नादिदर्शनं सम्भवेत्। न चाननुभूतस्यापि विषयस्य स्वप्नादौ दर्शनात् तद्विषयकसंस्कारस्य स्वाप्नज्ञानजनकत्वमेव न घटते।

तथाहि स्वपत्नीवैधव्यदर्शनं स्वात्मशवशरीरदर्शनं वा स्वप्ने यदा स्यात्, तदा तथाविधसंस्काराभावेऽपि स्वप्नदर्शनसम्भवात् स्वाप्नज्ञानं प्रति तत्तद्विषयकसंस्कारस्य कारणत्वमेव न सिध्यति व्यभिचारादिति वाच्यम्, तत्रापि संस्कारसत्त्वात्। तथाहि कार्यकारणभावनिर्धारणं तु सर्वत्रैव फलबलकल्प्यम्। यतोऽन्वयव्यतिरेकनियमवशात् कार्यकारणभावः कल्प्यते। तथाविधो नियमस्तु पुनस्तथा तथावस्तुसत्त्वे कार्योत्पत्ति-दर्शनात्, अभावे च तथाविधानां वस्तूनां कार्योत्पत्तेरदर्शनात् कल्प्येत। अतो यदि सर्वत्रैव स्वप्नदर्शनं स्वप्नदृष्टवस्तुसमानाकारसंस्कारजन्यमेव स्यात्, तदैव तथा विधकार्यकारण-भावः सिध्यति। तथाहि विशकलितसंस्कारसत्त्वान्निद्रादिदोषोपप्लववशादप्रसिद्धस्य वस्तुनोऽननुभूतस्यापि स्वप्ने दर्शनमित्युपलब्धेः स्वप्नदृष्टतत्तद्विषयकसंस्कारत्वेनैव कारणत्वं कल्प्यम्। तच्चाखण्डविशकलितसंस्कारद्वयसाधारणं भवेत्। अत एव कदाचित् स्वात्मानमष्टबाहुं सिंहवदनगजसमारूढं स्वप्ने पश्यति जनः। तत्र न तथाविधं किंचिद्वस्तु पूर्वानुभूतम् अप्रसिद्धत्वात्, अपि त्वष्टसंख्या-बाहु-गज-सिंहवदनादिविषयाणां पूर्वपूर्वानुभूततया तत्तदनुभवाहितविशकलितसंस्कारा एव निद्रादिदोषवशात्तत्तथा-विधमेकं विशिष्टविषयकं स्वप्नं जनयन्ति। अत एवात्रैवमास्थेयं यद् यद्विशेष्यक-यत्प्रकारकस्वप्नदर्शनं भवेत्, तद्विशेष्यकतत्प्रकारकसंस्कार एव तत्र हेतुरिति नियमो न, पूर्वोक्तस्थले तथाविधसंस्काराभावेऽपि स्वप्नदर्शनसम्भवात्; किन्तु स्वप्नदृष्टानां विशकलितसंस्कारजन्यत्वं सिद्धमेव। तथाहि, स्वपत्नीवैधव्यादिस्वप्नदर्शनस्थले स्वप्नद्रष्टुः स्वपत्नीविषयकसंस्कारो वैधव्यविषयकसंस्कारश्च निश्चित एव वर्तते, केवलं तु स्वपत्नीधर्मिकवैधव्यप्रकारकसंस्कारस्तत्र नासीदेव। न हि स्वप्नज्ञाने भासमानानां विषयाणां प्रत्येकसंस्काराभावे स्वप्नदर्शनं घटते। यस्य तु पत्नीविषयको वैधव्यविषयकश्च संस्कारो नास्ति, न तस्य भवति कथंचिदपि तत्र तादृशं स्वप्न-दर्शनम्। अतो विशकलिताः संस्काराः प्रत्येकविषयसम्बन्धिनो ये तत्र वर्तन्ते, निद्रादिदोषसम्पर्कात् तेषां तेषां संस्काराणां परस्परविशेष्यविशेषणभावादिक्रमेण स्वप्नदर्शनं सम्भाव्यते। तस्मात् क्वचिद्विषयस्य साक्षाज्जनकत्वम्, क्वचिच्च संस्कारद्वारेति द्वितीयः कल्पो दुरपनेय एव स्यादिति चेत्, तत्रोच्यते—विषयस्य साक्षाज्जनकत्वं प्रागेव निराकृतम्।

तत्रोत्तरपक्षः—

यत्तूक्तं परम्परयेति, तत्र नास्माकमप्यसम्मतिः। किन्तु तत्रेदमवधेयं यत् संस्कारः खल्वनुभवजन्यः। अनुभवश्च विषयसत्त्वमपेक्षते न वा? यदि विषयसत्त्वं सर्वत्र तत्तदनुभवं प्रति कारणं स्यात् तर्हि मृगतृष्णिकादौ व्यभिचारः। न हि

तत्र कथंचिद्विषयसत्त्वं सम्भावयितुं शक्यते। यदि तत्र सलिलादीनां सत्त्वमेव स्यात् तदा दर्शनानन्तरं तत्र प्रवृत्तस्य सलिलार्थिनः सलिललाभेन स्नानपानाद्यर्थक्रिया परिनिष्पन्नापि स्यात्। तच्च नास्ति। तस्मादकामेनापि स्वीकर्त्तव्यं यत्, तत्र विनैव सलिलसत्त्वं सलिलानुभवः। अतोऽनुभवत्वावच्छिन्नं प्रति तत्तद्विषयास्तित्वं न कारणम्। न च तत्राप्यन्यत्रावस्थितं यत् सलिलादिकं वस्तु सत्, तदेव कदाचिदनुभूतमिति तत्संस्कारवशात् तत्रानवस्थितस्यापि सलिलस्य प्रत्यक्षात्मकं ज्ञानमिति वाच्यम्, अनुभवं प्रति विषयास्तित्वमेव कारणत्वेन यतो न साधयितुमलम्, अतः कथमन्यत्रावस्थितस्य सलिलस्यानुभवः सलिलसत्त्वजन्य इति निर्धारितं भवेत्? यदि पुनरनुभवत्वावच्छिन्नं प्रति विषयास्तित्वं कारणमिति साधयितुं शक्येत तदैव भवतामेव पन्थाः साधीयान् भवेत्। प्रकृते तु विषयानुभवकारणत्वेन विषयास्तित्वमेव न सिध्यति, यतो यत्र मृगतृष्णिकादिदर्शनं भवेत्, तत्र तादृशं ज्ञानमनुभवपदवाच्यं न वा? यद्यनुभवपदवाच्यं स्यात् तदा विषयासत्त्वेऽपि तदनुभवसिद्धौ विषयास्तित्व-तदनुभवयोः कार्य्यकारणभाव एव न सिध्यति। यदि पुनस्तथाविधं ज्ञानमनुभव-पदवाच्यमेव न भवेत्, तदा[1] लोकसिद्धव्यवहारापलापः। यतोऽनुभवत्वं नाम स्मरणा-न्यज्ञानत्वम्। मृगतृष्णिकादौ च सलिलं पश्यामीति प्रतीतिसाक्षिकतया प्रत्यक्षात्मकस्य स्मरणान्यज्ञानस्यानुभवत्वं नैवालमेव कश्चित् कथङ्कारमप्यपलपितुम्।

अन्यथाख्यातिवादिनैयायिकमते विषयसत्त्वस्यानुभवकारणत्वम्—

ननु मृगतृष्णिकादौ यज्ज्ञानं जायते, तत्त्वन्यत्रावस्थितस्य सलिलादिवस्तुनो ज्ञानलक्षणसन्निकर्षेणावभासकमेव। अतस्तत्रापि विषयास्तित्वमनुभवं प्रति कारणम्, तदानीमेवान्यत्र विषयसत्ताया वर्तमानत्वात्। केवलं तु यथार्थव्यवहारनिष्पादकस्य विशेषणविशिष्टविशेष्येण सह लौकिकसन्निकर्षादेरभावात् तत्र संवादिप्रवृत्तिर्न घटते, अपि तु विसंवादिनी प्रवृत्तिः। अत एव तथाविधं ज्ञानं न प्रमा। यतो हि यत्र ज्ञाना-नन्तरं ज्ञेयवस्तुसंग्रहार्थिनस्तत्र प्रवृत्तस्य वस्तुलाभात् प्रभृत्तिः फलवती भवेत्, तत्रैव ज्ञानं प्रमा। उक्तं च तत्रभवता वात्स्यायनभाष्यकृता—'प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्ति-

---

१. कैश्चित् पुनर्दार्शनिकम्मन्यैर्मन्यते यद् यथार्थज्ञानमेव ज्ञानपदप्रवृत्तिनिमित्तम्। अत एव यदयथार्थं प्रतीयते तद् वस्तुगत्या ज्ञानपदप्रवृत्तिनिमित्ततां नावगाहते, यतो वस्तुस्वरूपस्फुरणस्यैव प्रकाशात्मकत्वेन ज्ञानत्वम्। अत एव स्वालम्बनो-भूतविषयप्रकाशनं विना नान्यत् किंचिज्ज्ञानपदवाच्यम्। अयथार्थज्ञानस्थले तथाविधानां स्वालम्बनीभूतविषयाणामभावात् तत्स्थलीयज्ञानमिवोदीयमानमपि न ज्ञानपदवाच्यम्, अपि तु ज्ञानाभास एव। एवमेतन्मते मृगतृष्णिकादिदर्शनस्य ज्ञानत्वमेव न घटते, कुतोऽनुभवत्वम्?

सामर्थ्यादर्थवत् प्रमाणम् इति[1]। तस्माज्ज्ञानलक्षणसन्निकर्षवशादन्यत्रावस्थितस्य सलिलादिवस्तुनस्तत्र तत्र भानादनुभवं प्रति विषयसत्तायाः कारणता न व्याहन्यते। अत एव सर्वथैव तुच्छानामत्यन्तासतामाकाशकुसुमादीनामनुभवो नैव कुत्रापि जायते। तस्मान्निर्बाधमेव विषयास्तित्वस्यानुभवजनकत्वम्। इत्येवं प्राप्ते प्रत्युच्यते—

अन्यथाख्यातिखण्डनेन नैयायिकमतनिरासः—

ज्ञानलक्षणसन्निकर्षस्यैवाप्रामाणिकत्वात् तद्वशादन्यत्र विद्यमानस्य वस्तुनोऽन्यत्र भानं नैवोपपद्यते। तथाहि, सुरभि चन्दनमित्यादिज्ञानोपपत्तये ज्ञानलक्षणसन्निकर्षः स्वीकर्त्तव्य इति परेषां मतम्। तथा च घ्राणेन्द्रियासन्निकृष्टे चन्दनकाष्ठे यत्रेन्द्रियसंयोगवशात् सुरभि चन्दनमित्याकारकं चन्दनचाक्षुषं जायते, तत्र चन्दनचाक्षुषे सुरभित्वभानमपि तदानीं ज्ञानलक्षणप्रत्यासत्त्यैव। सुरभित्वभानार्थं चान्यस्य सन्निकर्षस्यासम्भवात् तत्र सौरभत्वज्ञानमेव हि स्मरणात्मकं सन्निकर्षरूपेण ग्राह्यमिति न्यायतन्त्रिणां राद्धान्तः[2]। स च न युज्यते। यतस्तत्र चन्दनकाष्ठे प्रत्यक्षानन्तरमिदं चन्दनं सुरभि चन्दनत्वाच्चन्दान्तरवदित्यनुमानेनैव सुरभित्वज्ञानोपपत्तिसम्भवे कृतं तदर्थं ज्ञानलक्षणसन्निकर्षस्वीकारेण। यद्वा, एकमेव ज्ञानं चन्दनांशे चाक्षुषं सौरभांशे स्मृत्यात्मकं नरसिंहाकारमित्येव वाङ्गीक्रियताम्। किञ्च, यदि ज्ञानलक्षणसन्निकर्षो भ्रमस्थले स्वीक्रियते, तदा स्वाभाविकसन्निकर्षस्यैव सत्त्वात् तज्ज्ञानं कथङ्कारं भ्रमत्वमवगाहते। अपि च, ज्ञानलक्षणसन्निकर्षाङ्गीकारे सर्वज्ञानुमानोच्छेदप्रसङ्गो दुर्वारः। तथाहि पर्वतादौ धूमादिदर्शनेन व्याप्तिस्मरणादिक्रमेण यदा वह्निव्याप्यधूमवानयमिति परामर्शः स्यात्, तदनन्तरं वह्नेर्मानसप्रत्यक्षं परामर्शात्मकज्ञानलक्षणसन्निकर्षवशान्न वारयितुं शक्यते, समानविषयकज्ञानस्थले प्रत्यक्षसामग्र्याः सर्वतो बलवत्त्वात्। अपि च, अन्यत्रावस्थितस्य रजतादेः शुक्तिरजतभ्रमस्थले ज्ञानाभ्युपगमे तत्रानवस्थितस्यापि विषयस्य भानोपगमः। तच्च न युक्तम्, अनवस्थितस्य वस्तुनस्तन्मतेऽपरोक्षप्रतीतेरयोग्यत्वात्। अपि च, तद्विषयकचाक्षुषं प्रति तद्विषयकेन्द्रियसंयोगस्य कारणत्वाभ्युपगमभाज् ज्ञानलक्षणात्मकोपनयप्रयोज्यस्य विषयस्य लौकिकत्वासम्भवेन रजतं पश्यामीति प्रत्ययानुपपत्तिः। तस्मान्नैव सिद्धं रजतादीनां भ्रमविषयाणां ज्ञानजनकत्वम्।

---

१. न्यायदर्शनम्, १।१।१—वात्स्यायनभाष्यम् (पूर्वभाष्यम्)।

२. 'तदिन्द्रियग्रहणयोग्यतां विनापि सुरभि चन्दनमित्याकारकचाक्षुषादौ सौरभादीनां ···· ज्ञानस्य सन्निकर्षमुद्रया प्रत्यक्षहेतुता कल्प्यते।
(ज्ञानलक्षणाविचाररहस्यं हरिरामतर्कवागीशीयम्, पृ० ७. कालिकातासंस्कृतकालेज्-संस्करणम्, १९५४)।

अख्यातिवादिमीमांसकमतेऽपि ज्ञानं प्रति विषयस्य कारणत्वम्—

ननु यत्र रज्ज्वादिवस्तुन्यनवस्थितानामपि सर्पादीनां प्रतीतिस्तत्र नैवायं सर्प इत्यादिविशिष्टमेकमेव ज्ञानम् । यतः स्वावलम्बनीभूतविषयप्रकाशनमेव धियां स्वभावः। अनालम्बनीभूतविषयप्रकाशनत्वमपि ज्ञानानां यद्यङ्गीक्रियते, तदा सर्वत्रैव ज्ञानेऽनाश्वासप्रसङ्गः। तथा च, ज्ञानपूर्वकव्यवहारानुपपत्तौ लोकयात्रासमुच्छेदः स्यात् । तस्माद् अयं सर्प इत्यादौ नैकं ज्ञानम्, अपि त्वयमिति प्रत्यक्षात्मकमेकं ज्ञानम्, सर्प इति च स्मरणात्मकमन्यत्[1]। तत्र च दोषवशाज् ज्ञानद्वयविषययोश्च मिथो भेदाग्रहात् 'अयं सर्पः' इत्यादिसामानाधिकरण्येन प्रवृत्तिरुपपद्यते, न तु तत्र विशिष्टमेकं ज्ञानं स्वीकरणीयम् । अतो भ्रमस्थलेऽपि ज्ञानस्य स्वालम्बनत्वनियमात् सर्वत्रैव ज्ञानं प्रति विषयसत्त्वमेव कारणमिति चेत्, तत्रोच्यते—

अख्यातिवादखण्डनेन मीमांसकमतनिरासः—

इदं रजतमित्यादिज्ञानानन्तरं रजतार्थिनां तत्र प्रवृत्तिः सम्पद्यते। तद्विषयकप्रवृत्तिं प्रति तद्विषयकेष्टसाधनतानिश्चयत्वेन कारणत्वं सर्वत्रैव प्रसिद्धम् । अत इदङ्कारास्पदे वस्तुनि रजतार्थिनां प्रवृत्तिदर्शनात् तत्रैदन्त्वावच्छिन्नविशेष्यताकमभेदसम्बन्धावच्छिन्नरजतत्वावच्छिन्नप्रकारताकमेकं विशिष्टं ज्ञानमवश्यं वाच्यम् । यदि तु पुरोवर्त्ति शुक्लभास्वरद्रव्यं रजतत्वेन नैव निश्चिनुयात्, तर्हि रजतार्थिनस्तत्र प्रवृत्तिरपि न स्यात् । दृश्यते च रजतार्थिनस्तत्र प्रवृत्तिः । अपि च, इदन्त्वावच्छिन्नवस्तुनो रजतस्य च केवलमसंसर्गो न गृह्यत इत्यगृहीतासंसर्गकज्ञानमेव तत्र यदि स्यात्, तर्हीदन्त्वास्पदे वस्तुनि रजतनिश्चयाभावादुपेक्षैव समीचीना, न तु प्रवृत्तिः । अपि च, इदन्त्वावच्छिन्नवस्तुप्रत्यक्षेण रजतसादृश्यसन्दर्शनवशात् रजतसंस्कारः समुद्बोधितः सन् रजते स्मृतिं जनयेदित्येवं तेषामभिलापः। तत्र सादृश्यं नाम तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् । तथा चेदङ्कारास्पदं वस्तु रजतभिन्नत्वे सति चाकचिक्यादिरूपरजतगतधर्मवदिति ज्ञानमेव रजतसदृशमिदमित्यस्यार्थः। तथा सति सादृश्यग्रहणे सत्येव तत्र रजतसंस्कारः समुद्बोधितो भवेत् । सादृश्यग्रहणवेलायामेव पुनारजतभिन्नतयैवेदङ्कारास्पदस्य वस्तुनो ग्रहणात् तत्र 'इदं रजतम्' इति सामानाधिकरण्यनिश्चयः कथं सम्पद्यते ? न हि रजतभिन्नमिदमिति ज्ञात्वापि रजतमिदमिति प्रमत्तं विना कोऽपि जानीयात्। तस्माद् इदं

---

१. 'रजतमिदमिति नेदमेकं विज्ञानम्, किन्तु द्वे एते विज्ञाने ग्रहणस्मरणरूपे। तत्र रजतमिति स्मरणं तस्यानुभवरूपत्वाभावान्न प्रामाण्यप्रसङ्गः। इदमिति विज्ञानमनुभवरूपं प्रमाणमिष्यत एव' (प्रकरणपञ्चिका, षष्ठप्रकरणे, पृ० १२६)।

रजतमिति सामानाधिकरण्येन निर्देशात् तत्र रजतार्थिनां प्रवृत्तेश्चेदन्त्वादवच्छिन्नधर्मिकरजताभेदज्ञानं स्वीकर्त्तव्यम् । अपि च, तादृशज्ञानस्य भ्रमस्थले कारणतानभ्युपगमे, भेदाग्रहसहितस्य इदमिति रजतमिति च ज्ञानद्वयस्य कारणताभ्युपगमे च प्रमास्थलाद् भिन्न एव कार्यकारणभावोऽङ्गीकरणीयः स्यात् । प्रमास्थले त्विदन्तावच्छिन्नविशेष्यताकमभेदसम्बन्धावच्छिन्न रजतत्वावच्छिन्नप्रकारताकज्ञानस्य प्रमाप्रवृत्तिं प्रति कारणता भवतामप्यभिमतेति प्रवृत्तिं प्रतीष्टसाधनताज्ञानस्य कार्यकारणभावद्वयं भवता स्वीकर्त्तव्यं स्यात् । तच्च नोपादेयम्, भ्रमप्रमोभयस्थल एव तादृशेष्टसाधनताज्ञानत्वेन कारणताकल्पनायां लाघवात् ।

अनिर्वाच्यवादिमतेऽपि भ्रमस्थले प्रातिभासिकसतः प्रतीतेर्विषयानुभवयोः कार्यकारणभावः—

नन्वत्यन्तासतामाकाशकुसुमादीनां साक्षात् प्रतीतिविषयत्वायोगाद् इदं रजतमित्यादौ नु साक्षात्प्रतीत्युपपत्तेस्तत्र प्रतीयमानं रजतं नात्यन्तासत्, अत्यन्तासतां क्वचिदपि धर्मिणि तावदिदन्तया प्रतीतेरयोगात् । नापि प्रतीयमानं रजतादिकं सदेवेति वक्तुं साम्प्रतम्, तत्र प्रवृत्तस्य रजताप्राप्तिदर्शनात् । यदि तु तद्रजतं सदेव स्यात् तर्हि तत्र रजतज्ञानानन्तरं प्रवृत्तेन तद्रजतमपि लभ्येत । न च लभ्यते । तस्मात् तद्रजतं न पारमार्थिकं सत्, नाप्यसत्, प्रत्यक्षविषयत्वात्, नापि सदसत्, विरुद्धधर्मायोगात् । अतः प्रतीयमानं तथाविधं रजतं तत्कालोत्पन्नं सदसद्भ्यामनिर्वाच्यम्, अज्ञानपरिणामात्मकं किमप्युररीकर्तव्यम्[1] । तथा च, प्रत्ययमात्रशरीरस्य तत्तत्कालोत्पन्नस्य भाविज्ञानविनाश्यस्य ज्ञानकाले यत् प्रातिभासिकं सत्त्वं तद्वशादेव तथाविधानां रजतादीनां प्रतीतिरित्यनुभवत्वावच्छिन्नं प्रति यथाकथंचिदविषयसत्त्वमावश्यकमेवेति चेत्, अत्रोच्यते ।

---

१. 'अनिर्वाच्यमेवारोपणीयं मरीचिषु तोयमास्थेयम् ।..........तत् सिद्धमेतद् विवादाध्यासितं रजतादिज्ञानं पुरोवर्त्तिवस्तुविषयम्, रजताद्यर्थिनस्तत्र नियमेन प्रवर्त्तकत्वात् यद् यदर्थिनं यत्र नियमेन प्रवर्त्तयति, तज्ज्ञानं तद्विषयम्, यथोभयसिद्धसमीचीनरजतज्ञानम् । तथा चेदम्, तस्मात् तथेति ।'

(ब्रह्मसूत्रम् १।१।१—अध्यासभाष्यभामती) ।

'ब्रह्मनन्दिना हि नासतोऽनिष्पाद्यत्वात् प्रवृत्त्यानर्थक्यं तु सत्त्वाविशेषादिति सदसत्पक्षप्रतिक्षेपेण पूर्वपक्षमादर्श्य न संव्यवहारमात्रत्वादित्यनिर्वचनीयता सिद्धान्तिता' (कल्पतरुः, पृ० ४२६) ।

अनिर्वाच्यवादनिराकरणपूर्वकं स्वाभिमतोपपादनम्—

शुक्तिरजतादिज्ञाने प्रतीयमानानां रजतादीनां प्रत्ययमात्रशरीरत्वाङ्गीकारेणास्मदीप्सितं स्वीकृतप्रायमेव। तथाहि प्रत्ययशरीरेति शब्दस्य कोऽर्थः? प्रत्ययाद् बहिर्यस्यास्तित्वं नास्ति, तस्यैव प्रत्ययमात्रशरीरत्वं वक्तुं युज्यते। तथा च, ज्ञानेन विषयः प्रतीयते, तस्य ज्ञानाद्बहिः सत्त्वमेव नास्तीत्यस्माकमपि सिद्धान्तः। तस्मात् प्रत्ययमात्रशरीरेति कथनेन भवद्भिरस्माकमानुकूल्यमेव विहितं न तु प्रातिकूल्यम्। यत् पुनरुक्तम्—तथाविधस्य रजतस्य सदसद्भ्यामनिर्वाच्यत्वमिति, तत् तु न मृशामः। तथाहि, द्विधैव वस्तु विचारणीयम्, सत्त्वेनासत्त्वेन वा। तत्र यदि सत् स्यात्, तर्हि नासत्। असच्चेत् न सत्। न ह्याभ्यामन्यस्तृतीयः प्रकारो वर्त्तते। तस्मादनिर्वाच्यमिति यदुक्तं तत् तु मनोरथमात्रम्। ययो हि प्रत्ययमात्रशरीरस्य रजतस्य ज्ञानाद् बहिरस्तित्वं नास्त्येव, अतो ज्ञानातिरिक्तस्य विषयस्य सत्त्वं विनापि विषयाकारविज्ञानबलाद् विषयानुभवोऽव्याहतो भवेत्। तस्मात् प्रसिद्धस्य विषयानुभवस्य सिद्धिः कथमिति पर्यनुयोगे विज्ञानवादिनां प्रतिवचनं यद् अनुभवं प्रति स्वालम्बनीभूतविषयस्य कारणत्वासम्भवात् सुतरां विज्ञानस्यैव परिणामविशेषो विषयानुभव इति गृह्यताम्। उक्तं च विज्ञप्तिमात्रतासिद्धौ—

'आत्मधर्मप्रचारो हि विविधो यः प्रवर्त्तते।
विज्ञानपरिणामोऽसौ परिणामः स च त्रिधा[१] ॥'

अयमभिप्रायः—अस्माभिर्यदनुभूयते 'अहं नीलं पश्यामि' इत्यादिरूपेण, तत्रात्मविषयग्रहणात्मकावरणेनावृतं विज्ञानं प्रकाशते। उक्तं च—'आत्मधर्मग्रहाभ्यामुभयोरावरणयोः समुत्पादः[२]।' अत्र चाऽऽत्मेत्येको राशिः, धर्मशब्देन प्रतिपाद्यो ज्ञेयतया प्रसिद्धो विषयोऽपरो राशिः। आभ्यां राशिभ्यां समावृतं विज्ञानं प्रकाशते। अत एव एकस्यैव विज्ञानस्य वस्तुतो भेदाभावेऽपि संवृतिवशाद् भागात्मकराशिद्वयकल्पनम्। तथा चोक्तम्—

अभिन्नोऽपि हि बुद्धात्मा विपर्यासनिदर्शनैः।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते[३] ॥'

---

१. वि० मा० सि० त्रिंशिकाप्रकरणम्, कारिका १।
२. वि० मा० सि० उयेन्साङ्कृतटीका, प्रथमपरिच्छेदः, पृ० १।
३. सांख्यदर्शनम्—१।१।२० प्रवचनभाष्ये विज्ञानभिक्षुपादैरुद्धृतेयं कारिका।

अपि च— परिच्छेदान्तराद्योऽयं भागो बहिरवस्थितः ।
ज्ञानस्याभेदिनो भेदप्रतिभासोऽप्युपप्लवः[1] ॥'

ननु विज्ञानस्यैकत्वेऽपि विभिन्नाकारपरिणामे किं बीजमिति चेत्, तत्रोच्यते—अनाद्यविद्याजनितपूर्वपूर्वविकल्पाहितानुभवजन्यविचित्रसंस्कारवशाद्विज्ञानस्य तथाविधः परिणामः सम्भवेत् । उक्तं च विज्ञप्तिमात्रतासिद्धौ स्थिरमतिभाष्ये—

'तत्रात्मादिविकल्पवासनापरिपोषाद् रूपादिविकल्पवासनापरिपोषाच्चालयविज्ञानादात्मादिनिर्भासो विकल्पो रूपादिनिर्भासश्चोत्पद्यते । तमात्मादिनिर्भासं रूपादिनिर्भासं च तस्माद्विकल्पाद् बहिर्भूतमिवोपादायात्माद्युपचारो रूपादिधर्मोपचारश्चानादिकालिकः प्रवर्त्तते, विनापि बाह्येनात्मनो धर्मैश्च[2] ।'

दृश्यते च तैमिरिकादिरोगाक्रान्तानां सत्यप्येकस्मिन् चन्द्रमसि द्विचन्द्रदर्शनम् । अतोऽसत्यपि विज्ञानातिरिक्ते कस्मिंश्चिदात्मनि धर्मे वा केवलं विकल्पवासनावशादेव विचित्राकारान् विषयाननुभवति लोके लोकः । तत्र यथा मृगतृष्णिकादिस्थले असतोऽपि जलादेर्दर्शनं प्रसिद्धम्, न च तेनैव दर्शनेन जलादेस्तत्र पारमार्थिकत्वं स्यात्, एवं विज्ञानातिरिक्ततया आत्मधर्मादिदर्शनेनापि न तेषामात्मधर्मादीनां पारमार्थिकत्वं सम्भवेत् । तदुक्तं स्थिरमतिभाष्ये—'एवं विज्ञानस्वरूपे बहिश्चात्मधर्माभावात् परिकल्पित एवात्मा धर्मांश्च न तु परमार्थतः सन्तीति[3] ।'

ज्ञानातिरिक्तज्ञेयाभावसिद्धये ज्ञानज्ञेययोः सम्बन्धविचारः—

ननु विषयो यदि ज्ञानाद्बहिर्नास्त्येव, तर्हि नीलोऽयं पीतोऽयमिति विज्ञानवैचित्र्यं कथं सिध्येत् ? न हि विषयवैचित्र्यं विना निज्ञानवैचित्र्यं सम्भवेत् । सर्वत्रैव विज्ञानातिरिक्तस्य विषयस्यानङ्गीकारे केवलं स्वरूपतो विज्ञानमेवावशिष्यते । स्वरूपतश्च विज्ञानस्याकारभेदासम्भवात् कथं ज्ञानवैचित्र्यं सर्वानुभवसिद्धं व्यवस्थापयितुं शक्यत इति चेत् ? अत्रोच्यते—

ज्ञानज्ञेययोः सम्बन्धनिराकरणम्—

यदि विज्ञानाद्बहिर्विषयो विज्ञानाद् भिन्न एव विज्ञानेन प्रकाशीक्रियते, तर्हि विषयविज्ञानयोः सम्बन्धः स्वीकर्त्तव्य एव । विज्ञानेनासम्बद्धानामपि विषयाणां

---

१. सर्वदर्शनसंग्रहे माधवाचार्येणोद्धृतोऽयं श्लोकः । पृ० ३५, निर्णयसागरसंस्करणम्, १९२४ ।

२. विज्ञप्तिमात्रतासिद्धिः, का० १—त्रिंशिकाविज्ञप्तिभाष्यम् पृ० २९ ।

३. विज्ञप्तिमात्रतासिद्धिः, का० १—त्रिंशिकाविज्ञप्तिभाष्यम् पृ० २९ ।

प्रकाशनाङ्गीकारे सर्वत्र विज्ञानं सर्वविषयं स्यात्, एकविषयं वा भवेत्। अतो विज्ञानातिरिक्तस्य विषयस्य सत्त्वमिच्छद्भिर्ग्राह्यविषयैर्ग्राहकविज्ञानेन सम्बन्धः कश्चिदवश्यमङ्गीकार्यः। वस्तुतस्तु स एव न घटते। यतः सत्त्वस्य क्षणिकत्वव्याप्यत्वनियमाद्विषयस्य सत्त्वाङ्गीकारे तस्यापि क्षणिकत्वं बौद्धाचार्यैर्निपुणतमयुक्तिभिर्वैशद्येन प्रतिपादितम्[1]। एवं विज्ञानस्यापि क्षणिकत्वं बौद्धनये सत्त्वेनैवोपपादितम्। तत्र विषयविज्ञानयोः सम्बन्धः कया रीत्या स्थापनीय इति प्रतिपत्तव्यम्। किमनुत्पन्नं विज्ञानं विषयेण सम्बध्यते, किं वा विज्ञानमुत्पन्नमेव विषयेण सम्बद्धम्? एवं विषयोऽपि किमुत्पन्न एव विज्ञानेन सम्बध्यते, विनष्टो वा विज्ञानेन सम्बध्यते? नैतेषां पक्षाणां कोऽपि क्षणभङ्गवादे सङ्गच्छते। तथाहि अनुत्पन्नं विज्ञानम् अनुत्पन्नो विषयो वा न संसर्गमर्यादामवगाहते, सम्बन्धस्य सम्बन्धिद्वयसत्त्वव्याप्यत्वनियमात्। तथाहि, आदौ विज्ञानं ततश्च विषय उत्पद्यते चेत्, तर्हि विषयोत्पत्तिकाले विज्ञानस्य नाशात् तथा विज्ञानोत्पत्तिकाले विषयस्यानुत्पन्नत्वान्नोभयोरेकक्षणावस्थायित्वं सम्भवेदिति सम्बन्धानुकूलैकक्षणसत्त्वं विज्ञानविषययोर्नैव सम्भवेत्। यदि पुनरादौ विषय उत्पद्यते ततो विज्ञानं तदापि समान एव न्यायः। विज्ञानोत्पत्तिकाले विषयस्य विनाशाद् विषयसत्त्वदशायां पुनर्विज्ञानस्यानुदयान्नैतयोः सम्बन्धः सम्भवेत्। न च विषयं विना विज्ञानानुदयाद् विज्ञानजनकत्वं, विषयस्य स्वीकर्तव्यमिति वाच्यम्, कार्य्यकारणभावस्य तत्र युक्तिपराहतत्वात्। तथाहि—कार्यं प्रति तदव्यवहितपूर्ववर्त्तिनः कार्यकालवृत्तितया कारणत्वं दृश्यते। स एव तु नात्र घटते। विज्ञानोत्पत्तिपूर्वक्षणे समुत्पन्नो यो विषयस्तस्य विज्ञानाव्यवहितपूर्ववर्त्तित्वेऽपि न विज्ञानोत्पत्तिकालवृत्तित्वं तदानीं तस्य विनाशात्। नहि विनष्टस्य तत्र कारणत्वं सम्भवेत्। विनष्टस्य कारणत्वे मृतेनापि भर्त्रा पत्न्यामपत्यजननं समापतेत्। तच्च षण्डकोपाख्यानवदुपहासास्पदं स्यात्। तथा चोक्तं पातञ्जलभाष्ये—

'कश्चित् षण्डकोपाख्यानेनोद्घाटयति—मुग्धया भार्यया अभिधीयते षण्डकः, आर्यपुत्र! अपत्यवती मे भगिनी किमर्थं नाहमिति, स तामाह—मृतस्तेऽहमपत्यमुत्पा-

---

१. यत् यत् सत् तत्, क्षणिकमिति बौद्धसिद्धान्तः। तथा च तत्त्वसंग्रहे—

'तथाहि सन्तो ये नाम ते सर्वे क्षणभङ्गिनः।
तद् यथा संस्कृता भावास्तथा सिद्धा अनन्तरम्॥'
(त० सं० का० ३९२)

उक्तं च—'क्षणिकाः सर्वसंस्कारा अस्थिराणाः कुतः क्रिया।' एवं केवलं सिद्धान्ततया बौद्धोक्तक्षणभङ्गवादः स्वीकृत एवात्रास्माभिः, न पुनस्तत्स्थापने विस्तरभिया प्रयासोऽपि कृतः।

दयिष्यामीति[1]।' अतो विषयस्य विज्ञानजनकत्वं नास्ति। एवं कथमपि विज्ञानातिरिक्तस्य विषयस्य विज्ञानेन सम्बन्धासम्भवाद् विज्ञानेन स्वातिरिक्तं वस्तु प्रकाश्यत इति तु रिक्तमेव वचः।

ज्ञानातिरिक्तात्मनोऽस्तित्वे पूर्वपक्षः—

ननु ज्ञातैवात्मतया प्रसिद्धस्तत्र ज्ञातैव यदि ज्ञानातिरिक्ततया नास्ति, तर्हि विज्ञानं कथमुत्पद्यते? न हि ज्ञातारमन्तरेण विज्ञानस्य विज्ञानत्वमेव सिध्यति। तथाहि, इदं विज्ञानमिति यदि कोऽपि न जानीयात्, तर्हि विज्ञानमस्तीत्येवं कथं सिध्यति? अतो ज्ञानातिरिक्तस्य ज्ञातुरनङ्गीकारेण मूलोच्छेदि पाण्डित्यं सुमहत् प्रदर्शितमिति चेदत्रोच्यते—

विज्ञानस्य स्वप्रकाशत्वान्न दोष इति सिद्धान्तः—

किमिदं विज्ञानं नाम? तदेवादाववधार्यताम्। स्वप्रकाशमानमेव हि विज्ञानमिति विज्ञानस्य स्वरूपम्। उक्तं चाभिधर्मकोशे—'विज्ञानं प्रतिविज्ञप्तिर्मन आयतनं च तत्[2]।' तथाहि, स्वयंप्रकाशमानस्य विज्ञानस्य स्वातिरिक्तं किञ्चित् प्रकाशार्थं नापेक्ष्यते।

ननु विज्ञानं स्वयंप्रकाशमित्यत्र किं मानम्? उच्यते—विज्ञानं यदि स्वातिरिक्तं किञ्चित् प्रकाशार्थमपेक्षते, तर्हि विज्ञानस्य प्रकाशस्वरूपतैव न सिध्यति। यतः स्वातिरिक्तेन येन विज्ञानस्य प्रकाशो भवेत्, स एव तर्हि प्रकाशस्वभावः, अन्यथा तेनैव कथं विज्ञानं प्रकाशते? यत् प्रकाशते, येन च प्रकाशते तयोरुभयोर्मध्ये कस्यचित् प्रकाशस्वरूपत्वमावश्यकम्, अन्यथा प्रकाशानुपपत्तेः। न हि जडयोर्द्वयोः सम्बन्धात् प्रकाशोत्पत्तिः सम्भवेत्। यतो ययोः सम्बन्धात् प्रकाशः सम्पद्यते सम्बन्धिनोस्तयोर्यद्यन्यतरस्यापि न प्रकाशात्मत्वम्, तर्हि तयोः सम्बन्धात् प्रकाशः कथङ्कारं सम्पद्यते? अतस्तयोर्मध्ये कस्यचित् प्रकाशस्वरूपत्वं कल्पनीयम्। यस्य च प्रकाशस्वरूपत्वं तदैव विज्ञानमिति वक्तुं न शक्यते। तथा चोक्तं तत्त्वसंग्रहे—

> 'स्वरूपवेदनायान्यद् वेदकं न व्यपेक्षते।
> न चाविदितमस्तीदमित्यर्थोऽयं स्वसंविदः[3]॥

---

१. पातञ्जलव्यासभाष्यम्, साधनपादः, सूत्रम् २४।
२. अभिधर्मकोशः—२।२६।
३. तत्त्वसंग्रहः, का० २०११।

ज्ञानस्य ज्ञेयाद्यपेक्षत्वाद् मीमांसकानामाक्षेपः—

ननु ज्ञानं यद्यपि प्रकाशात्मकम्, तथापि स्वात्मप्रकाशनाय स्वातिरिक्तं किंचिद् अपरमवश्यमपेक्षणीयम्। यतो ज्ञानं ह्यर्थप्रकाशनार्थमेव व्यापृतम्। न ह्यर्थप्रकाशनं विना ज्ञानस्यास्ति कश्चिद्व्यापारः। तथाहि ज्ञातारं ज्ञेयं च विना ज्ञानं कथमपि न लब्धप्रकाशं भवेत्। न ह्यग्निराकाशं दहति। अतो यथा वह्नेर्दाहकत्वसिद्धौ दाह्यास्तित्वमपेक्ष्यते, तथैव ज्ञानस्यापि प्रकाशकत्वसिद्धौ प्रकाश्यं किंचिदपेक्ष्यते। अतो न ज्ञेयं विना ज्ञानसिद्धिः। एवं ज्ञातारमन्तरेण ज्ञानं निराश्रयं कथं लब्धसत्ताकं स्यात्? अतो ज्ञानं यद्यपि स्वप्रकाशं तथापि तत्र प्रकाशकत्वोपपत्तये ज्ञातृज्ञेयसम्बन्ध आवश्यक एव। उक्तं च शास्त्रदीपिकायाम्—

'येऽपि स्वप्रकाशां संविदमातिष्ठन्ते तैरप्यं सम्बन्धो मानसप्रत्यक्षगम्योऽवश्यमभ्युपगमनीयः। अन्यथा ज्ञातो मया घट इति ज्ञानज्ञेयसम्बन्धो वा न व्यवहर्तुं शक्यते'[1]।

तत्र ज्ञानस्य स्वप्रकाशत्वं नाम स्वसम्बद्धव्यवहारे सजातीयज्ञानान्तरापेक्षाराहित्यम्[2]। ज्ञानस्य स्वव्यवहारे संविदन्तरनैरपेक्ष्येण स्वप्रकाशत्वमव्याहत।। प्रमातृसम्बन्धं विना यद्यपि ज्ञानं न प्रकाशते, तथापि प्रमातृप्रमेययोः स्वव्यवहारे संविदपेक्षा विद्यते। अतस्तयोर्न स्वप्रकाशकत्वम्। उक्तं च प्रकरणपञ्चिकायामपि—

'मेये मातरि च व्यतिरिक्ता प्रतीतिः साक्षात्कारवती, मितौ त्वव्यतिरिक्ता। इदमहं गृह्णामीति वा इदमहं स्मरामीति वा त्रितयमेवावभासते। मेयमात्रवभासरूपा संविदेका। न तु तस्यां संविदन्तरं चकास्ति[3]।'

तत्र समाधानम्—

ज्ञानादतिरिक्तं ज्ञेयं विना ज्ञानव्यापारो न सिध्यतीति तदुक्तं तत्रेदं पृच्छ्यते—कोऽयं ज्ञानव्यापारः? नन्वर्थस्य संवित्तिरेव ज्ञानव्यापार इति चेत्, संवित्तिर्ज्ञानान्नातिरिच्यते। न ह्यर्थवित्तिर्ज्ञानादन्या। वित्तिरुपलब्धिरर्थप्रतीतिर्विज्ञप्तिरिति ज्ञानमेव पर्यायैः

---

१. शास्त्रदीपिका, अ०, पा० १, अधि० ५, पृ० ५६।

२. 'इह च संविन्मात्रं स्वयं प्रकाशितम् अर्थोऽपि तद्वशात् ......प्रकाशकत्वमेव हि संविदा विषयेण सम्बन्धो नान्यः।' शास्त्रदीपिका, अ० १, पा० १, अधि० ५, पृ० ५६।

३. प्रकरणपञ्चिका—प्रकरणं पष्ठम्, पृ० १७०-७१, काशीहिन्दूविश्वविद्यालयः, १९६७।

शब्दैरभिधीयते। एवं च सति ज्ञानस्वरूपायामर्थवित्तौ सिद्धायां तदन्यः कश्चित् संवेदनात्मको व्यापारः ज्ञानाद् व्यतिरिक्तः कथं सिध्यति ? अतो ज्ञानं स्वयमेव स्वस्मिन् व्याप्रियत इति यदि भवतामिष्टम्, तर्हि नास्माकं हानिः। तथा चोक्तं तत्त्वसंग्रहे—

'ननु चार्थस्य संवित्तिर्ज्ञानमेवाभिधीयते।
तस्यां तदात्मभूतायां को व्यापारोऽपरो भवेत्[1]॥'

नन्वर्थस्य संवित्तिरिति कथनेनैव ज्ञानार्थयोर्भेदः सम्यक् परिस्फुटः। अतोऽर्थस्यैव प्रकाशनव्यापारो ज्ञानस्येति स्वीकर्त्तव्यम्। न ह्यर्थस्य सत्तां विना तत्र प्रकाशनाख्यः ज्ञानव्यापारः सम्भाव्यते। न ह्याकाशकुसुमादौ कस्यचिद् व्यापारः कल्पयितुमपि शक्यते। यदि त्वर्थो ज्ञानादव्यतिरिक्त एव स्यात्, तदा ज्ञानस्यार्थानुभवात्मकत्वं न सङ्गच्छेत्। वस्तुतस्तु ज्ञानादयोऽतिरिच्यत एव, इति चेत् तत्रोच्यते—ज्ञानातिरिक्तत्वमर्थस्य ज्ञानेनावगम्यते न वा ? नो चेत्, अतिरिक्तत्वमर्थस्य कथं जानीयात् ? अथावगम्यते, तर्हि ज्ञानातिरिक्तेनार्थेन ज्ञानस्य सम्बन्धः स्वीकरणीयः। स च न सङ्गच्छत इति प्रागेवावेदितम्।

ननु ज्ञानं यदि प्रत्यक्षं स्यात् तदैवार्थं विनापि ज्ञानं प्रत्यक्षं भवेदिति विज्ञानवादिमतं ग्रहीतुं शक्यते। तथाहि प्रत्यक्षस्य सर्वप्रमाणश्रेष्ठत्वान्निर्भासि ज्ञानं चेत् प्रत्यक्षग्राह्यम्, तर्हि प्रकाशात्मकं ज्ञानं विना संवित्तौ नान्यत् किञ्चित् प्रयोजनमिति वक्तुं शक्यते।

ज्ञानस्य प्रत्यक्षत्वासम्भवेन विषयसत्त्वसम्पादनमिति कुमारिलमतम्—

किन्तु ज्ञानमेव प्रत्यक्षं न भवेत्। तथाहि, ज्ञानं नाम क्रिया, जानाति वेत्तीत्यादिशब्देनैव तदुपपत्तेः। सा च क्रिया सकर्मिका, अतः कर्मभूतेऽर्थे फलं जनयति। तच्च फलं प्रकाशाख्यम्। यदा पुनरिन्द्रियादिव्यापारजन्यं तथाभूतं फलं तदैव ज्ञानमपरोक्षमिति व्यवह्रियते। लिङ्गादिजन्यं यदा फलं तदा तु परोक्षमिति व्यपदिश्यते। अत्रेदं तात्पर्य्यम्—

प्रतीतिसाक्षिकतयैव सर्वं वस्तु सर्वत्र प्रतिपन्नं स्यात्। अहं घटं पश्यामीत्याकारिकायां प्रतीतौ अंशत्रयमवभासते। तत्र 'अहम्' इत्येकोऽंशः, 'घटम्' इत्यपरः, पश्यामीत्यन्यश्च। तत्र पश्यमीत्यनेनैव संवित् प्रसिध्यति। तथा च, तत्र कर्तृभूतमात्मानं

---

१. तत्त्वसंग्रहः, का २०१६।

कर्मभूतं च घटं विना पश्यामीत्यस्याः प्रतीतेरनुदयात् तत्र कर्तृतयाऽऽत्मानम्, कर्मतया च घटं पश्यामीत्येवार्थः। तथा चात्मना घटस्य पारस्परिकक्रियासम्बन्धं विना घटमहं पश्यामीति प्रतीतिर्न स्यात्। अत आत्मघटयोरेवम्भूतः कश्चित् सम्बन्धः स्वीकर्तव्यो येन तयोः प्रकाश उपपद्यते। स एव सम्बन्धो ज्ञानाख्यया क्रियया निष्पद्यते[1]। न हि पुनर्घटं पश्यामीतिवज्ज्ञानं साक्षात्करोमीति प्रतीतिर्जायते। तथा च, प्रकाशाख्यस्य फलस्य सकर्मतया कर्मभूतं यत् तदेवात्र प्रत्यक्षम्। न तु ज्ञानं कर्मभूतम्। अतः कथं ज्ञानस्य प्रत्यक्षता सम्भवेत्? किन्तु ज्ञानस्य सम्बन्धवशाद्विषये ज्ञातता नाम कश्चिदतिशयो जन्यते। सा च ज्ञातता यदेन्द्रियादिसम्बन्धजन्या तदैव ज्ञाततालिङ्गे-नानुमितं ज्ञानं वस्तुतः परोक्षमप्यपरोक्षमिति व्यवह्रियते, ज्ञाततायां ज्ञानत्वोपचारात्। यदा पुनर्लिङ्गादिजन्या ज्ञातता तदैव तुल्ययुक्त्या ज्ञानं परोक्षमिति व्यवहारः। अतो विषयनिष्ठं प्राकट्याख्यं यत् फलं तदेव सर्वत्र ज्ञानस्यानुमापकम्। उक्तं च शास्त्र-दीपिकायाम्—

'ज्ञानक्रिया हि सकर्मिका कर्मभूतेऽर्थे फलं जनयति पाकादिवत्, तच्च फलमैन्द्रिय-कज्ञानजन्यमापरोक्ष्यम्, लिङ्गादिज्ञानजन्यं तु पारोक्ष्यमित्युच्यते[2]।

एवं च, सति ज्ञातृज्ञेययोः सम्बन्धं बिना ज्ञानानुपपत्तेर्ज्ञानक्रियाद्वारकस्तत्र कर्तृभूतस्य ज्ञातुः कर्मभूतस्य चार्थस्य परस्परं यः सम्बन्धः, स एव मानसप्रत्यक्षेण गृह्यते। गृहीतेन च तेन सम्बन्धेन ज्ञानं कल्पयितुं शक्यते। तथाहि, ज्ञानाज्ज्ञेये ज्ञातरि च कश्चिदतिशयो जन्यते, स एवातिशयो ज्ञातता। मानसप्रत्यक्षबलेन तस्या ज्ञातताया ग्रहणात् तद्विषयकं ज्ञानं विना ज्ञाततायाः अनुपपत्तेः। अतो ज्ञाता ज्ञेयं ज्ञानेन तयोः सम्बन्धश्च मानसप्रत्यक्षेण गृह्यते, न तु ज्ञानम्। तस्माद् ज्ञानं न प्रत्यक्षम्, अपि तु ज्ञात-तालिङ्गकानुमानेन सिद्धमिति[3] पूर्वपक्षः।

---

१. 'ज्ञानक्रियाद्वारको यः कर्तृभूतस्यात्मनः कर्मभूतस्य चार्थस्य परस्परं सम्बन्धो व्याप्तृव्याप्यत्वलक्षणः, स मानसप्रत्यक्षावगतो विज्ञानं कल्पयति, न ह्यागन्तुक-कारणमन्तरेणात्मनोऽर्थं प्रति व्याप्तृत्वमुत्पत्तुमर्हति'।

(शास्त्रदीपिका–१।१।५, पृ ५६)।

२. शास्त्रदीपिका—१।१।५, पृ० ५६।

३. 'अर्थगतो वा ज्ञानजन्योऽतिशयः कल्पयति ज्ञानम्'

(शास्त्रदीपिका–१।१।५, पृ० ५६)।

भट्टपादमतखण्डनम्—

तत्रेदं प्रत्युच्यते—ज्ञानस्याकर्मतया यदि प्रत्यक्षत्वं नेष्येत, तदा घटमहं जानामीत्यादिप्रत्ययेषु भवन्मत आत्मनोऽपि प्रत्यक्षत्वं न स्यात्, तस्याप्यकर्मत्वात्। न हि घटमहं जानामीत्यादिप्रतीतिष्वात्मा कर्मतयाऽवभासते। अतः प्रत्यक्षत्वं यदि कर्मत्वं विना नैव स्यात्, तर्हि पूर्वोक्तप्रत्ययेष्वात्मनोऽप्यकर्मत्वात् प्रत्यक्षत्वं कथं भवेत्? तथा चानुमानम्-आत्मा न प्रत्यक्षः कर्मत्वेनाप्रतीयमानत्वात्, करणज्ञानादिवत्। स्वीक्रियते च पुनस्तत्रात्मनः प्रत्यक्षत्वं भवता। उक्तं च तत्त्वार्थश्लोकवार्त्तिके—

'कर्मत्वेनाप्रतिभासमानत्वात् करणज्ञानमप्रत्यक्षमिति चेन्न, करणत्वेन प्रतिभासमानस्य प्रत्यक्षोपपत्तेः। कथंचित् प्रतिभासते, कर्म च न भवतीति व्याघातावस्थः' इत्यादि[1]।

तत्र ज्ञानस्य परोक्षत्वे व्यवहारापलापः—

वस्तुनस्तु ज्ञानं यदि स्वयमप्रत्यक्षं तदा जगदान्ध्यं प्रसज्येत। तथाहि, ममेदं ज्ञानं जातम् इत्याद्यनुभवेषु ज्ञानं प्रत्यक्षं परोक्षं वा? यदि ज्ञानं परोक्षमेव स्यात्, तदा ज्ञानस्य प्रकाशाभावाद् ज्ञानजनितव्यवहारादिकं कथं सम्भवेत्? यतो ज्ञानेन वस्तु ज्ञात्वा तदनन्तरं तदभिमुखिप्रवृत्तिर्जनानां सर्वेषामेव जायते। तत्र ज्ञानमेव यदि न प्रत्यक्षं तर्हि ज्ञाततालिङ्गकानुमानमपि कथं सम्भाव्यते? अनुमाने हेतुज्ञानमावश्यकम्। न हि हेतुज्ञानं विना व्याप्तिस्मरणादिक्रमेणानुमानं सम्भवेत्। तत्र ज्ञातताख्यहेतोर्यज् ज्ञानं तत् प्रत्यक्षं परोक्षं वा? तत्रापि यदि ज्ञानं परोक्षमेव स्यात् तर्हि भवन्मते तस्याप्यनुमेयत्वमेव। एवं तत्राप्यनुमानहेतुज्ञानस्य परोक्षत्वे पुनरनुमेयत्वं तद्धेतोरापद्येत। तथा चानवस्था दुष्परिहरा। तदुक्तम्—

'गोचरान्तरसञ्चारस्तथा न स्यात् स चेक्ष्यते।
गोचरान्तरसञ्चारे यदन्त्यं तत् स्वतोऽन्यतः॥
न सिद्धमस्य चासिद्धौ सर्वेषामप्यसिद्धता।
अतश्चान्ध्यमशेषस्य जगतः सम्प्रसज्यते[2]॥'

तत्र च ज्ञातताहेतुकज्ञानानुमाननिराकरणम्—

एवञ्चाकामेनापि भवता ज्ञाततालिङ्गकानुमितिस्थले हेतुभूताया ज्ञाततायाः प्रत्यक्षत्वमेव स्वीकर्त्तव्यम्। एवञ्च, तत्र हेतोर्ज्ञानं यदि प्रत्यक्षविषयः स्यात्, तदा सर्वत्रैव

१. तत्त्वार्थश्लोकवार्त्तिकम्, पृ० ४६।
२. तत्त्वसंग्रहः, का २०२५, २०२६।

ज्ञानानां प्रत्यक्षविषयत्वे का बाधा ? अपि च, ज्ञानं स्वयमप्रत्यक्षं चेत् तर्हि तज्जन्यज्ञाततायाः प्रत्यक्षत्वमपि कथम् ? तथाहि विषयनिष्ठा सा ज्ञातता ज्ञानविषययोरतिरिक्ता न वा ? यदि ज्ञानादतिरिच्यते ज्ञातता, तदा तस्या ज्ञानजन्याया विषयातिरिक्तत्वे स्वीकृते विषयनिष्ठत्वोपपादनार्थं तत्र सम्बन्ध एव कश्चिदपेक्ष्यते। स च ज्ञातताविषययोः सम्बन्धः प्रत्यक्षो न वा ? यदि सम्बन्धस्य प्रत्यक्षत्वमङ्गीक्रियते, तर्हि ज्ञातताप्रत्यक्षत्वमपि बलादापद्येत, सम्बन्धिद्वयप्रत्यक्षं विना सम्बन्धप्रत्यक्षानुपपत्तेः। किञ्च, ज्ञातृज्ञानज्ञेयसम्बन्ध एव ज्ञाततेति यद्युच्यते, तर्हि ज्ञाततायाः प्रत्यक्षमेव नोपपद्येत। सम्बन्धस्य प्रत्यक्षे प्रतियोग्यनुयोगिनोः प्रत्यक्षमप्यपेक्ष्यते। कथमन्यथा वायुशरीरयोः संयोगस्य प्रत्यक्षं न स्यात्, वायोरप्रत्यक्षत्वेऽपि शरीरस्य प्रत्यक्षत्वात्। तस्मात् सम्बन्धप्रत्यक्षेऽनुयोगिन इव प्रतियोगिनोऽपि प्रत्यक्षं तन्त्रम्। अतो यदि किल ज्ञाततायाः प्रत्यक्षत्वमिष्येत, तर्हि ज्ञानस्यापि प्रत्यक्षत्वमङ्गीकरणीयम्। एवञ्च सति ज्ञातताकारणीभूतस्य ज्ञानस्य स्वयमप्रत्यक्षस्य प्रत्यक्षात्मकज्ञातताजनकत्वं कथं सम्भाव्यते ? कार्यकारणयोः सालक्षण्यनियमाज्ज्ञानस्याप्रत्यक्षीभूतस्य प्रत्यक्षभूतज्ञातताजनकत्वं नैवोपपद्येत। अतो ज्ञाततायाः प्रत्यक्षत्वाङ्गीकारे ज्ञानप्रत्यक्षत्वमपि सुतरां सिध्यतितराम्। यदि पुनर्विषयस्वरूपैव ज्ञातता, तदा ज्ञानजन्यत्वं तस्या न घटते। न हि विषयो ज्ञानजन्यः, तत् कथं विषयस्वरूपाया ज्ञाततायाः ज्ञानजन्यत्वम् ? एवं विषयनिष्ठाया ज्ञाततायाः विषयेण वैशिष्ट्योपपत्तये सम्बन्धान्तरमावश्यकम्। ज्ञातताविषययोश्च स सम्बन्धोऽपि ज्ञातताप्रतियोगिकविषयानुयोगिको वाच्यः। अतः प्रतियोग्यनुयोगिनोरपि सम्बन्धत्वं स्वीकर्त्तव्यम्। एवं च, तस्य सम्बन्धस्यापि प्रतियोग्यनुयोगिनोर्वैशिष्ट्यसम्पादनार्थं सम्बन्धान्तरमावश्यकमित्यनवस्था। तथा च केनाप्युपायेन ज्ञातताலिङ्गकानुमानं न सम्भवेत्।

परोक्षज्ञानकल्पनाया असमीचीनत्वसाधनम्—

अपि च, भवन्मत आत्मा प्रत्यक्षग्राह्यः। एवं सति चात्मनः प्रत्यक्षत्वे परोक्षज्ञानकल्पनया किं साध्यते ? न चात्मनः कर्त्तुः स्वरूपवद् बाह्यपदार्थग्राहकत्वं येन सम्पद्यते, तदेव ज्ञानमिति तत्र व्यवस्थापनीयम्। आत्मनश्च कर्तृत्वात् कर्मत्वाभावेन प्रकाश्यस्वरूपतानुपपत्तेः कर्मत्वेन प्रतीयमानानां प्रकाशनार्थमेव तत्र ज्ञानं परोक्षं कल्प्यत इति वाच्यम्, युक्तिविरोधात्। तथाहि, कर्त्तुः करणमन्तरेण क्रियायां व्यापारासम्भवात् करणभूतपरोक्षज्ञानकल्पनं भवतामभिमतम्। तत्र च मनसश्चक्षुरादेश्चान्तर्बहिःकरणसद्भावात् तेभ्योऽस्य ज्ञानस्य विशेषानुपपत्तिः। तथा च, ज्ञानप्रयोजनमेव तत्र न सिध्यति, यतो विषयप्रकाशनार्थं कर्त्तुः करणभूतमेव ज्ञानमिति तव सम्मतम्। तत्र करणभूतेन

ज्ञानव्यतिरिक्तेनैव वस्तुना यदि वस्तुप्रकाशनं सम्भवेत्, तर्हि ज्ञानकल्पनं तत्र निरर्थकमेव स्यात्। न च मनश्चक्षुरादेः करणत्वेऽपि जडत्वात् किंचिच्चेतनं करणमावश्यकमिति तदेव चेतनं ज्ञानं परोक्षं कल्पनीयमिति वाच्यम्, चक्षुरादिद्वारेण युक्तो हि अहं घटं पश्यामीत्यादिरूपसंवेदनस्य सर्वेषामपि सिद्धत्वात् तत्र परोक्षभूतज्ञानकल्पनं विनैव भावेन्द्रियमनःप्रभृतेश्चेतनत्वकल्पनमेव वरम्। उक्तं च तत्त्वार्थश्लोकवार्त्तिके—

'करणत्वात् तयोरचेतनत्वादुपकरणमात्रात् प्रधानं चेतनं करणमिति चेन्न, भावेन्द्रियमनसः परेषां चेतनतयाऽवस्थितत्वात्'[1]। तथाहि, अर्थग्रहणव्यापारः प्रत्यक्षसिद्ध एव। एवञ्च सति, इन्द्रियादिद्वारेणैवार्थग्रहणसम्भवात् परोक्षं ज्ञानं किमर्थमिष्यते? घटमहं पश्यामीत्यादिरूपेण दर्शनाख्यस्य ज्ञानस्य प्रत्यक्षत्वं यदुपलब्धं तदपि वा कथं वार्य्यते? अपि च, घटं पश्यामीत्यादौ घटसंवेदनात्मनोर्यथाक्रमं फलत्वेन कर्तृत्वेन चानुभूयमानयोः प्रत्यक्षत्वाभ्युपगमे करणरूपस्य ज्ञानस्य करणतयानुभूयमानस्यापि प्रत्यक्षत्वं न भवेदिति विनिगमनाविरहात् कथं चिन्त्यते? नहि फलीभूतज्ञानात्मानौ विना करणभूतस्य ज्ञानस्य कथमप्यनुभवः। सम्भवेदिति तत्र यदि फलीभूतज्ञानात्मनोः प्रत्यक्षत्वं तर्हि करणभूतस्यापि ज्ञानस्य प्रत्यक्षत्वं नैव सम्भवेत्। अपि च, ऐन्द्रियकं ज्ञानं प्रत्यक्षमिति यदुच्यते तत्रेयं प्रत्यक्षता—अर्थधर्मः, ज्ञानधर्मो वा? न तावदर्थधर्मः, तथा सति नीलादिविज्ञानकाले नीलादिमद्देशे ज्ञानकालाद् भिन्नकालेऽप्यनेकप्रमातृसाधारणविषयनिष्ठायाः प्रत्यक्षतायाः सत्त्वात् सर्वेषामेव तत्र प्रत्यक्षमिति प्रसिद्धिसम्भवः। न चैवं सम्भवेत्, भवन्मतेऽपि ज्ञानकाल एवात्मनि प्रत्यक्षतायाः प्रसिद्धेः। तस्मात् प्रत्यक्षता नार्थधर्मः। एवं भवन्मते यस्यात्मनः ज्ञानेनार्थः प्रकाश्यते, तदानीं तस्यैव ज्ञानस्य न ग्रहणम्। अतोऽगृहीतज्ञानजन्यप्राकट्यस्य प्रत्यक्षं भवतीति केवलं स्वसम्प्रदायश्रद्धामात्रम्। तथाहि, अर्थप्रकाशविज्ञानस्य स्वनिष्ठं प्राकट्यं वर्त्तते न वा? ओमिति चेत्, प्राकट्यवशादर्थस्येव ज्ञानस्यापि प्रत्यक्षता कथं वार्यताम्? यदि पुनः ज्ञाननिष्ठं प्राकट्यं नास्ति, तर्हि प्राकट्यरहितस्यार्थप्रकाशनविज्ञानस्यार्थप्रकटीकरणासामर्थ्ये बलादापतितं स्यात्। नहि स्वयमन्धोऽन्यस्य दर्शनक्रियां सम्पादयतीति साम्प्रतम्।

न चक्षुरादिवज्ज्ञानस्यापि प्राकट्याभावे तेनार्थप्राकट्यं सम्भाव्येतेति वाच्यम्, चक्षुरादीनां जडत्वेनार्थप्रकाशकत्वासम्भवात्। यत्तु चक्षुरादेरर्थप्रकाशकत्वं व्यवह्रियते, तद् विषयप्रकाशकत्वात् खलूपचारेण बोध्यम्। अत एवाज्ञातस्यापि कारणस्य कार्ये प्राकट्याख्यव्यापारविरोधाज्ज्ञापकस्याज्ञातत्वे तस्य ज्ञापकत्वमेव न सिध्यति। अत एव

---

१. तत्त्वार्थश्लोकवार्त्तिकम्, पृ० ४३।

भवन्मतेऽपि प्रमातुरात्मनो ज्ञापकस्य स्वयं प्रकाशमानस्य स्वीकारात् तेनैवार्थे प्राकट्य-जनकत्वेनात्मातिरिक्तज्ञानपरोक्षत्वकल्पनं युक्तिविरुद्धम्। अतः प्रत्यक्षता नार्थधर्मः। यदि तु ज्ञानधर्मे एव प्रत्यक्षता, तर्हि ज्ञानस्य परोक्षत्वं कल्पयितुं न शक्येत, प्रत्यक्षत्वा-श्रयस्य स्वयमप्रत्यक्षत्वे तस्य प्रत्यक्षत्वाश्रयत्वानुपपत्तेः। यत् खलु सर्वथा परोक्षम्, न तत् प्रत्यक्षताधर्माधारः, यथाऽदृष्टादि। सर्वथा परोक्षं च परमते विज्ञानम्। अतोन विज्ञानं प्रत्यक्षताधार इति सम्भवेत्। अपि च ज्ञानपरोक्षत्वाङ्गीकारे ज्ञानसद्भावसिद्धिः कथम्? प्रत्यक्षादनुमानाद्वा? न तावत् प्रत्यक्षात्, ज्ञानस्य प्रत्यक्षाविषयत्वोपगमात्। यद् यद्विषयं न भवेन्न तत् तद्व्यवस्थापकम्। यथा प्रत्यक्षाविषयपरमाण्वादिकं न प्रत्यक्षव्यवस्थापकम्। ज्ञानाविषयं च प्रत्यक्षमिति भवतामभिमतम्। अतो न प्रत्यक्षेण ज्ञानसद्भावसिद्धिः। नाप्यनुमानात्। तथा ह्यनुमानं हि साध्याविनाभाविलिङ्गं विना न सम्भवेत्। न च मीमांसकाभिप्रेतं परोक्षज्ञानानुमापकं किञ्चित् कारणं लिङ्गादिकं वा सम्भवेत्। तस्मान्न ज्ञानस्य स्वयं परोक्षस्य प्रत्यक्षेणानुमानेन वा सिद्धिः। प्रमाणान्तरं च नास्ति बौद्धनये। एवं च सति ज्ञानस्य परोक्षत्वानुपपत्ताव-परोक्षमेव स्वप्रकाशमिति स्वीकर्तव्यम्। अत एव स्वातिरिक्तविषयानपेक्षणाज्ज्ञानमपि स्वप्रकाशमेवापरोक्षरूपं सिध्यति। तस्मान्न बहिरर्थप्रकाशनार्थं परोक्षज्ञानं प्रयोजनमिति निरस्तं मीमांसकमतम्।

ननु ज्ञानस्य विषयप्रकाशकरूपत्वाद् विना विषयं ज्ञानं कथं प्रकाशते? अनुभूयते च नीलमिदं विज्ञानमिति विज्ञानभेदः। तत्र च विज्ञानातिरिक्तस्य नीलपीताद्यर्थसत्त्वे सर्वेषां विज्ञानानामैक्यान्नीलपीतादिभेदो विज्ञानस्य नैव सिध्येत्। अतोऽनुभवसिद्धेन नीलपीताद्यनेकाकारविज्ञानेन विज्ञानालम्बनतया नीलपीताद्यर्थानां विज्ञानव्यतिरिक्ता-नामस्तित्वमवश्यं स्वीकर्त्तव्यम्। इति चेत्, अत्रोच्यते—

ज्ञानज्ञेययोरभेदप्रतिपादनम्—

नीलादिविज्ञानेषु प्रतीयमानो नीलाद्यर्थो विज्ञानाद् भिन्नो यदि सिध्येत्, तदैव तत्तदाकारविज्ञानभेदोपपत्तये विज्ञानातिरिक्ततया ग्राह्याणामस्तित्वं स्वीकर्त्तव्यं स्यात्। वस्तुतस्तु प्रतीयमाना नीलादयोऽर्था विज्ञानादभिन्ना एव। तथाहि—नीलविज्ञानं नीलं चेत्येतयोरपृथक् संवेदनं सर्वत्रैवानुभवसिद्धम्। तथाहि नीलमिति विज्ञानमिति च यदि पृथक्कालेनावभासितं स्यात्, तदा नीलस्य तद्विज्ञानस्य च वस्तुतोऽवभास एव न सम्भवति। यतो नीलविज्ञानं बिना न हि नीलस्यावभासः कश्चिदन्यो भवति। यदि नीलं विज्ञानात् पृथक्कालवर्त्ति स्यात्, तर्हि क्षणिकस्य नीलस्य

विज्ञानक्षणे सत्त्वासम्भवात् कथं विज्ञानेन तदवभासः सम्पद्यते? तस्मान्नीलावभास-प्रतिपत्तये नीलतद्विज्ञानयोरपृथक्संवेदनमेव स्वीकर्त्तव्यम्। वस्तुतस्तु यदेव नील-संवेदनम्, तदेव नीलविज्ञानम्। न हि नीलसंवेदनादृते नीलविज्ञानं नाम किंचिदस्ति। अतो नीलतद्विज्ञानयोरपृथक्संवेदनं सिद्धम्। तथा चोक्तम्—

'यत् संवेदनमेव स्याद् यस्य संवेदनं ध्रुवम्।
तस्मादव्यतिरिक्तं तत्ततो वा न विभिद्यते[1]॥'

दृश्यते च द्विचन्द्रादिदर्शनस्थले विषयस्य ज्ञानादव्यतिरिक्तत्वम्। अतो यथा द्विचन्द्रादि-ज्ञाने संवेद्यस्य चन्द्रादेः संवेदनस्य ज्ञानस्य चाव्यतिरिक्तत्वम्, तथैव नीलादिसंवेदनमपि विज्ञानतद्विषययोरव्यतिरिक्ततासाधकम्, विज्ञानस्वभावत्वात्। तथा चात्रानुमानम्—नीलादयोऽर्था विज्ञानादव्यतिरिक्ता विज्ञानादपृथक्संवेदनत्वात्, यद् येनापृथक् संवेद्यते, तत् ततोऽव्यतिरिक्तम्, यथा द्विचन्द्रादिज्ञानस्थले द्विचन्द्रादेर्ज्ञानादव्यतिरिक्तत्वम्। तदीरितं तत्त्वसंग्रहे—

'यथा नीलधियः स्वात्मा द्वितीयो वा यथोडुपः।
नीलधीवेदनं चेदं नीलाकारस्य वेदनम्[2]॥'

एवं प्रमाणविनिश्चयेऽप्युक्तम्—

'सहोपलम्भनियमादभेदो नीलतद्धियोः।
भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये[3]॥'

तथाहि नीलतद्विज्ञानयोः सहोपलम्भनियमो दृश्यते। न ह्यनयोरेकस्यानुपलम्भेऽन्यस्योपलम्भोऽस्ति। यद् येन सह नियमत उपलभ्यते तेन सह तदभिन्नमेव, यदा मृदा सहैवोपलब्धो घटो मृदभिन्नः। तथा च समीरितम् —

'अविनाभावविषयान्न विनाभावसम्भवः।
विवक्षापरतन्त्रत्वान्न शब्दाः सन्ति कुत्र वा[4]॥'

वस्तुतस्तु चाक्षुषप्रत्यक्षस्य नियमत आलोकसहोपलब्धिकत्वेऽपि न केवलं सहोपलब्धिमात्रमेवाभेदे हेतुः; किन्तु यदुपलब्धिसत्तासमनियतोपलब्धिसत्ताकत्वं यस्य

---

१. तत्त्वसंग्रहः, कारिका २०२९।
२. तत्त्वसंग्रहः, कारिका २०३०।
३. प्रमाणविनिश्चयः, परि० १।
४. ज्ञानश्रीमित्रनिबन्धावल्यामुद्धृतोऽयं श्लोकः, पृ० ३१६।

तत् ततोऽभिन्नमित्येव वाच्यम्, तत्र च नीलसत्त्वतदुपलब्ध्योर्विज्ञानसत्त्वतदुपलब्धि-समनियतत्वान्नीलतद्विज्ञानयोरभेदनियमो बोध्यः। तथा च, नीलं विज्ञानादभिन्नं विज्ञानोपलब्धिसत्तासमनियतोपलब्धिसत्ताकत्वात्, यद् यदुपलब्धिसत्तासमनियतं तत् ततोऽभिन्नम्। यथा मृदोऽभिन्नो घटः। नहि मृत्सत्तोपलब्धी अन्तरेण घटस्य सत्तोपलब्धी सम्भवतः। एवमत्रापि बोध्यम्।

सहोपलम्भशब्दार्थविचारः—

ननु सहोपलम्भनियम इति यदुक्तं तत्रेदं परिपृच्छ्यते—सहशब्दस्तु लोकेऽनेन विना क्वचिदन्यत्र तिष्ठतीत्यर्थको दृश्यते। यथा पुत्रेण सह पितेत्यादौ पितृपुत्रयोरन्यत्र पृथगवस्थानसम्भवेऽपि, अस्मिन् पुत्रेण विना पिता न तिष्ठतीत्यर्थलाभः। तस्मान्नील-तद्विज्ञानानां सहभावेनायमेवार्थः प्रतिपद्यते यद् अन्यत्र नीलं तद्विज्ञानं च यद्यपि पृथग-वस्थातुं शक्नुयात्, तथाप्यत्र सहैव तयोरुपलम्भः। तथा च न तेन नीलतद्विज्ञानयोर-भेदसिद्धिः। दृश्यते च द्विचन्द्रादिदर्शनस्थलेऽपि वस्तुभूतस्य चन्द्रस्यारोपितचन्द्राद् भेदज्ञानसत्त्वेऽपि तदानीमेव सहोपलम्भः। तथा चोक्तं भदन्तशुभगुप्तेन—

सहशब्दश्च लोकेऽन्यस्मिन्नैवानेन विना क्वचित्।
विरुद्धोऽयं ततो हेतुर्यद्यस्ति सहवेदनम्[1]॥

तत्समाधानम्—

तत्रोच्यते—न हि सहशब्दः सर्वत्रैव तथाविधार्थ प्रयुक्तः, अपि तु द्विचन्द्रादि-दर्शनस्थले चन्द्रद्वयस्य परमार्थतो भेदाभावेऽपि सहोपलम्भः प्रसिद्धः। तस्माद् यत्र कल्पितेन वस्तुना यथार्थस्य वस्तुनः सहोपलम्भाभिमानस्तत्र सहशब्दः सर्वथैवा-भेदार्थकः। अतोऽत्रापि नीलतद्धियोः सहोपलम्भनियमात् तयोरभेद एव व्यव-स्थाप्यते। तथा चोक्तं पञ्जिकायाम्—

'चन्द्रद्वयस्य सहोपलम्भाभिमानोऽस्ति लोके, न च तयोर्भेदोऽस्ति परमार्थतः। अथ च सह शशिद्वयोपलम्भात् सहेति वक्तारो भवन्ति। एवमिहापि ज्ञानादव्यतिरिक्त-मपि बहिरिव भासमानमाकारं द्वितीयं कृत्वा कल्पितभेदनिबन्धनः सहशब्दः प्रयुक्तः'[2] इति।

---

१. तत्त्वसंग्रहः, का० २०२९—पञ्जिकायामुद्धृतः, पृ० ६९२।
२. तत्त्वसंग्रहः, का० २०२९—पञ्जिका, पृ० ६९२।

वस्तुतस्त्वेककालार्थक एवात्र सहशब्दः। तथा च ज्ञानज्ञेययोः परस्परमेककालएवोपलम्भः। तथा च य एव हि ज्ञानोपलम्भः, स एव ज्ञेयस्यापि, एवं य एव ज्ञेयस्य स एव ज्ञानस्याप्युपलम्भ। इति सिद्धम्। न च द्वयोरुपलम्भयोस्तथात्वं (एककालत्वं) सम्भवेदित्येक एवोपलम्भः। यतो यदि ज्ञानस्यासंवेदनम्, तर्हि तदेवार्थस्याप्यसंवेदनम्। तस्माज्ज्ञानस्य संवेदनं चेत् तदेवार्थस्यापि संवेदनमित्युभयोरेकसंवेदनमिति सिद्धम्। संवेदनयोरेकत्वे पुनः संवेद्ययोरप्यभेदः सिध्यति। तस्मात् सहोपलम्भनियमादेव ज्ञानज्ञेययोरभेदः।

विषयविषयिभाववशाद् भिन्नयोरपि सहोपलम्भ इति पूर्वपक्षः—

ननु ज्ञानज्ञेययोर्विषयविषयिभावेन नियतत्वाद् विनाप्यभेदं सहोपलम्भनियमो भवितुमर्हति। तथाहि विषयग्रहणस्वरूपत्वात्तस्य। ज्ञानस्य ग्राहकत्वमेव स्वभावः, एवं विषयस्यापि ज्ञानग्राह्यत्वमेव स्वभावः; किन्तु तयोरेवं भिन्नत्वेऽप्येकसामग्र्यधीनत्वात् सहोपलम्भः सिध्यति। तथाहि सामग्र्या नीलादिविषयनिर्णायकमेव ज्ञानं जन्यते। एवं नीलादिरपि ज्ञानैरध्यवसीयमानरूपः प्रसिद्धः। अतः सहोपलम्भनियममात्रादेव तयोरभेद इति नैव सिध्येत्।

विषयविषयिभावानुपपत्तिप्रदर्शनद्वारा तत् समाधानम्—

तत्रेदमुच्यते—भिन्नयोर्वस्तुनोः पृथक् पृथगुपलब्धौ यत्र कश्चित् प्रतिबन्धको वर्त्तते, तत्रैव तयोः सहोपलम्भो भवेत्। यथा एकाधिकरणे समवस्थितयोर्नीलपीतयोरेकसामग्रीग्राह्यत्वेनैकेन पुरुषेण पृथगुपलम्भो न क्रियते। एवञ्च सति नीलतद्धियोः पृथक् संवेदने यदि कश्चित् प्रतिबन्धकः स्यात्, तदैव तयोः सहोपलम्भो भिन्नयोरिति वक्तुं शक्यते। परन्तु नास्ति कश्चिदत्र प्रतिबन्धकः। तथा ह्यत्र क्षणिकयोस्तयोस्तादात्म्यं तदुत्पत्तिर्वा पृथक्संवेदने प्रतिबन्धकः कल्प्येत्। न तावत् तदात्म्यं परैर्नीलतद्धियोस्तादात्म्यानङ्गीकारादत्र तस्यैव साध्यत्वाच्च। नापि तयोरुत्पत्तिस्तत्र पृथगुलब्धौ प्रतिबन्धिकेति वाच्यम्। यदि सहोत्पन्नयोरपि पृथगुपलब्धौ तदुत्पत्तिरेव प्रतिबन्धिका, तर्हि नीलतद्विज्ञानयोरिव चक्षुषोऽपि तत्र सहोपलब्धिप्रसङ्गः। यतश्चक्षुर्नीलविज्ञानं च युगपदेवोत्पन्नं तस्माच्चक्षुषः पृथगुपलब्धौ तदुत्पत्तिरेव प्रतिबन्धिकेति चक्षुषोऽपि नीलविज्ञानसहोपलम्भो दुर्निवारः स्यात्। वस्तुतस्तु न तथा। न हि नीलविज्ञानयोरिव तद्ग्राहकचक्षुषोऽपि ताभ्यां सहोपलब्धिः क्वचित् सम्भवेत्। तस्माद् विषयविषयिभावमात्रेण सहोपलम्भ इति तु रिक्तं वचः। नापि सामग्रीवशादेव विषयविषयिभावः सम्भवेत्। तथा च सति सर्वेषां चित्तचैत्तानां चक्षुरादीनां च सामग्री-

यौगपद्याद् विषयविषयिभावः समापद्येत । वस्तुतस्तु विषयविषयित्वस्यैव विचारासहत्वेनासिद्धतया न तथाविधकल्पना न्याय्या । यतो यदि भवदभिमतः पृथगुपलब्धिप्रतिबन्धकः सम्भवेत्, तदैव सहोपलम्भवशाद् विषयविषयिभाव उपपद्येत । अत्र न पुनर्विषयविषयिभावव्यवस्थायां प्रतिबन्धे विचार्यमाणे तादात्म्यतदुत्पत्त्योः प्रतिबन्धकत्वासम्भवात् सुतरां विषयविषयिभावोऽपि न सिध्यति । न च तादात्म्यतदुत्पत्तिभ्यां विना कश्चिदन्यः प्रतिबन्धः कल्पयितुं शक्येत । नापि तादात्म्यतदुत्पत्तिभ्यां विषयविषयिभावः । तथा सति चक्षुषोऽपि नीलविज्ञानेन तदुत्पत्तिव्यापारबलाद् विषयविषयिभावः प्रसज्येत । नापि चक्षुषा नीलविज्ञानतादात्म्यमपि । तस्माद् विषयविषयिभावानुपपत्तौ सहोपलम्भनियमे अभेदमन्तरेण नान्यत् किंचिल्लभ्यते । उक्तं च तत्त्वसंग्रहे—

'न ज्ञानात्मा परात्मेति नीलधीवेदने कथम् ।
नीलाकारस्य संवित्तिस्तयोर्नो चेदभिन्नता[1] ॥'

कथितं च कमलशीलपादैः पञ्जिकायाम्—

'सिद्धे हि प्रतिबन्धे विषयविषयिभावो युक्तः, यावता स एव विषयविषयिभावव्यवस्थायां प्रतिबन्धो विचार्यते । न च तादात्म्यतदुत्पत्तिव्यतिरेकेणापरः प्रतिबन्धोऽस्ति, यतो विषयविषयिभावः सिध्येत् । नापि तादात्म्यतदुत्पत्तिभ्यां विषयविषयिभावो युक्त इति विचारितम् । अतो न व्यतिरिक्तस्य कथञ्चित् सहोपलम्भोऽस्ति[2] ।' इति ।

अत इदं तावत् सिद्धम्, यत् यत् संवेदनं तत्तज्ज्ञानान्नार्थान्तरम् । यथा आत्मसंवेदनम् । अतो नीलतद्विज्ञानयोरपि नार्थान्तरत्वम् ।

ग्राह्यग्राहकभाववशाज् ज्ञानज्ञेययोर्भेद इति पूर्वपक्षः—

ननु नीलमिति ग्राह्यतया विज्ञानमिति च ग्राहकतया प्रतीयते । ग्राह्यग्राहकयोर्भेदाभावे ग्राह्यग्राहकभावनुपपत्तिः । न हि यदेव ग्राह्यं तदेव ग्राहकम्, यदेव वा ग्राहकं तदेव ग्राह्यमिति शक्यते वक्तुम् । तथा च नीलं विज्ञानाद् भिन्नं विज्ञानग्राह्यत्वात्, अथवा विज्ञानं नीलाद् भिन्नम्, नीलग्राहकत्वादित्यनुमानाभ्यां नीलतद्विज्ञानयोर्भेदः प्ररूढ एवेति चेत्, तत्रोच्यते—

तत्र समाधानम्—

विज्ञानस्य निर्व्यापारतया न परमार्थतः कस्यचित् केनचिद् ग्रहणं सम्भवेत् ।

---

१. तत्त्वसंग्रहः, का २०३१ ।
२ तत्त्वसंग्रहः, का० २०३१—पञ्जिका, पृ० ६९५ ।

केवलं च प्रकाशरूपतया विज्ञानस्य तथैव प्रथते। तस्मान्न चैवमर्थस्य मुख्यतो ग्राहकं ज्ञानम्, न वाऽर्थो विज्ञानग्राह्यः। केवलन्तूपचारादेव तथाविधव्यवहार इति सिद्ध एव विज्ञानतद्ग्राह्ययोरभेदः।

अर्थस्य ज्ञानाभिन्नत्वे व्यवहारानुपपत्तिप्रदर्शनम्—

ननु यदि विज्ञानादभिन्न एवार्थस्तर्हि ज्ञानपूर्वकव्यवहारो नोपपद्येत। तथाहि, सर्वत्रैव विषयं प्रत्यक्षीकृत्य तावदिदमिति निश्चित्य तदभिमुखिप्रवृत्तिर्दृश्यते। तत्र विज्ञानाद् यद्यभिन्न एवार्थस्तर्हि विज्ञानस्यान्तरत्वेनाबहिः स्थिततया प्रवृत्त्यादियोग्यानां व्यवहारोपयोगिनां विषयाणामपि विज्ञानाभिन्नतयाऽऽन्तरत्वमेव स्यात्। तर्हि कथम् इदङ्काराभिधेयाभिमुखिप्रवृत्तिर्जनानाम्? दृश्यते च बालोऽपि सुखसाधनं मातृस्तनमवलोक्य तदभिमुखे करौ प्रसारयन् तत्रैव प्रवृत्तौ भवेत्। न हि मातृस्तनस्यान्तरत्वे सति बालस्यापि तदभिमुखिनी प्रवृत्तिः सम्भवेत्। अपि च, यदि बहिःस्थिततया सर्वत्रैवावभासो द्विचन्द्रादिदर्शनवद् भ्रान्त एव स्यात्, तर्हीन्द्रियजन्यज्ञानादिष्वपि विषयास्तित्वनिर्धारणसम्भवात् सर्वत्र ज्ञाने नाश्वासप्रसङ्गः। स च लोकानुभवविरुद्धः। अतः कथमुक्तं विज्ञानादभिन्न एवार्थ इति?

ज्ञानज्ञेययोः पारस्परिकव्यापारविचारः—

अत्रोच्यते—किमिदं विज्ञानं नाम, यस्य विषयाद् भेदेन प्रतीतिर्व्यवहारसाधकत्वं च स्यात्? यदि ज्ञायतेऽनेनेति ज्ञानम्, जानामीति वा ज्ञानं तदा ज्ञेयापेक्षं लक्षणं स्यात्। एवं ज्ञेयमपि ज्ञानविषयत्वं विना नैव सम्भवेदिति ज्ञानस्य ज्ञेयापेक्षत्वात्, ज्ञेयस्य च पुनर्ज्ञानापेक्षत्वादन्योन्याश्रयो दुर्वारः। अपि च, 'इदं ज्ञानम्' 'इदं ज्ञेयम्' इति च यो व्यवहारः, स ज्ञानज्ञेययोः कञ्चिद्व्यापारमन्तरेण न सिध्यति। तत्रैव पृच्छ्यते—ज्ञानस्य ज्ञेये व्यापारः, ज्ञेयस्य वा ज्ञाने व्यापारः, अथवा उभयोः परस्परं व्यापारः। तत्र यद्याद्यः कल्पोऽभिमतः स्यात् तदा किं ज्ञानव्यापारो ज्ञेयत्वनिवर्त्तक उत ज्ञेयस्य विकारको ज्ञानव्यापारः? न चाद्यः कल्पः कल्प्यः, अदृश्यानां विषयाणां ज्ञेयत्वेनासिद्धिप्रसङ्गात्। न चेष्टापत्तिरिति वाच्यम्, केनचित् पुरुषेण यो विषयो यदा न ज्ञायते, तदैव पुरुषान्तरेण तज्ज्ञानसम्भवात् अदृश्यस्य सर्वथाऽज्ञेयत्वं नाभिधातुं शक्यते। तथा चोक्तं ज्ञानश्रीमिश्रनिबन्धावल्याम्—

'तत्र न तावत् ज्ञेये ज्ञानव्यापारो निवर्त्तकः शक्योऽभिधातुम्, अदृश्यविषयव्यालोपप्रसङ्गात्। न च तथैवाभ्युपगमो युक्तः, तदैव केनचिद् दृष्टेः। तज्ज्ञानेन निवर्त्तना-

भ्युपगमे च परोक्षस्यापि स्थितेरनपह्नवः'[१] इत्यादि ।

नापि विकार्यपक्षो ग्राह्यः। तथा सति यस्य ज्ञानस्य योऽर्थो विकार्य्यः, स एव तज्ज्ञानग्राह्य इति स्वीकरणीयं स्यात् । विकारो नाम स्वाभाविकशक्तेः शैथिल्यसम्पादकमवस्थान्तरम् । यथा रोगादिना चक्षुषां विकारोऽन्धत्वादिकम् । एवञ्च सति ज्ञेये ज्ञानव्यापारो यदि विकारकः स्यात्, तदा कथञ्चित् कारणेन किञ्चिदाच्छन्नबुद्धेर्विकार्य्यमिन्द्रियमपि ग्राह्यं स्यात् । उक्तं च ज्ञानश्रीमिश्रपादैः—

'विकार्यपक्षे तु यस्य ज्ञानस्य यो विकार्योऽर्थः, स ग्राह्य इति व्यवस्थायां शोकादिनोपहताया बुद्धेर्विकार्यमिन्द्रियमपि ग्राह्यं स्यात्[२] ।'

अतो ज्ञानस्य ज्ञेये व्यापारो नैव सिध्यति ।

जडविषयेषु प्रकाशोत्पत्तिरेव ज्ञानव्यापार इति पूर्वपक्षः—

अथ ज्ञानातिरिक्तानां विषयाणां जडत्वात् स्वयंप्रकाशासम्भवात् विषयेषु प्रकाशोत्पत्तिरेव ज्ञानव्यापारः, यतः प्रकाश्यं विना प्रकाशो न घटते, अत एव ज्ञानस्यापि प्रकाशरूपतोपपत्तये स्वातिरिक्तेन केनचिद् वस्तुना भवितव्यम् । तत्र च वस्तुनि ज्ञानव्यापारः प्रकाशाख्यातिशयो ज्ञानाज्जायते ।

तथा चोक्तं श्लोकवार्त्तिके—

'यदाभासं हि विज्ञानं तत्संयोगे तदिष्यते[३] ।'

विषयनिष्ठप्रकाशोत्पत्तौ दोषप्रदर्शनेन पूर्वपक्षनिराकरणम्—

अत्रोच्यते—यदि ज्ञानेन विषये प्रकाश उत्पाद्यते, तर्हि प्रकाशाख्यातिशययुक्तस्य विषयस्य तदानीं सर्वैरेवानुभवः कथं न स्यात् ? यथा प्रकाशरूपस्य सूर्यस्य वर्त्तमानतादशायां न केवलमेकेनैव स विलोक्यते; किन्तु सर्वैरेव, एवं ज्ञानव्यापारेण ज्ञेयनिष्ठप्रकाशोत्पत्तौ । एवं यस्य कस्यचिज्ज्ञाननिवृत्तौ प्रकाशस्यापि निवृत्तिसम्भवात्, तदाऽन्यस्यापि तदानीं तद्विषयस्यादर्शनप्रसङ्गः । तदुक्तं ज्ञानश्रीमिश्रचरणैः—

'अत्रापि पक्षे एकगोचरः सर्वगोचरः स्यात् । तदीयज्ञाननिवृत्तौ तद्रूपनिवृत्तेरन्यस्याप्यदर्शनप्रसङ्गः[४] ।'

---

१. ज्ञाश्रीमिश्रनिबन्धावली, अद्वैतबिन्दुप्रकरणम्, पृ० ३४६ ।
२. ज्ञानश्रीमिश्रनिबन्धावली, पृ० ३४७ ।
३. श्लोकवार्तिकम्, सूत्रम् ५-१९ कारिका, पृ० १५३ ।
४. ज्ञानश्रीमिश्रनिबन्धावली, पृ० ३४७ ।

न चैकस्य पुरुषस्य ज्ञानेन विषयनिष्ठो यः प्रकाशो जायते, स खलु तेनैव पुरुषेणानुभूयेत, नान्यैरिति वाच्यम्, विचारासहत्वात्। तथाहि, यस्य कस्यचित् पुरुषस्य यदा यस्मिन् विषये प्रकाशाख्यो ज्ञानव्यापारः समुत्पन्नस्तदा स विषयः प्रकाशरूपापन्न इति स्वीकार्यम्। विषयस्य प्रकाशरूपत्वे तदानीं सर्वैरेव कथं नानुभूयेत ? पुरुषान्तर-ज्ञानव्यापाराभावादिति चेन्न, तर्हि कस्यचित् पुरुषस्य ज्ञानव्यापारापन्नो विषयस्तदानी-मेव पुरुषान्तरीयज्ञानव्यापारानापन्न इति स्वीकर्तव्यम्। तच्च न युज्यते, एकदा प्रकाशाप्रकाशयोर्विषयनिष्ठत्वासम्भवात्। यदि कस्यचित् पुरुषस्य ज्ञानेन प्रकाशो विषयनिष्ठः समुत्पद्येत, तर्हि तदानीमेव तत्र कथं पुरुषान्तरीयज्ञाननिष्ठव्यापाराभावाद-प्रकाशत्वं च ? नहि केनचित् पुरुषेणावधृतैरालोकैर्घटनिष्ठस्यान्धकारस्यापसारणदशायां पुरुषान्तरीयालोकव्यापाराभावादन्धकारस्तत्र कल्पयितुमपि शक्येत। एकेन पुरुषेण स्वप्रयोजनार्थमालोकेन विषयावरकतमोविनाशे सति अनवधृतालोकानामपि पुरुषाणां सकाशे स विषयो न प्रकाशितो भवतीति वक्तुं न युज्यते। तस्माद् ज्ञानव्यापारेण यदि विषयनिष्ठः प्रकाशाख्यः कश्चिदतिशयो जायते, तदाऽनुत्पन्नज्ञानानामपि पुरुषाणां स विषयो ज्ञानग्राह्यस्तदानीमेव कथं न भवेदिति निरुत्तरं वचः। तस्माज्ज्ञानातिरिक्ते विषये ज्ञानव्यापारः कश्चिन्नैव सिध्यति। न च व्यापाररहितानामपि विषयाणां ज्ञान-ग्राह्यत्वं सम्भवेत्, तथा सति सर्वदा सर्ववस्त्ववभासप्रसङ्गस्य दुर्निवारत्वात्। अतो ज्ञानव्यापारबलादेव विषयावभासनमङ्गीकर्तव्यमिति स्वातिरिक्ते विषये ज्ञानव्यापारा-सम्भवान्न ज्ञानव्यतिरिक्तं ज्ञेयं ज्ञानेन गृह्यत इति युक्त्या व्यवस्थापयितुं शक्यते। तथा चोक्तं ज्ञानश्रीमिश्रपादैः—

'प्रकाशोत्पादने सर्वं प्रति प्राकाश्यसम्भवः।
उत्पादनात् प्रकाशत्वस्थितौ नैकमपि प्रति[1]॥'

तथा—

'उत्पातमात्रेऽतिशयान्तरे वा
ज्ञानात् प्रकाशो न हि बाह्यराशेः।
प्रकाशरूपस्य समुद्भवे तु
प्रसह्य साधारणताप्रसङ्गः[2]॥'

---

१. ज्ञानश्रीमिश्रनिबन्धावली, पृ० ३४८।
२. ज्ञानश्रीमिश्रनिबन्धावली, पृ० ३४९।

ज्ञाने ज्ञेयव्यापारविवेचनम्—

नन्वेवं ज्ञानस्य ज्ञेये व्यापारो नैव सिध्यतु, अपि तु ज्ञेयस्य ज्ञाने व्यापाराद् ग्राह्यत्वमिति चेन्न, तत्रापि पूर्वदोषानुसक्तेः। तथाहि ज्ञेयं यदि ज्ञानं जनयेत् तदा ज्ञानजनकत्वाद् व्यापारनिष्ठजनकतानिरूपितजन्यतावत्त्वं ज्ञाने ज्ञेयव्यापारः सम्भवेत्। तच्च न युक्तम्। जनकतामात्रेण ग्राह्यत्वाङ्गीकारे चक्षुरादेरपि यत् किञ्चिद्विषयप्रत्यक्ष-ज्ञानजनकतया घटादिविषयप्रत्यक्षाणां चक्षुरादिकमपि ग्राह्यं स्यात्। न ज्ञानस्य तत्राधिगतिर्व्यापार इत्यपि वाच्यम्, सा हि अधिगतिर्विषयस्वरूपा ज्ञानरूपार्थान्तरं ज्ञानान्तरम् वा? न च प्रथमः कल्पः, विषयस्वरूपवत् तस्या अप्यधिगतेस्तदानीं सिद्धस्वरूपतया तत्र ज्ञानव्यापारविरहः। एवं यदि ज्ञानान्तरं तर्हि तस्यापि ज्ञानरूपतया ज्ञानस्यात्मन्येव व्यापार इति व्याहतं वचः। अतो ज्ञेयव्यापारो ज्ञान इत्यपि न सिध्यति। तस्माज्ज्ञानज्ञेययोः कथञ्चिदपि व्यापारासम्भवाज्ज्ञानातिरिक्तं ग्राह्यं ज्ञानेन गृह्यत इति कल्पनाया अनवकाशः।

ज्ञानग्राह्यबाह्यविषयाणामसम्भाव्यत्वप्रतिपादनम्—

ज्ञानेन स्वातिरिक्तो विषयो गृह्यत इत्यभिलषतां वादिनां मते ज्ञानातिरिक्तो ग्राह्यो विषयः किंस्वरूपस्तदपि विचारणीयम्। तत्र सौत्रान्तिकवैभाषिकास्तथा न्यायवैशेषिकमीमांसकसांख्यपातञ्जलजैनाः पूर्वपक्षवादिनो भवेयुः। तथाहि, एतेषां मध्ये कैश्चिदतिसूक्ष्मपरमाणुसंज्ञकावयवसमष्टिमात्रं विषयस्वरूपमितीष्यते। अपरे पुनर्नैयायिकादयः परमाणुभिर्द्व्यणुकादिक्रमेण समारब्धोऽवयव्येव ज्ञानग्राह्यो विषय इति मन्यन्ते। तत्र न्यायवैशेषिकाणामवयवेभ्यो भिन्नोऽवयवीति स्वीकुर्वतां मतमेवादौ परीक्ष्यते। तथाहि, एतेषां मते सावयवनिरवयवभेदेन ज्ञानग्राह्याणां विषयाणां द्वैविध्यम्। तत्र कार्यद्रव्याणि पृथिवीजलतेजःपवनाख्यानि सावयवानि, अन्यान्याकाश-कालदिगात्ममनांसि पृथिव्यादीनां परमाणवश्च नित्यानि निरवयवद्रव्याणि। एवं गुण-कर्मसामान्यविशेषसमवायाभावा अपि निरवयवा एव पदार्थाः। सर्वे खल्वेते पदार्था ज्ञानातिरिक्ता एव ज्ञानेन गृह्यन्ते। तत्र सावयवद्रव्याण्येव स्थूलतया सर्वेषां प्रत्यक्ष-सिद्धानीति तेषां स्वरूपं तन्मतानुसारेण निरूप्यते।

सर्वत्रैव सूक्ष्मात् स्थूलोत्पत्तिः परिलक्ष्यते। दृश्यते च पटापेक्षया सूक्ष्मेभ्यस्त-न्तुभ्यः स्थूलपटोत्पत्तिः। अतो घटादीनां कार्याणामेव य आरम्भका अवयवास्ते घटाद्य-पेक्षया सूक्ष्मा इति स्वीकर्तव्यम्। तत्र चावयवानां चरमः सूक्ष्मतमो विभागः परमाणु-रिति व्यपदिश्यते। य एष कार्यद्रव्याणां परस्परावयवविभागक्रमेण विनाशो दृश्यते,

तत्र चावयवविभागस्य कुत्रचिच्चरमो विश्रामः स्वीकर्तव्यः। अन्यथा मेरुसर्षपयोरपि तुल्यपरिमाणप्रसङ्गः। यस्मादारम्भकावयवसंख्यातारतम्यवशादारब्धानामपि परिमाणतारतम्यं दृष्टं लोके, दृश्यते च सहस्रतन्तुभिः समारब्धो यः पटस्तत्परिमाणापेक्षया लक्षतन्तुभिः समारब्धस्य पटस्य परिमाणाधिक्यम्। तस्मादयमेव नियमो यद् आरम्भकावयवपरिमाणान्येवारब्धस्य परिमाणजनकानि। अत एवाल्पैरवयवैरारब्धस्य द्रव्यस्य यादृशं परिमाणं तदपेक्षया बहुभिरवयवैरारब्धस्य द्रव्यस्य परिमाणाधिक्यम्। एवं स्थिते यदि पुनरवयवविभागानां काचित् परमा विश्रान्तिर्नाङ्गीक्रियेत, तदा अवयवविभागानां स्वेच्छातन्त्रत्वं सम्पन्नं भवेत्। तथा च सति यावद्भिरवयवैः सुमेरुपर्वत आरब्धस्तावद्भिरेवावयवैः सर्षपोऽपि समारब्ध इति कल्पयितुं शक्यते, निरङ्कुशत्वादवयवकल्पनायाः।

वस्तुतस्तु अवयवविभागस्याविरामे स्वीक्रियमाणे मेरुसर्षपयोरुभयोरप्यवयवसंख्याया अनन्तत्वात् समसंख्यकावयवारब्धतया तुल्यपरिमाणत्वं केन वारणीयम्? पक्षान्तरे महान् भेदस्तत्परिमाणयोरुपलभ्यते, तस्मादकामेनापि स्वीकर्तव्यं यत्, सुमेरुपर्वतारम्भकावयवापेक्षया सर्षपारम्भकावयवानां संख्याल्पत्वम्। तच्चावयवविभागानां चरमविश्रान्तिं विना नैव सम्भाव्यते। यत्र च विभागानां चरमा विश्रान्तिः, स एव परमाणुः, सुतरामेव स निरवयवः, तस्य सावयवत्वे विभागस्य चरमत्वासम्भवात्, असमवेतभावकार्योत्पत्तिप्रसङ्गाच्च। न हि कुत्राप्यसमवेतं सत् किमपि भावकार्यमुत्पद्यत इति दृश्यते। अत एव युक्तितः परमाणुसिद्धौ सत्यां परमाणूनां नित्यत्वमप्यङ्गीकरणीयम्, असमवेतस्य भावकार्यस्यादृष्टचरत्वात्। तदेतेषां नित्यानां परमाणूनां परस्परसंयोगक्रमेण द्व्यणुकत्र्यणुकादिपरम्परया महानवयवी कार्यभूतः सम्पद्यते। एवम्भूतोऽवयवी खल्ववयवेभ्योऽत्यन्तं भिन्नः स्थूलो विषय इत्यात्मसमवेतेन ज्ञानेन स गृह्यते। प्रत्यक्षस्थले त्वादौ विषयेन्द्रियसंयोगस्ततश्च विषयसंयुक्तेन्द्रियेण मनःसंयोगः, तथाविधेन्द्रियसंयुक्तस्य मनश्चात्मना संयोगः, ततश्च समवायेनात्मनि तद्विषयकं ज्ञानमुत्पद्यत इत्येषा न्यायवैशेषिकप्रक्रिया।

ज्ञानग्राह्यविषयो नावयविरूप इति विचारपूर्वकसमाधानम्—

तत्रैदं प्रतिविधीयते—निरवयवाः परमाणवो द्व्यणुकादिक्रमेण मिलिताः सन्तोऽवयविरूपतामादधतीति भवतां यः सिद्धान्तः, स खलु मनोरथमात्रम्, युक्तिविरोधात्। तथाहि, प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्येण संयोगः सम्भवति, संयोगस्य प्रदेशवद्व्याप्यत्वात्। अतो निरवयवतया प्रदेशरहितानां परमाणूनां संयोगव्यापकप्रदेशवद्विरुद्धस्वभावानां संयोगो नैव सम्भवेद्। यतो निष्प्रदेशाः परमाणवः, संयोगश्च प्रदेशवद्व्याप्यः।

प्रसिद्धञ्चैतत् व्यापकाभावस्य व्याप्याभावप्रयोजकत्वम्। तस्मात् संयोगव्यापकीभूतस्य प्रदेशवत्त्वस्य विरुद्धं यत् प्रदेशाभाववत्त्वं परमाणुषु तदुपलब्धेः सुतरां संयोगाभावोऽपि समापतेत्। तथा चोक्तं विज्ञप्तिमात्रतासिद्धौ—

'षट्केन युगपद्योगात् परमाणोः षडंशता।
षण्णां समानदेशत्वात् पिण्डः स्यादणुमात्रकः[१] ॥'

एवं तत्त्वसंग्रहेऽप्युक्तं शान्तरक्षितपादैः—

'संयुक्तं दूरदेशस्थं नैरन्तर्यव्यवस्थितम्।
एकाण्वभिमुखं रूपं यदणोर्मध्यवर्त्तिनः[२] ॥'

निरवयवपरमाणूनां संयोगसम्भवान्नावयवित्वसिद्धिः—

अत्रेदं तात्पर्यम्—निरवयवाः परमाणवः किं सर्वत्र मिलितास्तिष्ठन्ति, अथवा मिलनशून्याऽपि स्वातन्त्र्येण तिष्ठन्ति ? यदि मिलिता एव तर्हि संयोगोऽसम्भवः, संयोगस्य दूरदेशस्थितयोरेव (अप्राप्तयोरेव) सम्भवात्। यतो देशाद् देशान्तरप्राप्तिरेव संयोगः[३]। तस्मान्मिलितानामत एव प्राप्तानां संयोगो नैव सम्भवेत्। यदि पुनर्दूर-देशस्थिताः (अप्राप्ताः) एव परमाणवः परस्परं संयुज्यन्त इत्यङ्गीक्रियेत, तदापि निरव-यवतया दिग्भाग्भेदासम्भवात् कथं निरंशयोः परमाण्वोः संयोगः सम्भवेत्? अपि च, यः खलु निरवयवः परमाणुस्तेन सार्धं निरवयवस्य परमाण्वन्तरस्य संयोग एकदेशावच्छेदेन सर्वावच्छेदेन वा ? यद्येकदेशावच्छेदेन संयोगः स्वीक्रियते तर्हि स प्रदेशः पूर्वपश्चिमादि-नानाप्रदेशानां मध्ये यदि यः कश्चिदेक एव प्रदेशः स्यात्, तर्ह्यन्यांशैः परमाणूनां योगा-भावात् कथमवयविसृष्टिर्घटेत ? यदि तु कस्यचिन्मध्यवर्त्तिनः परमाणोः पूर्वापरोत्तरो-दध्वाधःप्रभृति प्रतिदेशं परमाणुसंयोगो न भवेत्, तर्ह्यवयविरूपता नोपपद्येत। परमाणोश्च पुनर्निरंशतया तथाविधसंयोगासम्भवात् सुतरामवयवी नोपपद्यते। अथ यदि सर्वावच्छे-देन द्वयोः परमाण्वोः संयोगः स्यात्, तर्हि निरवयवयोस्तयोस्तथाविधसंयोगान्न कदाचि-दपि प्रथिमा सम्भवेत्। अतः स्थूलभावोपपत्तये विभिन्नैः प्रदेशैः परमाणूनां संयोगः कर्तव्य एव। स च न सम्भवति, अवयवात्मकानां प्रदेशानामेवाभावात्। तस्मात् परमाणूनां संयोगादिक्रमेणावयव्युपपत्तिर्भवेदिति तार्किकैर्यदुक्तं तद्दुरुक्तमेव। अतः कथन्तरामवयवसंयोगैकशरणानामवयविनां सिद्धिर्भवेत्।

---

१. विज्ञप्तिमात्रतासिद्धिः (विंशतिकारिका–२३)
२. तत्त्वसंग्रहः, बहिरर्थपरीक्षा, का० २१८९।
३. 'अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः' (भाषापरिच्छेदः; ११५ कारिकांशः)

अवयवस्वरूपाणामपि ज्ञानग्राह्यत्वासम्भवप्रतिपादनम्—

अथ यद्यसंयुक्ता अपि परमाणवः संहताः सन्तो ज्ञानविषयतां गच्छन्तीत्युच्येत, तत्रेदं भवान् पृष्टो व्याचष्टाम्—परमाणूनां परस्परमसंयुक्तानां किं भूतः पुनः संघातः ? स संघातः परमाणुभ्योऽतिरिच्यते न वा ? अत्र च निरवयवानां संयोगासम्भवात् सुतरामसंयुक्ताः परमाणवः स्वातन्त्र्येण यदि प्रत्येकं तिष्ठन्ति, तर्हि तेषां तथाविधमवस्थानं परमाणुस्वरूपान्नातिरिच्यत एव। तस्मात् सङ्घातः परमाणुभ्यो नातिरिच्यत इति स्थितम्। उक्तं च विज्ञप्तिमात्रतासिद्धौ—

'परमाणोरसंयोगे तत् सङ्घातेऽस्ति कस्य सः।
न चानवयवत्वेन तत् संयोगो न सिध्यति[1] ॥'

तस्मात् परमाणूनां प्रत्येकं स्वरूपं यथातीन्द्रियतया नेन्द्रियग्राह्यम्, तथैव सङ्घातस्यापि परमाणुस्वरूपानतिरिक्तस्य नेन्द्रियादिज्ञानग्राह्यत्वं कथमप्युपपद्यते।

तत्र सौत्रान्तिकभदन्तशुभगुप्तसम्मतपूर्वपक्षः—

अत्रेदं पुनराशङ्क्यते—यदि परमाणुपुञ्जस्य दिग्भागभेदादिकं नैवास्ति, तर्हि सूर्योदये सूर्यास्तकाले च च्छाया कथं विभिन्नदिग्भागभागिनी स्यात्? दृश्यते च सूर्योदयकाले वृक्षस्य छाया पश्चिमदेशगामिनी, अस्तकाले पुनः पूर्वदेशगामिनी। तत्र वृक्षापेक्षया दिग्भागभेदः प्रत्यक्षसिद्ध एव। तत्र वृक्षस्य परमाणुपुञ्जात्मकस्य दिग्भागभेदाभावे छायाया अपि विभिन्नदिग्भागित्वं नैव सिध्येत्। तस्मात् प्रत्यक्षेणैव वृक्षादिपदार्थस्य दिग्भागभेददर्शनात् परमाणुपुञ्जस्यापि दिग्भागभेदः स्वीकर्तव्यः।

शुभगुप्तमतखण्डनम्—

अत्रोच्यते—परमाणुसङ्घातो भवद्भिर्य इष्येत, यदि तस्य परमाण्वतिरिक्तत्वं भवेत्, तदैवैकस्य परमाणोरावरकेण परमाण्वन्तरेण देशादिभागः सम्भवेत्। किन्तु निरवयवस्य परमाणोरयं पृष्ठभागः। अयं च पुरोभाग इति कल्पनाया अवकाशः कुतः? सूर्याभिमुखस्य वस्तुनस्तत्पृष्ठभागे छाया पतेदिति भवद्भिः प्रतिपादयितुमिष्यते। स च पुनस्तदैव सम्भवेद् यदि परमाणोः पृष्ठभागः पुरोभागश्च सिध्यति। वस्तुतस्तु स एव सिध्यति, निरंशत्वान्निरावरणत्वाच्च। अतः पृष्ठभागादिकल्पनया छायाप्रतिपादनार्थं भवतां प्रचेष्टा वृथैव। तथा चोक्तं स्थिरमतिभाष्ये—

---

१. विज्ञप्तिमात्रतासिद्धिः, विंशतिकाप्रकरणवृत्तिः, कारिका २३।

'यदि नान्यः परमाणुभ्यः पिण्ड इष्यते न ते तस्येति सिद्धं भवति । सन्निवेशपरिकल्प एषः परमाणुः सङ्घातः इति वा, किमनया चिन्तया, लक्षणं तु रूपादि यदि न प्रतिषिध्यते !'[१] इति ।

अपि च, योऽयं सङ्घात इष्यते किमयमनेकस्वभाव एकस्वभावो वा ? नाद्यः, अनेकस्वभावत्वे प्रत्येकं मरमाणूनां ग्रहणं विना नैव वस्तुग्रहणं सम्भवेत् । संहतानां च परमाणूनामनेकस्वभावानां यदि प्रत्येकं ग्रहणं न भवेत्, तर्हि तन्निष्ठनीलादिज्ञानमपि न सम्भवति । परमाणूनां चातीन्द्रियतयेन्द्रियाद्यसंस्पृष्टत्वात् प्रत्येकं परमाणूनां ग्रहणं नैव सम्भवति । अतः परमाणूनामग्रहणादनेकस्वरूपाणां तेषामनुभूतिः कथंचिन्नोपपद्यते । यदि पुनरेकस्वभावः परमाणुर्स्तर्हि पृथिव्यां क्रमेण गमनं नोपपद्यते । अत्रायमाशयः— परमाणूनामेकस्वभावत्वे सर्वत्रैव परमाणुस्वरूपतया वस्तूनां विच्छेदराहित्यात् सर्वव्यापकमेकस्वभावं परमाण्वात्मकं वस्तु सिद्धं भवति । तथा च सति यत्र कुत्रचिद्देशे पादक्षेपे कृते सत्येकस्वभावतया देशस्य पादक्षेपविशिष्टस्वभावत्वेन तदानीं सर्वत्रैव पादक्षेपात्मकं गमनं प्रसज्येत । यदि देशविच्छेदो न स्यात्, तर्हि देशाद् देशान्तरप्राप्तय उत्तरदेकसंयोगानुकूलव्यापारात्मकस्य गमनस्य नावश्यकता वर्त्तते, उत्तरदेशस्यैवाभावात् । एवं यस्य कस्यचिद् वस्तुनः पूर्वभागे गृहीतेऽपि परभागस्याग्रहणं यद्दृष्टं लोके, तदपि नोपपद्येत, एकस्वभावत्वेन पूर्वापरभागयोरभावात् । किं बहुना, प्रत्यक्षसिद्धानां गवाश्वहस्तिसिंहादीनां प्राणिनां परस्परवैचित्र्यं विच्छिन्नतामूलं यदुपलभ्यते, तदप्येकस्वभावत्वे नोपपद्येत । तथा चोक्तं विज्ञप्तिमात्रतासिद्धौ—

'एकत्वेन क्रमेणेतिर्युगपन्न ग्रहाग्रहौ ।
विच्छिन्नानेकवृत्तिश्च सूक्ष्मानीक्षा च नो भवेत्[२] ॥'

व्याख्यातं चात्र स्थिरमतिपादैः—

'यदि यावदविच्छिन्नं नानेकं चक्षुषो विषयस्तदेकं द्रव्यं कल्प्यते पृथिव्यां क्रमेणेतिर्न स्याद् गमनमित्यर्थः । सकृत्पादक्षेपणे सर्वस्य गतत्वात् । अर्वाग्भागस्य च ग्रहणं परभागस्य चाग्रहणं युगपन्न स्यात् । नहि तस्यैव तदानीं ग्रहणं चाग्रहणं च युक्तम्[३] ।'

---

१. विंज्ञप्तिमात्रतासिद्धिः, विंशतिकाप्रकरणवृत्तिः, कारिका १४–भाष्यम्, पृ० १४ ।
२. विज्ञप्तिमात्रतासिद्धिः, विंशतिकाप्रकरणवृत्तिः, कारिका १५ ।
३. विज्ञप्तिमात्रतासिद्धिः, विंशतिकाप्रकरणम्, का० २५–स्थिरमतिभाष्यम्, पृ०१६ ।

प्रत्यक्षेण ज्ञानातिरिक्तस्यावयविनोऽसिद्धिः—

अपि च, चाक्षुषादिप्रत्यक्षबलेनैव ज्ञानादतिरिक्तस्य ज्ञेयस्यास्तित्वमभ्युपगच्छन्ति वादिनः। तत्र ये नामावयविस्वरूपं वस्तु चक्षुषा गृह्यत इति मन्यन्ते तान् प्रत्ययं प्रश्नः—किं चक्षुषा सम्बद्धमेव वस्तु गृह्यते, असम्बद्धं वा? यदि त्वसम्बद्धं चक्षुषा गृह्यते, तदा प्रत्यक्षस्य प्रतिविषयनियमव्यवस्था व्याकुप्येत, असम्बद्धानामपि वस्तूनां चक्षुषा ग्रहणसम्भवात्। तथा च रूपं रूपवद् द्रव्यं चक्षुषा गृह्येतेति नि मो निर्युक्तिक एव स्यात्। तथा च कदाचिच्चक्षुषा गन्धशब्दस्पर्शादयोऽपि गृह्येरन्। न चैतदस्ति। तस्मात् सम्बद्धमेव वस्तु चक्षुषा गृह्येतेति स्वीकरणीयम्। उक्तं च—

'सम्बद्धं वर्त्तमानं च गृह्यते चक्षुरादिना'[1] इति। एवं च सति घटादिभिरेकदेश एव चक्षुःसंयोगसम्भवात् सर्वावयवावच्छेदेन चक्षुःसंयोगाभावाच्च कथङ्कारं घटोऽयमिति प्रत्यक्षं स्यात्? न हि घटैकदेश एव घटः, अपि तु ये ये अंशा घटे तिष्ठन्ति, तेषां भागानां साकल्येन समाहार एव घटपदवाच्यः। अतो घटैकदेशे चक्षुःसंयोगसत्त्वात् कथमपि घटस्य सार्विकतया प्रत्यक्षं न सम्भवेत्, चक्षुःसंयोगशून्यानां घटांशानां ग्रहणासम्भवात्। अतः कथङ्कारमवयवी प्रत्यक्षग्राह्य इति वक्तुं शक्यते? न च चक्षुःसम्बद्धांशविशेषाच्चक्षुषाऽसम्बद्धानामप्यंशानामनुमितिः सम्भवेदित्यनुमित्यात्मक एव घटावयवविबोध इति वाच्यम्। यदि साकल्येन सर्वेषां भागानां प्रत्यक्षं कदापि स्यात् तर्ह्ययं घट इति प्रत्यक्षज्ञानं सिध्येत्। सति च प्रत्यक्षेण घट इति ज्ञाने घटांशदर्शनेन अयं घट इत्यनुमानं सम्भवेत्। किन्तु कदाचिदपि 'अयं घटः' इति ज्ञानमेव न भवितुमर्हति, सर्वैर्भागैश्चक्षुःसंयोगासम्भवात्। अतो घट इति ज्ञानसम्भवे तावदंशदर्शनेन घटस्यानुमितिः कुतः? साध्यज्ञानं हेतुदर्शनेन साध्यानुमितेरनुदयात्। तस्माद् यत् किंचिच्चक्षुषा सम्बध्यते तदनिश्चितविशेषस्वरूपं यत्किंचिदेतदिति ज्ञानमेव सर्वत्र सम्भवति, न पुनः कुत्रचिदपि 'इदमित्थम्' 'इदमिदम्'इत्यादिरूपेण निश्चयात्मकं ज्ञानं सम्भवेत्। अतः प्रत्यक्षबलादवयविसिद्धिरिति कल्पनाविजृम्भणमेव।

अथ यदि परमाणुपुञ्जात्मकमेव ज्ञेयं वस्त्विति प्रतिपादयितुमिष्येत, तदापि न मनोरथसिद्धिः। परमाणोरतीन्द्रियत्वेन तत्पुञ्जस्याप्यतीन्द्रियतयोरिन्द्रियादिभिर्ग्रहणायोग्यत्वात्। अतः प्रयाससहस्रैरप्यवयवात्मकं वाऽवयविरूपं वा ज्ञेयं ज्ञानातिरिक्तं न व्यवस्थापयितुं शक्येत।

---

१. श्लोकवार्त्तिकम्, प्रत्यक्षप्रकरणम्, श्लोकः ८४।
भाट्टचिन्तामणिधृतश्चेदं वार्त्तिकम्, पृष्ठम् २९।

बाह्यार्थानामभावेऽर्थक्रियाव्यवस्थानुपपत्तिरिति पूर्वपक्षः—

नन्वेवं ज्ञानाद् भिन्नतया प्रतीयमानानामर्थक्रियाकारिणां वस्तूनां यत् स्वरूपमुपलभ्यते, तदस्ति नास्ति वा, किं भवतां मतम्? अस्ति चेत्, विज्ञानव्यतिरिक्तस्यार्थस्य सिद्धिः। नास्ति चेत्, कथं तत्तदर्थक्रियानिष्पत्तये तत्तद्वस्तुग्रहणं नियमतो दृश्यते। यदि विज्ञानादतिरिक्तं किंचिन्नास्त्येव, तदा दाहशैत्यनिवृत्तये यथाक्रमं जलानलयोर्ग्रहणं नियमतो न स्यात्। एवं च सति सर्वार्थिनः सर्वत्रैव प्रवर्त्तेरन्निति चेत्? प्रागेव दत्तोत्तरेणापि पुनरेतदविशेषतः प्रतिपाद्यते यत्—

बाह्याकारस्यालोकत्वव्यवस्थापनेन तत्समाधानम्—

ज्ञानं यदि न प्रकाशते, तर्हि स्वयमनिर्भासं ज्ञानं बाह्यमर्थं प्रतिपादयितुं न शक्नुयादिति सर्वैरेव स्वीकर्त्तव्यम्। ज्ञाननिष्ठं निर्भासत्वमपि नान्यनिमित्तमनवस्थाप्रसङ्गादित्यप्यावेदितमस्माभिः। अथ सनिर्भासमपि ज्ञानं बाह्यं किंचित् प्रकाशयतीत्येवं तावत् प्रतिपाद्यते। ज्ञानज्ञेययोः क्षणिकयोः सम्बन्धाभावः परस्परव्यापारविरहादिति पूर्वमुक्तम्। नापि विषयविषयिभावनिबन्धनः प्रकाश्यप्रकाशकभावो ज्ञानातिरिक्तस्य बाह्यस्य ज्ञानस्य चेत्यपीतः प्रागेव विचारितम्। तत्र ज्ञानस्य या ज्ञेयाकारता सा वस्तुभूतं ज्ञेयमपेक्षते न वेत्येवं तावद्विचारणीयम्। तत्र ज्ञानं स्वपूर्ववर्त्तिनो विषयस्याकारमाश्रते, स्वपरवर्त्तिनो भाविनो विषयस्य वाऽऽकारं गृह्णातीत्येवं पक्षद्वयावगाहिनी विचारणा। तत्र पूर्ववर्त्तिनो विषयस्य ज्ञानक्षणे विनाशाद् भाविनो विषयस्यापि ज्ञानक्षणेऽसत्त्वात् तत्तदाकारग्रहणं ज्ञानस्य कथमापद्येत? न ह्यसतां विषयाणामाकारग्रहणं सम्भवति। ज्ञानक्षणे त्वविद्यमानस्यापि विषयस्य यदि ज्ञानेनाकारो गृह्येत, तर्हि विषयनिरपेक्षमेव तदाकारग्रहणं ज्ञानस्यापतितम्। एवं च सति विनापि विषयसत्तां तत्तदाकारग्रहणे ज्ञानस्य प्रवृत्तिं को निरुन्ध्यात्। न च युगपदुत्पन्नयोर्ज्ञानज्ञेययोर्ज्ञेयाकारग्रहणं ज्ञानस्य वक्तुं युगपदुत्पन्नयोः सव्येतरविषाणयोरिव तदसम्भवात्। तथाहि ज्ञानेन ज्ञेयाकारग्रहणं प्रति ज्ञेयं यदि कारणं स्यात्, तदैव ज्ञेयाविना भावसम्बद्धस्य ज्ञानस्य ज्ञेयाकारताग्रहणं युक्तम्। कार्यकारणभावश्च पौर्वापर्यभावनियतः। न हि पूर्ववर्त्तितां विना कारणत्वं सम्भवति, यतः कारणं स्वयमवस्थितं सत् स्वशक्तिव्यापारयोगात् कार्यं जनयेत्। अतः कार्यात् पूर्ववर्त्तिन एव कारणत्वं कल्पनीयम्। तस्माद् युगपदुत्पन्नयोः कार्यकारणभावासम्भवात् स्वसमनियतोत्पन्नज्ञेयाकारग्रहणं ज्ञानस्य न सम्भाव्येत। न च विनष्टमपि ज्ञानं

स्वाव्यवहितोत्तरक्षणोत्पन्नज्ञाने स्वाकारं समर्पयेदिति युक्तम् । ज्ञानेन ज्ञेयाकारग्रहणक्षणे यदि ज्ञेयं नास्त्येव तदा कथङ्कारं ज्ञानेन ज्ञेयाकारो गृह्येत ? ज्ञेयमपि यदि विद्यमानमेव ज्ञाने स्वाकारं समर्पयितुं न क्षमते, तर्हि विनष्टस्य ज्ञेयस्य तदाकारसमर्पकत्वे का प्रत्याशा ? स्मर्यते च पुनराभाणकः—

"मुग्धया भार्ययाऽभिधीयते पण्डकः—'आर्यपुत्र ! अपत्यवती मे भगिनी किमर्थं नाहमिति, स तामाह-'मृतस्तेऽहमपत्यमुत्पादयिष्यामि'इति तथेदं विद्यमानं ज्ञानं चित्तनिर्वृत्तिं न करोति, विनष्टं करिष्यतीति का प्रत्याशा"[1] ।

चित्राकारज्ञानानुपपत्तिः—

नाप्यनागतस्य विषयस्याकारो ज्ञानेन गृह्यत इति युक्तम् । न ह्यनुत्पन्नं ज्ञेयं स्वाकारं ग्राहयितुं शक्नुयात् । तस्माज् ज्ञानेन विषयव्यवस्थापनार्थं य आकारो गृह्यते, स न ज्ञेयसत्त्वसापेक्षः । अतो विनापि वस्तुभूतं ज्ञेयं संवृतिवशाद् य आकारो गृह्येत, ज्ञानेन तस्याप्ययथार्थत्वमेव समुचितम् । न ह्ययथार्थेनाकारेणार्थः संविदितो भवेत् । तथा सति भ्रान्तज्ञानस्थलेऽर्थसंवेदनप्रसङ्गः[2] । एवं चित्रास्तरणस्थले ज्ञानस्य ज्ञेयाकारत्वाङ्गीकारे किमेकमेव ज्ञानमनेकाकारान् गृह्णाति, आहोस्विदाकारभेदेन इति तत्रानेकान्येव जानातीति ? वस्तुतस्त्वेकमेव ज्ञानं तत्र स्वीकर्तव्यम्, अन्यथा नीलपीत-कृष्णरक्ताद्यवगाहिनीनामाकृतीनां भेदेन ज्ञानस्यापि यदि भेदस्तर्हि तत्र चित्रं ज्ञानमेव न भवेत् । अपि तु नीलं पीतमित्याद्यनेकमेव ज्ञानं स्वीकर्तव्यम् । एवं च सति स्वाकारपर्यवसायिनां ज्ञानानामन्याकारसंवेदनासम्भवात् चित्रमित्यनुभवो नोपपद्येत, तथाविधानुभवस्य नीलपीताद्यनेकावगाहित्वनियमात् । अतो ज्ञानं तत्र नानेकम्, अपि त्वेकमेव । एवं यदि चित्रास्तरणे ज्ञानस्य नीलादयो बहव आकाराः स्वीक्रियन्ते, तथा सत्यकाकारेऽपि सितादावर्वाङ्मध्यपरभागरूपा बहव आकारा इति तत्रापि तदात्मकं ज्ञानमनेकमिति निष्पन्नं भवेत् । तथा च सति कुत्राप्येकं ज्ञानमिति व्यवहारो नोपपद्येत । अपि च, ज्ञाने ये विषयाकाराः स्वीक्रियन्ते, तत्रेदं पृच्छ्यते—किं

---

१. पातञ्जलव्यासभाष्ये समुद्धृतोऽयं सन्दर्भः, साधनपादः; सूत्रम्—२४, पृ० २३४ ।

२. उक्तं च—

'अस्तु न हि स सारूप्यं विज्ञानं बाह्यवेदकम् ।
तस्यापि सर्वथाऽयोगान्न युक्ता वेदकस्थितिः ।।'

(तत्त्वसंग्रहः, का० २०३५) ।

विषयाणां सर्वथा सारूप्यं ज्ञाने, अथवा यत्किञ्चित् सारूप्यम् ? सर्वथा सारूप्ये तु ज्ञानस्यापि ज्ञेयवज् जडत्वमापद्येत । यत्किंचित्सारूप्ये सर्वेषां ज्ञानानां सर्वात्मकत्वं प्रसज्येत, अर्थक्रियाकारित्वसारूप्यस्य सर्वत्र सम्भवात् । तस्माज् ज्ञानेन स्वातिरिक्तस्य विषयस्याकारो गृह्यत इति रिक्तं वचः[1] ।

ननु यज्ज्ञानं येन जनितं तत्तस्यैव संवेदकम् । अतोंऽशतः सारूप्ये सत्यपि जन्य-जनकभावनियमाधीनत्वात् संवेद्यसंवेदकभावस्य न सर्वं ज्ञानं सर्वसंवेदकं स्यादिति वाच्यम्, भवेदेतदेवं यदि ज्ञेयस्य ज्ञानजनकता सिध्येत् । न चैवम्, पौर्वापर्यादिभाव-वैधुर्यात् । अतः कथमपि ज्ञानस्य ज्ञेयाकारत्वं वास्तवमिति वक्तुं न शक्येत, अपि त्वलीकेनैवाकारेण सांवृतिकेन सर्वे प्रमाणप्रमेयव्यवहारा जायन्ते । सांवृतिकस्य चालीकत्वं प्रसिद्धमेव विदुषां सर्वेषाम् । तस्माद् बहिरर्थस्याभावेऽपि संवृतिजनितपूर्व-संस्कारवशाज्ज्ञाने कश्चिदाकारः प्रतिभासते । स चाकारोऽपि ज्ञानस्यालीक एव । अतो न साकारविज्ञानं वस्तुभूतं ग्राह्यमिति निराकारं विज्ञानं स्वप्रकाशमानमलीकाकारैस्तथा तथा प्रतीयमानं व्यवहारसाधकम् । उक्तं च तत्त्वसंग्रहे—

"शुद्धस्फटिकसङ्काशमर्थाकारैरनङ्कितम् ।
यैरिष्टं वेदनं कैश्चिदिदं तान् प्रतिसाधनम्[2] ।।'

तस्मात् सर्वथैव निराकारं विज्ञानमेकं पारमार्थिकं वस्तु, बाह्यार्थसाधकादीनामाका-राणामप्यलीकत्वात् । तस्माद् विज्ञानातिरिक्तं सर्वमसदिति निराकारविज्ञानवादिना-माशयः ।

साकारविज्ञानवादिमते तु विज्ञानपरिणामो वस्तुभूत एव बाह्याकारत्वेन प्रतीयते । अतो विज्ञानातिरिक्तं बाह्यं यद्यपि नास्नि, तथापि परिणामप्रभावादाका-रस्य विज्ञानाव्यतिरिक्तस्य विज्ञानवदेव सत्त्वमङ्गीकर्त्तव्यम्, न तु विज्ञानातिरिक्तं किञ्चित् सिध्यति, विज्ञाननिष्ठस्याकारस्य विज्ञानाव्यतिरिक्तत्वात् । अत एवाकार-भेदाद्विज्ञानभेदप्रतीतिरपि समुपपद्यते लोकेषु ।

---

१. तदुक्तम्—

'सर्वात्मना च सारूप्ये ज्ञानेऽज्ञानादिना भवेत् ।
साम्ये केनचिदंशेन सर्वं स्यात् सर्ववेदकम् ।।'

(तत्त्वसंग्रहः, का २०३८) ।

२. तत्त्वसंग्रहः, का २०३४ ।

अत एव ग्राह्यस्यार्थस्यानुपपत्तौ नीलपीताद्याकारविज्ञानं केवलं विज्ञानस्यैव परिकल्पिताकारविशेष इति विज्ञानवादिमतं सूपपन्नमिति दिक् ।

एकस्यैव विज्ञानस्यालयविज्ञानादिभेदेनाष्टविधतासाधनम्—

साकारविज्ञानवादे विज्ञानं तात्त्विकतयैकमपि प्रवाहरूपेण त्रिधा परिणमते । तच्चालयविज्ञानं क्लिष्टमनोविज्ञानं प्रवृत्तिविज्ञानं चेति त्रिविधम् । तथा चोक्तम्—

'आत्मधर्मोपचारो हि विविधो यः प्रवर्त्तते ।
विज्ञानपरिणामोऽसौ परिणामः स च त्रिधा ।।
विपाको मननाख्यश्च विज्ञप्तिविषयस्य च[१] ।'

उक्तं च स्थिरमतिभाष्ये—

'स एष त्रिविधः परिणामो विपाकाख्यो मननाख्यो विषयविज्ञप्त्याख्यश्च[२] ।' इति ।

तत्रालयविज्ञानं सर्वविज्ञानवीजम् । उक्तं च—

'तत्रालयाख्यं विज्ञानं विपाकः सर्वबीजकम्[३] ।।' इति ।

आलयशब्दस्य गृहस्थानाधारोऽर्थः । तदेवोक्तम्—

'आलयः स्थानमिति पर्यायौ[४] ।' इति ।

आलयविज्ञानस्वरूपनिरूपणम्—

तत्रालीयन्त उपनिबध्यन्तेऽस्मिन् सर्वधर्माः कार्यभावेनेति वा, आलीयते उपनिबध्यते कारणभावः सर्वधर्मेष्विति वा व्युत्पत्त्याऽऽलयशब्दो निष्पन्नः । विजानातीति विज्ञानम् । तथा चालयं चासौ विज्ञानं चेत्यालयविज्ञानम् । यच्च नीलमिति पीतमिति प्रवृत्तिविज्ञानानि प्रकाशन्ते तेषामाधारः, उत्पत्तिस्थानं चालयविज्ञानम् । नहि तेषां प्रवृत्तिविज्ञानानां निराधारत्वं निरालम्बनत्वं वा सम्भवति । अतस्तेषामपरिच्छिन्न-

---

१. विज्ञप्तिमात्रतासिद्धिः, त्रिंशिकाकारिका, का० १, २–पूर्वार्धः ।
२. विज्ञप्तिमात्रतासिद्धिः, त्रिंशिकाकारिका, का० २ पूर्वार्धः–स्थिरमतिभाष्यम् ।
३. विज्ञप्तिमात्रतासिद्धिः, त्रिंशिकाकारिका, का० २–परार्धः ।
४. विज्ञप्तिमात्रतासिद्धिः, त्रिंशिकाकारिका, का० २–पूर्वार्धः– स्थिरमतिभाष्यम् ।

मालम्बनं किंचिद्वर्त्तते, तदेवालयविज्ञानम्। तथाहि, आलयविज्ञानस्य द्वैविध्यम्—एकमध्यात्मम् उपादानविज्ञप्तिरूपम्। अन्यच्च बाह्यिकतयाऽपरिच्छिन्नाकारभाजनम्। तत्राध्यात्ममुपादानम्, अन्यच्च बहिरर्थाकारतया प्रतीयमानं प्रवृत्तिविज्ञानम्। वस्तुत आलयविज्ञानमेव मूलं विज्ञानम्। न ह्यालयविज्ञानमन्तरेण विज्ञानप्रवृत्तिसम्भवः। अत्र समुद्रेण दृष्टान्तः कल्पयितुं शक्यते। तथाहि, समुद्रस्यान्तर्वर्त्ती कश्चिदाभ्यन्तरीणस्तरः सर्वदैव प्रवहत् सर्वेषां तरङ्गाणामाधारोऽपि स्वयं सर्वदैव स्वरूपेणावतिष्ठते, तमेव चाश्रित्य अन्ये तरङ्गाः प्रतिक्षणमुपचीयमाना अपचीयमानस्वभावाश्च पुनः पुनः क्रमन्ते, तथाऽत्रापि विज्ञानस्य कश्चित् प्रशान्तभागः प्रवाहाणामाधारतयाऽवस्थितस्तदेवालयविज्ञानम्, तथा विविधवासनावशात् प्रवृत्तिविज्ञानतरङ्गा ये नाम प्रतीयन्ते, तेऽप्यालयविज्ञानमूलका एव। तस्मादालयविज्ञानं सर्वविज्ञानमूलम्। एवं यथा गृहेषु सर्वाणि द्रव्याणि संभृतानि तिष्ठन्ति, एवमेवालयविज्ञाने वासनारूपेण सर्वाणि प्रवृत्तिविज्ञानानि तिष्ठन्ति, अतोऽप्यालयविज्ञानं सर्वेषां विज्ञानानां मूलम्। अत एवोक्तम्—'विपाकः सर्वबीजकमिति[1]।'

तथा च घटमहं जानामि नीलमहं पश्यामीत्यादिषु विभिन्नेषु प्रवृत्तिविज्ञानेषु अहमहमित्याकारिका या चित्सन्ततिरनुवर्त्तते, सैवालयविज्ञानमितिनिर्णेतुं शक्यते। एवं विज्ञानस्य द्वितीयपरिणामो मननाख्यः क्लिष्टमनःसंज्ञकः प्रसिद्धः। आलयविज्ञानप्रवृत्तिविज्ञानयोः सम्बन्धसम्पादकमिदं विज्ञानम्। यच्च पुनर्मनोविज्ञानं तत् तु मानससुखदुःखादिबोधात्मकम्, तन्न क्लिष्टमनःसंज्ञकम्। यतः षडेव प्रवृत्तिविज्ञानानि। रूपविज्ञानम्, रसविज्ञानम्, गन्धविज्ञानम्, स्पर्शविज्ञानम्, शब्दविज्ञानं मनोविज्ञानं चेति। एतेषां षण्णां प्रवृत्तिविज्ञानानां स्पष्टतया प्रतीयमानानां याऽस्पष्टावस्था, तदेव क्लिष्टमनोविज्ञानम्। तत्तु परिगणनया सप्तमं विज्ञानम्। अष्टमं चालयविज्ञानमित्यष्टौ विज्ञानानि। एतेषां विज्ञानानां विशेषतः परिचयस्तु बौद्धशास्त्रेषु प्रसिद्ध इति विस्तरभिया नेह प्रपञ्च्यते। उक्तं च विज्ञप्तिमात्रतासिद्धौ—

'यत्रजस्तन्मयैरन्यैः स्पर्शाद्यैश्चार्हतो न तत्।
न निरोधसमापत्तौ मार्गे लोकोत्तरेण च॥
द्वितीयः परिणामोऽयं तृतीयः षड्विधस्य या।
विषयस्योपलब्धिः सा कुशलाकुशलाद्वया[2]॥'

एतेषां विज्ञाननां तरङ्गकल्पत्वमपि तत्रैव निर्धारितम्—

---

१. विज्ञप्तिमात्रतासिद्धिः, त्रिंशिकाकारिका, का० २–परार्धः।

२. विज्ञप्तिमात्रतासिद्धिः, त्रिंशिकाकारिका, का० ७, ८।

'पञ्चानां मूलविज्ञाने यथाप्रत्ययमुद्भवः।
विज्ञानानां सह न वा तरङ्गाणां यथा जले[1]॥'

विज्ञानानामसदालम्बनत्वम्—

अथ विज्ञानातिरिक्तस्य बाह्यस्याभावेऽपि विज्ञानपरिणामवशाद् विविधाकारा ये नाम प्रतीयन्ते, ते खलु विज्ञानस्यैवाकारा न तु विज्ञानातिरिक्तता तेषाम्। अतोऽवस्तुभूतस्यापि विज्ञानव्यतिरिक्ततया प्रतीयमानस्य विकल्पतुल्यत्वं बोध्यम्। तथा चोक्तम्—

'विज्ञानपरिणामोऽयं विकल्पो यद्विकल्प्यते।
येन तन्नास्ति तेनेदं सर्वं विज्ञप्तिमात्रकम्[2]॥'

तस्मादारोपिताः सर्वे प्रतीयमाना वस्तुशून्या विकल्पमात्रम्। तथा चोक्तं पातञ्जले—

'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः[3]।'

एवं स्थिरमतिभाष्येऽप्युक्तम्—

"अध्यारोपितार्थाकारास्त्रैधातुकाश्चित्तचैत्ता विकल्प उच्यते। यथोक्तम्—'अभूतपरिकल्पस्तु चित्तचैत्तास्त्रिधातुका' इति। तेन त्रिविधेन विकल्पेनालयविज्ञान-क्लिष्टमनःप्रवृत्तिविज्ञानस्वभावेन स्वसम्प्रयोगेण यद्विकल्प्यते भाजनमात्मा स्कन्ध-धात्वायतनरूपशब्दादिकं वस्तु तन्नास्तीत्यतः स विज्ञानपरिणामो विकल्प उच्यते, असदालम्बनत्वात्[4]॥"

एतावता प्रबन्धेन विज्ञानवादिबौद्धानां मतं यथामति किञ्चिदालोचितम्। दुरवगाहबौद्धसिद्धान्तसागरे यद्यपि बहून्येव वक्तव्यरत्नानि विराजन्ते, तथापि सर्वथा तेषां समुद्धरणं नास्मिन् क्षुद्रकलेवरे निबन्धे सम्भवत्येवेत्यतो येषां सिद्धान्तानामुल्लेखः प्रस्तूयमानवस्तुप्रकटनायोपयुज्यते, तेषां तेषां सिद्धान्तानां संक्षेपतः समावेशः कृत एवास्मिन्नध्याये। अतः कथमेषामेव सिद्धान्तानामुपादानम्, नान्येषामिति पर्यनुयोगानवकाशः।

---

१. विज्ञप्तिमात्रतासिद्धिः, त्रिंशिकाकारिका, का० १५।
२. विज्ञप्तिमात्रतासिद्धिः, त्रिंशिकाकारिका, का० १७।
३. पातञ्जलदर्शनम्, समाधिपादः, सूत्रम् ९।
४. विज्ञप्तिमात्रतासिद्धिः, त्रिंशिकाकारिका, का० १९—स्थिरमतिभाष्यम्, पृ० ७९।

विज्ञानवादिनां बौद्धानां मते ज्ञानातिरिक्तस्य बाह्यस्यानङ्गीकारे प्रधानतस्तिस्रो युक्तयः परिलक्ष्यन्ते। तत्र प्रथमा युक्तिस्तावद् व्यवहारानुकूलतयाऽर्थक्रियाकारित्वेन बाह्यानां वस्तूनामस्तित्वं स्वीकरणीयमिति बाह्यार्थवादिनां य सिद्धान्तस्तन्निरसनम्। यतो न खलु व्यवहारो वस्तुसापेक्षः, अपि तु ज्ञानसापेक्ष एव सः। सर्वासामर्थक्रियाणां सुखदुःखयोरन्यतरत्वेन पर्यवसानात् सुखदुःखयोः पुनर्ज्ञानमात्रसापेक्षतया न तत्र ज्ञानातिरिक्तस्य वस्तुनः प्रयोजनम्। दृश्यते च पुत्रादिमरणे संघटितेऽपि तदजानतः पुंसो न तज्जनितशोकादिकम्, अपि च, जीवितस्यापि तनयस्य पार्श्वे शयानस्य तदा स्वप्ने मरणमनुभूतं तदा तज्ज्ञानमात्रेणैव महान् शोकः सम्पद्यते। तत्र शोकस्याश्रुपातादिकमेव प्रमाणम्। तथाविधं स्वप्नं पश्यतोऽश्रुभिरुपाधानं सिक्तं भवेदिति प्रत्यक्षत एवोपलभ्यते। अनेनैव प्रमाणितं यद् वस्तु तथाविधं तिष्ठति न वा, न तेन किञ्चिदायातम्, तज्ज्ञानमात्रमेव दुःखादिजनकम्। एवं सुखादिकमपि समानेनैव न्यायेन व्यवस्थापयितुं शक्यम्। पूर्वपुरुषैर्भूम्यादिषु प्रथितानां रत्नानामज्ञानान्न सुखादिकं स्यात्, अपि तु स्वप्नादौ तथाविधार्थप्राप्तिसन्दर्शनेन महान् सन्तोषः स्यादिति सर्वानुभवसिद्धम्। दृश्यते च स्वाप्निकरतिसुखादिकमपि सर्वेषाम्। अतोऽनवस्थितेऽपि वस्तुनि तत्तज्ज्ञानमात्रेणैव सुखादिकं सम्पद्यत इति सिद्धमेव। तस्मात् सुखादिकं न वस्तुसत्तासमनियतम्, अपि तु तत्तज्ज्ञानेनाविनाभावः सुखदुःखयोः।

तथा च सत्यर्थक्रियापर्यवसायि सुखदुःखादिकं यदि ज्ञानमात्रसम्पाद्यं तर्हि तथाविधार्थक्रियाकारित्वेन ज्ञानातिरिक्तस्य बाह्यवस्तुनोऽस्तित्वे न किञ्चित् प्रमाणम्, यतोऽर्थक्रियाकारित्वबलेनैव वस्तूनां सत्त्वं व्यवस्थापितं परैः, सा चार्थक्रिया यदि वस्तुनिरपेक्षा ज्ञानमात्रसाध्या च, तदा तथाविधार्थक्रियाकारिणां वस्तूनामस्तित्वं नैव सिध्येत्। अतो व्यवहारानुकूलतया ज्ञानातिरिक्तस्य बाह्यवस्तुनः किञ्चित् प्रमाणं नोपपद्यते। द्वितीया युक्तिः पुनर्ज्ञानज्ञेययोः सम्बन्धासिद्धिः। तथाहि, सर्वेषां भावानां क्षणिकत्वं बौद्धशास्त्रेषु युक्तिसाधितम्। अतः सत्त्वस्य क्षणिकत्वव्याप्यतया ज्ञानज्ञेययोरपि सत्त्वेन क्षणिकत्वं स्वीकर्त्तव्यम्। एवञ्च सति ज्ञानज्ञेययोः सम्बन्ध एव न सम्भवेत्। तथाहि ज्ञानमसम्बद्धं वस्तु नैव प्रकाशयेत्। असम्बद्धवस्तुप्रकाशकत्वे ज्ञानस्य सर्वज्ञानानां सर्ववस्त्ववभासकत्वप्रसङ्गाज्ज्ञानं किम्भूतं ज्ञेयं प्रकाशयेदिति नियमो न स्यात्। अतो ज्ञानातिरिक्तस्य बाह्यवस्तुनोऽस्तित्वं यदीष्येत, तर्हि ज्ञानज्ञेययोः सम्बन्धोऽप्यवश्यं स्वीकर्तव्यः स्यात्। वस्तुतस्तु स एव न घटते। तथाहि, ज्ञानं यदि ज्ञेयात् पूर्वमेव स्यात्, तर्हि ज्ञेयं विनैव ज्ञानोत्पत्तिस्वीकारे ज्ञानविषयतया ज्ञेयस्वीकारो निरर्थकः। यतो यं विषयं विनैव यज्ज्ञानमुत्पद्यते, तज्ज्ञानं

स्वयमेव सिद्धमिति न विषयेण तत्र किञ्चित् करणीयं विद्यते। अपि च, पूर्ववर्त्तिना ज्ञानेन परभाविनो विषयस्य सम्बन्ध एव न सम्भाव्यते। सम्बन्धिनोः समकालीनसत्त्वं विना न सम्बन्धसिद्धिः। यतो येन यत् स्वायत्तीक्रियते, तेनैव तत् सम्बध्यते। न ह्यनवस्थितस्य पूर्ववर्त्तिनो ज्ञानस्य परक्षणोत्पन्नानां विषयाणां स्वायत्तीकरणं सम्भवेत्, असतः कर्तृत्वायोगात्। न वा ज्ञेयात् परवर्त्तिनो ज्ञानस्य पूर्ववर्त्तिना ज्ञेयेन सम्बन्धः सम्भवेत्, ज्ञानकाले ज्ञेयस्य विनाशात्, सदसतोः सम्बन्धाभावात्। नापि युगपदुत्पन्नयोः ज्ञानज्ञेययोः सम्बन्धः सम्भवति, सव्येतरविषाणयोरिव युगपदुत्पन्नयोः सम्बन्धासिद्धेः। तस्माद् ज्ञेयपूर्ववर्त्तिनो ज्ञानस्य ज्ञेयपरवर्त्तिनो वा ज्ञानस्य ज्ञेयेन सम्बन्धो न सम्भवेत्, तयोर्व्यापाराभावादिति ज्ञानज्ञेययोः सम्बन्धासिद्धिः। अतो ज्ञानातिरिक्तस्य ज्ञेयस्यास्तित्वं नैव सिध्येत्, ज्ञानेन तत्सम्बन्धासम्भवात्। तत्र तृतीया युक्तिस्तावज् ज्ञेयस्वरूपमेव न सिध्यति। तथाहि ज्ञेयमवयविरूपमवयवरूपं वा? न च तृतीयः प्रकारो वर्त्तते। न च तत्रावयविरूपत्वं ज्ञेयस्य सम्भवेत्। यतोऽवयवित्वं नामावयवसमूहघटितत्वम्। तद्घटनप्रकारश्च द्विधा सम्भवेत्। तत्रैकेनावयवेनावयवान्तरसंयोगादवयवी यथाक्रमं भवितुमर्हति।

तद् यथा, द्वाभ्यां तन्तुभ्यां संयुक्ताभ्यां प्रथमं किञ्चिदवयविरूपं निष्पद्यते। एवं क्रमेण सूत्रान्तरसंयोगवशात् पटाख्यो महानवयवी सिध्यति। वस्तुतस्त्वयं प्रकारो न सम्भवेत्, यतोऽवयविनोऽवयवविभागक्रमेण यत्र पर्यवसानं तत्तु निरवयवं किञ्चित् परमाण्वादिसंज्ञकं तेषामभिमतम्। तत्र च द्वाभ्यां परमाणुभ्यां परस्परसंयुक्ताभ्यां द्व्यणुकम्, एवं कतिपयैर्द्व्यणुकैस्त्र्यणुकमित्यादिक्रमेण महावयवी सम्पद्यत इति तेषां प्रक्रिया। तत्र च निरवयवानां परमाणूनां दिग्देशाद्यभावात् प्रदेशवद्व्याप्यस्य संयोगस्य तत्रासम्भवः। सावयवस्य च सावयवान्तरेण वस्तुना संयोगः परिलक्ष्यते। यथा सूत्रं सूत्रान्तरेण संयुज्यते। तथा चैकदेशेन परस्परसंयोगवतोर्द्रव्ययोः संयुक्तदेशातिरिक्तदेशमादाय प्रत्येकावयवपरिमाणापेक्षया महत्त्वादिकं जायते। किन्तु निरवयवयोः परमाण्वोः प्रदेशासम्भवान्न तथाविधसंयोगः कल्पयितुं शक्यते। अथ यदि द्वयोः परमाण्वोर्निरवयवत्वात् सामग्रः संयोगो भवेत्, तर्हि प्रथिमानुपपत्तिः। एकस्मिन् परमाणावन्यस्य परमाणोः साकल्येन प्रवेशान्नहि तदानीं परमाणुपरिमाणापेक्षया किञ्चित् परिमाणान्तरं सम्भाव्येत। तस्मान्नैवावयवी सिध्येत्। अथ यद्यवयवसमूहात्मकं ज्ञेयं वस्तु, तर्हि पुञ्जान्तर्गतानां परमाणूनां प्रत्येकं निरवयवतयाऽतीन्द्रियत्वेन पुञ्जस्याप्यतीन्द्रियत्वमेव स्यात्। नहि पुञ्जान्तर्भुक्तपरमाण्वतिरिक्तं किञ्चित् पुञ्जाख्यं प्रसिध्यति। तस्मान्निरवयवानां परमाणूनां संयोगासम्भवात् समूहात्मकपुञ्जस्यापि निरन्तरनिरवकाशेनाव-

स्थानमात्रत्वं परमाणूनां सिध्येत् । न हि तेनातीन्द्रियाणां परमाणूनां स्वस्वभावमतिक्रम्य कथञ्चिदैन्द्रियकत्वं कल्पयितुं शक्येत । प्रत्येकं परमाणूनां सुतरामतीन्द्रियतया ज्ञानाविषयत्वे न ज्ञेयतासमासाद्यते । अतो यज्ज्ञेयतयाऽभिमन्यते, तन्नावयविरूपं न वाऽवयवरूपमिति विचारः सर्वथा ज्ञेयस्यैव शशविषाणायमानतामेवापादयति । अतः केवलं प्रतिक्षणं समुत्पन्नं स्वप्रकाशं विज्ञानमेवैकमपि संवृतिवशाद् ग्रहीतृग्रहणग्राह्याकारतया विकल्प्यते ।

तत्र साकारविज्ञानवादिनां मते विज्ञानस्यैव परिमाणो नीलपीताद्याकार इति परिणामभेदवशाद् ग्राह्यतया प्रसिद्धानामवस्तुभूतानामपि नीलपीतादीनां पारस्परिको भेदः कल्प्यते । तत्तु प्रवृत्तिविज्ञानमालयविज्ञानमिति च प्रधानतो द्विविधम् । एवं क्लिष्टमनःसंज्ञकं विज्ञानान्तरमपि प्रवृत्तिविज्ञानालयविज्ञानयोरन्तराले किञ्चिद् बौद्धशास्त्रप्रसिद्धमित्यावेदितमस्माभिः । तथा चानादिसंवृतिवशाद् ये ये विज्ञानाकारा अनुभूताः, तदनुभवजन्यसंस्कारवशात् सर्वेषु जन्मसु विज्ञानं तत्तदाकारेण प्रवर्त्तमानं ग्राह्यग्रहणग्रहीतृभेदेन परिकल्पितमिति विज्ञानातिरिक्तं प्रतीयमानं सर्वं शशविषाणादिवत् तुच्छमेवेति साकारविज्ञानवादिमतम् । निराकारविज्ञानवादिमतेऽपि विज्ञानातिरिक्तस्य बाह्यस्य तुल्ययुक्त्यैवाभावादलीकत्वमेव । अपि तु विज्ञानस्य य आकार इति कथ्यते, तदपि न समीचीनम् । किन्तु यथा शुद्धे स्फटिके प्रतिबिम्बवशात् स्फटिकं लोहिताकारमिव प्रतीयते, तद्वदेवानाद्यविद्यासञ्चितानां संस्काराणां प्रतिबिम्बपातात् कल्पितेन तेन प्रतिबिम्बेन विज्ञानं तत्तदाकारप्राप्तमिव प्रतीयते, विज्ञानं तु वस्तुतो निराकारमेव । उभयोरेव मते विज्ञानातिरिक्तस्य बाह्यस्याभावाद् बाह्यतया प्रतीयमानं सर्वथाकाशकुसुमादिवदत्यन्ततुच्छं विकल्पमात्रमिति विज्ञानवादिनामाशय इति दिक् ।

अविद्यास्वरूपम्

श्रीसुधाकरदीक्षितः
प्राध्यापकः,
न्याय-वैशेषिकविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

❀ ❀ ❀

मानवः सुखमेव वाञ्छति, तदर्थं प्रतिक्षणं सर्वात्मना यतते च, परमन्ततः हृदयपरितापजनकं प्रियविप्रयोगजन्यम् अप्रियसंयोगजन्यं वा दुःखमेव लभते। अत्र श्रीमतो भर्त्तृहरेः पद्यमिदं हठात् स्मरणपथमायाति—

"उत्खातं निधिशङ्कया गिरितलं ध्याता गिरेर्धातवः
निस्तीर्णः सरिताम्पतिर्नृपतयो यत्नेन संसेविताः।
मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः
प्राप्तः काणवराटकोऽपि न मया तृष्णेऽधुना मुञ्च माम् ॥" इति।

अनया तृष्णया निगडिता एव वयं विविधासु पुण्यपापजनिकासु प्रवित्तिषु निरता जरा-रोग-शोक-परिताप-बन्धन-मरणादिरूपासु नैकविधासु दुर्दान्तदुःखपरम्परासु निमज्जामः।

अनयाऽस्माकं दुर्दशया नितान्तं सन्तप्तः परमकारुणिकस्तत्रभवान् शङ्कराचार्यः अस्मान् उद्धर्त्तुं श्रुतिशिरोभूताभ्यः उपनिषद्भ्यः अद्वैतसिद्धान्तामृतं दुदोह।

अद्वैतसिद्धान्तानुसारं जन्म-मरणलक्षणं दुःखं भोक्तृभोक्तव्यादिलक्षणः सर्वोऽपि दृश्यमानः दुःखमयः प्रपञ्चश्च अविद्याया विलासमात्रम्। अस्या अविद्यायास्तत्त्वज्ञानेन निवृत्तौ सत्यामेव निरतिशयसुखस्वरूपः अपवर्गः समवाप्तुं शक्यः।

केयमविद्येति साम्प्रतं चिन्तनीयम्। यद्यपि भगवत्पदवाच्यतामधिगन्तुं प्रथमं विद्याविषयकं चिन्तनमनन्तरं चाविद्याविषयकं चिन्तनं युक्तं प्रतिभाति—

"उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिम्।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति॥"

इति प्रसिद्धेः परमत्र प्रथममविद्याविचारणायामस्ति कश्चन विशेषः। स चायम्—

प्राणिमात्रस्याभिलाषः श्रेयोविषयकः प्रेयोविषयकश्च। श्रेयः कल्याणम्, प्रेयः प्रियम्। कल्याणापेक्षया प्रियस्य चित्ताकर्षकत्वम् आवर्जकत्वञ्चाधिकमिति निर्विवादम्। अत एव प्रियङ्करा उपायाः प्राणिभिः प्रथममनुष्ठीयन्ते, कल्याणकरेषु उपायेषु तु तदैव प्रवृत्तिः जायते, यदा विचारप्रवणं चित्तं निर्विकारं सत् सूक्ष्ममीक्षितुं स्थैर्यमासादयति। प्रियङ्कराणामुपायानां स्रोतः अविद्या, श्रेयस्कराणां तु विद्या। अत एवाविद्यायाः स्थानं प्रथममयत्नसिद्धं च, विद्यायास्तु तदनु यत्नसाध्यं स्थानम्। तेनाविद्यायाः प्रथमं स्वरूपचिन्तनं युक्तमिति।

एवमविद्यायाः स्वरूपे प्रथमं चिन्त्यमाने भगवत्पादानां श्रीमतां शङ्कराचार्याणां मतेन भावरूपैव सा सिद्ध्यति। यद्यपि अविद्यापदोच्चारणसमकालमेवापाततो विद्याया अभाव एवाविद्येति प्रतीयते, तथापि नाभावाद् भावोत्पत्तिरिति न्यायेन अस्मिता-राग-द्वेषादीनामविद्याकार्याणामभावादुत्पत्त्यसम्भवमभ्युपगम्यास्या भावरूपत्वमेव स्थिरीक्रियते। अत एव संक्षेपशारीरके श्रीमान् सर्वज्ञात्ममुनिः स्पष्टं वदति—

"नाभावतास्य घटते वरणात्मकत्वात्
नाभावमावरणमाहुरभावशौण्डाः।
अज्ञानमावरणमाह च वासुदेवः
तद्भावरूपमिति तेन वयं प्रतीमः॥"

अस्या अज्ञानापरपर्यायाया अविद्याया आवरणकारित्वं गीतायां भगवतो वासुदेवस्य एभिर्वचनैः स्पष्टम्—

"अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।" (५-१५)।
"धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्॥" (३-३८) इति।

अस्या आवरणकर्त्र्या अविद्याया नाशः, अधिष्ठानस्य परमतत्त्वस्य परब्रह्मणः साक्षात्कारेणैव भवतीत्यपि भगवान् वासुदेवः गीतायामेव प्रतिपादयति—

"ज्ञानेन तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्॥" (४।१४) इति।

श्रुतिरपि अत्रार्थ प्रसिद्धा—"तमेव विदित्वाऽतिमृत्युमेतो"ति।

यद्यपीयमविद्या शङ्कराचार्यमतेऽनिर्वचनीया, तेन चास्याः सदसदविलक्षणत्वेन भावात्मकत्वप्रतिपादनमपि न साम्प्रतं प्रतिभाति; परं जगत उपादानकारणत्वेनाभ्युप-

गम्यमानाया अस्या भावाभावविलक्षणाया अभावपदेन व्यपदेशापेक्षया भावपदेन व्यपदेशो युक्त इति दृष्ट्वैव भावात्मिकेयमिति मन्ये शङ्करानुयायिनः स्वीकुर्वन्ति ।

सूक्ष्ममीक्ष्यते चेद्दशाविशेषे विद्यैवाविद्यापदाभिधेया भवति । जगत उपादानत्वेन स्वीक्रियमाणाया अस्या किं नामेति प्रश्नस्य नास्ति किञ्चित् समाधानम्, अत एव विद्या-पदस्य पूर्वं निषेधार्थकस्य, अल्पार्थकस्य सादृश्यार्थकस्य वा नञ उल्लेखेन कथञ्चिदियं प्रसिद्धिं नीयते प्रकारान्तराभावात् । तथा चास्या अभिधायकोऽयमविद्याशब्दः इयम् अल्पविद्या; अपूर्णविद्या, सन्दिग्धविद्या, विपरीतविद्या वेति शब्दमर्यादया स्पष्टयति । तेन हि विद्यैव न्यूना विपरीता सन्दिग्धा वा सती अविद्यापदव्यपदेश्येति स्फुटं प्रतीयते । एवं स्थिते विद्यावाचकपदेनैव वाच्यमानेयं नूनं भावरूपैव स्यादिति मतिर्जायत एव ।

किञ्च यया सामग्र्या विद्यावृत्तेः समुदयः स्वीक्रियते, तस्याः पृथक् काचन सामग्री नास्त्यविद्यायाः । विद्यावृत्तेः कारणकूटकुक्षौ ज्ञानस्य इच्छायाः प्रयत्नस्य चान्त-र्भावः शास्त्रसम्मतः । ज्ञानं बुद्ध्यधीनम्, इच्छा मनोऽधीना, यत्नश्च ज्ञानेन्द्रियाधीनः । अत एव बुद्धिः मनसा, मन इन्द्रियेण, इन्द्रियश्च विषयेण यदा सन्निकृष्टं भवति, तदा घटपटादिविषयाणां निश्चयात्मकमपरोक्षज्ञानं जायते । पर्यन्ते च कर्मेन्द्रियचेष्टया कार्यं सिद्ध्यति । यदा हि तमोगुणमहिम्ना एषां बुद्ध्यादीनामवान्तरव्यापारे न्यूनत्वं वैपरीत्यं वा भवति, तदैव चरमफलत्वेनाभिप्रेतं ज्ञानं क्रिया वाऽभीष्टरूपमनासाद्यानभीष्टं रूपमा-सादयति, तेन विपरीतफलोत्पादोऽपरिहार्यः । एतेन हि ज्ञाने इच्छायाम् प्रयत्ने चागन्तुक-दोषवशेन सति वैपरीत्ये विद्यैवानभीष्टस्यानिष्टस्य वा फलस्योत्पादिका सती अविद्यात्वं भजत इति स्थितम् । अनया दिशाऽपि अविद्याया भावरूपतैव स्फुटीभवति ।

यतो विद्यैव तमोगुणमहिम्ना मलिना सती अविद्येत्युच्यतेऽतो विद्याऽविद्ययोः मूलतः सत्यप्यैक्ये साधनफलादिमूलकः परस्परं भेदोऽप्यपरिहार्यः । विद्याया मार्गः अन्तर्मुखः, अविद्यायास्तु बहिर्मुखः । विद्याया अपवर्गः फलम्, अविद्यायाश्च संसारः फलम् । अत एवाविद्यायाः स्वरूपपरिचयस्त्यागायापेक्ष्यते, विद्यायाश्च कतिचित् कालं यावदुपादानाय । अन्ते तु विद्याऽपि त्याज्या एव भवति ।

एवं वस्तुस्थितावपि श्रीमदाद्यशङ्कराचार्याणां कथनानुसारं वर्णाश्रमधर्मस्य संरक्षणार्थं लोकसंग्रहार्थं वावश्यं यावच्छरीरस्थितिं परिपालनीयस्य पालनार्थमंशतोऽ-विद्याया अङ्गीकारस्तथैवापरिहार्यो भवति, यथा धात्र्यां वस्तुगत्या मातृत्वरहितायामपि पोषणकार्यसम्पादनोद्देश्येन मातृत्वारोपः अपरिहार्यो भवति । अत एव विद्याऽविद्या-स्वरूपवेत्ता भगवत्पदवाच्य इति शास्त्रकारा वदन्तीति शम् ।

●

किं नाम प्रतिशरीरभिन्नत्वम्

डॉ० चन्द्रशेखरशर्माहिरेमठः

अनुसन्धानोपाध्यायः (रिसर्च एसोसिएट), वेदान्तविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी।

❀ ❀ ❀

इह खलु सर्वेऽपि दार्शनिकाः बन्ध-मोक्षादिव्यवहारं जीवात्मन एव प्रतिपादयन्ति। किन्तु जीवात्मस्वरूपविषये तेषां नैकमत्यं दरीदृश्यते। चार्वाकास्तदेकदेशीयाश्च शरीरस्य तद्गतेन्द्रियाणां वाऽऽत्मत्वेन व्यवस्थापयन्ति। तत्र तावन्न्यायनये--"स च देहेन्द्रियादिव्यतिरिक्तः प्रतिशरीरं भिन्नो नित्यो विभुश्च"[1] इति सप्रमाणेन शरीरेन्द्रियादीनामात्मत्वं निराकृतम्। मम शरीरम्, ममेन्द्रियाणि, मम मनः, मम बुद्धिरित्यादिरूपेण व्यवहारदर्शनात्, तेषामात्मत्वं नैव संभवति। तस्माच्छरीरादिव्यतिरिक्तो नित्यो विभुरूपः स आत्मा प्रतिशरीरं भिन्नश्च वर्तत इति नैयायिकानां सिद्धान्तः। अत्र "प्रतिशरीरं भिन्नः" इत्यस्य कोऽर्थ इति तावद् विमृश्यते।

इह खलु केचन सुखिनः, केचन च दुःखिनः, अपरे बद्धाः, अन्ये च मुक्ता दृश्यन्ते, एतादृशं वैलक्षण्यं जीवनानात्व एव सङ्गच्छते। अन्यथा जगद्वैचित्र्यभङ्गप्रसङ्ग इति कृत्वा तद् व्यवस्थार्थं नानात्मवाद एव वर इत्यामनन्ति नैयायिकाः। उक्तञ्च—

कश्चिद्रङ्कः कश्चिदाढ्यः कश्चिदन्यविधः पुनः।
अनयैवात्मनानात्वं सिद्ध्यत्र व्यवस्थया[2] ॥ इति।

ननु सुखदुःखव्यवस्थार्थं जीवानेकत्वाङ्गीकारो गौरवदोषग्रस्तः, अतो यथैकस्यैव चैत्रस्य 'पादे मे वेदना शिरसि मे सुखम्' इत्यादि शरीरोपाध्यवच्छेदेन अनुभवोपपत्तिः, तथैकस्यैवात्मनश्चैत्रादिशरीरावच्छेदेन नानाविधानां सुखदुःखादीनामनुभवः स्यादिति चेन्न, पादाद्यवच्छेद्यसुखादिषु योऽहं शिरसि सुखमनुभवामि, सोऽहमेव पादे दुःखमनुभवामीति प्रत्यभिज्ञोपपत्तिवद् योऽहं चैत्रशरीरेण सुखमनुभवामि, सोऽहमेव मैत्रशरीरेण

---

१. तर्कभाषा० पृ० १४४।
२. तत्त्वावली० आत्म० ९०।

दुःखमनुभवामीत्यनुसन्धानाभावान्नैकात्मवादः शोभनः प्रतिभाति । अतः "गौरवञ्च फलमुखं न दोषाय[१]" इति वचनाद् व्यवस्थानुसारेण नानात्मस्वीकारे न गौरवम् ।

नन्वेकात्मवादिनोऽप्यस्मिन् शरीरे विद्यमान एव जीवोऽतीतदेहेष्वासीत्, यद्य-मुक्तोऽग्रेऽपि भविष्यतीति स्वीकुर्युः, तर्हि तस्य जीवस्य योऽहं पूर्वजन्मनि सुखमन्वभवं सोऽहमेव अस्मिञ्जन्मनि दुःखमनुभवामीति प्रत्यभिज्ञानं कथं न भवति ? यदि तत्र शरीरभेदो हेतुः, तर्ह्येकात्मवादेऽपि शरीरभेदेनैव हेतुना शरीरान्तरानुभूतसुखादीनां प्रत्यभिज्ञानुपपत्तिरिति चेत्, मैवम्, जन्मान्तरसुखाद्यनुसन्धाने न शरीरभेदो हेतुः, किन्तु जन्मान्तरानुभूतसुखादिसंस्काराभावः । उत्तरोत्तरजन्मप्राप्तौ पूर्वपूर्वशरीरानुभूतसुखादि-संस्काराणां विनश्यमानत्वात् । अतोऽयोगिपुरुषाणां जन्मान्तरसुखाद्यनुसन्धानाभावः । शरीरभेदमात्रस्य हेतुत्व एकस्मिन्नेव जन्मनि तावदवयवोपचयापचयाभ्यां बाल्यादि-शरीरभेदेन बाल्येऽनुभूतसुखादेर्यौवनवार्धक्यादावस्मरणप्रसङ्गः । अतः सर्वशरीरेषु नैक आत्मा, अपि तु प्रतिशरीरं भिन्नः[२] ।

ननु प्रतिशरीरं भिन्न इत्यस्य कोऽर्थः ? 'यावन्ति शरीराणि तावन्त आत्मानः' इत्येव 'प्रतिशरीरं भिन्नः' इत्यस्यार्थः स्यात्, तच्च न घटते, शरीरभेदस्यात्मभेदे प्रयोज-कत्वाभावात् । जन्मभेदेनावस्थाभेदात् कायव्यूहस्थलेष्वनुपपत्तेः । तथाहि—"प्रेत्याहारा-भ्यासकृतात् स्तन्याभिलाषात्"[३] इत्यस्य सूत्रस्य भाष्ये—"स खल्वयमात्मा पूर्वशरीरात् प्रेत्य शरीरान्तरापन्नः क्षुत्पीडितः पूर्वाभ्यस्तमाहारमनुस्मरन् स्तन्यमभिलषति । तस्मान्न देहभेदादात्मा भिद्यते"[४] इति वात्स्यायनेन जन्मान्तरीयानेकेषु देहेष्वेकस्यैवात्मनः स्थितिरिति व्यवस्थापितत्वात् तत्रापि देहभेदे नात्मभेदः । यद्येवमुच्येत न, जन्मान्तरीय-शरीरभेद आत्मभेदे प्रयोजकः, अपि त्वेकस्मिन्नेव जन्मनि विद्यमानः शरीरभेद इति, तदप्ययुक्तम्, एकस्मिन्नेव जन्मन्यवस्थाभेदेन संभवेऽपि शरीरभेदे स नात्मभेदे प्रयोजकः । बाल्य-यौवन-वार्धक्यादिष्ववस्थासु तत्तच्चैत्रादिशरीराणामवयवोपचयापचयाभ्यां भिन्न-त्वेऽपि 'योऽहं बाल्ये पितरमन्वभवं सोऽहमिदानीं नप्तॄननुभवामि' इति प्रत्यभिज्ञानान्य-थाऽनुपपत्त्या तासु सर्वास्ववस्थास्वनुभविता खल्वेक एव जीव इति सर्वानुभवसिद्धम् ।

यद्येवमुच्येत, एककालिकशरीरभेद आत्मभेदे प्रयोजक इति, तदप्ययुक्तम्, काय-व्यूहस्थले योगिनः स्वयोगशक्तिमहिम्ना तावदेकस्मिन्नेव काले शतशः शरीराणि निर्माय

१. अद्वैतब्रह्मसिद्धिः, पृ० ११० ।
२. द्र० न्यायप्रकाशे, पृ० २३४-२३६ ।
३. न्या० सू० ३।१।२१ ।
४. न्या० सू० वात्स्यायनभाष्यम्—३।१।२१ ।

तैः सर्वैः शरीरैरेककालावच्छेदेन स्वसञ्चितकर्मफलानि भुञ्जते। सत्यपि समानकालिकशरीरभेदे नात्मभेदः स्वीक्रियते। तस्मात् "प्रतिशरीरं भिन्नः" इति पदस्थशरीरभेदेन कथमात्मभेदः ? इति जिज्ञासायामुक्तं मेरुशास्त्रिगोडबोलेमहोदयैः—"अत्र भोगवत्त्वे सत्यनवच्छिन्नभोगवद्भिन्नो भिन्नशब्दार्थः। द्वितीयार्थोऽवच्छेद्यत्वं व्युत्पत्तिवैचित्र्याद् भोगेऽनवच्छेद्यत्वे चान्वेति। शरीरपदं तु प्रयोज्यतासम्बन्धेन तत्तन्मनोविशिष्टपरम्। तेनैकात्मनो जन्मभेदेनावस्थाभेदेन कायव्यूहस्थले च नानाशरीरसत्त्वेऽपि न क्षतिः, एकस्यैव मनसः पूर्वपूर्वजन्मार्जितधर्माधर्मद्वारा सकलशरीरप्रयोजकत्वात्। तथा चैकैकात्मा यत्किञ्चिन्मनोविशिष्टशरीरावच्छिन्नभोगवत्वे सति तादृशशरीरानवच्छिन्नभोगवद् भिन्न इति वाक्यार्थः। वीप्सावशात् तत्तन्मनोविशिष्टत्वेन सकलशरीराणां बोधः[1]" इति।

नीलकण्ठशास्त्रिणः "प्रतिशरीरं भिन्नः" इत्यस्यार्थमेवं प्रतिपादयन्ति—"न चावयवोपचयापचयाभ्यां तत्तच्चैत्रादिशरीराणां भिन्नत्वेऽपि जीवभेदाभावादिदमसङ्गतम्, एवं कायव्यूहस्थलेऽपीति वाच्यम्, समानकालिकयोगजधर्माजन्यशरीरभेदेन जीवभेदस्यैव विवक्षिततयाऽदोषात्। एवं चैतच्छरीरावच्छिन्नभोगवान् समानकालिकयोगजधर्माजन्यतच्छरीरावच्छिन्नभोगवद् भिन्न इति रीत्या प्रतिशरीरं जीवभेदः साध्यः[2]" इति।

पूर्वं यदुक्तं जन्मभेदेनावस्थाभेदाच्छरीरभेदेऽपि नात्मभेद इति, तद्व्यावृत्त्यर्थं समानकालिक इत्युक्तम्। समानकालिकेषु योगिनां कायव्यूहीयशरीरेष्वनेकेषु सत्स्वपि नात्मभेद इति दोषपरिजिहीर्षया योगजधर्माजन्येत्युक्तम्। एवं सति न कोऽपि दोषः। अनुमानं च—"एतच्छरीरावच्छिन्नजीवः समानकालिकयोगाद्यजन्यैतच्छरीरभिन्नशरीरावच्छिन्नजीवभिन्नः, समानकालिकयोगाद्यजन्यैतच्छरीरभिन्नशरीरावच्छिन्नजीवभिन्नः, समानकालिकयोगाद्यजन्यैतच्छरीरावच्छेद्यभोगानधिकरणत्वात्, घटवत्।

एवं न्यायनये जीवानेकवादो युक्त्यनुमानेभ्यः प्रसाधितः। किञ्च ते, "यो यो ह्यस्येतः प्रैति" "यो यो यां यां तनुं भक्तः" इत्यादिश्रुतिस्मृतीनां वचनान्यपि जीवनानात्वे प्रमाणयन्ति। यत्र पुनः "एको देवः सर्वभूतेषु गूढः" इति श्रुत्याऽऽत्मैकत्वं प्रतिपाद्यते, तदीश्वरविषयकमिति निरूपयन्ति। तदेवं न्यायदर्शने श्रुति-स्मृत्यनुमानयुक्तिभिर्जीवानामनेकत्वमङ्गीक्रियत इति शम्।

●

---

१. तर्कसंग्रहस्य वाक्यवृत्तिः, पृ० २०।
२. तर्कसंग्रहनीलकण्ठी० पृ० ९३-९४।

अघायुशब्दव्युत्पत्तिप्रसङ्गे शाङ्करभाष्यसमीक्षणम्

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

निदेशकः, अनुसन्धानसंस्थानस्य,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणस्याम्

❀ ❀ ❀

'सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः' इति श्रीमद्भगवद्गीतामाहात्म्यवचनाद् श्रीमद्भगवद्गीताया वेदोपनिषत्सारताऽभिहिताऽऽस्ते। तत्रानायासेन बहुत्र विषयजातस्य[1] शब्दावल्याश्चापि[2] निकामं सादृश्यमभिलक्ष्यते। तत्र यद्यपि सकृदेव प्रयुज्यते तावद् 'अघायुः' इति शब्दः,[3] तथापि तदीयां वैदिकीं परम्परां विरुन्धन्ति तद्व्याख्याकारा इति चित्रम्।

वैदिकवाङ्मये तावदघायुशब्दो नास्ति सकारान्तः[4]। श्रीमद्भगवद्गीताव्याख्याकारैस्तु स मकारान्तेन खल्वायुश्शब्देनाघशब्दस्य समासत्वात् सकारान्तो मन्यते[5]। परवर्तिनो व्याख्याकृतः शाङ्करभाष्ये प्रदर्शितां शङ्कराचार्यकृतव्युत्पत्तिमेवान्वाचख्युः[6]।

---

१. (क) इन्द्रियाणि पराण्याहुः (श्रीमद्भगवद्गीता ३,४२) इति विषयस्य कठोपनिषदः 'इन्द्रियेभ्यः परा ह्यर्थाः' (१, ३, १०) इत्यनेन सार्धं तुलना कर्तव्या।

(ख) मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी॥
—ऋग्वेदसंहिता १०, ११७, ६,

इत्युक्तेर्गीतायाः (३, १६) श्लोकगतस्याघायुशब्दस्य संकेतः।

२. 'न जायते म्रियते वा कदाचिद्' इत्यादिश्लोकानां शब्दशः साम्यं द्रष्टव्यं कठोपनिषदि (१, २, १८-१९)।

३. अघायुरिन्द्रियारामो मोघं पार्थ स जीवति (३,१६)।

४. अघायोः (ऋ० सं० १, २७, ३; १, १२०, ७; ७, १, १३; १०, ४२, ११)।

५. 'अघं पापमायुर्जीवनं यस्य सोऽघायुः पापजीवन इति यावत्'—शाङ्करभाष्यम्।

६. अघायुः = पापजीवनः (नीलकण्ठः); मधुसूदनः; अघं पापमायुर्जीवनं यस्य सः (भाष्योत्कर्षः); अघं पापरूपमायुर्यस्य सः (श्रीधरः); अघायुः = पापमयः (अभिनवगुप्तः)।

ऋग्वेदसंहितायां प्रयुक्तस्याघायुशब्दस्य 'अघमायुर्जीवनं यस्य सः' इति बहुव्रीहिसमासत्वं नास्ति। अघमात्मन इच्छुरित्यर्थे नामधातुप्रयुक्तेन क्यच्प्रत्ययेन 'अघायु'-शब्दस्य निष्पत्तिर्जायते[१]। उभयोरपि व्युत्पत्त्योः प्रवृत्तिनिमित्तभेदो जनयत्यर्थभेदम्। बहुव्रीहिसमासनिष्पन्नस्याघायुश्शब्दस्य पापजीवनरूपोऽर्थो भवति। नामधातुप्रत्ययनिष्पन्नस्याघायुशब्दस्य तु 'पापकः'[२], 'पापमिच्छन्'[३], 'पापफलेच्छुः'[४], 'परकीयपापेच्छुः'[५], 'पापरूपानिष्टकरणेच्छुः'[६], इत्यादिरूपस्तद्भिन्न एवार्थः सम्पद्यते[७]।

श्रीमद्भगवद्गीतायामितः पूर्वं 'यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः' (३९) इत्याभाष्य सर्वेषु कर्मसु यज्ञार्थमक्रियमाणेषु तानि लोकस्य बन्धनाय प्रभवन्ति, फलाकांक्षत्वात्। तस्मात् सर्वाण्येव कर्माणि यज्ञरूपतया परमात्मसमर्पणायैव विधातव्यानीति तत्र कर्मकालुष्यरूपफलानुदयात् तज्जन्यसंस्काराभावेन कर्मसंस्कारफलादिचक्रराहित्यमभिप्रेयते। फलाकांक्षासङ्गराहित्येन कर्मानुष्ठानादेव मुक्तसङ्गत्वमिति 'तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचार' इति गीतोक्तिः सङ्गच्छते। फलार्थं कर्म कर्तुमभिलषन्तस्तु स्वयमेव पापमिच्छन्ति। पापेच्छव एवाघायवो भवन्ति। तदुक्तं श्रीमद्भगवद्गीतायाम् (३,१३)—

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्॥ इति।

अत्र 'भुञ्जते' इत्यस्य भोक्तुमिच्छन्तीत्यैदम्पर्यम्।

---

१. सुप आत्मनः क्यच् (पा० अ० ३, १, ८) इति प्रकरणे 'छन्दसि परेच्छायां क्यच उपसंख्यानम्' इति वार्तिकेन क्यचि, 'क्याच्छन्दसि' (३, २, १७०) इत्युप्रत्ययस्ताच्छील्यादिषु च्छन्दसि। परस्याघं पापं दुःखं वेच्छतीत्यर्थेऽघशब्दात् क्यच्। 'न च्छन्दस्यपुत्रस्य' (पा० अ० ७, ४, ३५) इति निषेधात् 'क्यचि च' (पा० अ० ७, ७, ३३) इति ईत्वम्, 'अकृत्सार्वधातुकयोः' (१, ४, २५) इति दीर्घश्च न। 'अश्वाघस्यात्' (७,४,३७) इत्यात्वम्। अतो लोपः। अघायुरिति सिद्धिः।

२. उतोत्तरस्मादधरादघायोः—ऋ० १, ४२, ११; ४३, ११; ४४, ११ = पापकाच्छत्रोः (सायणः)।

३. पाहि धूर्तेररुषो अघायोः—ऋ० ७, १, १३—पापमिच्छतः (सायणः)।

४. पातं नो वृकादघायोः—ऋ० १, १२०, ७—अघं पापफलमिच्छतः (सा०)।

५. ऋ० १, १२, ७ = अघं परेषामिच्छति (सायणः)।

६. यो नो अग्ने अररिवाँ अघायुः—ऋ० १,१४७,४ = मरणादिरूपपापेच्छावान् (सा०)।

७. निमर्त्यादघायोः—ऋ० १, २७, ३ = अघं पापमनिष्टं कर्तुमिच्छतः। सुप आत्मनः क्यच् (सायणः)

एवं तावद् गीतोक्तस्याघायुशब्दार्थस्य प्रसङ्गे वैदिक्याः परम्पराया गीतागत-विषयसन्दर्भस्य च पर्यालोचनया नामधातुप्रत्ययसाधितत्वमेव तच्छब्दस्य युक्तियुक्तं वेदसम्मतं च प्रतिभाति।

अघायुशब्दस्य प्रथमाबहुवचने 'अघायवः'[१] इति षष्ठ्येकवचने 'अघायोः'[२] इत्येतादृशमेव वैदिकं रूपम्, न तु 'अघायुषः' इति। एवमेव केषाञ्चिदन्येषां शब्दानामपि क्यजन्ताः प्रयोगा वैदिके वाङ्मये समासाद्यन्ते—'देवयुः',[३] 'गव्युः'[४], 'अस्मयुः'[५], 'सुम्नयुः' इति। 'देवायन्तः', 'सुम्नायन्तः' इत्यत्रात्वं तु 'देवसुम्नयोर्यजुषि काठके' (७,४,३८) इति पाणिनीयेन सूत्रेण संजायते।

बहुत्र सादृश्यादभ्यूहिता भवन्ति व्युत्पत्तयः शब्दानाम्। अल्पमायुर्यस्य स इत्यल्पायुः[६], दीर्घमायुर्यस्य स इति 'दीर्घायुः[७]' इत्यनयोर्वेदलोकप्रसिद्धयोः शब्दयोर्व्युत्पत्तिसादृश्यादघायुशब्दोऽपि व्युत्पादितो व्याख्याकृद्भिः। क्यजन्तस्याघुशब्दस्य वैदिकभाषायामेव प्रयोगदर्शनाद् भगवता शङ्कराचार्येण लौकिके संस्कृते क्यज्विरहितः प्रयोगोऽभ्यूहितस्तद्भिन्ना च व्युत्पत्तिराविष्कृता स्यादिति न युज्यते वक्तुम्, श्रीमद्भगवद्गीतायामार्षप्रयोगाणामनेकत्र दर्शनात् तस्या उपनिषदां साररूपत्वाच्च।

●

१. मा त्वा वृका अघायवः – वाजसनेयिमाध्यन्दिनशुक्लयजुर्वेदसंहिता ४, ३४।
२. ऋ० १, २७, ३; १०, ४२, ११; ४३, ११; ४४, ११।
३. आ देवयुरिनधते—ऋ० ४, २, ७।
४. गव्युः—ऋ० ९, ९७, १५।
५. त्वं तमिन्द्रं वावृधानो अस्मयुः – ऋ० १, ३१, ७ = अस्मान् कामयमानः (सायणः)।
६. दुराचारो हि पुरुषो लोके भवति निन्दितः।
दुःखभागी च सततं व्याधितोऽल्पायुरेव च॥
मनु० ४, १५७।
७. दीर्घायुषं कृणोतन— ऋ० ४, १५, १०।

शाङ्करमताभिमतमोक्षतत्साधनविमर्शः

श्रीशिवजी उपाध्यायः

प्राध्यापकः, सं० सं० वि० वि०, वाराणसीस्थः

❀ ❀ ❀

अथ कोऽयं मोक्षपदार्थः ? कश्च तदवाप्तेः सुगमः श्रौतोद्दिष्टः पन्थाः ? किञ्च तदर्थमन्वर्थसाधनम् ? इत्येषा शिष्टजिज्ञासानिहिता मनीषा विशेषात्मतत्त्वालोचनसुख्यातशेमुषीकस्य निखिलवेदान्तवाक्यनिगूढार्थज्ञानप्रथितपादनप्रार्थतप्रज्ञाविवेकस्य विश्वविश्रुतदार्शनिकशीर्षाभिषिक्तगरिमोद्गीतगुरुतरकीर्तिकस्य; अद्वैतसिद्धान्तप्रतिष्ठापनपरमाचार्यवर्यस्य श्रीमदाचार्यशङ्करभगवत्पादस्य मताभिमता तदीयभाष्यग्रन्थोपनिबद्धा तत्र तत्र तद्व्याख्याग्रन्थेषूपनिषदां प्रतिपाद्यतत्त्वालोचनविवेचनेन तद्भावनोन्नीतप्रणीतस्तोत्रपद्यकदम्बकेषु चाप्येकान्तेन मतान्तरनिरसनोपात्तोदारावैशिष्ट्यप्रकर्षेण पर्यवतिष्ठते। शिष्यः खलु विदिताखिलवेद्यविद्याविद्योतितान्तःकरणा मनीषिणः, तेषां तत्कृता वा जिज्ञासा मोक्षविषया। मोक्षमुद्दिश्य तज्ज्ञानेच्छा तदवाप्त्युन्मुखीभावः तदुपायसमालम्बनोद्योगो वा तादृशजिज्ञासायास्तात्पर्यार्थः। मोक्षश्च मुक्तिमायानिवृत्त्यात्यन्तिकसुखावाप्त्यनासक्त्यादिशब्दव्यपदिष्टः समेषां मुमुक्षूणामुद्दिष्टः शास्त्रोपदिष्टः प्रतिष्ठते। तत्रानेकेषां दार्शनिकविदुषां दर्शनान्तरदृशा मतान्तराणि स्वस्वोन्मिषितमनीषया निरूपितानि सन्दृश्यन्ते। तत्र समग्रमतान्तराग्रेसरीकृता समन्वयदिशा ब्रह्माद्वैततत्त्वाधिगमनोद्भासितात्मप्रकाशा श्रीमच्छङ्करभगवत्पादस्य मनीषैव सविशेष्प्रकर्षमादधातीति तदभिमतमोक्षतत्साधनस्वरूपं निरूपयितुमिदमुच्यते—

आत्यन्तिकया दुःखान्निवृत्त्याऽऽत्यन्तिकं सुखम्।
मोक्ष इत्युच्यते यस्मात्परं किञ्चिन्न विद्यते॥ १॥

अतिक्रान्तोऽन्तश्चरमोऽवधिरत्यन्तस्तदनुबन्ध्यात्यन्तिकमतिशयितलौकिकावसानसंस्थानमस्य भावस्तत्तया दुःखात्प्रतिकूलवेद्यभावादनभीष्टक्लेशाज्जगत्प्रहाणजनितनिर्वेदादनात्मभूतवस्तुस्वभावाच्च, निवृत्तिर्निर्वर्तनमुन्मोचनमुद्धृतिश्चानया निवृत्त्या जगन्निःसारतयोपक्षीणतयासक्त्या यदात्यन्तिकं निरतिशयं निरवद्यमन्तहीनञ्च यत् सुखमनुकूलवेद्यानन्दात्मकमात्मावस्थानरूपं ब्रह्मास्वादसविधवर्ति परमात्म्यैक्यदर्शि दर्शितं तत्र त्रतोपनिषद्वेदान्तवाक्येषु तदेव 'मोक्ष'-इत्युच्यते प्रतिपाद्यते निरूप्यते वा श्रीमच्छ-

ङ्करभगवत्पादेन स्वीयभाष्यव्याख्यानग्रन्थोदिताभिमतश्रौतसिद्धान्तानुसारमित्याशयः पर्यवसेयः। यस्मादुक्तलक्षणलक्षितात् सुखात्परमन्यदधिकमभिलषणीयं किञ्चित्किमपि तत्सदृशमाख्येयमनाख्येयं वा सांसृतिकं सुखं न विद्यते विद्यमानमासाद्यतेऽनुभूयते लभ्यते वाऽस्मिन् नामरूपक्रियात्मके जगतीति बोध्यम्। आत्यन्तिकदुःखनिवृत्तिहेतुकात्यन्तिकसुखात्मको मोक्ष इति मोक्षलक्षणः पुरुषार्थ एव सर्वाभिलषणीयतया पुरुषैरर्थ्यमानतया त्र स्वेतरपुरुषार्थशीर्षस्थः सुस्थिरीभवतीति गूढार्थः प्रत्येतव्यः[1]।

सर्वथा सर्वदुःखेभ्यो मुक्तिर्मोक्ष इति स्मृतः।
लेशतो दुःखमात्रेऽपि विद्यमाने न तद्भवः॥ २॥

तदस्य मोक्षलक्षणपुरुषार्थस्य कुतः कथं कुत्र वोद्भव इत्याकांक्षायामभिधीयते—सर्वथा सर्वावस्थासु सर्वतोभावेन सर्वसंसारान्तमिथ्यात्वप्रणिधानेन तत्पार्यन्तिकस्थितिप्रबोधकाले च सर्वदुःखेभ्य आधिदैविकाधिभौतिकाधिदैहिकेति त्रिविधतापप्रदप्रतिकूलितवेदनोद्भूतेभ्यः क्लेशेभ्यो या मुक्ति-मुक्तावस्थितिर्विनिवृत्तिस्तत्प्रवृत्त्यभावरूपा सैव मुक्त्याख्या भवभवत्खेदक्षीणतरमायिकप्रभावादात्मोद्धृतिर्मोक्ष इति स्वरूपप्रकारनिर्दिष्टः स्मृतः कल्पितः प्रतिपादितः स्मृतिबुद्धिविषयीकृतो मन्वादिस्मृत्युक्तपथोपदेशितः श्रुत्यनुगतपथानुमोदितमतानुसरणादिति तात्पर्यम्। किञ्च दुःखमात्रे यत्किञ्चिदपि सांसारिके क्लेशे लेशतोऽपि अणुपरिमितेऽपि विद्यमाने कुत्रचिदत्रस्थानमापन्ने विद्यमानतयाऽनुभूयमाने वा तद्भवस्तस्य मोक्षस्योपलम्भो मुमुक्षूणां न भवतीति भावः। सर्वविधसंसारजन्यदुःखमुक्त्यात्मको मोक्ष इत्याशयो यावत्संसारस्तावत् तज्जन्यदुःखम्, तत्प्रहाणे तन्मुक्तिः, तादृशमुक्त्याख्यो मोक्ष इत्येकान्तवेदान्ततात्पर्यार्थः[2]।

आत्मैक्यवादिनामेतन्मतं भेदान्न भिद्यते।
अन्यथाऽद्वैतसिद्धान्तभङ्गापत्तिः प्रसज्यते[3]॥ ३॥

---

१. भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥—मुण्ड० २।२८।

२. तत्र को मोहः कः शोकः एकत्वमनुपश्यतः।—ईशावा० ७।

३. आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन।—तैत्ति० २।९।
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
यस्मिन् स्थितो न दुःखेन गुरुणाऽपि विचाल्यते।
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम्॥—गी० ६।२१-२२-२३।

तदेतन्मतमास्थेयमनास्थेयं वा ? भेदान्तरेण मोक्षस्यान्यथोपपत्तेश्चेति चेदुच्यते— आत्मनामसंख्यातानां जीवानां देहिनामैक्यमेकत्वमद्वैतधियाऽभेदं वदन्ति ये त आत्मैक्यवादिनस्तेषामेतदुक्तलक्षणलक्षितमात्यन्तिकदुःखनिवृत्तिहेतुकात्यन्तिकसुखात्मको मोक्ष इत्येतन्मतं भेदाद् भेदान्तरेणात्मानैक्यप्रतिपादनोदितबुद्धिभिदोत्थदर्शनान्तर-सिद्धान्तान्न भिद्यते नातिरिच्यते न पृथगवतिष्ठते समेषां दर्शनानामत्रैव तात्पर्यात्, दुःखमात्रप्रहाणार्थमात्यन्तिकसुखाधिगमनार्थमेव समस्तदर्शनान्तराणां प्रवृत्तेर्दर्शनाच्च। तदेतदद्वैतसमन्वयादेव भेदानामेकत्र पर्यवसानात्सम्भवतीति भावः। अन्यथोक्तलक्षण-वैपरीत्येन लक्षणान्तरेऽङ्गीक्रियमाणे यत्किञ्चिद् दुःखसंस्पर्शेऽद्वैतसिद्धान्तस्यैक्येनाभेदेन प्रतिष्ठितस्य समन्वितस्य श्रौतप्रतिपादितस्य परमार्थोद्दिष्टस्य चातीवनिर्दृष्टस्य मतस्य भङ्गापत्तिः क्षयापत्त्याऽनुपपत्तिः प्रसज्यते प्रसक्तिमाप्नोति तदद्वैतसिद्धान्तहानं स्यादिति तादृश एवाभेदात्मक आत्मैक्यवादिभगवत्पादशङ्करादिम्तो मोक्षलक्षणः पुरुषार्थः स्वीकार्य इति तात्पर्यमवधार्यम्[1]।

औपाधिकस्य भेदस्य विद्यमानतयाऽप्यसौ।
तल्लयात्पूर्णभावाच्च मोक्षावस्था विशिष्यते ॥ ४ ॥

भेदस्यावास्तवत्वान्नैरर्थक्यमनुपयोगित्वञ्चेत्युपपाद्यते—उपाधिरुपधीयमाननाम-रूपक्रियादिलक्षणस्तत्प्रयुक्तो भेदो जीवनिष्ठ औपाधिकस्तदवच्छिन्नः कल्प्यते, तादृश-नानोपाधिकृतभेदस्य विद्यमानतयाऽपि साक्षादक्षिलक्ष्यीक्रियमाणतया जगति वर्तमानतया व्यवहारविशेषप्रवर्तनोपादेयतया तस्य सत्त्वेऽपि, अपिना परमार्थतस्तदनुपादेयत्वमिति सूच्यते। तल्लयात्तस्य भेदस्य संसारमात्रस्थितिकस्य लयान्नाशादपगमाच्च परात्मनि निवर्तनादिति भावः। पुनश्च पूर्णभावात्पूर्णत्वप्राप्तेः पूर्णत्वेनात्मनो दर्शनात्पूर्णताया पर्यवसानाच्च मोक्षावस्था मुक्तिस्थितिरात्यन्तिकसुखावाप्तिर्निखिलदुःखनिवृत्तिनिरूपिता पदार्थपरात्मनिष्ठिता विशिष्यते विशेषेण इष्यते, विशेषाधानभानेन प्रमीयते। सेयं मुमुक्षूणामवस्था सफलभेदापगमात्पूर्णत्वपर्याप्त्या पर्याप्नोतीति तत्र निर्विशेष एव तद्गतो विशेषो न तु भेदोदित इति बोध्यम्[2]।

---

१. आत्मानं चेद् विजानीयादहमस्मीति पूरुषः।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ॥
—बृहदारण्यक० ४।४।१२।

२. स एष आत्मा अपहतपाप्मा विरजो विमृत्युर्विशोको
विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः। छान्द० ८।१।५।
पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ ईश० १।१।

किञ्चिद् दुःखे सुखप्रेक्षा प्रेक्षकाणां न युज्यते ।
प्रकाशप्रसरादीषत्तमोभावो यथा तथा ॥ ५ ॥

सति संसरणशीलसंसारबन्धोद्भूताल्पमात्रदुःखलेशेऽपि कुतः सुखोपलब्धिरित्युद्दिश्यते—किञ्चिदिति स्वल्पतमेऽपि देशकालस्थित्यवस्थादिप्रातिकूल्यात् नामरूपक्रियाद्युपाधिसत्त्वे दुःखे क्लेशे अविद्याजनिते विद्यमाने प्रेक्षकाणां परमार्थप्रेक्षोन्मुखीभूतात्मनां मुमुक्षूणां सुखप्रेक्षा दुःखप्रहाणजनितात्मसाक्षात्काररूपनिरतिशयानन्दस्य प्रेक्षा साक्षात्कृतिस्तादात्म्यापत्त्या चिदानन्दानुभूतिर्न युज्यते युक्त्योपपद्यते, शास्त्रोक्ततर्कसङ्गता न सङ्गच्छते, यतश्चास्यात्यन्तिकसुखस्यैकान्तेन निखिलदुःखनिवृत्त्यैव सम्भूतत्त्वादिति भावः । तत्रोपमितिदृष्टान्तो निर्दिश्यते—प्रकाशस्य दिनकरनिशाकरनक्षत्रदीपादिकृतस्य प्रभामण्डलस्य प्रसरात्प्रसृतेः प्रसरणाच्च तमोभावोऽन्धकारसत्ता यत्किञ्चित्तमसोऽवस्थितिर्यथा न युज्यते, तथैव खल्वात्मदर्शनोदितपरात्मप्रकाशप्रकर्षप्रसारात् किञ्चिदपि दुःखं न स्थातुमर्हतीति प्रेक्षावतां साधकानां मुमुक्षूणां सुखप्रेक्षा सुतरां सम्पद्यत इति सङ्गतिरुपमितिदृष्टान्तेन संयोज्येति ।

स्वातन्त्र्याद् दुःखराहित्यादेकान्तश्रयणादपि ।
भेदाभावादथात्मैक्यात्तत्सत्त्वान्मुक्तिरिष्यते ॥ ६ ॥

अपि चेत्थमियं मुक्तिर्मोक्षलक्षणा कैर्हेतुभिरुपपद्यते इत्याख्यायते—स्वातन्त्र्यात् स्वस्यात्मनस्तन्त्रमनुशासनमात्मानुसन्धानं यमनियमध्यानासनप्राणायामप्रत्याहारादितदुपायानुष्ठानेन स्वस्य तन्त्रणम्, तद्भावात्, दुःखराहित्यात् दुःखस्य त्रिविधस्य पूर्वोक्तस्य राहित्यमभावो यत्किञ्चिदपि दुःखं तत्प्रतिरोधीति तस्य सर्वथा हेयत्वमित्युक्तम् । तादृशजगज्जातकष्टजातस्यासम्पर्कात्, अपीति भिन्नहेतुक्रमद्योतनार्थम् । किन्त्वेकान्तश्रयणाद् एकमद्वैतं तस्यान्ते राद्धान्तः सिद्धान्तो वा तदाश्रयग्रहणात्, अथवैकान्तस्य विविक्तस्य जनसम्मर्दशून्यस्य रहोवासस्य, उत वा एकान्तस्यैकस्य जीवात्मनोऽन्तस्य तत्त्वस्याश्रयालम्बनशरणसमाग्रहणादिति नानातात्पर्यार्थः प्रत्येतव्यः । इत्थं च भेदाभावात्सकलसंसारसम्बन्धनिबद्धभिदोपसर्जनात्, अथ चात्मैक्याज्जीवात्मपरमात्मनोरैक्यसम्पादनादात्मोन्नयनेन परात्मतादात्म्यसमधिगमनात्, तत्सत्त्वात्तस्मिन्नात्मनि सत्त्वाद् विद्यमानत्वान्निविष्टत्वादात्मनिष्ठपरमात्मप्रकाशनाच्च मुक्तिर्मोक्षलक्षणेष्यते, स्वाभीष्टा तिष्ठति, इष्टतया पर्याप्यत इति भावः ।

आत्मानात्मभिदो भाने चिदचित्परिकल्पने ।
परमात्मात्मनोश्चैक्ये मुक्तिः स्यात्पारमार्थिकी ॥ ७ ॥

केयं किल पारमार्थिकी मुक्तिः ? कुतश्च तदुपपत्तिरिति सिद्धान्तसारः सन्दर्श्यते—क आत्मा कश्चानात्मा ? किं सत्यम् ? किं मिथ्येति विवेकबुद्धयाऽऽत्मनः परमार्थतत्त्वस्यानात्मनोऽसत्यकल्पिताविद्याप्रपञ्चात्मकस्य जगद्रूपस्य चेति तदुभयसमुच्चायकम्। तयोरात्मानात्मनोर्भिदो भाने पार्थक्येन बोधे विविक्ततया तदान्तर्यप्रज्ञाने "ब्रह्म सत्यं जगन्मिथ्येति" वेदान्तवाक्यानुसारं प्रत्ययोपगमे, चिच्चैतन्यमचिदचैतन्यं चेतनात्मकं जडात्मकं ज्ञानमज्ञानं चेत्यनयोश्चिदचितोस्तत्त्वातत्त्वयोः परिकल्पने परिकलने परिकल्पनया परितः स्मृत्याऽवधारणे वा, ततश्च परमात्मन आत्मनश्चैक्ये जीवात्मपरमात्मनोरद्वैततत्त्वावबोधे जाते सति पारमार्थिकी परमार्थसम्बन्धनिबन्धिनी परमतत्त्वावाप्तिसम्पत्तिप्रसविनी मुक्तिर्मोक्षलक्षणात्मिका स्यात् सम्भवितुं शक्नुयादिति बोध्यम्। "तत्र को मोहः कः शोकः एकत्वमनुपश्यतः", "आत्मा वाऽरे द्रष्टव्यो मन्तव्यो निदिध्यासितव्य" इति श्रुत्युक्तेः, "उद्धरेदात्मनाऽऽत्मानम्" इति गीतोक्तेश्च जीवात्मपरमात्मैक्यप्रतिष्ठानाच्चिदचित्परिज्ञानात्सत्यत्वमिथ्यात्वपरिबोधाच्च परमार्थसार्थक्येन परा मुक्तिः सम्भवतीति वेदान्ततात्पर्यात् पर्यवसीयते। इयमेव परा मुक्तिः परब्रह्मसविधवर्तिनी मुक्तात्मनामद्वैतिनामभिप्रेता परात्मनि पर्यवस्यति।

न प्रियाप्रिययोः स्पर्शो नापि लेशस्तयोः क्वचित्।
निषेधात्सर्वभावानां कैवल्यमिति मन्यते ॥ ८ ॥

मोक्षो मुक्तिरिति पर्यायमात्रभिन्नाभिधानेन कुत्रचिच्छास्त्रोद्देशे कैवल्यमित्युच्यते, तदपि कैवल्यं जीवात्मपरमात्मैक्योपात्तमुक्तिपदार्थपरतया ततो न भिद्यत इत्युपस्थापयितुं प्रयत्यते—प्रियमिष्टमप्रियमनिष्टं तयोः काम्याकाम्ययोः पुत्रादिरिप्वादिरूपयोर्भोग्याभोग्ययोर्वा स्पर्शो योगात्संसर्ग इन्द्रियसन्निकर्षश्च न यत्र नैवास्तीति शेषः। अपि च तयोः प्रियाप्रिययोरिष्टानिष्टसांसारिकपदार्थयोः क्वचित्कस्मिंश्चित् स्थाने क्वापि अवस्था विशेषे सामान्ये वा लेशः कणशोऽप्यवस्थानमंशतोऽपि भानं वा यत्र न स्यादिति. भावः। एवं सति सर्वभावानां समग्रजागतिकपदार्थानां प्रियाप्रियाणाञ्च निषेधात् निषिध्यमानतया विसर्जनात् तत्रोदासीनतयाऽनासक्तया वा पर्युपेक्षणात् कैवल्यं केवलत्वधर्मवदैक्यानिष्ठितं स्वरूपावस्थानं मोक्षलक्षणमिति मन्यते मतानुगतमङ्गीक्रियते विज्ञैरिति वेद्यम्। कैवल्यमात्मकैवल्यप्रत्यायकत्वान्नेति निखिललौकिकभावविषेधाच्च पार्यन्तिकतयाऽद्वैतसिद्धान्तनिर्दिष्टमोक्षाख्यलक्षणपुरुषार्थपर्यवसायि प्रतितिष्ठतीति गूढाशयो बोध्यः।

वस्तुतो नामभेदाच्च स्वार्थभेदो वितन्यते।
स्पर्शास्पर्शादयो भावा विनश्यन्ति परावधौ ॥९॥

नामभेदात्स्वार्थभेदो न मोक्षलक्षणः पुरुषार्थस्तेन भिद्यत इति प्रतिपाद्यते— वस्तुतो याथार्थ्येन परमार्थेन वेति हेतौ तसिल्। आहोस्विद् वस्तु परमार्थसद् परमात्मतत्त्वम्, ततो भेदे पञ्चम्यास्तसिल् इत्यवधार्यम्। ततो नामभेदादभिधानरूपाख्यानेन भेदोपगमात्स्वार्थभेदः स्वस्य नामाख्यातस्य वस्तुनो भेदः पृथग् भावो वितन्यते विस्तार्यते व्याक्रियते व्युत्पाद्यते वा—"**नामरूपे व्याकरवाणि**" इत्यभियुक्तोक्तेः। पर्यन्ते च स्पर्शास्पर्शादयो वैषयिकस्पृश्यास्पृश्यात्मकधर्मादयो भावाः पदार्थाः परावधौ परमार्थानुसन्धानसान्तसीम्नि परमे चरमे भूम्नि पर्याप्ते सति विनश्यन्ति, विनाशं क्षयं लयं वा उपगच्छन्ति। यावन्तो भेदास्तावन्तः स्वार्थपर्यवसायिनः, पार्यन्तिके परात्मतादात्म्यापन्ने ते भेदाः प्रविलीयन्ते, तत्र केवलं परमात्मप्रत्ययमात्रस्य पर्यवस्थानादिति शास्त्रोक्तगूढाभिप्रायः प्रत्येयः।

सोऽहमित्येव यद्भानं तन्मुक्तेर्मार्ग उच्यते।
तत्प्रत्ययोपरोधाच्च तत्प्राप्तौ बाध इष्यते ॥१०॥

अथ मुक्तेर्मोक्षलणायाः पुरुषार्थत्वेनेत्थङ्कारस्वरूपतयाऽऽत्यन्तिकसुखात्मत्वे निखिलजगदुद्गतक्लेशनिवर्तकत्वेन प्रतिपादिते तदुपलम्भे[1]को मार्गः समाश्रयणीय इत्युच्यते—सोऽहं परमात्मप्रकाशांशसम्भूतो जीवोऽहमस्मिन् पाञ्चभौतिके पिण्डे निबद्धो वस्तुतः परमात्मैवाहमेतत्कर्मकृताल्पशरीरबन्धननिर्मुक्त इत्येवं प्रकारकं यद्भानं "अहं ब्रह्मास्मीति" प्रत्ययापादनं तदेव स्वात्मनः परमात्मप्रत्यवेक्षणप्रबोधनं मुक्तेर्मोक्षलक्षणायाः कैवल्यादिनानापदाभिहिताया निरतिशयसुखात्मिकाया मार्गः पन्थाः प्राप्त्युपायः साधनरूप उच्यते प्रतिपाद्यते निर्दिश्यते[2] तत्त्वज्ञैर्महात्मभिः शङ्करभगवत्पादप्रभृतिभिरद्वैततत्त्वाभिनिविष्टमतिभिरिति शेषः। तादृशोक्तपरमात्मप्रणिधानप्रतोपपथानुसरणात् तत्प्रत्ययोपरोधात् सोऽहमित्याकारकप्रतिभानप्रतिरोधनादनात्मवस्तुपरिकलनात् तदनल्पव्यापकपरात्मतत्त्वमुत्सृज्याल्पशरीरबन्धाधारेण परिसीमितदेहाभिमानाद् वेत्याशयः। अतश्चोक्तप्रतिरोधहेतोः तत्प्राप्तौ "सोऽह"माकारकस्य परमार्थबोधस्य परात्मतादात्म्यापत्तिप्रपत्तेरुपलब्धौ बाधः प्रत्यूहः प्रत्यवायः संसारबन्धनिष्पादको भगवत्तत्त्वात्मसाक्षात्कृतिप्रतिरोधकः परमसाध्यानुसन्धानसाधनविरोधीष्यते निरुच्यते।

सर्वात्मैक्ये परां काष्ठां प्राप्ते किंस्विद्विनश्यति।
तदभोक्तृतयाऽत्यन्तं दुःखनाशः श्रुतौ स्मृतः ॥११॥

---

१. अविद्यायामन्तरे वर्तमानां.... कठ० १।२।५

२. न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्....॥ कठ० १।२।६।

सर्वत आत्मैकत्वेनानात्मत्वमतत्त्वभूतं क्षयमुपैति तदभोक्तृभावेन च दुःखजातं प्रणश्यतीति निदर्श्यते सर्वात्मैक्ये सर्वेषां जीवात्मनामेकत्वे परमात्मभावेनैकत्वाभ्युपगमे सर्वतो मिथ्यात्वेन कल्पिताज्जगत आत्मन एव सत्यतया तदेकत्वप्रणिधाने वा **"ब्रह्म सत्यं जगन्मिथ्येति"** श्रुत्युक्तेः। उत वा सर्वेषु पदार्थेषु आत्मैवैकं परमार्थ-सत्यमित्यस्यैव व्यापकत्वेनैकत्वमनुसन्धेयमिति तदर्थमत्यर्थप्रयत्न आस्थेयः। अतश्च सर्वतोभावेन तस्मिन्नात्मगतैकत्वे परां काष्ठां परमावधिं परमानुसन्धानसीमानमधिगते सति किंस्विद् किमपि लौकिकं वस्तुजातमनात्मपरिकलितं विनश्यति विनाशमुपयाति। आत्मातिरिक्तसमग्रजगन्मात्रस्य विनाशित्वात्। किमित्यनेन कैमर्थ्येनानात्मवस्तूनां वैयर्थ्यम्, स्विदिति पदेन विकल्पतया तेषामनित्यत्वञ्चेति बोध्यम्। पुनश्च तद्भोक्तृतया तेषामनात्मभूतानां लौकिकानां वस्तूनां भोक्तृभावाभावात्, अभोक्तृ-त्वेनाभोग्यत्वमप्यूह्यम्। तस्मादभोक्तृत्वाद्धेतोरत्यन्तं दुःखनाशस्तेन चात्यन्तिकसुखं मोक्षलक्षणं श्रुतौ वेदोपनिषदादिशास्त्रेषु स्मृतः कल्पितः स्मृतिपदमानीतो बोधितश्चेति भावः।

सर्वमात्मैव चाकृत्य सर्वतः सम्प्रतिष्ठते।
सर्वथा तन्मयीभावादभोक्तृत्वं निसर्गतः॥१२॥

कथमभोक्तृत्वं प्रकृतिगतं सांसारिकभोग्यवस्तुषु सम्भवतीति तत्र हेतुरुच्यते— सर्वमिदं नामरूपजातिक्रियात्मकं जगदावृत्याच्छाद्य परिव्याप्यात्मसात्कृत्य चैक आत्मैव परमात्मतत्त्वांशभूतोऽथवा तद्रूपः साक्षात्परमात्मैव, एवकारेण तदन्यजगज्जन्यवस्तूनां मिथ्यात्वमूह्यम्। यथोक्तम्—"स वा अयमात्मा सर्वेषां भूतानामधिपतिः, सर्वेषां भूतानां राजा, तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्व लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः॥"
(बृहदारण्यक० २।५।१५)

तादृशोऽयमद्वय आत्मा सर्वतः समन्तात् सर्वात्मभूतत्वात्सर्वत्रानुस्यूतत्वाच्च सम्प्रतिष्ठते सम्यक् साधु प्रशस्तत्वेन च प्रतिष्ठामाप्नोतीति "सर्वस्य हृदि विष्ठितम्" इति गीतोक्तेः[1]। तदेनमखिलात्मभावभावितमात्मानमनुविद्य संविदङ्गीकारेण सङ्गत्य

---

१. अनन्तश्चात्मा विश्वरूपो ह्यकर्ता॥ श्वेता० १।९।
(क) ज्ञात्वा देवं सर्वपाशापहानिः॥ श्वेता० १।१०।
(ख) सर्वाजीवे सर्वसंस्थे ""॥ श्वेता० १।६।
(ग) "तद्य इहात्मानमननुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेष्वकाम-चारो भवत्यथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु सञ्चारो भवति" छान्दोग्य० ८।१।६।

सम्मत्य च सर्वथा सर्वास्ववस्थासु सर्वेषु भावेषु सर्वेषु समयेषु च त्रिकालाबाध्यस्वरूप-सन्धानसमाहितेन चेतसा तन्मयीभावादात्मतादात्म्यप्रणिधानात् तादृग्रूप्येण समग्र-भावनोद्भावनात् तत्त्वेन स्वत्वस्य परिणमनाच्च निसर्गतः स्वभावतः प्रकृतिसंसर्गतो न त्वारोपितधर्मतोऽभोक्तृत्वं भोग्यवस्त्वनासक्तिजन्यज्ञानोन्मिषितो भोक्तृत्वाभावः सम्पद्यते, सम्भवति चेति बोध्यम्। जीवात्मत्वे परिच्छिन्नतया भोक्तृत्वं परमात्मत्वे त्वपरिच्छिन्नभावापन्ने तद्भाव इत्याशयः।

आत्मनो नाप्यचैतन्याज्जडत्वात्प्रस्तरोपमा।
अभोक्तृत्वमसङ्गत्वं निर्लेपत्वं च तत्क्रमात्॥ १३॥

न खलु देहवदस्य देहिन आत्मतत्त्वस्याचेतनत्वमभोक्तृत्वेनाकर्तृत्वेन जडत्वञ्चेति सहेतुकं प्रतिपाद्यते—अपिरिति पूर्वार्थक्रमद्योतनार्थम्. तेन अभोक्तृत्वेनापि अस्यात्मनः परमात्मतादात्म्यापन्नस्य सर्वव्यापकस्य स्वतः प्रकाशमानस्य सतोऽचैतन्याच्चेतनत्वा-भावाच्चिच्छिन्नत्वात्, जडत्वात् क्रियाशून्यत्वात्कर्तृत्वाभावाद् वा प्रस्तरोपमा पाषाण-साधर्म्यकल्पना न, अस्तीति विशेषः। न च चेतनत्वे सत्येव भोक्तृत्वं तद्भावेऽभोक्तृत्व-मिति तस्यात्मनोऽचेतनत्वकृतमभोक्तृत्वमिति वाच्यम्, न वा तदकर्तृत्वेन जडत्वम्, तेन प्रस्तरसाधर्म्यकल्पनं कर्तुमुचितम्, तत्रानासक्त्याऽसङ्गत्या निर्लेपतया चाभोक्तृत्वादि-धर्माणां प्रवृत्तत्वात्। "**अनन्तश्चात्मा विश्वरूपो ह्यकर्ता**" इति श्वेताश्वतरोपनिषदुक्तेः तस्यात्मनो विश्वरूपत्वेऽप्यकर्तृत्वमभोक्तृत्वं सर्वात्मकत्वात् सङ्गच्छते, जीवात्मन एव तत्त्वापत्तेः, परमात्मनस्तु तथात्वानापत्तेश्च। प्रत्युतास्य परात्मभूतस्यात्मनस्तादृशाद-नासक्त्युल्लसितात् क्रमादेकैकशः क्रमानुरोधादभोक्तृत्वं भोक्तृदासीनत्वमसङ्गत्वं संसर्ग-शून्यत्वं निर्लेपत्वं विषयवस्तूल्लापलेपत्वपृथक्त्वं चोपयुज्यते पारमार्थिकत्वादिति तात्पर्य-मवधार्यम्।

यस्तूर्णनाभ इव तन्तुभिः प्रधानजैः स्वभावतः।
देव एकः (आत्मा) स्वमावृणोति स नो दधातु ब्रह्माप्ययम्॥
(श्वेत० ६।१०)

मोक्षावस्थागता काचिद् विशिष्टा दुःखनिष्कृतिः।
तत्सम्भूत्या परावाप्तिर्या सैषा मुक्तिरुत्तमा॥ १४॥

तत्रापि मोक्षलक्षणे पुरुषार्थे वैशिष्ट्येन प्रत्यवस्थानात् परावाप्त्या काचिदुत्तमा-मुक्तिरास्थीयते मुमुक्षुभिरित्यापाद्यते मोक्षावस्थाऽप्युत्तममध्यमाधमतया त्रिविधोक्ता। साधकमुमुक्षूणां त्रैविध्यविभागात्तद्विभागोऽपि कल्पितः। युञ्जानयुक्तमुक्तात्मभेदात् तत्राप्यधममध्यमोत्तमभेदो मोक्षावस्थायामास्थाप्यते। तदत्र तद्वशाद् दुःखनिवृत्त्यादेरपि

तादृक्त्वमूह्यम्। मोक्षस्य मुमुक्षुभिरभिकाम्यस्य परात्म्यैकात्म्यसमवाप्तिस्वरूपस्यावस्था स्थितिर्दशा प्रपत्तिरध्याप्तिरवस्थानवृत्तिश्च, तद्गता तन्निष्ठा काचिदाख्यातुमनर्हा वैलक्षण्यक्षुण्णा निरतिशयेत्यर्थः, विशिष्टा विगतशिष्टत्वं शेषत्वशून्यत्वमशेषजुष्टत्वं यत्तेन वैशिष्ट्येन धर्मेण श्लिष्टा विशिष्टा, निःशेषशेषत्वराहित्यमेवात्र विशिष्टत्वमाख्यातम्। तादृशी विशिष्टा दुःखनिष्कृतिः क्लेशनिवृत्तिः, जगत्तापत्रयोद्धृतिरात्यन्तिकी दुःखनिष्कृतिरित्युच्यते। तादृशाशेषदुःखनिष्कृतिसम्भूत्या सम्प्रपत्त्या सम्भवनात्सम्यगुत्पत्त्युपपत्तेश्च या परावाप्तिः परात्माधिगमः परमात्मसुखोपलब्धिः, तादृरूप्यपूर्णप्रपत्तिश्च सञ्जायते, सैषा श्रुत्यादिसकलवेदान्तशास्त्रसुप्रसिद्धोत्तमा मुक्तिरितीष्यते। इयमेव परा मुक्तिर्मोक्षलक्षणोक्ता कैश्चिदिति बोध्यम्[1]।

ज्ञानं चैतन्यमित्याहुर्ज्ञानी चेतन उच्यते।
बद्धावस्थस्य जीवस्य ज्ञानं भवति दुःखदम्॥ १५॥

किं चैतन्यम्? कश्च तद्विशिष्टश्चेतनः? किञ्च दुःखकारणम्? इत्युदीर्यते—ज्ञानं ज्ञायमानवस्तुगतावबोधो ज्ञेयपदार्थस्वरूपप्रत्ययो विवेकबुद्धिसंवित्त्यादिपदाभिधेयं ज्ञानमेव चैतन्यमित्युच्यते। तच्च चैतन्यं चेतनधर्म इत्याहुर्मनीषिणश्छिन्नसंशया महात्मानः। यश्च ज्ञानविशिष्टो ज्ञानी विवेकबुद्धिबोधजुष्टः, स एव चेतनश्चेतनावांश्चैतन्यधर्मा जीव इत्युच्यते। तदेव चैतन्यवज्ज्ञानं बद्धावस्थस्य संसारबन्धनिबद्धस्थितिकस्य देहान्तर्निविष्टस्वरूपस्य सीमितस्थानसंस्थस्याङ्गुष्ठमात्रपरिमितात्मभावस्य परिच्छिन्नप्रमाणस्य च जीवस्य (कृते) दुःखं ददातीति दुःखदं क्लेशापादकं भवभवद्भोगभूरिशोकामयभयोत्पादकं भवति जायते भवोन्मुखीं वृत्तिमाददातीति ज्ञेयम्। मुमुक्षूणां मुक्तात्मनां महात्मनां च यज्ज्ञानं तन्मुक्तिमोक्षपरानन्दप्रदं भवति, परमात्मप्रकाशप्रसारात्, बद्धात्मनां जीवानां संसारसंसरणशीलानां मुग्धमतीनां तदेव ज्ञानं भ्रमात्मकं दुःखदं भवतीति तात्पर्यार्थो बोध्यः[2]।

सुखदुःखानुभूतिश्च ततो नापैति सर्वथा।
मुक्तावस्थस्य यज्ज्ञानगुणोऽपि प्रविलीयते॥ १६॥

यतश्च सुखं सांसारिकं दुःखानुविद्धं ततस्तदुभयानुभूतिस्ततो नापयाति तद्वैपरीत्येन मुक्तात्मनः सा व्यपगच्छतीति पर्यवस्थाप्यते—सुखं क्षणिकं लौकिकवस्तुविषयगतं

---

१. सर्वाजीवे सर्वसंस्थे बृहन्ते, तस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे।
पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति॥ श्वेताश्वत० १।६।

२. "एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत॥" गी० १५।२०

स्रक्चन्दनवनितादिभोग्यसमुद्भूतं तात्कालिकमापातमधुरं पार्यन्तिकक्लिष्टकष्टकरं विरसावसानमित्यर्थः। दुःखं तादृशसांसारिकसुखानुगतभोगसंसर्गसङ्गतं सान्तमत्यन्तवेदनोत्पादकं वैरस्यवैमनस्यपरमित्यर्थः, तयोरनुभूतिर्मानसिकोऽनुभवोऽनुभूयमानस्वभावपर्यसायिनीवृत्तिः, सुखानुबन्धिनी दुःखानुवृत्तिकृता मानसी प्रवृत्तिरिति भावः। ततश्चेतनावतो जीवात्सांसारिकात् सर्वथा सातत्येन समन्ततः सर्वतोभावेन च नापैति दूरं नापयाति, तस्य वैषयिकभोगेषु संसक्तत्वात्। तद्वैपरीत्येन तु मुक्तावस्थस्य निर्लिप्तात्मनोऽनासक्तिभावेन निर्विचिकित्समसन्दिहानचेतसा विद्यमानस्य मुक्तात्मनो ज्ञाननिर्धूतदूषणस्य मुमुक्षोः पुरुषस्य (जीवस्य) तज्ज्ञानगुणोऽपि तस्य संसारविषयकृतस्य ज्ञानस्य ममत्वाकारस्य देहत्वाद्यभिमानसम्भूतस्य यो गुणः काम्यत्वाभिरामत्वोत्सुकत्वादिरूपप्रवृत्तिजनकः, आसक्तिहेतुकः, संसर्गसंसृष्ट इत्यर्थः। सोऽपि ज्ञानगुणो दुःखापादकः प्रविलीयते प्रकर्षेण विलयं गच्छति। संसारविषयं ज्ञानं निवर्तते, परमात्मविषयं ज्ञानमुपजायते तस्य मुक्तात्मनो मुमुक्षोरियमेव मोक्षस्थितिरिति भावः[1]।

श्रुतिसम्मतसर्वात्मदृष्टेरैक्यं प्रशस्यते।
तत्तात्पर्यात्समस्तत्वादात्मैव प्रतिपाद्यते ॥ १७ ॥

सर्वत्र श्रुतिस्मृत्यादिशास्त्रेषु सर्वात्मदर्शनपरः सकलसंवृत्यपेतस्वरूप एक आत्मैव तात्पर्यतया प्रतिपादितः, स एव मोक्षलक्षणपुरुषार्थार्थनीय इति सिद्धान्तसारः प्रस्तूयते, श्रुतिः श्रूयमाणस्वरोच्चयोचिता ऋगादिमन्त्रोदिता वर्णपदवाक्यविशेषिताऽनाद्यपौरुषेयप्रकल्पिता स्वयम्प्रकाशा काचिच्छन्दोमयी प्रणिधानपरिफलिता वाक्, तेन श्रूयते—इति, श्रवणमिति श्राव्यत इति श्रावणमिति श्रवणविषयीकरणमिति श्रूयतेऽनयाऽस्मिन्निति वा बह्व्यो व्युत्पत्तयस्तत्तच्छ्रवणधर्मानुसारिण्यः संगच्छन्ते। तादृशश्रुतिसम्मता श्रौतसिद्धान्तसारसर्वस्वभूताऽऽत्मदृष्टिरात्मतत्त्वप्रतिपादनपरं दर्शनं तदन्तरैक्यमेक्यमेकत्वमद्वैततत्त्वं ब्रह्मापरपर्यायं परमार्थसत् प्रशस्यते, श्रुतिप्रशस्तवचनैरुपन्यस्यते[2]—

"तत्र को मोहः कः शोक एकत्वमनुपश्यतः" (ईशावा० ७।)
"आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" (तैत्ति० २।९)
"अयमात्मा ब्रह्म सर्वानुभूः" (बृहदा० २।५।१९)

१.(क) न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ।। गी० ४।३८।

(ख) सा काष्ठा सा परा गतिः,
यस्मात्परं नापरमस्ति किञ्चित्। श्वेता० २।९।

२. ब्रह्मैवेदममृतं पुरस्ताद् दक्षिणतश्चोत्तरेण।
अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ।। मुण्डको० २।२।११।

इत्येवम्भूतैः शतशः प्राशस्त्यवचनोपन्यासैः श्रुतिषु तदुपलक्षणेन स्मृत्यागमादिशास्त्रेषु तदेवात्मैक्यतत्त्वं परात्मप्रकाशप्रकर्षेण ब्रह्माद्वैतसम्मतमतमशेषभेदोत्सारणपूर्वकमपूर्वमुन्नीयते प्रमीयते प्रकाश्यते परमात्मतत्त्वविद्भिः श्रीमच्छङ्करभगवत्पादप्रभृतिभिर्वेदान्तराद्धान्तमुद्योतयद्भिर्विद्वद्भिरिति गूढाभिप्रायो बोध्यः। किञ्च—तस्मात्तत्रोक्तात् श्रुत्यादिशास्त्रोपदिष्टात्तात्पर्यात्तत्परकोचितवचोवितानात् तदुद्देश्यकयत्नसंरम्भात् तत्प्राधान्येन प्रवर्तनाच्च समस्तत्वात् सर्वत्रानुस्यूतत्वात्सर्वसद्भावात् सर्वस्वभूतत्वाच्च स एव आत्मैव जीवेश्वरादिनानारूपोपादानप्रतानेन प्रतिपाद्यते प्रतिपाद्यत्वेन प्रदर्श्यते निर्दिश्यते प्रशस्यते चेति सारार्थोऽवधार्यः, एवकारस्तदन्ययोगव्यवच्छेदायेति बोध्यम्। तादृशात्मदर्शनोदिताद्वैततत्त्वसुखावबोध एव मोक्षलक्षणः पुरुषार्थ इत्यास्थेयम्।

किं पश्येत् किन्नु जानीयात् दृष्टिज्ञानभिदा कुतः।
तदभावप्रभानत्वे तत्सद्भावकथा वृथा॥ १८॥

दर्शनं ज्ञानमित्युभयं भेदाभावात्तस्य परात्मनः सत्तापर्यवसितं तिष्ठतीति सन्दर्श्यते—किं पश्येत् ? स्वयमेव परमात्मतादात्म्यापन्नो जीवस्तदतिरिक्तं किमन्यत्तत्त्वं द्रष्टुमिच्छेत् ? सर्वत्रैकत्वेन व्यापकत्वेन परात्मन एव विद्यमानत्वात्। किञ्च किन्नु जानीयात् ? किमन्यत्तर्कवितर्काभ्यां विषयीकृत्य बुद्ध्या ज्ञातुं यतेत ? ज्ञातृज्ञेयज्ञानरूपतया तस्यैवैकस्य परात्मभावस्य संस्थितत्वात्। अतश्च दृष्टिज्ञानयोर्दर्शनबोधयोरात्मसाक्षात्कारतद्विषयकभानयोश्च भिदा भेदः पार्थक्यं मिथोऽतिरिक्तत्वं कुतः कस्माद्धेतोः स्यात् ? न तयोः कदापि भेदोद्भव इति भावः। अपि च तस्या तादृशदृष्टिज्ञानजन्यभिदाया अभावस्य प्रभानत्वे सति सर्वत्र दर्शनज्ञानजनितभेदापगमे जाते तत्सद्भावकथा तस्या भिदाया भेददृष्टेर्वा सत्त्वेन भावोऽस्तित्वं सत्तायां परमार्थतोऽवस्थानमित्यस्य कथा चर्चाऽऽख्यानं वृत्तिर्वा वृथा अपार्था मिथ्या अस्तीति शेषः[1]। सर्वासु वृत्तिषु सर्वेषु भावेषु च सर्वात्मकत्वेनैकस्यैवात्मनः परात्मप्रकाशप्रतिभासमानस्य सत्त्वात् न तद्गतो दर्शनज्ञानकृतभेदो युज्यते इति भावः।

जडत्वान्नैतदुक्तं स्यात्सर्वात्मत्वात्प्रयुज्यते।
दर्शनज्ञानभेदादेरभावप्रतिबोधनात् ॥ १९॥

एतदखिलं दर्शनज्ञानात्मकं परमार्थतत्त्वं भेदापेतं सर्वात्मत्व एवोक्तं प्रयुक्तं भवति न जडत्वे तद्भावानुभूतिरित्यापाद्यते—एतदुपर्युक्तं परमार्थगतदर्शनज्ञाननिष्ठभेदाप-

---

१. येनावृतं नित्यमिदं हि सर्वं ज्ञः कालकालो गुणी सर्वविद्यः।
तेनेशितं कर्म विवर्तते ह पृथ्व्यप्तेजोऽनिलखानि चिन्त्यम्॥ श्वेता० ६।२।
तमक्रतुः पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः॥ कठ० १।२।२०।

नयनं सर्वात्मत्वादेव सर्वत्रात्मनो व्यापकत्वात् तद्भावेन भावितत्वाच्च सर्वेषां पदार्थानां परमार्थप्रोतत्व एवोक्तं सत्प्रयुज्यते प्रयुक्तं भवति, न तु स्वार्थगतभेदबुद्धिव्यवसायेन व्यवसीयते, कथमपि कुत्रचिदिति भावः। जडत्वाज्जाड्यजनितमोहान्नैतदुक्तं भवति। नापि तदुपरोधे प्रयुक्तं भवतीति तात्पर्यम्। तस्माच्च सर्वथा दर्शनस्य ज्ञानस्य च भेदादेः पृथग्भावबुद्धिगताज्ञानस्य च प्रतिबोधनात्प्रत्यवमर्शनात्प्रतिभानात्प्रत्ययोपगमाच्च तद्गतभिदोपसंहारः परात्मभावोन्मेषः तादात्म्यापत्तिर्ब्रह्माद्वैतप्रपत्तिस्तज्जन्यमात्यन्तिकसुखावाप्तिर्मुक्तिलक्षणा मोक्षाख्यपुरुषार्थतया समधिगम्यते मुमुक्षुभिर्महात्मभिरिति भगवत्पादशङ्करतदनुयायिनामाचार्याणां वेदान्तविदुषामभिमतं मतं यथामत्युपस्थापितमास्थेयम्।

यदा सन्दर्शनादीनां साधनानां विनाशनम्।
तदा नो तत्प्रयुक्तत्वात् साध्यज्ञानादिभावना॥ २०॥

यद्यपि साधनाधीनं साध्यज्ञानमथापि साध्यावाप्तौ तन्निवर्तत इत्यभिसन्धीयते—यदा यस्मिन् समये मुक्त्याख्यमोक्षलक्षणपुरुषार्थाधिगमो जायते, यस्मिंश्च सन्दर्शनादीनां सम्यग्दर्शनमनननिदिध्यासनासनानुध्यानोपासनादीनां साधनानां मोक्षसाधनहेतूनां साध्यस्य साध्यमाननिमित्तानामित्यर्थः। विनाशनं विलय उपरमोऽवसानं वा भवतीति शेषः। तदा मोक्षाधिगमे सति तत्प्रयुक्तत्वात्साधनप्रयोज्यतया तद्विषयीकृतत्वात् साधननिष्ठप्रयोजकतानिरूपितसाध्यनिष्ठप्रयोज्यतया च साध्यज्ञानादिभावना साध्यत्वावमोक्षादेः पुरुषार्थस्यादिपदेन परमात्मसाक्षात्कारप्रतिपन्नात्मन इति बोध्यम्। तादृशी भावना वृत्तिः साधनकृता साध्यभावनादृष्टिरिति यावत्। नो भवतीति शेषः। इयमेव नित्यमोक्षप्रतिष्ठेत्युच्यते। यथोक्तं भगवद्गीतायाम्—"यद्गत्वा न निवर्तन्ते तद्धाम परमं मम"। इत्थञ्च मोक्षतत्साधनयोर्मोक्ष एव पारमार्थिकः पर्यवतिष्ठते तत्साधनं तु तत्प्राप्त्यनन्तरं हेयत्वादपारमार्थिकमित्यवसेयम्।

एवं मोक्षस्वरूपस्य संक्षेपाच्छङ्कराध्वना।
तत्प्राप्तेः साधनस्यापि विमर्शः श्रुतिसम्मतः॥ २१॥

एवमुपर्युक्तप्रकारकाद्वैतसिद्धान्तानुसारं मोक्षस्वरूपस्य मोक्षाख्यचरमपुरुषार्थस्य लक्षणोपपादनं समासेन श्रीमच्छङ्करभगवत्पादप्रतिष्ठापितपथमनुसृत्य तथा च तादृशलक्षणलक्षितस्य तस्योपलब्धेर्हेतुभूतस्योपायप्रायसाधनस्य च श्रुतिशास्त्रानुमोदितः परमार्थपरामर्शप्रदर्शितो विमर्शो विचारः स्वबुद्धिकृतो विवेको प्रस्तुतो मया कारिकाव्याख्यानवृत्तिविरचनेन विदुषां सचेतसां चेतःसमावर्जनायेति कृतं पल्लवितेन।

१. ज्ञात्वा देवं सर्वपाशापहानिः, क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः।
तस्याभिधानात् तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः॥ श्वेता० १।११।

अद्वैतमते जगतः ब्रह्मणोऽभिन्नत्वं भिन्नत्वं वा

डॉ० नरेन्द्रनाथपाण्डेयः

प्राध्यापकः,

वेदान्तविभागे

सं० सं० वि० वि०, वाराणसी

❀❀❀

अद्वैतिनः खलु 'ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः' इति वदन्तो जगतो मिथ्यात्वमङ्गीकुर्वन्ति प्रमाणत्वेन च 'नेह नानाऽस्ति किञ्चन' 'अतोऽन्यदार्तम्' इत्यादि श्रुतिकदम्बकमुदाहरन्ति। किन्त्विदमत्र विचारणीयं भवति अभिन्ननिमित्तोपादानत्वपक्षपातिन इमे जगदुपादानकारणत्वं ब्रह्मणि वदन्तः कारणाद् ब्रह्मणोऽभिन्नत्वं कार्यस्य यदि स्वीकुर्वन्ति तदा जागतिकपदार्थेषु सत्त्वादीनां प्रसङ्गः, मृद्गुणानाम् घटादिष्विव। यदि भिन्नत्वं स्वीक्रियते तदा सिद्धान्तच्युतिः—तदुक्तं भगवत्पादैरारम्भणसूत्रे—'तस्मात् कारणात् परमार्थतोऽन्यत्वं व्यतिरेकेणाभावः कार्यस्यावगम्यते। कुतः ? आरम्भणशब्दादिभ्यः[1]।' कारणव्यतिरेके कार्याभावः इति कथनेन कारणाधीनसत्ताकत्वं कार्यस्यायाति तथा च कार्यस्य विवर्तरूपत्वं फलितं भवति। विवर्तस्य च अधिष्ठानसत्तातिरिक्तसत्ताकत्वाभावः शुक्त्यादौ प्रसिद्धः। अत एव कल्पितवस्तूनां शुक्त्यादीनां नाशे अधिष्ठानमात्रस्यैवावशेषो भवति, न तु घटादीनां नाशप्रसङ्ग इव कपालाद्युपलब्धिः।

भामतीकृतस्तु—न खल्वनन्यत्वमित्यभेदं ब्रूमः, किन्तु भेदं व्यासेधामः। ततश्च नाभेदाश्रयदोषप्रसङ्गः' इत्यादिकं वदन्तः स्पष्टमेव जगद् ब्रह्मणोर्भेदं निराचक्रुः, अभेदञ्च स्वीचक्रुः। यद्यप्येवं वक्तुं शक्यते यत् सिद्धान्तलेशकृता प्रथमपरिच्छेदे मायायाः कारणत्वविचारावसरे[2] 'विवर्तपरिणामोपादानद्वयसाधारणमन्यल्लक्षणमाहुः स्वाभिन्नकार्यजनकत्वमुपादानत्वम्। अस्ति च **प्रपञ्चस्य सद्रूपेण ब्रह्मणा विवर्तमानेन जडेनाज्ञानेन परिणामिना चाभेदः**; सन् घटः, जडो घटः इति सामानाधिकरण्यानुभवात्' इत्यादि वदता ब्रह्मणा जगतोऽभेदः स्वीकृतः; किन्त्वयमभेदो न ब्रह्मरूपधर्मिसमानसत्ताकाभेदः चिज्जडयोर्विभिन्नसत्ताकयोरभेदासम्भवात्। अपि तु शुक्तिरजतयोरिव प्राती-

---

१. तदन्यत्वमारम्भणशब्दादिभ्यः (२।१।४ ब्र० सू०)।

२. सिद्धान्तलेशसंग्रहः, पृ० ४६, अच्युतग्रन्थमालासंस्करणम्।

तिकाभेद इति तत्रैव निर्णीतम्। तथा च न भामतीवचनेन सह विरोधः। एवं स्थिते यदि भेदाभेदावुभावपि न स्वीक्रियेते, कस्तर्हि पन्था आश्रयितव्यः ?

अस्मिन् विचारप्रसङ्गे ब्रह्मकारणतापक्षं स्पष्टयितुं मधुसूदनसरस्वतीनां पक्षमुपस्थापयामः—'उभयोः[1] परिणामितया कारणत्वानङ्गीकारात्, किन्त्वज्ञानस्यैव। अत एवासाधारण्येन निर्विकारत्वमपि। न ह्यविद्यासाहित्येऽपि ब्रह्म परिणमते; किन्तु विवर्तते। न च अविद्यापरिणामत्वेऽपि सत्यत्वापत्तिः परिणाम्युपादानसमसत्ताकत्वरूपस्य सत्यत्वस्य परिणामत्वनिर्वाहकत्वात्। ब्रह्मसमसत्ताकत्वाभावेन तदपेक्षया परिणामत्वाभावात्। स्वसमानसत्ताकविकारहेतुतया निर्विकारत्वोपपत्तेश्च। न च सत्योपादानत्वे सत्यत्वापत्तिः परिणाम्युपादानधर्माणामेव मृत्वसुवर्णत्वादीना कार्येऽन्वयदर्शनात् सत्योपादानत्वेऽप्यसत्यत्वोपपत्तेः।'

अयमाशयः—अज्ञानविशिष्टं ब्रह्म जगत उपादानकारणम्। किन्त्वज्ञानमेव जगद्रूपेण परिणमते ब्रह्म तु विवर्तते। अतो 'ब्रह्म जगतो विवर्त्युपादानम्' न तु परिणामि। अत एव जगतः सत्यत्वमपि न वक्तुं शक्यम्। परिणाम्युपादानाज्ञानसमसत्ताकत्वस्य तत्र सत्त्वेऽपि ब्रह्मसमसत्ताकत्वं नाऽस्ति। ब्रह्मैव च सत्यम्। अतो ब्रह्मसमसत्ताकत्वाभावाज् जगतो न सत्यत्वम्। ब्रह्मणो जगद्रूपेण विवर्तमानत्वेऽपि निर्विकारत्वं निर्बाधमेव, यतः स्वसमसत्ताकविकारहेतुत्वे एव वस्तूनि विक्रियन्ते, नाऽन्यथा।

यद्यप्येवं वक्तुं शक्यते अज्ञानस्यैव परिणामित्वेन जगत्सर्गोपपत्तौ ब्रह्मणो विवर्त्युपादानस्वीकारपक्षः व्यर्थः ? किन्त्वेवं स्वीकारे 'यतो वा इमानि भूतानि जायन्ते' इत्याद्याः श्रुतयो ब्रह्मण एव जगत्कारणत्वं प्रतिपादयन्त्यो व्यर्था स्युः। अचेतनस्य कारणत्वन्तु ईक्षतेर्नाशब्दम् (ब्र० सू० १।१।५) सूत्रे विस्तरेण निराकृतं भगवत्पादैरिति; तत एवावलोकनीयम्।

एतावता इदं निश्चितं भवति विभिन्नसत्ताकयोः ब्रह्मजगतोरभेदो न सम्भवति, किन्तु भेदोऽपि निषिध्यते चेत् कस्तत्राशय इति विविच्यते। भगवत्पादैः अनन्यत्वमित्यस्य व्याख्यानावसरे कारणात् परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः कार्यस्यावगम्यते इति योऽर्थः कृतः, तस्य भेदनिषेधे एव तात्पर्यम् वर्तते। यदि ब्रह्मभिन्नत्वेन जगतः परमार्थतः सत्त्वं स्यात्, तदा अन्वयव्याप्तिरपि तत्रोक्ता स्यात्। अज्ञानस्य कारणत्वे तूभयविधाव्याप्तिः संघटते, न तु ब्रह्मकारणत्वे सृष्टिप्राक्काले ब्रह्मणः सत्त्वेऽपि प्रपञ्चाभावात्। यद्यपि ब्रह्म व्यतिरेके जगदभाव इति वक्तुं न शक्यते, सदातनस्य ब्रह्मणो

१. अद्वैतसिद्धिः, परि० २ पृ० ७५८।

व्यापकस्य देशतः कालतो वा व्यतिरेकाभावात् तथाऽपि सांभावनिकोऽत्र व्यतिरेको गृह्यते ब्रह्मव्यतिरेके अधिष्ठानाभावाद् जगन्न भासेत शुक्त्यभावे रजतमिवेति तस्य भावः।

एतस्य व्याख्यानस्य ब्रह्मणो विवर्तभूतस्य जगतोऽत्यन्तासत्त्वे तात्पर्यम्। अत एवाग्रे उक्तं भाष्यकृता—'तस्माद्यथा घटकरकाद्याकाशानां महाकाशानन्यत्वम्, यथा च मृगतृष्णिकोदकादीनामूषरादिभ्योऽनन्यत्वं दृष्टनष्टस्वरूपत्वात् स्वरूपेणानुपाख्यत्वात्, एवमस्य भोग्यभोक्त्रादिप्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभाव इति द्रष्टव्यम्।' अत्र भाष्यकृता जागतिकपदार्थानां दृष्टनष्टस्वरूपत्वमुक्तम्। क्वचिद्दृष्टम्, पुनर्नष्टम् दृष्टनष्टमित्युच्यते। भामतीकृता च विस्तरेण भाष्योक्तिः विवृता। अयमत्राशयः-सत्स्वभावता चेद् विकारजातस्य कदाचिदप्यसत्वं न स्यात्, अनुभूयते च तत् नाशानन्तरम्। असत्स्वभावत्त्वं चेत् कदाचिदपि सत्त्वं न स्यात्, दृश्यते च तदपि। अत एषां पदार्थानां सत्त्वं वा असत्त्वं वा विविच्य वक्तुं न शक्यते। अत इमे अनिर्वचनीयाः प्रतीतिसत्त्वाः वस्तुतो न सत्येव।

तदित्थं अवस्तुसताम् एषां जागतिकपदार्थानां ब्रह्मणो भिन्नत्वं स्वीक्रियते, तदा ब्रह्मप्रतियोगिकभेदाश्रयत्वं निरुपाख्यस्य स्वरूपेणासतो जगतो वक्तव्यम्। तच्च न सम्भवति स्वरूपेणासत आधारत्वासम्भवात्। अतो जगतो ब्रह्मप्रतियोगिकभेदाश्रयत्वं वक्तुं न शक्यते। अतः सुष्ठूक्तं भामतीकृता 'भेदं व्यासेधामः' इति। इदन्तु परमार्थदृष्ट्या, व्यवहारदृष्ट्या तु यावद् व्यवहारं घटादीनां सत्वात् तत्र परस्परं भेदाश्रयता भवत्येव।

अस्तु यदि असतो भेदप्रतियोगित्वमनुयोगित्वं वा न स्वीक्रियते, तदा नेदं रजतमित्यत्र प्रातीतिकरजतस्य कथं निषेधः। व्यावहारिकरजतस्य तत्र निषेधः स्वीक्रियते चेत् 'प्रसक्तं हि प्रतिषिध्यते' इति न्यायविरोधः; किन्तु तत्र प्रातिभासिकतत्कालोत्पन्नरजतस्यैव निषेधः स्वीक्रियते। व्यावहारिकरजतस्य तु इदं रजतमित्यत्र न ज्ञानविषयता प्रत्यक्षे सन्निकृष्टस्यैव ज्ञानविषयत्वात्, व्यावहारिकरजतस्य च असन्निकृष्टत्वात्। यद्यपि प्रातिभासिकरजतस्य पूर्वोपदर्शितरीत्या असत्त्वात् परमार्थतो निषेधप्रतियोगित्वं न सम्भवति, तथाऽपि निरुपाख्यानां घटादीनां यथा कथञ्चिद् अल्पकाले स्थितिकत्वेऽपि व्यवहारविषयत्वं तथा शुक्तिरजतादीनामपि ततो न्यूनकालस्थितिकत्वेऽपि व्यवहारविषयत्वं न विरुध्यते।

दार्शनिकशिरोमणिर्भर्तृहरिरपि अत्रार्थे स्वसंमतिं ददाति—

न तत्त्वातत्त्वयोर्भेद इति वृद्धेभ्य आगमः।
अतत्त्वमिति मन्यन्ते तत्त्वमेवाऽविचारितम् ॥

(वा० प० द्र० समु० का० ७)

अस्याऽयमर्थः—तत्त्वस्य सत्यस्य ब्रह्मणोऽतत्त्वस्य असत्यस्य विरूपाख्यस्य जगतश्च कश्चिद् भेदो नाऽस्ति। तर्हि अभेदः समायाति इति चेत् सोऽपि निरस्यते, अतत्त्वस्य निरुपाख्यत्वख्यापनद्वारा—अविचारितं तत्त्वमेव अतत्त्वमित्युच्यते। वस्तुतोऽज्ञान-विजृम्भणादन्यद् अतत्त्वं नाम किमपि नाऽस्त्येव। अत एवं फलितं भवति अविद्याव-स्थायां ब्रह्मैव जगद्रूपेण विवर्तमानम् नानाकारतया भाति, अर्थात् अविचारितं तत्त्व-मेवातत्त्वमित्युच्यते, ततः पृथग् अतत्त्वं नाऽस्त्येव। तत्त्वज्ञाने जाते तु सविलासाविद्यायाः नाशे तत्त्वं ब्रह्मैव भवति, नाऽन्यदतत्त्वम्।

अत एवाग्रिमकारिकायाम्—

'विकल्परूपं भजते तत्त्वमेवाविकल्पितम्' इति वदता हरिणा परमार्थतो विक-ल्पानामविषयस्य ब्रह्मणो नानाविधभेदावभासरूपविकल्पभजनमुक्तम्। विकल्पज्ञाना-गोचरस्तत्त्वमेव घटादिरूपोपाधिपरिच्छिन्नं सत् विकल्प्यमानं घटत्वादिकं स्वधर्मतया आश्रयति।

यद्यपि शङ्क्यते बहुभिः—ब्रह्म परमार्थतोऽद्वितीयम्, एकम्, अतो ब्रह्मतत्त्वेऽविद्य-मानस्यात्त्वस्य प्रपञ्चस्य प्रतिभानमयुक्तम्, तथाऽपि तत्र वक्तुं शक्यते यथा विषयाणां नीलादीनां बाह्यानामान्तरे ज्ञाने अत्यन्तमसम्भवो यद्यपि; तथाऽपि जडत्वप्रकाशत्वाभ्यां वैधर्म्याद् विषयतद्धर्मानात्मकमपि तज्ज्ञानं विषयधर्मात्मकमिव लोकव्यवहारे ज्ञातं भवति। तथैवाद्वैतनये ब्रह्मविवर्तभूतानां घटपटादिप्रपञ्चानां जडानां प्रकृतिभूते बोधमात्रस्वभावे ब्रह्मणि वैधर्म्येणात्यन्तमसंभवो यद्यपि, तथाऽपि प्रपञ्चानात्मकमपि ब्रह्मतत्त्वं प्रपञ्चात्मकमिव सन् घटः, सन् पटः, इत्यादिषु परोक्षापरोक्षप्रत्ययेषु अवभाति।

अतो निष्कर्षरूपेणेदं वक्तुं शक्यते यज्जगद्ब्रह्मणोऽभिन्नं वा भिन्नं वा किमपि वक्तुं न शक्यते, तस्य स्वरूपेणानुपाख्यत्वात्। यदि जगतः स्वरूपं निर्धारितं स्यात्, तदा भेदाऽभेदविचारः प्रसरेत्, अन्यथा नहि। जगत्तु अनिर्वचनीयम्, सत्त्वेन असत्त्वेन वा वक्तुमनर्हमतस्तत्र कोऽपि विचारो न प्रसरति। जगतश्चानिर्वचनीयत्वमुक्तम्—

प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत् ।
गाहते तदनिर्वाच्यमाहुर्वेदान्तवेदिनः ॥

इत्यादिना तत्त्वप्रदीपिकायाम् ।

बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते ।
अतो निरभिलप्यास्ते निःस्वभावश्च देशिताः ॥

इत्यादिकं वदन्तो बौद्धाचार्या अपि जगतो निरुपाख्यत्वेऽनुकूलाः। अतो निरुपाख्यस्य जगतो वस्तुभूतेन ब्रह्मणा सह अभेदो वा भेदो वा, किमपि वक्तुं न शक्यत इति शम्।

श्रीशङ्कराचार्यशतकम्

श्रीशिवदत्तशर्माचतुर्वेदः
साहित्यविभागाध्यक्षः
काशीहिन्दूविश्वविद्यालयस्य संस्कृतसंकाये

❀ ❀ ❀

(१)

शङ्करभगवत्पादं शिवाऽवतारं समाश्रये सुखदम् ।
कल्याणाय जनानां ज्ञानामृतवर्षिणं मेघम् ॥

(२)

मानवतेयं धन्या सञ्जाता यत्कृपालेशैः ।
आविर्भूतः प्रथमः स श्रीमान् शङ्कराचार्यः ॥

(३)

भूवलये धन्यतमः सर्वोऽयं कालटीभागः ।
यत्रत्यधूलिकणिका शङ्करपदसौरभं वहति ॥

(४)

सा माता धन्यतमा यस्याः कुक्षौ समवतीर्णम् ।
निखिलागमस्वतन्त्रं सत्यं सच्चिन्मयं ज्योतिः ॥

(५)

प्रणमामो गोविन्दं भगवन्तं सद्गुरुं नित्यम् ।
यस्य च शिक्षा फलिता जगद्गुरुत्वे स्वयंवृता काचित् ॥

(६)

वन्दितदिव्यचरित्रः परमपवित्रः प्रभास्फुरद्गात्रः ।
भूतभविष्यन्मध्ये विभूतिरिव वर्तमानोऽयम् ॥

(७)

ज्योतिः किञ्चन साक्षाद् भासितमासीत्तु भूवलये ।
यच्चाऽनन्तं कालं सम्यक् संस्तम्भयामास ॥

(८)

कालोऽयं कलिरूपः सत्ययुगादपि समुन्नतो जातः।
यस्मिन् शङ्करभगवत्पादैराविष्कृतिः क्लृप्ता ॥

(९)

धन्या मानवतेयं सञ्जाता शङ्कराचार्यः।
स्वयमवतीर्य समस्याः सर्वाः संसाधयामास ॥

(१०)

वेदानामथ मननं विधाय सद्यः समुन्नतं तत्त्वम्।
व्याप्तं परमनिगूढं वैशद्येनाथ घोषयामास ॥

(११)

उपनिषदां व्याख्यानं विहितवता धीमता येन।
भाष्याणां सा सरणिः प्रणम्य भावं समानीता ॥

(१२)

तासामथ सर्वासामुपनिषदामुपरि भाष्यसंरचना।
या विहिताऽऽचार्यवरैः सुधेव सा जीवनोन्नतये ॥

(१३)

तदनन्तरमुपनिषदां महत्त्वमग्रे परिस्फुरितम्।
अद्वैततत्त्वमयता सर्वासां सुस्फुटा जाता ॥

(१४)

तदिदं किञ्चन तावद्विलक्षणं दिव्यताभरितम्।
विज्ञानं विद्योतितमभवच्छ्रीशङ्कराचार्यैः ॥

(१५)

व्याख्या तावदियं सा गरीयसी शङ्कराचार्यैः।
उपनिषदां या रचिता संसारे निधिरयं कश्चित् ॥

(१६)

पञ्चमवेदविवर्ते दिव्ये तस्मिन् महत्त्वसंपूर्णे।
गीता संग्रथिताऽऽसीन्महितमहाभारते ग्रन्थे ॥

(१७)

वेदव्यासविरचना सेयं क्रोडीचकार तत्सर्वम् ।
मानवजीवनमध्ये समुन्नतं यत् प्रकाम्यं वा ॥

(१८)

तत्र च गीता दिव्या श्रीकृष्णेनार्जुनाय संदिष्टा ।
शङ्करभगवत्पादव्याख्यानं संप्रतीक्षमाणाऽऽसीत् ॥

(१९)

तदुपरि भाष्यविरचना कृता समासीत्तु शंकराचार्यैः ।
तदवधि गीता गीता जाता सर्वासु जनतासु ॥

(२०)

अद्वैतस्य समुद्रं तरङ्गितं वा न पश्यन्तः ।
दिग्भ्रान्ता इव मूढा जन्मनि जन्मनि भजन्ति दुःखचयम् ॥

(२१)

अद्वैताख्यं तत्त्वं गीतायां गीतमेव कृष्णेन ।
तत्सन्देशं लब्ध्वा पार्थो विजयी बभूव संग्रामे ॥

(२२)

पार्थत्वं ननु जातिः काचन सर्वेषु देहेषु ।
काले काले स्वीयं रूपं सम्यक् प्रकाशयत्येव ॥

(२३)

अद्यापि सैव गीता श्रीकृष्णस्यैव मुखकमलसंजाता ।
सर्वविधं पार्थत्वं पदे पदे संदिशत्येव ॥

(२४)

सर्वमपीदं तत्त्वं गीताभाष्यस्य रचनायाम् ।
शङ्करभगवत्पादैः प्रकाशितं सर्वदा जयति ॥

(२५)

यद्यप्यासीद् गीता महति महाभारते विमला ।
किन्तु महत्त्वं तस्याः प्राथम्येन प्रकाशितं जातम् ॥

(२६)

तावत्प्रभृति समेषामाचार्याणां च विदुषां च।
दृष्टौ गीता काचिद् विपुलज्ञाने गभीरनदी ॥

(२७)

यद्यपि शंकरभगवत्पादैर्व्याख्यायिता गीता।
तत्रैव पूर्वभाष्याणामपि संकेत उल्लसति ॥

(२८)

किन्तु न मिलितान्येतान्यद्यावधि भाष्यरूपाणि।
शङ्करभगवत्पादैरारचितं भाष्यमेवाऽऽद्यम् ॥

(२९)

अग्रे तु प्रस्थानत्रयमध्ये सुप्रतिष्ठिता गीता।
नानाव्याख्यानानां केन्द्रीभूतैव संजाता ॥

(३०)

अद्वैतवादविमतैरप्याचार्यैर्मता गीता।
सर्वा संपरिपीता कर्ममये जीवने सर्वैः ॥

(३१)

गीताऽमृतमिदमतुलं सूक्ष्मेक्षिकया विचारयन्वाचा।
नूनं निखिलं तेजो सम्भृतवांस्तद् विचारेषु ॥

(३२)

योऽयं मर्यादाया गरिमा कश्चित् समुच्छलति।
सर्वोऽयं सन्देशः करुणापूर्णस्य शङ्कराचार्यस्य ॥

(३३)

श्रीव्यासेन विरचितं दिव्यतमं ब्रह्मसूत्रं तत्।
शारीरिकेण भाष्येणाऽसौ स्वच्छं प्रकल्पयामास ॥

(३४)

वेदान्तडिण्डिमानां घोषश्चासीत् समुच्छलितः।
वैचारिकसंघर्षाणामप्येषा विलक्षणा सरणिः ॥

(३५)

उपनिषदामतिगहने ज्ञानवने संचरन्नित्यम् ।
दिव्यफलानामन्वेषणमथ दानश्रीगुर्विदधे ॥

(३६)

दर्शनसारैः सर्वैरोतप्रोतानि भिक्षुसूत्राणि ।
श्रीबादरायणकृतानि व्याख्यारत्नैर्विभूषयामास ॥

(३७)

सर्वेषामथ तेषां तेषां विख्यातदर्शनानां वा ।
सुगभीराणि मतानि तु नूनं विश्लेषयामास ॥

(३८)

ज्ञानस्याद्याकाशे नूतनसूर्यायितं येन ।
प्रातःस्मरणीयोऽसौ पुण्यश्लोकोऽस्ति शङ्कराचार्यः ॥

(३९)

स्वयमेव श्रीव्यासश्छन्नतया यत्समीपमागत्य ।
शास्त्रार्थं च वितन्वन् स्वात्मानं तोषयामास ॥

(४०)

विद्यारण्यविरचितं शङ्करदिग्विजयमालोच्य ।
शङ्करभगवत्पादे जातं विनयोज्ज्वलं चेतः ॥

(४१)

इतिहासानां मध्ये विभूतिसारैर्विभूषितस्वान्तः ।
बुद्धादूर्ध्वं पुरुषो न दृष्टिपथगो विभात्यद्य ॥

(४२)

विमता येन ध्वस्ता वैदिकमार्गाः प्रकाशिताः सम्यक् ।
सर्वो लोको नूनं नित्यं सच्छिष्यतां नीतः ॥

(४३)

दिव्यं जगद्गुरुपदं स्वयमेवोपायनीकृत्य ।
भारतजनता तुष्टा मानवता चापि सम्पुष्टा ॥

(४४)

पोषितचारित्रचित्रैर्विभूषितं वा चराचरञ्चैतत् ।
शङ्करभगवत्पादध्यानैरानन्दितं जातम् ॥

(४५)

सर्वेषामपि तावद्देवानां चाऽथ देवीनाम् ।
दिव्याः स्तुतयो रचिता विनिर्मलैश्छन्दसां निचयैः ॥

(४६)

सर्वेषामथ तेषां स्तुतिरूपश्च्छन्दसां महिमा ।
सत्यं सत्यमनन्तं सुखसंसारं समानयति ॥

(४७)

सौन्दर्यलहरिकायाः प्रवाहमाला निमग्नानाम् ।
भक्तानां हृदयानां या भाषा साऽस्ति मन्त्रमयी ॥

(४८)

भजगोविन्दस्तोत्रे जनजनमानसविराजिते दिव्ये ।
कल्याणानां करुणां धारां विस्तारयाञ्चक्रे ॥

(४९)

वाराणसीनिवासे लीलानां दिव्यचित्राणि ।
संपश्यन् विचचार स्वच्छन्दं शङ्कराचार्यः ॥

(५०)

श्रीविश्वनाथपूजनजगदम्बार्चननिवेदनेन विश्वेशम् ।
कोटीनपि तान्देवानावाहितवान् विभावना भरितः ॥

(५१)

सर्वेषामथ तेषां देवानां तुष्टिमातन्वन् ।
गाङ्गं पयः पिबन्नथ विरजांरूपे विराजितो जातः ॥

(५२)

नास्तिकतासिद्धान्तान् विवादमध्ये समाहुत्य ।
ज्ञानाऽग्निकुण्डमध्ये यज्ञे स्वाहाचकार विक्षिप्तान् ॥

(५३)

बुद्धो योऽसौ जातोऽवताररूपस्तदुपदेशान् ।
धूर्ता विपरीततया काले विस्तारयामासुः ॥

(५४)

आसीद् धूर्तैरेभिस्तादृशमाच्छादितं सर्वम् ।
ज्ञानस्य गगनमेतत् कालाऽऽवरणैर्यथा मेघैः ॥

(५५)

वेदान्तपवनवेगैर्विच्छिन्ना बौद्धमेघा ये ।
भारतवर्षाऽऽकाशं विहाय दूरं प्रयातास्ते ॥

(५६)

वाग्युद्धानि वितन्वन् बौद्धाचार्यैः सहैव सहसैव ।
तेषां पराजयानामितिहासे लेखनं चक्रे ॥

(५७)

मीमांसकान् विवादे सम्यक् सच्छिष्यतां नीत्वा ।
नानाशास्त्रार्थानां जनतायां सम्प्रवर्तनं चक्रे ॥

(५८)

आसेतुराहिमाचलमथाटकात् कटकपर्यन्तम् ।
पदभ्यां विचरन् नित्यं जनजनसन्दर्शनं चक्रे ॥

(५९)

दिव्यानथ तान्देवान्दिक्कोणेषु प्रतिष्ठितानपि वा ।
संपूजयन्निकामं सन्तुष्टः शङ्करस्वामी ॥

(६०)

यत्र हि जगाम जनता कोटिशतैः प्राप तं द्रष्टुम् ।
दर्शनवन्दनभाषणविनिमयरूपेण धन्यतां भेजे ॥

(६१)

राजानो येऽप्यासंस्तस्मिन् कालेऽथ संसारे ।
वैभवमतुलं स्वीयं तच्चरणे प्रार्पयामासुः ॥

(६२)

स्तोत्राणां या काचिद्दिव्या रचनावलिर्जयति ।
तस्या उद्भवसंस्था आचार्यस्तोत्रमालेयम् ॥

(६३)

जीवेश्वरयोर्मिलने बिन्दुत्वं सम्प्रयातानि ।
स्तोत्राक्षराणि शाश्वतभावैर्नित्यं प्रपूर्णानि ॥

(६४)

यत्राऽस्माकं श्रद्धाधाराऽसौ संप्रवहन्नास्ते ।
तत्रैव स्तुतिकाले चेतो नित्यं निबद्धत्तां याति ॥

(६५)

अद्वैतदर्शनस्याऽऽविर्भावे यन्मनोलग्नम् ।
तेन कथं देवानां स्तोत्राणीमानि रचितानि ॥

(६६)

द्वैते त्वेतत्सर्वं स्तोत्रं प्रक्रम्यतां नाम ।
कथमद्वैते स्तोत्रं तत्र द्वैतत्वमायातम् ॥

(६७)

सन्देहोऽयं तावदद्वैते नैव साधुतां याति ।
अज्ञाने तु द्वैताऽवस्थैवाऽत्रानुभूयमानाऽऽस्ते ॥

(६८)

अज्ञानावस्थतो ज्ञानावस्थं मनो यथा भूयात् ।
तस्यार्थे सात्त्विकता संगतिरावश्यकी कथिता ॥

(६९)

अज्ञानावस्थायां द्वैते बुद्धौ प्रजातायाम् ।
अद्वैतभावनार्थं स्तोत्राणीमानि रचितानि ॥

(७०)

अद्वैते तु तदेकं दृश्यं द्रष्टा च नो किंचित् ।
रूपं मृग्यं जातं केवलमेकं हि तत्त्वं तत् ॥

(७१)

नूनं तस्या एवोच्चाया भूमेरवाप्त्यर्थम् ।
नानाजन्म गृहीतं नानारूपाणि चाप्तानि ॥

(७२)

नाना-भाव-विलोपोऽपि च नानात्वेनैव सम्भाव्यः ।
एतत्तत्त्वं मत्वा स्तोत्राणां पद्धतिः सेयम् ॥

(७३)

द्वैताऽवस्थास्थितिरप्येषा निर्मूलतां यायात् ।
तस्मिन्नर्थे चैते देवा एवोपकुर्वन्ति ॥

(७४)

अद्वैताऽवस्थायां यदा स्थितिर्जायते नाम ।
नूनं तदा न संस्तुतिरप्येषा चादृता भवति ॥

(७५)

या साहित्ये सेवा विहिता श्रीशङ्कराचार्यैः ।
नैकशताब्दीं यावत्साऽद्याप्यायात्यविच्छिन्ना ॥

(७६)

पुनः समाजदृष्टिर्याता श्रीशङ्कराचार्याणाम् ।
वैदिकमार्गविलोपस्तेषां क्षणमपि न सह्यतां यातः ॥

(७७)

वैचारिकसंघर्षे बौद्धान् सम्यक् पराजित्य ।
वैदिकविश्वासानां दीप्तिः स्थानं परं लेभे ॥

(७८)

आस्तिकताया घोषो नूनं तैरेव तादृशो विहितः ।
भूमण्डलमिदमखिलं दिव्यैर्भावैर्विमण्डितं येन ॥

(७९)

नानावतारचर्चा परमेश्वररूपचित्रेषु ।
जनतायां हृन्मन्दिरमध्यस्थेयं पुनर्जाता ॥

(८०)

वर्णाश्रममर्यादा देशे संस्थापिता जाता ।
शान्तिः काऽप्यवतीर्णा समृद्धिमयता समायाता ॥

(८१)

वैराग्याविष्कारे नूनं तैर्यन्मनो दत्तम् ।
संन्यासाश्रमधारा नवावतारा स्थितिं प्राप ॥

(८२)

दशनाम्नां संन्यासाश्रमनिष्ठानां विभूतिरूपाणाम् ।
आविर्भावे जाते लोको वैराग्यमापेदे ॥

(८३)

वैराग्यमयी धारा नतमां साधारणी काचित् ।
नैवेयं संघर्षात्पलायने कापि सरणिः स्यात् ॥

(८४)

जीवनसफलीकरणे वैराग्यस्यैव धारेयम् ।
पूर्णतमं स्वाराज्यं जीवनमध्ये समादिशति ॥

(८५)

सर्वासां सिद्धीनां साम्राज्ये संस्थितो भूत्वा ।
दूरे संस्थित आसीन्मुक्तो मुक्तिप्रदाताऽयम् ॥

(८६)

देशस्य चतुष्कोणे पीठानां स्थापनां कृत्वा ।
धार्मिकमर्यादानां परिपालनभावमातेने ॥

(८७)

अद्यापि तेषु पीठेष्वासीनाः शंकराचार्याः ।
धार्मिकसद्भावानां प्रचारकार्येषु सज्जन्ते ॥

(८८)

शङ्करभगवत्पादैर्या या सरणिः प्रवर्तिता दिव्या ।
सा सैवाऽद्य समस्ते देशे परिपाल्यते सकलैः ॥

(८९)

सोऽयं भारतदेशोऽद्यत्वे तद्दिष्टमार्गाणाम् ।
अवलम्बनमथ कृत्वा जगद्गुरुत्वं वहन् जयति ॥

(९०)

इतिहासे स्वर्णमये लिखितं कालेन करुणारम्यम् ।
नानाऽसंख्यैश्चरितैस्तदिदं विभ्राजते ज्योतिः ॥

(९१)

दर्शन-विचार-सरणौ शांकरसिद्धान्तमुज्झित्वा ।
कोऽपि विचारः कर्तुं नतमामद्याऽस्ति शक्यसंपादः ॥

(९२)

स्तोत्राणां साहित्ये शङ्करवाक्यावलिः सेयम् ।
सन्तर्पयति नितान्तं मानसमद्यापि सहृदयावल्याः ॥

(९३)

शङ्करचरितसमर्चनविधया नूनं महाकवयः ।
छन्दोवितानमसमं नूनं विस्तारयन्त्यद्य ॥

(९४)

शास्त्रविचारावसरे शीर्षस्थः शङ्कराचार्यः ।
सर्वैरेवोद्ध्रियते नास्तिकहास्तिकपञ्चाननः सद्यः ॥

(९५)

खण्डनमण्डनसरणिः काऽपि समायोज्यतां नाम ।
शङ्करभगवत्पादा नो विस्मरणीयतां यान्ति ॥

(९६)

संन्यासिमण्डलानां सर्वस्वं शङ्कराचार्याः ।
संन्यासिनां समाजे श्रेष्ठत्वं सर्वसम्मतं चाऽस्ते ॥

(९७)

ग्रन्थाऽगारे तावद् विलोक्यते ग्रन्थनिचयेषु ।
शाङ्करसिद्धान्तानां ग्रन्थानां सा महीयसी संख्या ॥

(९८)

उत्तरदक्षिणभेदं विलोपयन्नूनमाचार्यः।
दक्षिणदेशोत्पन्नश्चोत्तरदेशेषु बभ्राम ॥

(९९)

जडजङ्गमजगतामथ सिद्धान्तेऽद्वैतमास्थाय।
ननु देशकालभेदे का भाषा शङ्कराचार्ये ॥

(१००)

गङ्गा-रेवामज्जनव्यत्यन्तेनादरेण संसाध्य।
नूनं पूतचरित्रो नेताऽऽसीच्छङ्कराचार्यः ॥

(१०१)

इति तावच्छ्रीगिरिधरशर्मचतुर्वेदतनुजन्मा ।
शिवदत्तचतुर्वेदः शङ्करशतकं निवेदयति ॥

पाणिनीयव्याकरणेऽद्वैतवादः

आचार्यश्रीरामप्रसादत्रिपाठी

व्याकरण-योग-तन्त्रागमविभागाध्यक्षचरः,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाराणसी

❀❀❀

प्रसीदता भगवता भक्ताय प्रोच्यते—अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम', 'स्वभक्तायाहं सर्वभूतेभ्योऽभयं ददामि' भयं दितीयाद्वै भवति, अतोऽद्वैतज्ञानदाने द्वितीयत्वज्ञानं नाशयामि। एवं च—आत्मस्वरूपावस्थानमेव भक्तमुद्दिश्य सम्पादितं परमात्मना। तदेव तु मुक्तिः। उक्तं च।

मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः, इति तत्र को मोहः कः शोकः सर्वत्र एकत्वमनुपश्यतः, इति च।

द्वयोर्भावो द्विता सैव द्वैतम् (स्वार्थेऽण् प्रत्ययः), न द्वैतमद्वैतम्, द्वैताभावः (भेदाभाव) तदस्यास्तीति अद्वैतं ब्रह्म (निर्धर्मकम्)। उच्यते च—शिवमद्वैतं तुरीयं मन्यन्ते, इति। 'एकमेवाद्वितीयं ब्रह्म' 'सर्वं खल्विदं ब्रह्म' 'नेह नानाऽस्ति किंचन' इत्यादि श्रुतिशतेनैतदेवाद्वैततत्त्वं पौनःपुन्येनोद्घोष्यमाणं वर्तते।

अयमद्वैतवादसिद्धान्तः प्रत्यक्षप्रमाणेनानुमानेनोपमानेनानुपलब्ध्या अर्थापत्त्या प्रमाणयितुं न शक्यते; किन्तु स्वतःप्रमाणभूता वेदा एव एनं सिद्धान्तं प्रमाणयन्ति। यतो हि—इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति, स वेदः, इति तैत्तिरीयसंहिताभाष्यभूमिकायां समामनन्ति श्रीसायणाचार्याः। अलौकिकोपायबोधकत्वं वेदत्वम्, ज्योतिष्टोम-दर्शपूर्णमासादिरिष्ट-(स्वर्गादि) प्राप्ति हेतुः, आत्मतत्त्वस्य श्रवणं मननं निदिध्यासनं च स्वस्वरूपस्याद्वैतस्यात्मतत्त्वस्य प्राप्ति हेतुः[1]। कलञ्जभक्षणवर्जनादिरनिष्टपरिहारहेतुरित्यर्थः। उक्तं च—

> प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
> एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥ इति।

एतादृशस्य महनीयस्य वेदस्याङ्गतां भजमानं पाणिनीयव्याकरणमपि तदीयसिद्धान्तात् पश्चात्पदं कथं भविष्यति? उक्तं च महर्षिणा श्रीपतञ्जलिना "सर्ववेदपारिषदं हीदं शास्त्रम्। तत्र नैकः पन्थाः शक्य आस्थातुमिति' "। अत्रोच्यते

१. आत्मा वाऽरे द्रष्टव्यः, श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ( )।

प्रदीपकृता श्रीकैयटेन—सर्ववेदाङ्गत्वादस्य सर्ववेदसाधारणं बहुलादिग्रहणोपेतं क्रियते। आनुषङ्गिको लौकिकशब्दसंस्कार इति वेदग्रहणं कृतमिति।

अयं भावः—वैदिकव्यवहारनिष्पत्तये व्याकरणेन शब्दसंस्कारः क्रियते। तत्र लौकिकव्यवहाराय शब्दसंस्कार आनुषङ्गिको बोध्यः। आचार्यपाणिनिना वैदिकशब्दानां संस्काराय बहूनि सूत्राणि, छन्दःपद-ब्राह्मणपद-मन्त्रपद-ऋषिपदघटितानि कृतानि।

पाणिनीयशिक्षायाम् व्याकरणं वेदपुरुषस्य मुखमिति प्रोच्यते—

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते"॥ (श्लोक ४१-४२)

यथा दर्शपूर्णमासयोरङ्गभूताः पञ्च प्रयाजाः, त्रयोऽनुयाजाः। प्रयाजा दर्शपूर्णमासाभ्यामादौ (पूर्वम्) अनुष्ठीयन्ते, अनुयाजास्तु पश्चात्क्रियन्ते, अतः कवचसदृशा इमे प्रोक्ताः। वर्म वा एतद् यज्ञस्य क्रियते—यत्प्रयाजानुयाजा इज्यन्ते इति। एतानि अङ्गानि अकृत्वा यदि दर्शादीनि विधीयेरन्, तदा विगुणा एव ताः स्युरिति निश्चप्रचम्।

तथैव मुखरूपं व्याकरणमङ्गं विहायाङ्गिनो वेदस्य कथं पदपदार्थबोधने व्यवस्था स्यात्। तद् विना वाक्यार्थबोधो न सम्भवति तस्यामवस्थायां कर्मानुष्ठानम् आत्मतत्त्वज्ञानं च नैव सम्भवति, इतिकृत्वा वेदानां नैरर्थक्यमापतेत्।

अतश्च वैदिकशब्दानामर्थबोधपुरस्सरं साधुत्वं ज्ञापयति एतच्छास्त्रम्। उक्तं च महामुनिना पतञ्जलिना—

कानि पुनः शब्दानुशासनस्य प्रयोजनानि? रक्षोहागमलघ्वसन्देहाः प्रयोजनम्, रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति[1]—इति।

प्रदीपोद्द्योतयोर्दर्शनेनास्य भाष्यस्येदं तात्पर्यमायाति यद् 'वेदार्थज्ञानपूर्वकं शुद्धतत्तन्मन्त्रैस्तद्विहितकर्मानुष्ठानेनान्तःकरणशुद्ध्या ब्रह्माभेदबुद्ध्या मोक्षरूपः पुरुषार्थो व्याकरणाध्ययनस्य पर्यवसितं प्रयोजनमिति। एतावतेदमागतम्—यत्पाणिनीयसूत्रेषु इदमवश्यमन्वेषणीयम्, यत्परमपुरुषार्थस्य मोक्षस्य स्वरूपम्, तत्साधनीभूतम् आत्मानात्मविवेचनम्, ब्रह्मणा सह जीवात्मनोऽभेदरूपाद्वैतज्ञानमित्यादि।

१. म० भा० २।१।५५।

अत्रोच्यते—समीचीनोऽयं प्रयासः, उक्तं च भाष्यकारेण—

"लक्षणं हि नाम ध्वनति, भ्रमति, मुहूर्तमपि नावतिष्ठते" इति। अत्र महामहोपाध्यायेन श्रीकैयटेन व्याख्यायते यद् मुहूर्तमपीति उभयत्रापि व्यापारान्नैकत्र विश्राम्यतीत्यर्थः। अनेनेदं सुष्ठु ज्ञातं भवति यत् सूत्राणां सर्वतोमुखी गतिरस्ति, न हि शब्दसंस्कारे एव तत्प्रवृत्तिरिति। यतश्च—छन्दोवत्सूत्राणि भवन्ति, इत्यपि भाष्यकृतोक्तं न विस्मरणीयम्।

यथा मन्त्रेषु अपूर्वा शक्तिरस्ति, तथैवैतेषु सूत्रेष्वपि। एकदा मधुमक्षिकया ममाङ्गुल्यग्रे दंशो विहितः, तत्र किमप्यौषधमलब्ध्वा मया "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः" इति सूत्रस्य तत्स्थानस्पर्शपूर्वकं जप आरब्धः, पञ्चाशत्संख्याकेनैव जपेन समस्ता पीडा दूरंगता। महान् विश्वासः समजनि, यत्पाणिनीयसूत्राणां नूनं मन्त्रत्वमस्ति। पूर्वमेकेन वृद्धवैयाकरणेनैकदोक्तम् यत् षट् पदानि सन्ति यस्मिन् सूत्रे, तस्य जपेन वृश्चिकदंशजनितस्य विषस्यापहरणं भवति, 'नेर्गदनद०' इत्यस्य सूत्रस्य, 'दाधर्तिदर्धर्तिदर्धर्षि०' इत्यस्य वा जपेन सर्पदंशजनितस्य विषस्यापहरणम्, 'अचतुरविचतुर०' इत्यस्य जपेन तृतीयकस्य चातुर्थिकस्य वा ज्वरस्यापसरणम्, 'वृद्धिरादैच्' इत्यस्य जपेन महान् अभ्युदयो भवति। एतच्छ्रुत्वा मया तदनुष्ठितम्, साफल्यं चावाप्तम्।

श्रीहरिणापि उच्यते—

"रूपादयो यथा दृष्टाः प्रत्यर्थं यतशक्तयः।
शब्दास्तथैव दृश्यन्ते विषापहरणादिषु[1]॥" इति॥

किमुत वक्तव्यम्—सूत्रस्य लक्षणमपि सूत्रस्य सर्वतोमुखत्वमभिव्यनक्ति, तथाहि—

"अल्पाक्षरमसन्दिग्धं सारवद् विश्वतो मुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः[2]॥"

अस्तु एतावत्सूत्रसामर्थ्यवर्णनस्येदमेव तात्पर्यम्, यत् केवला शब्दसिद्धिरेव नास्ति तत्फलम्; अपि तु अन्यदपि तिरोहितं प्रयोजनमस्ति।

प्रकृतमनुसरामः—'वृद्धिरादैच्' इति सूत्रमारभ्य 'अ अ' इति सूत्रे समापनमकारि भगवता पाणिनिना। तत्रोपक्रमोपसंहाराभ्यां ज्ञायते यथा अकारो वासुदेवो माया-

१. वा० प० १-१३८।
२. लघुशब्देन्दुशेखरे संज्ञाप्रकरणेऽभिनवचन्द्रिकाव्याख्यायाम्।

माश्रित्य द्विमात्रिकेण आकारात्मना वर्धते, तथैव भवान् ब्रह्मचर्ये गुरुसाहित्येन, गार्हस्थ्ये पत्नीसाहित्येन, वैदिकधर्मानुष्ठानं कुर्वन् वर्धताम्, अन्ते च यथा सृष्टिं विलाप्य परमात्मा 'अ अ' एव भवति, स्वस्वरूपे एवावतिष्ठते, तथैव भवान् अकारे परमात्मनि अवतिष्ठताम् । अयमेव मोक्षः ।

अयमकारो मायारहितं विशुद्धं ब्रह्म, मायासाहित्येन आकारादिरूपतां गच्छति । अथ च स्वरादिनिपातमव्ययमिति सूत्रेऽव्ययपदेनेदमेव विशुद्धं निर्धर्मकं ब्रह्म संकेतितमस्ति, अत एवाथर्वणश्रुतिस्तद्व्याख्यानप्रसङ्गे प्रोक्ता भगवता भाष्यकृता—

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ इति ।

स्त्रीपुंनपुंसकानि सत्त्वगुणाः । एकत्वद्वित्वबहुत्वानि च । एतानर्थान् केचिद् वियन्ति, केचिन्न वियन्ति । ये न वियन्ति, तदव्ययम् ।

अत्र प्रदीपकारेणोच्यते—यन्न व्येतीति नानात्वं न गच्छतीति सत्त्वधर्मा गृह्णातीत्यर्थ इति[1] ।

अनेन स्पष्टं प्रतीयते—यल्लिङ्गसंख्यादिसकलधर्मरहितं यद् वस्तु, तदेवाव्ययम्, तच्च निर्धर्मकं ब्रह्मैवास्ति । अव्ययमिति महासंज्ञाबलेनायमर्थो भाष्यकृता व्याख्यातः । ब्रह्म सच्चिदानन्दरूपतया शब्दरूपतया च वेदेषु निर्दिष्टम्, अग्रे तद् व्याख्यास्यते । मायासम्बन्धेनेदमेव परमात्म-परमेश्वरपदेन कीर्त्यमानं सृष्टिं विदधाति, चित्ताद्यन्तःकरणेन सम्बद्धं सत् जीवात्मपदेन प्रोच्यमानं नानाविधभोगपारवश्यमनुभवति । एतच्च संकेतितमस्ति भगवता सूत्रकृता—

"इन्द्रियमिन्द्रलिङ्गमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा[2]" इति सूत्रं विदधता । तथा हि—

"इन्द्र आत्मा, तस्य लिङ्गम्, करणेन कर्तुरनुमानात्, इत्येवमुक्तमत्र सूत्रे श्रीमता भट्टोजिदीक्षितेन शाब्दिकमूर्धन्येन । अयं भावः—

अत्र सूत्रे इन्द्रपदमात्मपरम्, तस्य लिङ्गमिति विग्रहे इन्द्रशब्दाद्घप्रत्यये 'आयनेयीय०' इति सूत्रेण[3] तस्येयादेशेऽकारलोपे इन्द्रियशब्दस्य निष्पत्तिर्भवति । तत्रेन्द्रस्य

---

१. म० भा०—१।१।३७ ।
२. पा० सू० ५।२।९३ ।
३. पा० सू० ७।१।२ ।

(आत्मनः) लिङ्गं ज्ञापकमनुमापकमिन्द्रियं कथं भवति, इति जिज्ञासायामुक्तम्—करणेन कर्तुरनुमानात्। करणं हि सकर्तृकं भवति—छेदनादि क्रियायां कुठारः करणमस्ति, तत्र कर्ता कश्चन लौहकारादिर्भवत्येव। एवमेवेन्द्रियाणां चक्षुरादीनां दर्शनादि-क्रियायामात्मकर्तृकत्वमस्त्येव।

किन्त्वियमाशङ्का भवति—यत् शरीररूपे पक्षे सात्मकत्वसाधने इन्द्रियाणां लिङ्गत्वं न युज्यते, तेषामतीन्द्रियत्वात्, लिङ्गज्ञानमन्तरा अनुमितेरसम्भवात्। अतः निमीलनोन्मीलनादिक्रियया शरीररूपे पक्षे पूर्वमिन्द्रियस्य चक्षुरादेरनुमितिः कर्तव्या, तदनु लिङ्गज्ञाने जाते सति आत्मरूपकर्तुरनुमितिः। हस्तपादादीनां कर्मेन्द्रियाणां विषये तु चेष्टादिना तेषामनुमितौ सत्यामात्मानुमितिरिरिति यावत्।

अनुमानाकारस्तु—इदं शरीरं सात्मकम्, चक्षुरादीन्द्रियवत्त्वात्। पुनश्च—इदं शरीरं चक्षुरादीन्द्रियवद् निमेषोन्मेषादिक्रियावत्त्वात्। यदि शरीरत्वावच्छेदेन साध्य-सिद्धिरभिप्रेयते, तदा यन्नैवं तन्नैवमिति व्यतिरेकव्याप्तिरेव सम्भवति। शरीरत्वसामा-नाधिकरण्येन यत्किञ्चिच्छरीरे तु स्वशरीरं दृष्टान्तीकृत्यान्वयव्याप्तिरपि युक्ता स्यात्। अत्रायं विवेकः—अनेनानुमानेन यस्यात्मरूपकर्तुरनुमितिर्भवति, स जीवात्मैव भवितु-मर्हति, तस्यैवेन्द्रियवत्ता वर्तते। परमात्मा तु इन्द्रियरहित एव। किन्तु इन्द्रेण सृष्टम्, इन्द्रेण दत्तमिति विग्रहद्वये तु इन्द्रः परमात्मैव भविष्यति, जीवात्मनः इन्द्रियस्रष्टृत्वदा-तृत्वयोरसम्भवात्। पुनः 'इन्द्रेण जुष्टम्' इति शब्दबलेन इन्द्रेण दुर्जयमिति विग्रहे च जीवात्मा एव बुध्येत, तेनैव इन्द्रियस्य सेवनात्, दुर्जयाच्च।

अतश्चात्र सूत्रे इन्द्रपदेन जीवात्मपरमात्मनोरुभयोर्बोध इष्टः सूत्रकारस्येति आत्म-त्वेन द्वयोरभेदः प्रतीयते।

मायारूपोपाधिनाऽऽत्मनः परमात्मपदवाच्यता, चित्ताद्यन्तःकरणरूपोपाधिना जीवात्मपदवाच्यता भवति। अस्मिन्नपि अंशेऽत्र संकेतः कृत एवास्ति। अन्यथा उक्तेषु अर्थेषु इन्द्रियशब्दनिष्पत्तिर्न सम्भवेत्।

वेदसिद्धान्तानुसारित्वादत्र तादृशोपाधिता मन्तव्यैव। अथ च चित्तवति नित्य-मिति सूत्रे[1] "जीवे नित्य"मित्यनुक्त्वा चित्तवति इति कथनमपि चित्ताद्यन्तःकरण-स्यात्मोपाधित्वमभिव्यनक्ति।

व्रीह्यादिभ्यश्चेति सूत्रीयव्रीह्यादिगणे मायाशब्दस्य पाठेन मायाशब्दाद् मत्वर्थे इनि प्रत्यये सति 'मायिन्' शब्दो निष्पद्यते।

---

१. पा० सू० ५।१।८९।

अत्र परमात्मनो मायोपाधिता व्यक्तीक्रियते। उक्तमपि—मायां तु प्रकृतिं विद्यान् मायिनं तु महेश्वरमिति। यत्रार्थे यस्य शब्दस्य प्रयोगो भवति वेदे, शिष्टलोके च, तत्रार्थे तस्य स्वीकारे न काचन विप्रतिपत्तिरिति कृत्वा वैदिकसिद्धान्तानुरोधेन मायाशक्तिसम्बन्धेनात्मनः परमात्मता समागता।

एवं च जीवात्मपरमात्मनोरुपाधिद्वयस्य प्रहाणे अभेदः स्फुट एव। इमौ जीवात्मानौ एकस्यैवाऽऽद्वयस्य ब्रह्मणः सोपाधिकस्वरूपभूतौ मन्तव्यौ, अद्वैतसिद्धान्तानुरोधात्। 'अ अ' इत्यनेन मोक्षस्य सूचनाच्च।

अस्मदो द्वयोश्चेति सूत्रीयं भाष्यं दृष्ट्वा स्पष्टं वक्तुं शक्यते, यच्छरीरस्य इन्द्रियाणां चात्मोपाधित्वं स्वीकृतमस्ति। शरीरोपाधितयोच्यते अहं पश्यामि। इन्द्रियोपाधित्वे तु वयं पश्यामः, इति व्यवह्रियते। इन्द्रियाणां बहुत्वाद् बहुवचनोपपत्तिः। यद्यपि एकस्यैवेन्द्रियस्य चक्षुषः दर्शनक्रियायां प्राधान्यम्, तथापि अन्येषामिन्द्रियाणामौदासीन्येन संविधातृत्वात् कर्तृत्वं विवक्षितम्, अथवा तदवच्छिन्ने आत्मनि बहुत्वमारोपितम्। यदेन्द्रियाणां करणत्वविवक्षा चित्ताद्यन्तःकरणाऽवच्छिन्नस्यात्मनः कर्तृत्वविवक्षा, तदा तु अहमक्ष्णा पश्यामि इति व्यवहारः।

एवमेव उपाधिभेददात्मनो द्वित्वकल्पनया-आत्मानमात्मना जानाति इति प्रयोगः। तत्रान्तःकरणावच्छिन्न आत्मा कर्ता, शरीरावच्छिन्न आत्मा कर्म इति बोध्यम्। अत एवोक्तं भूषणसारे[1]—

'आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते' इत्यादि।

आत्मपदेन क्वचिच्छरीरस्य, क्वचिन्मनसः, क्वचिदिन्द्रियाणां ग्रहणं भवति, इत्यन्यत्। एवमेवेन्द्रपदेनापि नेन्द्रस्य परस्येत्यादिसूत्रे देवराजस्येन्द्रपदवाच्यता, सापि तत्र तत्र प्रामाणिकी एव।

एतावता इदमागतम् यद् जीवात्मा चित्ताद्युपाधिविशिष्टः, परमात्मा मायोपाधिविशिष्टः पाणिनीयदर्शने स्वीक्रियत एव।

'मायायामण्' इति सूत्रेण[2] असुराणां मायेति विग्रहे आसुरीमाया इति प्रयोगो निष्पाद्यते। अनेन ज्ञायते यत् सुराणामपि माया भवति। एवमेव जीवात्मपरमात्मनोरपि मायाशक्तिर्द्रष्टव्या।

---

१. वै० भू० सा०—धात्वर्थनि०।
२. पा० सू० ४।४।१२४।

"सूत्रकृत्सम्मताद्वैतवादस्यमहाभाष्येऽपि समर्थनम्"

महाभाष्यकृता महामुनिना श्रीपतञ्जलिनाऽपि सूत्रसम्मतमद्वैतवादं भृशं समर्थयते। तथा हि—

१. अथ शब्दानुशासनमिति प्रथमवाक्येनैव[1] जीवात्मपरमात्मनोः संकेतः कृतोऽस्ति। शब्दानुशासनस्य शब्दसाधुत्वज्ञानं फलम्, तदाश्रयत्वेत जीवात्मनः संकेतः, साधुत्वज्ञानजन्यपुण्यदातृत्वेन च परमात्मनः संकेतो मन्तव्यः। एतयोर्द्वयोरभावे शब्दानुशासनं जलताडनादिवन्निष्फलमेव स्यात्।

२. शास्त्रज्ञानपूर्वकं साधुशब्दप्रयोगेण धर्मोत्पत्तिरित्येव निर्णयो दत्तो भगवता भाष्यकृता—"शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन" इति वदता[2]। अत्राऽपि स्पष्टं प्रतीयते यदीदृशं प्रयोगकर्ता जीवात्मैव, तदीयाभ्युदयव्यवस्थाता परमात्मैव भवितुमर्हति।

३. "सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते।

अत्रोद्द्योतकृता शाब्दिकशिरोमणिना श्रीनागेशेनोच्यते—तदध्ययनतन्मूलव्याकरणाध्ययनाभ्यां पुष्पितः। फलितः—तदर्थभावनया जनिततत्त्वज्ञानरूपफलः। चन्द्रतारकवत्प्रतिमण्डित इत्यनेनास्यानादित्वं सूचयति। तादृशोऽयं वेदराशिर्वेदितव्यः, बोध्यबोधकयोरभेदात्। सर्ववेदेति-सर्ववेदाध्ययनजन्यपुण्यफलस्य चित्तशुद्धिरूपस्य प्राप्तिरस्य ज्ञानेऽध्ययनमात्रे भवति। इदमेव पूर्वं पुष्पितत्वम्। तादृशपुत्रवत्त्वेन च मातापित्रोः स्वर्गे पूजा भवति, यथा कृतराजसूययुधिष्ठिररूपपुत्रेण पाण्डोः स्वर्गे पूजेति[3]।

अनेन भाष्येण तद्व्याख्यानभूतेनोद्द्योतेन च पूर्वजन्मनि कृतस्य कर्मणः स्वर्गादिफलं भवति, तस्य नियामकः, सर्वज्ञं परमात्मानमन्तरा कोऽन्यो भवितुमर्हति। कर्मफलभोक्तृत्वेन जीवात्मा स्वीकार्य एव। एवं च परलोकवादः, जन्मान्तरवादः, जीवात्मपरमात्मनोः सत्तावादश्च राजर्षिपाण्डुदृष्टान्तद्वारा सुष्ठु समर्थितः।

---

१. म० भा०—१।१।१।
२. म० भा०—१।१।१।
३. म० भा०—१।१।१०१।

४. सिध्यतेरपारलौकिके इति सूत्रीयभाष्यव्याख्याने प्रदीपे उद्द्योते चापारलौकिके इत्यंशस्य विवरणेऽदृष्टस्य चर्चा साधुतरं कृताऽस्ति[१]। अस्तिनास्तिदिष्टं मतिरिति सूत्रे भाष्ये च दिष्टपदेनादृष्टमेव गृह्यते[२]। जगति दृश्यते कश्चनैकः पुरुषः शिविकारूढोऽस्ति, अन्ये तां शिविकां स्वस्कन्धे निधाय वहन्ति। कश्चन् राजगृहे जातो नानाविधं सुखमुपभुङ्क्ते, अन्यो निर्धनपुत्रो भूत्वा बहुविधं दुःखमनुभवति। तत्रोभयत्र विचित्रकार्यद्वये किं कारणं परिलक्ष्यते, ऋते धर्माधर्मरूपादृष्टमन्तरा। तच्चाचेतनमदृष्टं चेतनाधिष्ठानमन्तरेण कथमपि तादृशं फलं दातुं न क्षमते, न ह्यचेतनो रथादिः चेतनाधिष्ठानं विना पदमपि गन्तुं प्रभवति। अतश्चादृष्टाधिष्ठातृतया तत्फलप्रदानाय सर्वज्ञः परमेश्वरः स्वीक्रियते व्याकरणदर्शने। तत्फलभोक्तृतया जीवात्मसत्ताऽपि स्वीकृतैव।

५. एवमेव 'क्षेत्रियच् परक्षेत्रे चिकित्स्यः' इति सूत्रे तद्भाष्यव्याख्याने च जन्मान्तरवादमुद्रया जीवात्मपरमात्मनोः सत्ता साधु सम्मानिता। अन्यथा परजन्मनि अधर्मरूपादृष्टजन्यव्याधेः सम्भव एव कथं स्यात्, यस्य चिकित्सा भवेत्।

६. तेन प्रोक्तमिति सूत्रं व्याख्यातवता भगवता भाष्यकृता वेदार्थस्य नित्यत्वमभ्युपेतम्। तत्रोद्द्योतकारेणोच्यते—अर्थशब्देनात्रेश्वरः। मुख्यतया तस्यैव सर्ववेदतात्पर्यविषयत्वात्, 'वेदैश्च सर्वैरहमेव वेद्यः' इति गीतोक्तेः, इति। अनेन विवरणेन स्पष्टमेव परमेश्वरसत्ता, वेदादेशपरिपालकत्वेन जीवात्मसत्ता च स्वीकरणीयैव स्यात्।

आचार्येण श्रीभर्तृहरिणा जीवात्मपरमात्मनोः सत्ता शब्दब्रह्माभेदेन प्रत्यपादि।
यथा हि— "तस्य शब्दार्थसम्बन्धरूपमेकस्य दृश्यते।
तद् दृश्यं दर्शनं द्रष्टा दर्शने च प्रयोजनम्[३]॥"

अत्र दृश्यपदेन विषयाः द्रष्टृपदेन जीवाः, दर्शनपदेन साध्यस्वभावक्रिया च विवक्षिताः सन्ति। कारिकामिमां व्याचक्षाणेन श्रीहेलाराजेनोच्यते—"द्रष्टापि जीवात्मा" अविद्याकृताऽवच्छेदो नियतः संसारी भोक्ता ब्रह्मैव, चेतनत्वाद् भावतो भेदानुपपत्तेरिति। अत्र ब्रह्मणो मायोपाधिकत्वे न परमेशसत्ताऽपि ज्ञायते।

अथ च ब्रह्मकाण्डे स्वयं स्वोपज्ञवृत्तौ पद्यमेकमुद्धरता श्रीहरिणा जीवस्य स्वरूपं स्फुटमुक्तम्। तथाहि—

---

१. म० भा०—६।१।४९।
२. म० भा०—६।१।४९।
३. वा० प०—३ का०, द्र० सं० १४।

"प्रविभज्यात्मनात्मानं सृष्ट्वा भावान् पृथग्विधान् ।
सर्वेश्वरः सर्वमयः स्वप्ने भोक्ता प्रवर्तते[1] ॥" इति ।

अयमाशयः—सर्वेश्वरः सर्वस्य स्वनिर्मितप्रातिभासिकस्वाप्नप्रपञ्चस्येश्वरः, न तु व्यावहारिकस्य जाग्रत्प्रपञ्चस्य, तस्येशरचितत्वात् । सर्वमयः सर्वस्वाप्नप्रपञ्चरूपः, तदुपादानत्वात् । भोक्ता जीवः, आत्मना स्वयमेवात्मानं शब्दतदर्थाकारेण प्रविभज्य पृथग्विधान् भावान् पदार्थान् सृष्ट्वा स्पप्ने प्रवर्तते ।

भोक्तृभोक्तव्यभोगरूपैरात्मानं प्रविभज्य व्यवहरति । तदानीं द्वितीयस्याभावान्न सहकारिणमपेक्षते, 'न तु तद्द्वितीयमस्ति' इति श्रुतेः । एवं च स्वाप्नप्रपञ्चं प्रति जीवस्याभिन्ननिमित्तोपादानत्वं जाग्रत्प्रपञ्चे ईशस्येव समर्थितम् । धर्माधर्मौ वासना च जीवात्मस्वरूपे एव समाविष्टा, इति न तेषां भिन्नत्वेन सहकारिता इति । पुनश्च—

"तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते[2] ॥

इति कारिकया परमात्मसत्ता स्फुटं संकेतिता श्रीहरिणा । यतश्चात्र स्वयं साधुशब्दप्रयोगजनितेन धर्मविशेषेणाभ्युदयो भवति—इति व्याख्यायते तेन । तत्र तस्याभ्युदयस्य नियामकः परमेश एव भवितुमर्हति । आश्रयस्तु जीव इत्यन्यत् ।

जीवात्मपरमात्मविषयिणीं चर्चां परिसमाप्य तयोः साक्षिविषयिकाऽपि ईषच्चर्चाऽवश्यं कर्तव्या वर्तते, अद्वैतवादिभिः कृतत्वात् । तत्र चित्ताद्यन्तःकरणोपहिता चिद् जीवसाक्षिपदेन संकीर्त्यते । 'साक्षाद् द्रष्टरि संज्ञायामिति' सूत्रं विवृण्वता भाष्यकृतोच्यते[3] ।

संज्ञायामिति किमर्थम् ? त्रिभिः साक्षाद् दृष्टं भवति—यश्च ददाति, यस्मै च दीयते, यश्चोपद्रष्टा, तत्र सर्वत्र प्रत्ययः प्राप्नोति । संज्ञाग्रहणसामर्थ्याद्धनिकान्तेवासिनोर्न भवति—इति । अत्र प्रदीपकृतोच्यते—अन्तेवासिशब्देन शिष्यसाधर्म्यात् पारतन्त्र्यादधर्मण उच्यते—इति ।

एतावतेदमायातं यदुत्तमर्णाधमर्णयोर्मध्ये यदुपद्रष्टा समीपदर्शी, स साक्षी भवति ।

---

१. वा० प०—ब्र० का० १२७—स्वोपज्ञवृत्तौ ।
२. वा० प०—१।१३१ ।
३. म० भा० ५।२।९१ ।

प्रकृते चोत्तमर्णो जीवः, अधमर्णश्च परमात्मा। यतो हि जीवात्मना कृतस्य कर्मणः फलं प्राप्ते काले परमेशेन प्रदीयते। मध्येकालं स्वसमीपे न्यासरूपेण स्थाप्यते। अत एव—'धारेरुत्तमर्णः' इति सूत्रे 'भक्ताय मोक्षं धारयति हरिः' इति समुदाह्रियते शिष्टैः। एवं च जीवकृतकर्मणः साक्षी जीवसाक्षी इति व्यपदिश्यते।

मायाऽवच्छिन्नस्य परेशस्य सृष्ट्यादिकर्मसाक्षी 'परेशसाक्षी' इति व्यपदेशं लभते। अयं च माययोपाधिनोपहितो न तु अवच्छिन्न इति विशेषः। अयमपि मायावच्छिन्नेश्वरस्य शुद्धब्रह्मणश्च मध्ये भवति।

अस्तु, एतद्विषयेऽधिकमनुक्त्वा मायाविषयको विचारः सूत्रमते ईषत्कृतोऽपि भाष्यादिमतेऽकृत उपक्रम्यते। या च शुद्धं ब्रह्मस्वाऽवच्छेदेन परमात्मसंज्ञां स्वकार्याऽन्तःकरणाऽवच्छेदेन जीवात्मसंज्ञां च प्रापयन्ती जननमरणाविच्छेदलक्षणं नानाविधं प्रपञ्चमुद्भावयति।

सा चेयं माया—अविद्या, अज्ञानम्, अजा, अव्यक्तम्, प्रकृतिः, तम इत्यादि शब्दैर्व्यवह्रियमाणा वेदे शास्त्रे लोके च परिलक्ष्यते। तथा हि—

मायामेतां तरन्ति ते, अविद्यायामन्तरे वर्तमानाः, अज्ञानेनावृतं ज्ञानम्, अजामेकां लोहितशुक्लकृष्णाम्, महतः परमव्यक्तमव्यक्तात् पुरुषः परः। तमसो मा ज्योतिर्गमय—इत्यादीनि वचनानि सन्ति मायायास्तत्तन्नामसमर्थकानि।

तत्र मिमीते शुद्धं ब्रह्म परिच्छिनत्ति इति व्युत्पत्तौ माधातोर्या प्रत्यये सति सार्थकं नाम निष्पन्नं भवति माया-इति। मेघेन यथा सूर्यमण्डलस्य परिच्छेदो भवति, तथैव मायया ब्रह्मणि परिच्छेदो ज्ञातव्यः।

एवमेव संज्ञायां समजनिषदनिपत० इत्यादि सूत्रेण[1] विद्यते ज्ञायते आत्मतत्त्वमनयेति विग्रहे विद्धातोः क्यपि सति विद्याशब्दोऽध्यात्मविद्यापरो निष्पद्यते। विरोधार्थकेन नञा सह समासेऽविद्याशब्दो व्युत्पाद्यते। तस्यार्थोऽस्ति विद्याविरुद्ध इति।

महाभाष्ये—स्तनकेशादिलिङ्गलक्षणं खट्वा, वृक्षादौ अदृष्ट्वा—"असत्तु खट्वा वृक्षयोर्लिङ्गं द्रष्टव्यम्। कथं पुनरसन्नाम लिङ्गं शक्यं द्रष्टुम्? मृगतृष्णावत्। तद्यथा मृगास्तृषिता अपां धाराः पश्यन्ति, न च ताः सन्ति। गन्धर्वनगरं यथा—यथा गन्धर्वनगराणि दूरतो दृश्यन्ते, उपसृत्य च नोपलभ्यन्ते, तद्वत् खट्वा वृक्षयोरसल्लिङ्गं द्रष्टव्यम्, इत्युक्तम्। तत्र गन्धर्वनगरं दृष्टान्तं व्याचक्षाणेन प्रदीपकारेणोच्यते—

---

१. पा० सू० ३।३।९९।

"नहि गन्धर्वनगरमन्तरिक्षे कदाचिदुपलब्धम्, न च तत्र तत्सदृशवस्त्वन्तरग्रहणम्, येन गन्धर्वनगरं स्मर्येत, तस्मादसतामपि भावानामचिन्त्यान्निमित्तसामर्थ्याद् यथोपलम्भस्तथा खट्वादावपि स्त्रीत्वादेरित्यर्थः । तदुक्तं हरिणा—

यथा सलिलनिर्भासो मृगतृष्णासु जायते ।
जलोपलब्ध्यनुगुणाद् बीजाद् बुद्धिर्जलेऽसति ॥
तथैवाव्यपदेश्येभ्यो हेतुभ्यस्तारकादिषु ।
मुखेभ्य इव लिङ्गेभ्यो भेदो लोके व्यवस्थितः ॥ इति ॥

अत्रोद्द्योतकृता श्रीनागेशेनोच्यते—"अचिन्त्येति—अनाद्यविद्यारूपमिथ्यावासनावशादित्यर्थः । अदृष्टविशेषवशादित्यर्थ इत्यन्ये । मृगतृष्णासु तद्विषयमरुमरीचिकासु । सलिलनिर्भासं स्वयमेव विवृणोति—बुद्धिरित्यादि, असति जले तद्बुद्धिरित्यर्थः । बीजं—मिथ्यावासनादि । अव्यपदेश्येभ्यः—अचिन्त्येभ्यः । हेतुभ्यः—मिथ्यावासनादृष्टरूपेभ्यः, इत्यर्थ इति'[1] ।

एतावता प्रघट्टकेनेदमायातम् यद् अविद्या नाम मिथ्यावासना इति—अनुपदमत्रैवोद्द्योतकृता तस्याः स्वरूपमित्थं व्याख्यातम्—एषा हि यावद्विशेषदर्शनम्, अधिष्ठाननिष्ठसत्त्वेनारोपितसत्त्ववती वस्तुतोऽसती एवास्ते । न तु सत्त्वासत्त्वाभ्यामनिर्वचनीया, तथा सति सद्भेदेऽसत्त्वम्, असद्भेदे सत्त्वमित्युभयरूपतैवापतति, न त्वतिरिक्तत्वम् । अत एव परमार्थसारे "सत्यमिव जगदसत्यं मूलप्रकृतेरिदं कृतं येन" इत्यादि वचनं स्वारस्यं भजते ।

एवमेव वैयाकरणसिद्धान्तलघुमञ्जूषायामपि श्रीनागेशेनोच्यते—

भ्रमात् संस्कारतोऽप्यन्या मण्डूकमृदुदाहृतेः ।
अविद्यानादिभावात्मा मता वाचस्पतेरिह ॥ इति ॥

कल्पतरुकारस्य श्लोकमिममुद्धरता मञ्जूषाकृता भ्रमतत्संस्कारयोरेव अविद्यात्वेनाभ्युपगम इति सूच्यते । अथ च वाचस्पतिपदोपादानेन सूत्रभाष्यकृतोस्तदुपज्ञमविद्यास्वरूपं नाभिमतमिति प्रतीयते । अस्तु—मण्डूकानां निःसरणं मृदस्तदैव संगतं स्यात्, यदा भ्रमतत्संस्काररूपाऽविद्याऽभिमता स्यात् । मण्डूकां यथा मृत्तिकात उत्प्लुत्योत्प्लुत्य बहिर्निःसरन्ति, तथैव अविद्यारूपाद् वासनासमूहाद् बहुविधः प्रपञ्चः समुद्भवति, वासनानां नानात्वाद् दृष्टान्तसंगतिः ।

---

१. म० भा०, प्र०-उ०—४।१।१।सू० ३ ।

अविद्याविषये वाक्यपदीयं तट्टीका च—

वाक्यपदीये तृतीयकाण्डे जातिसमुद्देशे षट्त्रिंशकारिकाव्याख्यायां श्रीहेलाराजेनोच्यते—सर्वशक्त्यात्मभूतत्त्वाद् ब्रह्मणोऽनेकविकारप्रदर्शनसामर्थ्यलक्षणा अविद्याख्याशक्तिः कार्यभेदादुपचरितनानात्वा समस्ति—इत्यागमविदः[1] ।

तस्मिन्नेव समुद्देशे अशीतितमकारिकाविवरणे उच्यते—अक्रमेऽपि[2] ब्रह्मणि भेदावभासनम् अविद्याकृतम् । तत्रैव क्रमाऽवभासनं कालाख्यस्वातन्त्र्यशक्तिकृतम् । ते च शक्ती न ब्रह्मणो भावात् परमार्थतो भिन्ने इति स एव तत्त्वत एवं चकास्ति—इति । तत्रैव सप्तत्रिंशकारिकायामुच्यते—क्रमाख्या कालशक्तिः, ब्रह्मणो जन्मवत्सु पदार्थेषु जन्मादिक्रियाद्वारकमेव पौर्वापर्येणावभासोपगमविधायिनी । तृतीयकारिकायां श्रीहरिणोच्यते—

"अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।
जन्मादयोः विकाराः षड् भावभेदस्य योनयः[3] ॥ इति ॥

अयं भावः—ब्रह्मणः कालशक्त्या जगतो जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यतीत्येवंरूपा षड् विकारा भवन्ति । तृतीयकाण्डे नवमसमुद्देशे—जगदुत्पत्त्यादिषु कालस्य निमित्तकारणता प्रतिबन्धाभ्यनुज्ञारूपशक्तिद्वयसम्बन्धः, उपाधिभेदाद्भेदवत्ता च सम्यक् प्रत्यपादि । यथा हि—

उत्पत्तौ च स्थितौ चापि विनाशे चापि तद्वताम् ।
निमित्तं कालमेवाहुर्विभक्तेनात्मना स्थितम्[4] ॥
तमस्य लोकयन्त्रस्य सूत्रधारं प्रचक्षते ।
प्रतिबन्धाभ्यनुज्ञाभ्यां तेन विश्वं विभज्यते[5] ॥
तस्यात्मा बहुधा भिन्नो भेदैर्धर्मान्तराश्रयैः ।
नहि भिन्नमभिन्नं वा वस्तु किंचन विद्यते[6] ॥ इति ॥

कालस्य द्वे शक्ती—प्रतिबन्धशक्तिः, अभ्यनुज्ञाशक्तिश्च ।

---

१. वा० प० ३—वा० स० ३६ ।
२. ,, ३ ,, ।
३. ,, १–३ ,, ।
४. तथैव—३-९।३।
५. ,, ,,—३-९।४।
६. ,, ,,—३-९।६।

उक्तं च—

द्वे एव कालस्य विभोः केषाञ्चिच्छक्तिवर्त्मनि ।
करोति याभ्यां भावानामुन्मीलननिमीलने[१] ॥ इति ॥

यथा अविद्यायाः शक्तिद्वयमस्ति—आवरणशक्तिः, विक्षेपशक्तिश्च, तद्वदत्रापि बोध्यम् ।

स्वयं श्रीहरिणा स्वोपज्ञवृत्तौ कालस्य जगतो जन्मादौ सहकारिकारणत्वं स्वातन्त्र्यापरपर्यायत्वं च स्पष्टमुक्तमस्ति । तथाहि—कालाख्येन स्वातन्त्र्येण सर्वाः परतन्त्रा जन्मादिमय्यः शक्तयः, तत्समाविष्टाः कालशक्तिवृत्तिमनुपतन्ति ।

सर्वेषां हि विकाराणां कारणान्तरेषु सत्स्वपि अपेक्षावशात् प्रतिबन्धजन्मनामभ्यनुज्ञया सहकारिकारणं काल इति[२] ।

कालसिद्धान्तदर्शिन्याम्—ब्रह्मणोऽवान्तरशक्तयः कालाभिधेया जगतो जन्मादौ उपादानकारणं भवन्ति, कालशक्तिस्तु निमित्तकारणम्, अनयैव कालाख्यया स्वातन्त्र्यशक्त्या ब्रह्मणो जगत्कर्तृत्वं निर्वहति, स्वातन्त्र्यस्य कर्तृप्रयोजकत्वात् । यथाह भगवान् पाणिनिः 'स्वतन्त्रः कर्ता' इति[३] ।

अन्यञ्च—कालात् साधुपुष्प्यत्पच्यमानेषु[४], उप्ते च[५] इत्यादि सूत्रेषु कालशक्तेः प्रतिबन्धाभ्यनुज्ञयोः संकोचः स्पष्टं प्रत्यपादि भगवता पाणिनिना । तथा हि—तत्र वसन्ते पुष्पन्ति वासन्त्यः कुन्दलताः । शरदि पच्यन्ते शारदाः शालयः । हेमन्ते उप्यन्ते हैमन्ता यवाः, एभिरुदाहरणैः परिज्ञायते यद् वसन्तादिकालः कुन्दलताविकसनादिकमभ्यनुजानाति । तदितरः कालस्तु तत्प्रतिबध्नाति ।

एवमेव भगवता भाष्यकृताऽपि—'येन मूर्तीनामुपचयापचयाश्च लक्ष्यन्ते, तं कालमाहुः' इत्युक्तम्[६] ।

तस्यैव कयाचित् क्रियया युक्तस्याहरिति च भवति, रात्रिरिति च । कया क्रियया ? आदित्यगत्या । तयैवासकृदावृत्तया मास इति भवति, संवत्सर इति च[७] ।

१. वा०प०—३-९।५६।
२. वा० प०, स्वोपज्ञवृत्तिः १-३।
३. श्रीहाराणचन्द्रभट्टाचार्यकृता—पृ० २५-२६ ।
४. पा० सू०—४-३-४३।
५. तत्रैव—४-३-४४।
६. प० भा० २।२।५।
७. म० भा० प्र० २।२।५।

अत्र प्रदीपकृतोच्यते—तरुतृणलताप्रभृतीनां कदाचिदुपचयोऽन्यदा त्वपचयः, स प्रत्ययान्तराविशेषेऽपि यत्कृतः, स काल इत्यर्थः। यद्येवं तस्यैकत्वात् कथमहरादिविभागः, इत्याह—तस्यैवेति, परोपाधिक एव सर्वस्य भेदः[1]।

एवं च—येनेति भाष्योक्त्या कालस्यैकत्वं सूचितम्, तथापि सूर्यक्रियाया उपाधित्वेन क्षणादिव्यवहारः सुयोज्यः। एतावता इदमायातम्—यत्सूत्रभाष्यकृतोरपि मते कालशक्तेः जगज्जन्मादौ कारणताऽस्त्येव।

हर्युपज्ञटीकामनुसृत्य व्याचक्षाणेन परमगुरुवरश्रीरघुनाथशर्ममहोदयेन अम्बाकर्त्र्यामुच्यते—भगवतः कालाख्या कर्तृत्वशक्तिरभिन्नापि क्रमवद्भिर्मात्रारूपैः = तत्तत्कारणशक्तिरूपैः, मीयन्ते निर्मीयन्ते पदार्था आभिरिति मात्राः शक्तयः प्रविभज्यमाना विकारमात्रागतं भेदरूपं संसर्गात् स्वस्मिन्नध्यारोपितं स्वाधिष्ठाने भगवत्यध्यारोपयति।

एवं च कालशक्तेरेकत्वेऽपि नानात्वं स्वसंसृष्ट—तत्तत्कारणशक्तिनानात्वप्रयुक्तं यत्राध्यारोपितेन च नानात्वेन ब्रह्मणो नानात्वमध्यारोपितमित्यायातम्। सर्वाश्च कारणशक्तयो भगवतः स्वातन्त्र्याख्यां कर्तृत्वशक्तिं कालाख्यां नातिवर्तन्ते; किन्तु तद्वृत्तिमनुपतन्त्येवेति नियतकाले प्रतिबन्ध्यभ्यनुज्ञे सर्वेषां भावानामिति।

एषा च कालशक्तिर्भगवतः शब्दब्रह्मण आत्मभूता नित्या, सर्वेषां भावानां स्वस्वोपादानादिगताः कारणशक्तयस्त्वनित्याः, आश्रयानित्यत्वात्, तासां सहकारिकारणं कालः।

उपादानादिशक्तयः कालशक्तिश्च कारणान्तराधीनवृत्तयः, इति न सदाजन्मादयो कारणान्तराणां सदाऽसन्निधानात्।

जन्मादयश्चोपादानशक्तीनां परिणामाः क्रमवन्तः। अत एव परिणामिन्यः शक्तयोऽपि क्रमवत्यः। तासां क्रमरूपैः कालशक्तेरपि तत्संसृष्टायाः क्रमवानिवावभासोपगमो लक्ष्यते[2]।

अविद्याशक्तिस्तु सत्त्वेनासत्त्वेन च ब्रह्मणो भेदेनाभेदेन च निर्वक्तुमशक्या, मूर्तिक्रियारूपविवर्तद्वयस्य जननी, एनया ब्रह्मतत्त्वमजस्रग्रस्तमिवास्ते। अभ्रखण्डेनादित्यविम्बमिव इत्यादि उक्तम्। मायापदेनापि अस्याः संकेतोऽस्ति। स्वोपज्ञटीकायामम्बाकर्त्र्यां च[3]।

---

१. वा० प० १-३—अम्बाकर्त्री।
२ वा० प० १-३, अम्बाकर्त्री-स्वोपज्ञवृत्तिश्च।
३. ,, ,, १-१-८ ,, ,,।

एतावता शक्तिविषयकविचारेणेदमायातम्—यद् भाष्यं व्याचक्षाणेन श्रीनागेशभट्टेन यदुक्तम्—अधिष्ठानगतसत्त्वेनारोपितसत्त्ववती वस्तुतोऽसती भ्रमसंस्काररूपा अविद्या प्रवाहानादित्वं भजमाना वस्तुतोऽनानादितां भजत इति। तत्तु भर्तृहरिपक्षतो विरोधमावहति। यतो हि एतन्नये साऽनादिः 'अपृक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते' इत्युक्त्या शब्दब्रह्मणो वस्तुतोऽभिन्ना आरोपितभेदा च।

अथ च सत्त्वेनासत्त्वेन च निर्वक्तुमशक्येति कृत्वा साऽविद्याऽनिर्वचनीयेत्यादि तेनानभ्युपगतम्। तदपि श्रीहरिदृष्ट्या विरुद्धमेव। एतन्मते सत्त्वासत्त्वाभ्यां तस्या अनिर्वाच्यतायाः स्वोपज्ञवृत्तौ स्वीकारात्[1]।

ननु 'अपृथक्त्वेऽपि' इत्यनेन शब्दब्रह्माभेदेन निर्वाच्यत्वे सति पारमार्थिकसत्त्वेन निर्वाच्यता संप्राप्तैवेति चेदुच्यते—व्यावहारिकेण सत्त्वेनानिर्वाच्येत्यर्थकरणेन शङ्कानिरासो बोध्यः। वेदान्तिमतेऽपि पारमार्थिकासत्त्वेन निर्वाच्यताऽस्त्येव, का हानिः?

न चैव सर्वासां शक्तीनां पारमार्थिकसत्त्वेन द्वैतापत्त्याऽद्वैतसिद्धान्तो भज्येतेति वाच्यम्, सर्वदा तासां शब्दब्रह्मरूपत्वेन अद्वैतसिद्धान्तस्य सुस्थत्वात्। अतश्चाभिन्नेऽपि शब्दब्रह्मणि भेदावभासनमविद्याशक्तिकार्यम्—अक्रमेऽपि तस्मिन् क्रमावभासनं कालशक्तिकार्यमिति निष्कर्षः। अथर्ववेदे कालहेतुका सृष्टिर्वर्णिता[2]। मैत्रायण्युपनिषदि चराचरसृष्टिहेतुतया कालतत्त्वं चर्चितमस्ति[3]। एवमेव तैत्तिरीयारण्यकेऽपि कालतत्त्वस्य साधु विवेचना विद्यते[4]। विस्तरभिया नेहोपन्यस्यते।

विवर्त-परिणामवादौ—

व्याकरणदर्शनेऽद्वैतवादस्योपपत्तिस्तदैव स्यात्, यदा शब्दब्रह्मणो जगद्रूपेण विवर्तः स्यात्। यतश्च—एकस्य तत्त्वात् स्वरूपात् अप्रच्युतस्य अधिष्ठानस्य आरोप्ये स्वभेदप्रतिभासपुरस्सरं योऽसत्यस्याधिष्ठानविभागेन च प्रतीयमानस्यारोप्यस्य धर्मोपग्रहः, स विवर्त इत्युच्यते, स्वप्नविषयप्रतिभासवत्।

तथाहि—यथा स्वप्नावस्थायामेक एव विज्ञानात्मा भिन्नजातीयानेकपदार्थावभासो जायते। न च विज्ञानस्य तदा स्वरूपहानं भवति, तथा सत्यनुभवाभावेन उत्थितस्य स्मरणानुपपत्तेः। तथा शब्दतत्त्वं ब्रह्मापि स्वरूपादप्रच्युतं सत् स्वाविद्यारूपया शक्त्या अर्थाकारेण प्रतिभासत इति भावः। उक्तं च—

---

१. वा० प० १-१ स्वोपज्ञवृत्तिः।
२. अथर्ववेदस्य कालसूक्ते–१९।६।
३. मैत्रा०–५-१५।
४. तैत्ति०–प्रा० ३ अ० ११।

"मूर्तिक्रियाविवर्तौ अविद्याशक्तिप्रवृत्तिमात्रम् ।
तौ विद्यात्मनि तत्त्वान्यत्वाभ्यामनाख्येयौ ।"

अस्यार्थः—गेहे घट', क्षेत्रे गौः, इत्यादिना देशभेदावग्रहरूपेण यद् गोघटादि-रूपाणामर्थानामवस्थानं स मूर्तिरूपो विवर्तः ।

यत्तु तेषामेव जायते, 'नश्यति वा घटः' इत्यादिना उत्पादविनाशक्रियोपहित-रूपेणावस्थानं स क्रियारूपो विवर्तः । स द्विविधोऽपि विवर्तोऽविद्याशक्तिरूपतया प्रवृत्ति-रूपतया चावस्थाभेदेन भिन्न इति चातुर्विध्यं विवर्तस्य । तथाहि—यदा मूर्ति-क्रिया-रूपयोर्विवर्तयोदर्शनं नास्ति, तदाऽविद्याशक्तिरूपो विवर्तः । यदा तु तयोर्दर्शनम्, तदा प्रवृत्तिरूपो विवर्तः । एतौ द्वापि विवर्तौ विद्यारूपे आत्मनि आविद्यकत्वाद् भेदा-भेदाभ्यामनिर्वाच्यौ । एतद्धि अविद्याया अविद्यात्वमिति । एतत्सर्वं स्पष्टीकृतमम्बाकर्त्र्या-मिति तत्र विशेषोऽवगन्तव्यः[1] ।

एवं च—"अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः" इति विवर्तलक्षणं रज्ज्वाः सर्पात्मना विवर्त एव भवति । रज्ज्वधिष्ठितदेशाविशेषावग्रहेणायं मूर्तिविवर्त इति मन्यते ।

एवमेव शब्दब्रह्मणि अधिष्ठाने समस्तस्य जगतो विवर्तो द्रष्टव्यम्, सूत्रभाष्य-कृतोरपि सम्मतोऽयं विवर्तवादः । यतश्चानुपदमेव तत्सम्मतोऽद्वैतवादः सिद्धान्त-यिष्यते ।

ननु आचार्येण श्रीहरिणा वाक्यपदीये ब्रह्मकाण्डे प्रथमकारिकायां—"विवर्ततेऽ-र्थभावेन' इत्युक्त्या विवर्तवादः प्रोक्तः । अग्रे च तत्रैव कारिकायां—'शब्दस्य परिणामोऽयमित्युक्त्या परिणामवादोऽपि समर्थितः । एवं च परस्परं विरोधः समा-यातः । यतो हि—'सतत्त्वतोऽन्यथाप्रथा विकार इत्युदोरितः' इति परिणामलक्षणं सर्व-सम्मतया तेन वस्तुनः तात्त्विकोऽन्यथा भावो भवति, यथा दुग्धस्य दधिरूपस्तात्त्विकोऽ-न्यथाभावः परिणाम इति । एवं सति शब्दब्रह्मणः परिणतिर्जगद्रूपा स्यात्तर्हि शब्द-ब्रह्मणि विकारित्वापत्तिरागच्छेत्, इति चेत्, श्रूयताम्—शब्दस्य परिणामोऽयमित्याम्नाय-विदो विदुः इत्युक्तमस्ति आचार्येण, एवं आम्नायविदो विदुः, न तु वयं ब्रूमः । अथवा प्राचीनाचार्यैः विवर्त-परिणामशब्दयोः समानार्थत्वेन व्यवहारः प्रायेण तत्र तत्र कृतोऽ-

१. वा० प० अ० क०—स्वोपज्ञवृत्तिश्च—१।१ ।

स्ति। यथा वैयाकरणभूषणसारस्य दर्पणनामिकायां टीकायां प्रथमे मङ्गलश्लोके—जगदेतद् विवर्तते—इत्यत्र विवर्तते इत्यस्योत्पद्यते इत्यर्थः कृतः।

महाकविभवभूतिना—

"एको रसः करुण एव निमित्तभेदाद्
भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्।
आवर्तबुद्बुदतरङ्गमयान् विकारान्
अम्भो यथा सलिलमेव हि तत्समस्तम्॥"

अत्र पद्ये जलपरिणामे विवर्तपदं प्रयुक्तमस्ति[1]। ब्रह्मसिद्धौ अनेकत्र समानरूपतया इमौ शब्दौ प्रयुक्तौ स्तः[2]।

यथा—अतो वाचो परिणामो विवर्तो वा जगत्—इत्यादि। यदि तु पराख्यां वाचं सूक्ष्मां पश्यन्तीवाचं वा परित्यज्य स्थूलायाः, पश्यन्त्याः परिणाम इत्युच्यते, तदा नास्ति विरोधलेशः।

अत एवोत्तरार्द्धेनोक्तम्—छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत। छन्दोभ्यः पश्यन्तीरूपाभ्यो वेदवाग्भ्य एव एतद् विश्वं व्यजायत—इत्यर्थोऽपि सुसंगच्छते। स्वरूपज्योतीरूपायाः परावाच एव विवर्तः, न तु पश्यन्त्यामध्यमाया वा। अथवा शब्दस्य शब्दब्रह्मसहकृताया अविद्याशक्तेरयं परिणामः। शब्दब्रह्मणस्तु विवर्त एवेति रीत्या योजनीयम्।

अस्तु, शब्दब्रह्माद्वैतवादस्य पोषको विवर्तवादः समर्थितः। अथ शब्दब्रह्मस्वरूपम्, जीवस्य मोक्षस्वरूपं तत्प्राप्त्युपायश्च विचारपथमागच्छति—इतिकृत्वा तदेवोच्यते—

अनुपहितैव 'चित्' निर्धर्मकविशुद्धब्रह्मपदेन संकेतिताऽस्ति। सूत्रकृन्मते एषैव 'चित्' अकारपदेनोच्यमानाऽस्ति। उक्तं च श्रीनन्दिकेश्वरकारिकायाम्—

अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु।
चित्कलाभिः समाश्रित्य जगद्रूप उदीरितः॥ इति॥

'अकारो वै सर्वा वाक्' इति श्रुतिस्तु सर्ववागधिष्ठानतयोपहितचितोऽकारपदबोध्यतां संकेतयति।

---

१. उ० रा० च०–३ अ०, श्लो० ४७।
२. ब्र० सि०–ब्र० का०–पृ० ८।

अस्तु, अकाररूपानुपहितचितिसायुज्यावाप्तिः, तत्स्वरूपेणावस्थानरूपो मोक्षः 'अ अ' इत्यन्तिमेनाष्टाध्यायीसूत्रेण सूचितोऽस्ति। पूर्वमपि विषयोऽयं कथितः, दार्ढ्याय पुनरपि उक्तः।

इयमेवानुपहिता चित् 'महान् देवः शब्दः' इत्येवं रूपेण भगवता भाष्यकृता प्रत्यपादि। 'चत्वारि शृङ्गा त्रयो अस्य पादा' इति ऋङ्मन्त्रस्य व्याख्यावसरे[1]।

तत्र महतेति प्रतीकमादाय—'परेण ब्रह्मणा' इति व्याख्यातं प्रदीपकृता। अथ च 'महान् परब्रह्मस्वरूपः देवोऽन्तर्यामिरूपः' साम्यं सायुज्यम् इति व्याख्यातमुद्द्योतकृता।

अत्र शब्दस्य परब्रह्मस्वरूपत्वकथनेन चिद्रूपता आनन्दरूपता च 'सच्चिदानन्दं ब्रह्म' 'नित्यं विज्ञानमानन्दं ब्रह्म' इत्यादिश्रुतिशतैरुक्तप्रायैव। अत एव तेन सायुज्यकथनं संगच्छते, अन्यथाऽचेतनेनानन्दभिन्ने न सायुज्याभिलाषः कथं स्यात् ?

उक्तं च श्रीहरिणाऽपि—'अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्। प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते' कारिकाया अस्या व्याख्यानमनुवदतोद्द्योतकृतोच्यते।

इह द्वौ शब्दात्मानौ कार्यो नित्यश्च। तत्रान्त्यः सर्वेश्वरः सर्वशक्तिर्महान् शब्दवृषभस्तस्मिन् खलु वाग्योगवित् शास्त्रजशब्दज्ञानपूर्वकं प्रयोगेण क्षीणपापः पुरुषो विच्छिद्याहङ्कारग्रन्थीनत्यन्तं संसृज्यते इति[2]।

पुनश्च 'सक्तुमिव तितउना पुनन्तः' इति ऋङ्मन्त्रं व्याचक्षाणेन भगवता भाष्यकारेणोच्यते—अत्रा सखायः सख्यानि जानते, इत्यादि।[3] अत्र प्रदीपकारः—सखायः-समानख्यातयो भेदग्रहस्य निवृत्तत्वात्सर्वमेकमिति मन्यन्ते। सख्यानि-सायुज्यानि। एकगम्य इति ज्ञानेनैव प्राप्यः। वाचीति—वेदाख्ये ब्रह्मणि या लक्ष्मीर्वेदान्तेषु परमार्थसंविल्लक्षणोक्ता, सैषां निहितेत्यर्थः।

अत्रोद्द्योतकारः—ज्ञानेनैवेति निर्विकल्पकज्ञानेनेत्यर्थः। अत एव दुर्गत्वम्-नान्यः पन्था इति श्रुतेरिति भावः।

भाष्ये वाग्विषय इति च्छेदः, अत एव श्रवणोपपत्तिः।

वाग्वेदरूपाऽत्र वेदान्तेष्विति सत्यं ज्ञानमित्यादिषु। परमार्थसंविल्लक्षण-परमार्थब्रह्ममात्रविषयज्ञानविषयाऽखण्डार्थरूपा, सैषां वाचि निहितेत्यर्थः। सर्वोऽपि

---

१. म० भा०—पस्पशा०—पृ० ३०-३१।
२. म० भा०-उ०-पस्पशा० पृ० ३१-३२।
३. ,, ,, प० उ० ,, पृ० ३४-३५-३६।

वेदस्तेषां ब्रह्मपरो वेदैश्च सर्वैरहमेव वेद्यः इत्युक्तेरिति भावः।

अयं भावः—ये शास्त्रतः प्रकृतिप्रत्ययविभागेन साधून् ज्ञात्वा शास्त्रार्थध्यानवन्तो मानसज्ञानेन वाचमसाधुभ्यः पृथक्कृतवन्तः, ते तज्ज्ञानपूर्वकसाधुशब्दप्रयोगैर्लब्धान्तःकरणशुद्धयोऽत्र य एष दुर्गो मार्गो ब्रह्मरूपस्तत्रात्मना सह समानख्यातयस्त्यक्तभेदभावनाः सख्यानि सायुज्यानि प्राप्नुवते। यत एषां वाचि वेदाख्ये ब्रह्मणि या भद्रा लक्ष्मीः, सर्वभासकब्रह्मरूपा, सा अधि-अधिकं निहिता भवति। एतच्छास्त्रप्रयोगव्यङ्ग्यस्य ध्वनिरूपरूषितस्यैव तैर्वाचकत्वस्वीकारेण तस्य चात्यन्तविचारे ब्रह्मातिरेके मानानुपलम्भेन तत्तदुपाधिभिन्नचित एव बोधकतया तैर्ग्रहात्। एवं सर्वबोधकेषु ब्रह्मबुद्धौ जातायां तेनैव दृष्टान्तेन सर्वपदार्थेषु ब्रह्मबुद्धिर्वैयाकरणानामिति।

यत्तु—पदपदार्थवाक्यार्थमर्यादया सत्त्यमित्यादितस्तेषां तद्बोधात् तेषां वाचि निहितेति। तत्र 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति श्रुत्या ब्रह्मणस्तन्मर्यादया शब्दा बोध्यत्वोक्तेः। तत्र ह्यप्राप्येत्यस्य सम्बन्धज्ञानेऽविषयीभूय असंबध्य चेत्यर्थः। आद्यं शब्दे, अन्त्यं मनसि।

शुद्धचित्तस्य तूभयमपि बोधकमखण्डविषयस्य दृश्यते त्वग्र्या बुद्ध्या—इति श्रुत्यन्तरात्, न तु पदपदार्थमर्यादयेति बोध्यम्। लक्षणादित्यस्य व्याख्या भासनादिति। परिवृढा-अज्ञाननिवर्तने प्रभ्वी इति[1]।

एतावद्भिर्भाष्यतद्व्याख्यानभूतप्रदीपोद्द्योतग्रन्थैश्च इदमायातम्—यद् व्याकरणदर्शनेऽपि भगवच्छङ्करपादाभिमतं यादृशं ब्रह्मलक्षणम्, तादृशमेव सच्चिदानन्दरूपमनादिनिधनमित्यादि।

तत्र परावाग्रूपतायामेवाधिक्यम्। अथ च निर्विकल्पकज्ञानेन शब्दब्रह्माकारवृत्त्याद्वैतप्रपञ्चस्य बाधे सति शुद्धेन शब्दब्रह्मणा सायुज्यावाप्तिः; स्वस्वरूपावाप्तिरिति यावत्, सैव मोक्षपदार्थः। उक्तं च—'मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः' इति।

अत्रोपायकथनम्—निर्विकल्पकज्ञानेनेति।

एवं च ऋते ज्ञानान्न मुक्तिः, ज्ञानादेव तु कैवल्यमित्यादिश्रुतिभिरनुमोदितोऽयमुपायः।

तत्र व्याकरणदर्शनेन किं भवति ? अत्रोच्यते—

---

१. म० भा०—उ० पस्पशा०, पृ० ३५-३६।

३५

व्याकरणशास्त्रज्ञानपूर्वकसाधुशब्दप्रयोगेणान्तःकरणस्य शुद्धिर्भवति। अथ च शुद्धेऽन्तःकरणे सर्वबोधकेषु साधुशब्देषु ब्रह्मबुद्धौ सत्यां तेनैव दृष्टान्तेन सर्वपदार्थेष्वपि वैयाकरणानां ब्रह्मबुद्धिराञ्जस्येन सम्पद्यते।

'तत्त्वमसि' इत्यादिमहावाक्यश्रवणेन साक्षादेवाखण्डप्रत्यक्षम् इति केषाञ्चन मतम्। श्रवणोत्तरं मननादिसम्पन्नेन मनसा इति केषाञ्चन मतम्। आद्यमते वाक्यस्य तत्र प्रधानकारणता, मनसः सहकारिता। द्वितीयमते मनसः प्राधान्यम्, वाक्यस्य सहकारिता। परन्तु शुद्धचित्तस्य वैयाकरणस्य तूभयमपि मतं समादृतमस्ति[1]।

शब्दब्रह्मणोऽभेदेन साक्षात्कारस्य मोक्षरूपता श्रीहरिणा ब्रह्मकाण्डे बहुत्र प्रतिपादिता। यथा हि—

"तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञः स ब्रह्मामृतमश्नुते[2] ॥" इति।

अयमाशयः—तस्य शब्दब्रह्मणः प्रवृत्तितत्त्वज्ञः, प्रवृत्तिः क्रिया, ते च षड्भावविकाराः, तेषामसद्रूपत्वेन तेषां तत्त्वं सत्ता परब्रह्मरूपा, तज्ज्ञो व्याकरणहेतुकशब्दसंस्कारजन्यपुण्यविशेषसहकारेण शब्दप्रवृत्तितत्त्वज्ञो वैयाकरणः तत्, श्रुत्यादिप्रसिद्धं विद्वदनुभवविषयञ्च अमृतं जरामरणवर्जितं ब्रह्म, वस्तुतः स्वात्मभूतम् अश्नुते प्राप्नोति—अभेदेन साक्षात्करोतीति यावत्, नित्यप्राप्तस्य प्राप्त्यन्तरासम्भवात्।

अस्या एव कारिकायाः व्याख्यायां स्वोपज्ञवृत्तौ श्रीहरिणा श्लोकत्रयी कारिकाःस्थविषयपोषकतयोपस्थापिताऽस्ति। तस्या आशयोऽम्बाकर्त्रीदृष्ट्योपस्थाप्यते—बुद्धिस्थे शब्दे गृह्यमाणो यो वर्णक्रमस्तस्य यः संहारः प्रविलयः, तस्योपायभूतो यो योगस्तेन संकृतवर्णक्रमं परावाग्रूपमात्मानमात्मनि बुद्धौ संवृत्य क्रमसंहारपूर्वकं बुद्धौ निवेश्य—परेण ज्योतिषैकत्वं प्रपद्यते, इति तृतीयश्लोकस्थवाक्येन सम्बन्धः।

तत्र परेण ज्योतिषैकत्वप्राप्तौ द्वितीयतृतीयश्लोकाभ्यां क्रम उक्तोऽस्ति। तत्र पूर्वं वैखरीरूपाया वाचो व्याकरणेन असाधुशब्देभ्यः पृथक्कृत्य ज्ञानरूपं संस्कारमाधाय कृत्वा, तामेव वाचं ध्यानक्रमेण ज्ञाने ज्ञायतेऽनेनेति करणव्युत्पत्त्या बुद्धौ, मध्यमारूपेण हृदयदेशाऽवच्छेदेन, पश्यन्तीरूपेण च नाभिदेशाऽवच्छेदेन प्रत्यवभासमानसूक्ष्मरूपवर्णक्रमवतीमेव निवेश्य, वाचंकरणात् प्राणे, प्राणाद्बुद्धौ ध्यानक्रमेण निवेश्येत्यर्थः।

---

१. म० भा० उ०—पस्पशा०।
२. वा० प०—१।१३१।

ततः परमस्या वाचो मध्यमारूपायाः पश्यन्तीरूपायाश्च वाचः, बन्धनान्यविद्या-हङ्कारादीनि विभज्य पृथक्कृत्य, अविद्यया हि संहृतक्रमे वागात्मनि वर्णक्रममध्यारोपयति, अहङ्कारेण च बुद्धि परावाग्रूपचैतन्यात्मरूपतयाऽभिमन्यते इति अविद्याहङ्कारौ वाचो बन्धनभूतौ ।

एवं तां वाचं छिन्नबन्धनां विवेकज्ञानेन कृत्वा परावाग्रूपात्मरूपं ज्योतिरान्तर-मासाद्य साक्षात्कृत्य छिन्नग्रन्थिपरिग्रहः छिन्नोऽविद्याहङ्कारादिरूपग्रन्थिपरिग्रहो यस्य स तथाभूतः सन् ग्रन्थीन् प्रागुक्तान् छित्वा परेण ज्योतिषैकत्वं साक्षात्कारेण प्रपद्यते, इति ।

यद्यपि पराख्यवाचः साक्षात्संकेतः कारिकाद्वारा श्रीहरिणा क्वचिदपि न विहितः, तथाऽपि हरिवृषभकृतस्वोपज्ञवृत्तौ परेण ज्योतिषेतिपदेन तदीयः संकेतो वर्तत एव, यश्च स्पष्टीकृतोऽस्ति अम्बाकर्त्र्यां श्रीगुरुचरणैः ।

अथ च—

"वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्[1] ॥"

इति कारिकया तिस्र एव वाचः प्रतिपादिताः सन्ति, तथापि एतावता संशयो नैव कार्यः, यत् परावाक् श्रीहरिसम्मता न इति । यतो हि—

व्याकरणशास्त्रस्यात्र वाग्विषयता निरूपिता, तत्र तु तिस्र एवेमा वाचः संस्कार्यत्वेन विषयतामावहन्ति । तत्रापि पश्यन्ती वाक् तु सविकल्पकसमाधौ योगि-गम्या एव, न तु सर्वजनसाधारणी । अस्यां स्थितौ पराख्यवाचः संकीर्तनमत्र कथं क्रियेत ।

व्याकरणशास्त्रस्य संस्कार्यत्वाभावात् । अम्बाकर्त्र्यां परापराभेदेन पश्यन्त्याः अपि स्वरूपद्वयं प्रतिपादितमस्ति ।

यदि तु त्रय्या वाचः पदं प्रतिष्ठापकं स्थानम् (अधिष्ठानमिति यावत्) इत्यंश-मुद्दिश्य परमिति पदं विधेयताप्रयोजकतया स्वीक्रियेत, तदा परमित्यनेन परावागित्यर्थः कर्तुं शक्यते । एवं च त्रय्या वाचो विवर्त्युपादानतया परावागभिमतैव शब्दतत्त्वविद्भि-र्वैयाकरणैः ।

अथ च—अत्रातीतविपर्यासः केवलामनुपश्यतीत्यत्रापि केवलापदेन पराख्याया वाचो निर्देश आयात्येव[2] ।

---

१. वा० प० १।१४२ ।

२. तत्रैव—१।१७ ।

सैव मायोपहिता सती छन्दसां योनिरिति कथ्यते। किं च—अनादिनिधनमिति प्रथमपद्येन पूर्वार्धेन यादृशं लक्षणं शब्दब्रह्मण उक्तमस्ति, तत्तु पराभिधानायां वाच्येव संघटते। अस्तु, श्रीहरिणा सूत्रभाष्याभिमतमेव शब्दब्रह्मणो मोक्षस्य च स्वरूपं समर्थितमिति सिद्धम्।

तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविधानामधिविद्यं प्रकाशते[1]॥
यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते।
तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते[2]॥

इत्यादि कारिकाभिः परब्रह्मसाक्षात्कारलक्षणमोक्षस्य साधनत्वे व्याकरणशास्त्रस्य महान् योग इति स्फुटो निर्देशो महते मङ्गलाय कल्पते।

॥ शुभं भूयात् ॥

●

---

१. वा० प० १।१४।
२. तत्रैव—१।२२।

शाङ्करभाष्यगताः केचन भ्रष्टाः पाठास्तेषां संशोधनं च

डॉ० रामशङ्करभट्टाचार्यः

वाराणसी

❀❀❀

शङ्कराचार्यविरचितेषु ब्रह्मसूत्रोपनिषद्भाष्येषु मुद्रितेषु क्वचिद् भ्रष्टाः पाठा अवलोक्यन्ते। निबन्धेऽस्मिन् केचन भ्रष्टाः पाठा उदाह्रियन्ते, समीचीनपाठानां निर्धारणाय च प्रयत्यते।

(१) शारीरकभाष्ये पठ्यते—"कठानां (काठकानामिति केषुचित्संस्करणेषु) संहितायां श्रूयते—तस्माद् ब्राह्मणः सुरां न पिबेदिति" (३।४।३१)।

संहितायां तु पिबेदित्यत्र 'पिबति' इति पठ्यते—"पाप्मा वै माल्व्यं तस्माद् ब्राह्मणः सुरां न पिबति पाप्मना नेत् संसृज्या इति" (१२।१२)।

अत्रेदं विज्ञेयं यत् पिबतीति लेडन्तं पदम्, न लडन्तम्। इदं प्रतीयते विध्यर्थ-लाभायैव उपर्युक्ते पदे परिवर्तनं विहितं केनचित्, यतो लडन्ते प्रयोगे विधिर्न प्रतीयते। लेट्यपि पिबतीति प्रयोगो भवितुमर्हति—इति विज्ञेयम्। काठकवाक्यमिदमन्यत्रापि अशुद्धरूपेणैव उद्धृतमिति दृश्यते। वेदाध्ययनह्रास एवास्य कारणमिति मन्ये।

(२) शारीरकभाष्ये पठ्यते—"एके शाखिनो दाशकितवादिभावं ब्रह्मण आमनन्ति आथर्वणिका ब्रह्मसूक्ते—ब्रह्मदाशा ब्रह्मदासा ब्रह्मैवेमे कितवा इत्यादिना" (२।३।४३)।

वाक्यमिदम् आथर्वण-पिप्पलाद-संहितायां पठ्यते। अत्रत्यः पाठस्तु 'ब्रह्मेमे कितवा उत' इति (८।९।१०)। इदानीं शौनकसंहितैव सुप्रचलिता विद्यते, न पिप्पलाद-संहिता[1]। अत एव ग्रन्थसम्पादकैः पाठस्यास्याशुद्धिर्न परिज्ञाता।

---

१. पिप्पलादसंहिता बहुकोशाधारेण सुष्ठु सम्पादिता दुर्गामोहनभट्टाचार्येण प्रकाशिता चेयमंशतः कलकत्तासंस्कृतकालेजसमाख्यया संस्थया। आशासे कृत्स्ना संहिताऽचिरात् प्रकाशमेष्यति।

अत्रेदं विज्ञेयं यदयं भ्रष्टपाठ एव भास्करादिकृतेषु ब्रह्मसूत्रभाष्येषु उद्धृतो दृश्यते—इत्यहो अज्ञपरम्परा !! शाक्ताचार्यभास्करेण ललितासहस्रनामभाष्ये सम्यक् पाठ एव उद्धृतः--"ब्रह्मदासा ब्रह्मदाशा ब्रह्मेमे कितवा उत" इति श्रुतिः (पृ० १६०; परापरेति नाम-व्याख्याने)।

(३) शारीरकभाष्ये पठ्यते—"ननु न हिंस्यात् सर्वा भूतानीति शास्त्रमेव भूतविषयां हिंसाम् अधर्म इत्यवगमयति। बाढम्, उत्सर्गस्तु सः। अपवादः—अग्नीषोमीयं पशुमालभेतेति" (३।१।२५)।

अत्रान्तिमे वाक्ये 'आलभेत' इति भ्रष्टः पाठः, 'आलभते' इत्येव समीचीनः पाठः; दृश्यतां तैत्तिरीयसंहिता (६।१।११), काठकसंहिता (२४।७) च। 'आलभते' इति न लङन्तं प्रत्युत लेडन्तं पदमिति विज्ञेयम्। मीमांसाभाष्येऽपि 'आलभते' इत्येव पदं दृश्यते (यदग्निषोमीयं पशुमालभते इति, ४।१।११)[1]।

(४) शारीरकभाष्ये पठ्यते—"बलस्य चेन्द्रो देवता प्रसिद्धा। या काचिद् बलप्रकृतिरिन्द्रकर्मैव तदिति हि वदन्ति" (१।१।२९)।

'इति हि वदन्ति' इति कथनतो विज्ञायते यदिदं कस्यचिदाचार्यस्य वचनमिति। वस्तुत इदं यास्कस्य निरुक्तकृतो वचनम्। निरुक्ते तु वाक्यमिदमित्थं पठ्यते—या च का च बलकृतिरिन्द्रकर्मैव तत् (७।१० खण्डे)।

(५) बृहदारण्यकभाष्ये पठ्यते—"बलमुपजनयत् स्थूणाख्यं तेनान्नम् उभयतः पाशवत् सदामवत् प्राणशरीरयोर्निबन्धनं भवति" (२।२।१)।

अत्र 'उभयतः पाशवत्' इत्यपपाठः। समीचीनः पाठस्तु 'उभयतः स्पाशवत्' इति (अत्र न पाशशब्दः; किन्तु स्पाशशब्दः)। बन्धनरज्जुवाचिनः पाशशब्दस्य प्रयोगे तु स्वारस्यं न स्यात्। दृश्यतां महाभाष्यगतं वाक्यम्—'सैषा उभयतस्पाशा रज्जुर्भवति' (६।१।६८)। अत्र कैयटः "स्पश बाधनस्पर्शनयोः इति भौवादिकस्य, स्पश ग्रहणसंश्लेषणयोः इति चौरादिकस्य वा रूपमेतत्"। एतेन स्पष्टं गम्यते स्पशधातुनिष्पन्नः स्पाशशब्दोऽत्र प्रयुक्तः।

'उभयतः स्पाश' इत्यत्र 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' इति वार्त्तिकेन 'उभयतस्पाश' इति रूपमपि सिद्ध्यति। अत एव केनापि भ्रान्त्या चिन्तितं यद् 'उभयतः पाश' इत्येव प्रयोगः; सन्धिकार्ये कृतेऽस्य 'उभयतस्पाश' इति रूपं भवति।

---

१. 'अग्नोषोमीयं पशुमालभते' इति वाक्यं बहुषु ग्रन्थेषूद्धृतम्; सर्वत्र 'आलभेत' इत्येव पठ्यते (दृश्यतां तत्त्वकौमुदी-२) इति दूयते चेतः।

(६) प्रश्नोपनिषदि पठ्यते—"यथैतस्मिन् पुरुषे छाया एतस्मिन्नेतदाततं मनोकृतेनायात्यस्मिञ् शरीरे" (३।३)। अत्र भाष्यस्य केषुचित् संस्करणेषु पठ्यते—"छायेव देहे मनोकृतेन मनः संकल्पेच्छादि-निष्पन्नकर्मनिमित्तेनेत्येद् वक्ष्यति"[१] इति।

अस्मन्मते अत्र 'मनोकृतेन' इत्यस्यानन्तरम् 'मनः कृतेन' इति पठितव्यम्, यथा दृश्यते केषुचित् संस्करणेषु। अत्रेयं युक्तिः—छान्दसपदव्याख्यानकाले शङ्कराचार्येण द्वे पद्धती अवलम्बिते। केषुचित् स्थलेषु 'शब्दोऽयं छान्दसः' इति कण्ठत उच्यते शङ्करेण; केषुचिच्च स्थलेषु छान्दसशब्देन सह लौकिकशब्दस्यापि प्रयोगः क्रियते, येन छान्दस-शब्दस्यार्थबोधः सुघटः स्यात्। शङ्कराचार्याभ्युपगत-पद्धतिद्वयविषये विस्तरेण चर्चा कृता मयान्यत्र।

उपर्युक्ते स्थले शङ्करेण द्वितीया पद्धतिरवलम्बिता, अर्थात् छान्दसस्य मनोकृते-नेति शब्दस्य व्याख्याने शब्दस्यास्य लौकिकं रूपम् (मनः कृतेन इति) अपि दर्शितम्। अतः 'मनोकृतेन मनःकृतेन' इत्येव भाष्यपाठः समीचीनः।

(७) शारीरकभाष्ये पठ्यते—अस्ति चात्र वेदान्तान्तरविहितेषु विज्ञानेषु अन्यदन्यन्नाम तैत्तिरीयकं वाजसनेयकं कौथुमकं कौषीतकं शाट्यायनकमित्येवमादि (३।३।१)।

अत्रेदं विज्ञेयं यत् तैत्तिरीयम् इत्यस्य 'तैत्तिरीयाणाम् आम्नायः धर्मो वा इत्यर्थः'[२]। एवमेव वाजसनेयिनां कौथुमानां शाट्यायनिनां धर्म आम्नायो वा इत्यर्थे वाजसनेयकम्, कौथुमकम्, शाट्यायनकम् इति सिद्ध्यति, एवं कौषीतकिनां (कैषीतकानां वा) धर्म आम्नायो वा इत्यस्यार्थे कौषीतककम् इति स्यात्, न पुनः कौषीतकमिति।

(८) ऐतरेयोपनिषदि पठ्यते—लोकान्नुसृजा इति (१।१।१)। अत्र भाष्ये 'सृजे सृजेऽहम्' इति पठ्यते।

भाष्यकारेणात्मनेपदिनः सृजधातोः प्रयोगः कृतः; धातुरयं दिवादिगणे पठ्यते, अतः 'सृज्येऽहम्' इति पठनीयं प्रतिभाति।

(९) बृहदारण्यकभाष्ये पठ्यते—"तस्माद् यावदियमवस्था नागमिष्यति तावदेव पुरुषार्थसाधनकर्तव्यतायाम् अप्रमत्तो भवेद्......(४।३।३५)।

---

१. दृश्यतां 'कठोपनिषद्गतस्य 'जाग्रत' इति पाठस्याशुद्धिः' इति शीर्षको निबन्धः; सारस्वती सुषमा ३९।१-४।

२. दृश्यतां 'गोत्रचरणाद् वुञ्' (४।३।१२६) इति सूत्रम्, चरणाद् धर्माम्नाययोरिति वार्त्तिकं च।

'नागमिष्यति' इत्यत्र 'नागच्छति' इत्येव पठनीयं प्रतिभाति; दृश्यतां पाणिनीयं सूत्रम्—'यावत् पुरानिपातयोर्लट्' (३।३।४) इति।

(१०) केनोपनिषद्-भाष्यस्य केषुचित् संस्करणेषु पठ्यते—"इन्द्रः परमेश्वरो मघवान् बलवत्त्वात्"; केषुचिच्च बलवत्त्वादित्यत्र यज्ञवत्त्वादिति पठ्यते। अस्मन्मते यज्ञवत्त्वादित्येव पाठः साधीयान्; दृश्यतां शतपथब्राह्मणगतं वाक्यम्—तत इन्द्रो मखवानभवत्। मखवान् ह वै तं मघवान् इत्याचक्षते परोऽक्षम् (४।१।२।१५-१६) इति। मख-यज्ञशब्दौ समार्थकौ, अतो यज्ञवत्त्वादिति पाठः सम्यगुपपन्नो भवति।

आभासवादः—एकं परिशीलनम्

डॉ० सि० मार्कण्डेयशास्त्री

❀❀❀

अद्वैतवादे 'आभासवादः' सुरेश्वराचार्येण प्रतिपादित इति सर्वैस्तत्त्वज्ञैरभ्युपगम्यते। जगतो मिथ्यात्वविषयेऽस्य प्रस्थानस्य मूलभूतं सूत्रम्—जीवात्मपरमात्मनोर्मध्ये भेदः स्वरूपत एव। स कथं भवति अल्पेनैव प्रयत्नेन स समुत्सारयितुं कथं शक्यत इति सुरेश्वरः प्रपञ्चयति। जगत् तथा जीवात्मा ब्रह्मण आभासरूपौ, अथ च मिथ्याभासौ, न परिच्छिन्नरूपौ, न वा विवर्तरूपौ। एतद्वादे उद्दिष्टो विषयो मिथ्याभूतजगदादीनां व्यावहारिकसत्यता, प्रयोजकत्वं च नाभ्युपगन्तव्ये भवतः। एवं चैष वादोऽद्वैतसिद्धान्ते इतरवादेभ्यो विशिष्टोऽतिवाद इति वक्तुं शक्यते। कथमेष वादो जगन्मिथ्यात्वं ब्रह्मणः अद्वितीयत्वं च प्रतिपादयति। अत्र च पद्मपादादिभिः प्रतिपादितानां विवर्तादिवादानां जगन्मिथ्यात्वविषये, जगद्ब्रह्मणोः सम्बन्धविषये च काश्चिद् अनुपपत्तयोऽद्य परिशीलनीयाः।

पद्मपादाचार्यैः प्रतिपादितस्तेषां शिष्येण प्रकाशात्मना विस्तारितो विवर्तवादोऽनिर्वचनीयम् अज्ञानमेव जीवात्मरूपेण जगदादिरूपेण च परिणमति। एष जीवात्मा मनोबुद्ध्यादिरूपेण जगदनुभवं प्राप्नोति, जगच्च वृत्त्यादिरूपेण करणानां विषयो भवति। अस्याज्ञानस्याधारो ब्रह्म।

"मनो यदवष्टभ्य विश्वः विवर्तते प्रपञ्चः, तदेव मूलकारणं ब्रह्मेति सूत्रार्थः" इत्येवं 'जन्माद्यस्य' सूत्रं तत्र श्रीशङ्करभगवत्पादभाष्यं व्याख्यातॄणां पद्मपादाचार्याणां भावं विवृण्वन् प्रकाशात्मा वदति—"मायया ब्रह्मपरतन्त्रत्वात् तत्कार्यमपि ब्रह्मपरतन्त्रं भवति।........ततश्च उत्पद्यमानकार्यस्य यद् आश्रयोऽपि ज्ञानानन्दलक्षणं च तद् ब्रह्मेति शुद्धब्रह्मलाभ इति, यतः कार्यस्यापि ब्रह्मावष्टम्भत्वम् अभ्युपगतम्, कारणस्य अज्ञानविषये तद् अभ्युपगन्तव्यमेव" इति।

अस्याज्ञानस्य बौद्धैः प्रतिपादितस्य अज्ञानस्य महान् भेदः। बौद्धानामज्ञानं वस्तुस्वरूपस्य ज्ञानाभावः, अथवा तस्यैवान्यथाज्ञानं विपर्ययज्ञानं वा भवति। अद्वैतमते तु अज्ञानस्य भावत्वम्, वस्तुत्वं चाभ्युपगम्यते। (सर्वेषां मिथ्याभासानां यः कश्चित् कारणमस्त्येव)। तथा च सर्वेषां मिथ्याभासानां यत् किञ्चित् कारणमवश्यं भवति।

एवञ्चास्य दृश्यमानस्यानुभूयमानस्य च जगतः सर्वव्यापके ब्रह्मणि यद् आधृतमज्ञानम्, तदेवोपादानकारणं स्यात्। एतच्चाज्ञानं 'अविद्या' इति च कथ्यते। एषा च ब्रह्मण्येव काचित् शक्तिरूपा वर्तते। एषाऽविद्याशक्तिर्मिथ्यारूपजाड्यात्मना परिणमति। यतः सा ब्रह्मण्येव स्थिता, तद्रूपा भवेत्। उक्तञ्च पञ्चपादिकाविवरणे—"शक्तिरिति आत्मपरतन्त्रतयाऽऽत्मनः सर्वकार्योपादानस्य निर्वोढृत्वम्" इति। ब्रह्म स्वस्मिन्नेवाविद्यां स्वरूपामिव दधाति, तयैव च सृष्टाववसरे प्रधृष्टो भवति। सा चाविद्या नानारूपं भजते। एवं ब्रह्म उपादानकारणमपि भवितुमर्हति, यतो जगतः सत्ता उपादानकारण एव सति ब्रह्मणि, अनुभवे उपलभ्यते। आभरणरूपत्वेन परिणामेऽपि उपादानं सुवर्णमाच्छादित एव भवति। एवमेव माया तत्कार्याणि च ब्रह्म आच्छादयन्ति। उक्तञ्च रामानन्द-सरस्वत्या विवरणोपन्यासे—"ततः स्वप्रकाशेऽपि आत्मनि विचित्रशक्तिभावरूपाविद्या-प्रयुक्तमावरणं दुरपह्नवम्" इति।

एवञ्च जगत्सृष्टौ ब्रह्म-माया उभावपि उपादानकारणत्वं भजतः। तत एवानु-भूयमाने जगति द्वे कारणे स्तः—ब्रह्मणः सत्ता, मायाया जाड्यं च। ब्रह्म अपरिणामि कारणम्, माया तु जगदादिरूपेण परिणामि कारणम्। प्रपञ्चितं खलु अप्पय्यदीक्षितैः स्वसिद्धान्तलेशसंग्रहे, यत् पदार्थनिर्णये आनन्दानुभवैरुक्तम्—"तत्र ब्रह्म विवर्तमानतया उपादानमविद्या परिणाममानतया। न च विवर्ताधिष्ठाने पारिभाषिकत्वम्, स्वात्मनि कार्यजनिहेतुत्वस्य उपादानलक्षणस्य तत्राप्यविशेषात्" इति। एष विवर्तवादादुपपन्न उत्तरो विवेकः। विवर्तवादिनस्तु ब्रह्म निमित्तकारणम्, माया उपादानकारणमिति प्रतिपादयन्ति; किन्त्वस्मिन् विवर्तवादादुत्तरवादेऽपि, उपादानकरणं ब्रह्मापि, 'मृद् घटः' इव न कदाऽपि परिणामित्वं भजति।

किन्त्वस्मिन् वादे दोष एषः प्रतिभाति। ब्रह्म उपादानकारणं भवत्यपि, जगतः आधारतयैव स्थितमपि मिथ्याभूतजगद्व्यापारे विलग्नं भवत्येव। जगतः सत्ता च आधारभूतब्रह्मण एव भवति, तथा च जगन्निराकर्तुं दुःशकं भवति। दृश्यमाने जगति जाड्यता परिणामिमायाया महावाक्यादि श्रवणाद् निराकरिष्यते; किन्तु ब्रह्मणः स्वरूपिणी या सत्ता, नैव निराकर्तुं शक्या, नापि तदिष्टं च। यदि सताऽपि निराक्रियते, तदा मोक्षपुरुषार्थो ब्रह्मत्वप्राप्तिरपि न सिद्ध्यति।

किञ्च, यतो माया तद्रूपा चाविद्या ब्रह्मणः शक्तित्वेन इष्टे। तस्मात् तद्रूपा जाड्यता च निराकरणाय न भवति शक्या, यतः सा मायैव जगत उपादानं कारणम्। एषा शक्तिः किं ब्रह्मरूपा, अथवा न तथा? यदि तद्रूपा नैव निराक्रियते, यदि न

तद्रूपा, ब्रह्म जगतः कारणत्वं नैवोपैति। जगतो मिथ्यात्वप्राप्तौ ततश्च ब्रह्मत्वसिद्धये, तर्कानुगुणेन केनचिदुपायेन भवितव्यम्। विवर्तवादे चैतौ द्वौ न सम्भवतः।

"अविद्यासहितब्रह्मोपादानम्" इति वाचस्पतिमिश्रा अपि अविद्यासहितब्रह्मणो जगत उपादानकारणत्वं प्रतिपादयन्ति। अत्र सुवर्णस्य कङ्कणादिरूपेण, मृदो घटादिरूपेण परिणामित्वं दृष्टान्ततया उल्लेखयन्ति। आभरणादिकं सुवर्णस्य दृश्यमानं परिणामरूपमेव। वस्तुतस्तत् स्वर्णमेव रूपान्तरं प्राप्तम्। एवं जगदप्यनुभवसिद्धं ब्रह्मणो रूपान्तरम्. ततश्चोपादानकारणं ब्रह्म। आभरणस्य मूल्यमुपादानकारणस्य मूल्येनैव निर्णीयते। तथैव जगतः सत्ता उपादानकारणस्य ब्रह्मण एवोपस्थिता भवति। आभरणरूपकत्वेन परिणाम उपादानं सुवर्णमाच्छादयति। एवमेव माया तत्कार्याणि ब्रह्म आच्छादयन्ति। एषा माया आत्मनि स्थिता। यदा ब्रह्म, अनयाऽभिभूयते, तदा दृश्यमानं जगदुदेति। एवञ्च माया ब्रह्मणः कार्याणि परिपोषयति।

सिद्धान्तलेशसंग्रहे वाचस्पतिमिश्रमतमस्मिन् विषय एवमुक्तम्—"**वाचस्पतिमिश्रास्तु जीवाश्रितमायाविषयीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतयोपादानमिति, मायासहकारिमात्रम्, न कार्यानुगतद्वारकारणम्**"। अत्र च शङ्करभगवत्पादानामारम्भाधिकरणभाष्ये वाक्यं प्रमाणं भवति यद् मूलकारणमेवान्त्यात् कार्यात् तेन तेन कार्यकारणेन नटवत्सर्वव्यवहारास्पदत्वं प्रतिपद्यत इति। कल्पतरुकारा अपि निगमयन्ति—

"अज्ञाननटवद् ब्रह्म कारणं शङ्करोऽब्रवीत्।
जीवाज्ञानं जगद्बीजं जगौ वाचस्पतिस्तथा" ॥ इति।

पदार्थनिर्णयकारैः वाचस्पतिमिश्रोक्तजगत्कारणवादो विस्तारितः, यथा—अविद्याया अथवा मायाया कारणत्वमानुषङ्गिकम्, ब्रह्मणश्च कारणत्वं मुख्यं भाष्यते। एवञ्च जगतः सत्ता सत्यत्वञ्च दृढतरमाविर्भवतः। तस्य निराकरणं कष्टतमञ्च। दुस्साध्यस्य संसारावरणविच्छेदनस्य साधनमपि दृढतरमेव भवति। तदर्थं नियोगरूपाः श्रवणमनननिदिध्यासनादय इष्यन्ते; किन्त्वेवंविधसाधनेन दृश्यमानजगतो भङ्गो भवेत्, ब्रह्मानुभवस्तु न सिद्ध्येदेव। जगदभाव एव ब्रह्म न भवति खलु।

एवं सति विवर्तवादिनो जगतः कारणं माया एवेति प्रतिपादयन्ति। ब्रह्म आधार एव, तस्मिन् स्थिता माया जगद्रूपेण परिणमति। अत्र सिद्धान्तलेशकारा उल्लिखन्ति—"सिद्धान्तमुक्तावलीकृतस्तु मायाशक्तिरेवोपादानमुपादानं न ब्रह्म"। तदेतद्ब्रह्मापरमपूर्वम्--'न तस्य कार्यं करणञ्च विद्यते' इत्यादिश्रुतेः। जगदुपादान-

मायाधिष्ठानत्वे तु उपचारादुपादानमिति। अस्मिन् वादे व्यावहारिकमिथ्यावसरे मया सत्तां प्राप्नोति खलु यतोऽन्यथा परिणामित्वं तस्या नैव सिद्ध्यति। सत्ता यदि कार्यावस्थायां भाति, कारणावस्थायामपि भवत्येव। तस्माद् विवर्तवादमनुसृत्यैवाचार्या मिथ्यापरिणामपूर्वमेव सत्ता अभ्युपगम्या एव। एवं च सति ब्रह्मानुभवकाले मायायां निराकरणं न सम्भवति, सा च विविक्ता प्रतिभात्येव। ततः अद्वैतसिद्धान्तमनुसृत्य केवलब्रह्मज्ञानं न सम्भवति। एतच्चानुपपन्नम्, अनिष्टं च। तस्मात् सर्वज्ञात्ममुनिः—ब्रह्मैवोपादानं जगतः, माया तु तत्र साधनरूपा इति प्रतिपादयति। ब्रह्म नैव परिणामि; किन्तु तदुपादानमिति, तत्र कारणत्वमुपलक्षणमेव, अर्थतयाऽऽपादितम्, न वस्तुतः। उक्तञ्च संक्षेपशारीरके—"कारणत्वमुपलक्षणं चितेः, ब्रह्मणो न खलु तद्विशेषणम्। इत्यपीदमुपपद्यते तदा चेतना भवति कारणं तदा" इति।

अस्मिन् वाद एष प्रस्तुतो विषयः। यद्यपि ब्रह्म वस्तुत उपादानकारणं मायोपहितमनुपहितं वा परिणामि नैव भवति। ब्रह्मणि स्थिता मायाऽपि न जगद्रूपेण परिणमति। मायायां जगद् भासते, यतो माया ब्रह्मणि स्थिता इव प्रतिभाति। एतदाभासो ब्रह्मण एव भास इव दृश्यते। ब्रह्मणि एवंरूपस्य जगद्भासस्य कारणं जीवात्मनो विपर्ययदर्शनं मिथ्यादर्शनं वा। ब्रह्मज्ञानसमये मायाकृतमिथ्यादिदर्शनं क्षीयते, मायाऽपि तत्त्वमस्यादिवाक्यैः तिरस्क्रियते। तथा च ब्रह्मैव शिष्यते, तस्यानुभवश्च भवति। अस्मिन् वादे मायायाः कारणत्वं न प्रतिपाद्यते, नैव च ब्रह्मणः। अत्र जगद् न विवर्तः, नापि परिणामः; किन्त्वाभास एव।

अयञ्च सुरेश्वराचार्याणामाभासवादो यथा जगद् ब्रह्मणो मिथ्याभास इव प्रतिभाति। अत्र वादे अविद्या अल्पीयसी यवनिका इव ब्रह्म-जगतोर्भेदं कल्पयति। यदा ब्रह्मैतद्यवनिकाद्वारा दृश्यते, तदा नानारूपं जगदिव भासते। एषा अविद्यायवनिका नीरूपाऽपि स्वस्यैव रूपं नाम च ब्रह्मणि कल्पयति; किन्त्वाधारभूतं ब्रह्म विना न जगत्, नैव च तद्रूपं नाम च ब्रह्मणि कल्पयितुं प्रभवति। एषाऽविद्या यतोऽस्या अविद्यायाः सत्ताऽपि न भवत्येव। तस्माज्जगतः सृष्टि-लययोर्मध्ये विभागोऽविद्याकृतोऽल्पाल्प एव स्यात्।

श्रीसुरेश्वराचार्या जगत्स्वरूपनिरूपणे कार्यकारणभावमेवं निरूपयन्ति। प्रथमत उद्भूत एष आभासः, तदनन्तरान् आभासान् सृजति। सृष्टिप्रादुर्भावे ब्रह्माविद्यायवनिकाद्वारा दृष्टं सद् आभासरूपं प्राप्नोति। अपि चैतादृशदर्शनेन ब्रह्मणि रूपं नाम च आभासतया कल्पिते इति प्रतिपादना सम्यक् स्यात्। ब्रह्माधारं विना अस्या अविद्यायाः

सत्ता नास्त्येवेति खलु सिद्धान्तः। एवं ब्रह्मणि धृतायामेवाविद्यायां सत्ता कल्पिता इव भासते। अत्रापि कारणम् आधारभूतं ब्रह्मैव। ब्रह्मापि अविद्याकल्पितनामरूपादिकं मिथ्यारूपमपि लभते। एवं सृष्टेः प्रथमावस्थायामविद्यायां किञ्चित् चलनं भवतीव, तच्च ब्रह्मण एवेति भाष्यते। यद्यपि ब्रह्मणो वस्तुनः चलनमेव नास्ति। ईदृशावस्थ आभासः 'ईश्वरः' इति नाम प्राप्नोति। अयं च 'ईश्वरः' सर्वव्यापी सर्वज्ञश्च। अत्राविद्यारूपा यवनिका तथा अल्पा, यथा इच्छामात्रेणैव नष्टा भवतीव।

एवंरूपोऽविद्याकृताभासो जगतस्तदनन्तरसृष्टिप्रक्रियायामप्यनुवर्तते; किन्त्वेतेऽनन्तरा आभासास्तत्पूर्वपूर्वाभासेभ्य एव प्राणन्ति। एष प्राथमिक आभास ईश्वराख्यः, अनेकेषामनन्तराभासानां मिथ्यारूपाणां निरन्तरं कारणं भवति। अस्मिन्ननन्तराभासभानेऽप्यविद्या कार्यकारणात्मकं स्वस्य कर्म करोत्येव। प्रथमाभासरूपं ब्रह्म अनन्तरकार्यकारणेषु प्रसरत्येव। एवंविधानि कार्यकारणरूपाणि तया अविद्यायवनिकया प्रसृताभासरूपेण प्रभवन्ति। तथा च द्वितीयाभासस्तदनन्तराभासः प्रथमाभासेश्वरस्य अविद्यायवनिकाद्वारा दृश्यमाना मिथ्याभूता आभासा एव। एवमीश्वरः सृष्टिकर्ता इत्युच्यते। यतः प्रथमाभासे अविद्यासत्ता अल्पाल्पा, ईश्वरस्य वशे माया तिष्ठतीत्युक्तं भवति। एषा अविद्या, यस्या द्वितीयाद्याभासा दृश्यन्ते, सैव माया इति पदं लभते। प्राथमिको मोहः ईश्वररूपाभासकर्त्री अविद्या, तदनन्तरो मोहः, तस्यैवेश्वरस्याभासकर्त्री माया। एतन्मायायाः सत्ता ईश्वरादेव भवति।

प्रथमाभासस्य मायाद्वारा तदनन्तररूप आभासो हिरण्यगर्भः, यो जगद्रूपः परमात्मा। अस्य परमात्मनो बुद्धिनामात्मकं रूपाभासं प्राप्तवत्यामविद्यायाम् आभासो जीव इति कथ्यते। अस्मिन्नेव परमात्मनि तरतमात्मकतया घनीभूताया अविद्याया अज्ञानमिति संज्ञां प्राप्ताया ये अनन्तरा 'अन्यतराः', 'अन्यतमाश्च' आभासा ज्ञानेन्द्रियकर्मेन्द्रियभूतपञ्चकादिरूपा जगति परिदृश्यमाना अनेके विषया विषयिणश्च।

एवञ्चाधोगमनानामाभासानाम् अन्तिमोऽस्मिञ्जगति मिथ्याभासरूपो मरुजलादिक आभासः। अनेकरूपं जगत्, यो चिदाभासस्यैव अविद्याज्ञानादिद्वारा कृत आभासः, भ्रमनामरूपतां प्राप्तायामविद्यायामेव प्राप्त आभासो भवति अत्र मिथ्याज्ञाने। एवञ्च सुरेश्वरमतमनुसृत्य मिथ्याज्ञानमपि आभासान्तरमेव; किन्त्वधमस्थानं प्राप्तोऽयमाभासः सृष्टिक्रमे। अत्रापि सूक्ष्मात् सूक्ष्मतरतया भासमानं ब्रह्म, आधारभूतं सत्तामापादयति, या सत्ता मिथ्याज्ञानानुभवसमये द्योतते, यां विना तादृशोऽनुभवोऽपि नैव जायते। तस्माद् मिथ्याज्ञानकृत आभासश्चिदात्मनोऽन्तिमम् अधःपतनम्।

अत्राविद्या भ्रमात्मिका सती अन्तिमां यवनिकां धत्ते। एवञ्च जगत्सृष्टौ ईश्वररूपश्चिदाभासः प्रथमः, भ्रमात्मकं मिथ्याज्ञानन्तु अन्तिमम्। अविद्या चैतयोरनुसन्धायको वक्रः पन्थाः।

एवञ्च सर्वमपि जगत् सुरेश्वरमतानुसारेण चिदात्मन आभासपरम्परा, तेषामाभासानां पारस्परिकसम्मेलनरूपकार्यकारणभावश्च। ईश्वरोऽविद्याद्वारा चिदात्मक आभासः। जीवो बुद्धिद्वारा ईश्वरस्यैवाभासः। मध्ये च विराड् मायाद्वारा ईश्वरस्यैव आभासः। एवञ्चान्ये जगद्विषया विषयिणश्च। तथा च जगति यावत्परमाणु सर्वोऽपि कार्यकारणभेदश्चिदात्मन आभास एव सृष्टिपरिणामे यत्किञ्चित्स्थानं लभते।

अथास्मिन् संसर्गेऽविद्यायाः स्थितिः का? किम् एषाऽपि चितोऽथवा परमात्मन आभासः? केचिद् अविद्यामपि आभास इति मन्यन्ते; किन्तु विषयेऽस्मिन् सुरेश्वरः स्वनिश्चितं मतं न प्रकटीकरोत्येव। अत्र सः स्वगुरुमेवानुसरतीव भाति। अविद्यायाः स्वरूपं न कदापि केनचित् प्रकारेणापि निश्चेतुं प्रभवति। ब्रह्मणः स्वरूपरूपा सत्ता अविद्यायामपि वर्तते इति वक्तुं न प्रभवामः, यतोऽविद्या अविनाशिनी स्यात्। नाप्यस्याः सत्तान्तरं प्रतिपत्तुं शक्यते, यतो द्वैतमभ्युपगम्यं भवति, तदनिष्टम्। उक्तञ्च बृहदारण्यकभाष्यवार्तिके सुरेश्वरेण—"अविद्या वाऽथ तत्कार्यं नाभेदान्नातिरेकतः। सिद्धायते यतोऽतः स्यादविचारितसिद्धिकम्" इति। तस्माद् अविद्या अनिर्वचनीया इति सुरेश्वरेण नोक्तम्। प्रायशः स मनुते अविद्याया अनिर्वचनीयत्वं नाम तस्या मिथ्यात्वमेव, न भावरूपत्वम्। अस्याः स्वरूपं परब्रह्मणः सत्ताया भिन्नं न भवति, नापि तदेव। तस्मात् तस्याः सत्ता विचाररहित्येनानुभूयते। "अविचारितसिद्धा" अविद्या इति सुरेश्वरोऽविद्यां प्रति नूतनं विशेषणं प्रस्तौति।

कोऽयमविचारितसिद्धो नाम? सुरेश्वर एतद्विषये प्रत्यङ्मोहृदय यथावकाशमेतद्विशेषणं सर्वेऽपि सर्वत्रापि ग्रन्थे उपयुङ्क्ते। प्रत्यगात्मनोऽज्ञानस्य च सम्बन्धः सुरेश्वरेण बृहदारण्यकभाष्यवार्त्तिके "अविचारितसंसिद्धं सर्वानर्थैक्यकारणम्। प्रत्यङ्मोहैकसाक्षित्वात् तमस्तत् प्रत्यगात्मनि" इति। प्रत्यगात्मनः पूर्णं निजं वा रूपं यन्न गृह्यते, तत्र कारणम् अज्ञानम्। एतदज्ञानस्य द्वे कर्मणी—एकं प्रत्यगात्मानं प्रति प्रवर्त्तते, तद्रूपं प्रत्यगात्मना तस्य सम्बन्धे विवेक्तुं न शक्यते। एवं तत् अतर्क्यम्। पूर्वोक्तं वार्त्तिकमवतारयति आनन्दगिरिः—"तत्तमेव अनिर्वाच्यप्रत्यगात्मनि इति सम्बन्धः। तदनिर्वाच्यसिद्ध्यर्थम् आद्यं विशेषणम्" इति; किन्तु सुरेश्वरेण अनिर्वाच्यशब्दो न कुत्रापि वार्त्तिकेषु नैष्कर्म्यसिद्धौ वा अज्ञानविशेषणतया प्रयुक्तः। एष एव विशेषः।

तैत्तिरीयभाष्यवार्त्तिकेऽपि एतमेव प्रकारम् आधुनिका आर० बालसुब्रह्मण्या अपि स्पष्टयन्ति।

अस्मिन् अविचारितपदे अंशत्रयमस्ति—'विचारितः', 'नञ्प्रत्ययः', 'सिद्धः' इति। सिद्धपदार्थो यत्किञ्चिद् वस्तु यद् अनुभवैक्यवेद्यमिति। अस्तित्त्वं यस्यास्ति, तदेवानुभवगोचरं भवति। अविद्यायाम् अस्तित्त्वं सम्पद्यते खलु आधारभूतब्रह्मणः। तस्माद् एतस्या अनुभवोऽविचाररमणीयरूप एव। यदा सम्यग् विचारो भवति, स च श्रुत्यनुमिततर्करूपा तया अविद्या नास्ति खलु। ततोऽस्मिन् अविचारितसिद्धपदे अविद्यायाः स्वरूपं समग्रं दर्शयति सुरेश्वरः। यच्च स्वगुरुभिः शङ्करभगवत्पादैः प्रतिपादितं स्वसच्छात्रैश्चानुमोदितमविद्याया भ्रान्तिजननत्वम्। सुरेश्वरो नानुमोदते यतोऽस्या अविद्यायाः सत्तात्वम्, अनुभववेद्यत्वञ्च तिरस्कर्त्तुं न प्रभवति। सा च सत्ता ब्रह्मणः सत्तासामान्यप्राया एव। अविद्या ब्रह्म च सिद्धे सती अनुभूयेते; किन्तु ब्रह्मणः सत्ता न कदापि तिरस्कर्तुं शक्यते। अविद्याविषये तु जडता सत्ता च विचारासमर्थे। यदा सम्यग् विचारो भवति, तदा तिरस्क्रियेते इति सुरेश्वरस्यानुगमः। उक्तञ्च तेन बृहदारण्यकभाष्यवार्त्तिके—"अविचारितसंसिद्धिरात्माविद्यैकरूपतः। सिद्धायतेऽखिलोऽनात्मा स्वतः सिद्धात्मसंश्रयात्" इति। आनन्दगिरिश्चैतद्वार्त्तिकमवतारयन् वक्ति—"भावाभावरूप अनात्मा अनुभवसिद्धश्चेत्, तद्वत् तस्य सत्यता इत्याशङ्क्याह" इति।

अत्र सुरेश्वरोऽविद्यायाः सत्यतामेव निराकरोति, न सत्ताम्, यतः सत्तां विना अनुभवो न सिद्ध्यति। भ्रमप्रमादा अपि अनुभवा एव; किन्तु सत्तैषा आधारभूतचैतन्याद् अविद्यां तत्कालं संक्रमति। एषाऽविद्यातत्त्वनिरूपणे सुरेश्वरस्य भावनेति शम्।

——





श्रीशङ्कराचार्यद्वादशजन्मशताब्दीविशेषाङ्कः

